Poona Oriental Series No. 8.

श्रीशंकराचार्यविरचित – प्रकरणग्रन्थाः ।

MINOR WORKS OF ŚRI ŚAṄKARĀCĀRYA

Edited by

H. R. BHAGAVAT.

१ अपरोक्षानुभूतिः
२ आत्मबोधः
३ तत्त्वोपदेशः
४ प्रौढानुभूतिः
५. ब्रह्मज्ञानावलीमाला
६ लघुवाक्यवृत्तिः
७ वाक्यवृत्तिः
८ सदाचारानुसंधानम्
९ स्वात्मनिरूपणम्
१० अद्वैतानुभूतिः
११ दशश्लोकी
१२ प्रबोधसुधाकरः
१३ प्रश्नोत्तररत्नमालिका
१४ ब्रह्मानुचिंतनम्
१५ मोहमुद्गरः
१६ योगतारावली
१७ शतश्लोकी
१८ स्वात्मप्रकाशिका
१९ सर्ववेदान्तसिद्धान्तसार-संग्रहः
२० विवेकचूडामणिः
२१ उपदेशसाहस्री
२२–३९ वेदान्तस्तोत्राणि
४०–६३ भक्तिस्तोत्राणि
६४ अनात्मश्रीविगर्हणप्रकरणम्
६५ आत्मानात्मविचारः
६६ जीवन्मुक्तानंदलहरी
६७ वाक्यसुधा
६८ अध्यात्मपटलविवरणम्
६९ सनत्सुजातीयभाष्यम्
७० विष्णुसहस्रनामभाष्यम्

Oriental Book Agency

15, Shukrawar, POONA 2 (India).

2nd Ed. 1952]

[Price Rs. 12-8

Printer:- M. S. Sathe, Prajna Press, 815 Gangapuri, Wai.
Publisher:- Dr. R. N. Sardesai, L. C. P. S., D. Ph. Th. (Leipzig,)
Proprietor, Oriental Book Agency, 15 Shukrawar, Poona 2.

PREFACE.

This volume comprises the Minor Works of Shri Shankaracharya. Many of these minor works are from the pen of the great teacher, but no one can say definitely that all are. The excellent edition published by the Vanivilas Press of Shri-rangam contains a few works more *e. g.* नृसिंहतापनीभाष्य, प्रपंचसार, ललितात्रिशती &c. These I have omitted thinking them to be not genuine. That edition contains numerous devotional Stotras also and many of these I thought it proper to omit, because, in my humble opinion, the language used and the purport conveyed do not show them to be Shri Shankara's * composition. This does not mean that the devotional stotras included by me in this volume are certainly all composed by Shri Shankara. I am unable to say any thing definite about the devotional stotras. As regards the Vedanta Stotras, I for one, have no doubt and consider all of them to be Shri Shankara's sublime utterances.

With regard to other works, I think प्रबोधसुधाकर, सनत्सुजातीयभाष्य and विष्णुसहस्रनामभाष्य form matter for con-

* The date of Shri Shankara *i. e.* Shankaracharya the author of the three Bhashyas and the establisher of the four Shankaracharya—Mathas, is, according to the late Lokamanya B. G. Tilak, 690—722 A. D.

troversy. Some may add सर्ववेदान्तसिद्धांतसारसंग्रह उपदेशसाहस्री too to this list, but not I. Here I sl like to mention a tradition about विष्णुसहस्रना The tradition is current in South India that was the first work written by Shri Shankara. V he wanted to begin writing his works he coul decide as to which he should take up first. the first day he wrote a page or so of a ce work and on the next morning awoke to find at night, The Unknown hand had effaced all writing. So he began a second work only to on the succeeding morning the same case wit Then he began a third and so on till the turn of विष्णुसहस्रनामभाष्य. This he found untouched on next morning, and so, completed this work of all.

The Vedanta Stotras of Shri Shankara i a special class of Vedanta literature and any desirous of learning the tenets of Advaita Ved can do no better than read and ponder over tl These stotras have gained an unparalleled p larity. Verily, he who is accustomed to the mu ing of these stotras every day enjoys moment least of extacy. That the popularity is wid borne out by the fact that some stotras are kn under more than one name, *e. g.* चर्पटपंजरिका and द्व पंजरिका form मोहमुद्गर. Other instances are—

अद्वैतपंचक = आत्मपंचक.

उपदेशपंचक = साधनपंचक.

विज्ञाननौका = स्वरूपानुसंधान.

दशश्लोकी = निर्वाणदशक = सिद्धांतबिंदु.

आत्मषट्क = निर्वाणषट्क = चिदानन्दषट्क.

ब्रह्मानुचिंतन = आत्मचिंतन.

जीवन्मुक्तानंदलहरी = अनुभवानंदलहरी.

Here I must mention that some प्रकरणs i. e. small works are printed in some books as stotras.

I have little more to say. The desire to edit and publish the works of Shri Shankara in handy volumes entered my mind in 1911, I actually began in 1915 and in 1925 I am finishing the sacred task. Very few people have a knowledge of the mundane difficulties that troubled me during this period. That I have been able to finish this task is due to the workings of the Maya of the Almighty, or I may say, is due to the blessings of the world-teacher Shri Shankaracharya.

I conclude with expressing my gratefulness to all persons, who were, during this period, connected with me through this work either thickly or thinly, who encouraged me, sympathised with me and patiently awaited the completion.

Poona city. }
24th November 1925. } H. R. BHAGAVAT.

अनुक्रमणिका ।

	विषयः ।	पृष्ठानि ।
१	अपरोक्षानुभूतिः	१—१२
२	आत्मबोधः	१३—१८
३	तत्त्वोपदेशः	१९—२६
४	प्रौढानुभूतिः	२७—२९
५	ब्रह्मज्ञानावलीमाला	३०—३१
६	लघुवाक्यवृत्तिः	३२—३३
७	वाक्यवृत्तिः	३४—३८
८	सदाचारानुसंधानम्	३९—४३
९	स्वात्मनिरूपणम्	४४—५६
१०	अद्वैतानुभूतिः	५७—६३
११	दशश्लोकी	६४—६५
१२	प्रबोधसुधाकरः	६६—८८
१३	प्रश्नोत्तररत्नमालिका	८९—९४
१४	ब्रह्मानुचिंतनम्	९५—९७
१५	मोहमुद्गरः	९८—१००
१६	योगतारावली	१०१—१०५
१७	शतश्लोकी	१०६—१२२
१८	स्वात्मप्रकाशिका	१२३—१२९
१९	सर्ववेदान्तसिद्धांतसारसंग्रहः	१३०—२१:
२०	विवेकचूडामणिः	२१९—२७

विषयः ।	पृष्ठानि ।
२१ उपदेशसाहस्री ।	२७३—३५०
२२–३९ वेदान्तस्तोत्राणि ।	३५१—३७३
प्रातःस्मरणम् । अद्वैतपंचकम् । आत्मषट्कम् । उपदेशपंचकम् । काशीपंचकम् । कौपीनपंचकम् । चर्पटपंजरिका । दक्षिणामूर्तिस्तोत्रम् । द्वादशपंजरिका । धन्याष्टकम् । निर्गुणमानसपूजा । निर्वाणमंजरी । परा पूजा । मनीषापंचकम् । विज्ञाननौका । षट्पदीस्तोत्रम् । हरिमीडेस्तोत्रम् ।	
४०–६३ भक्तिस्तोत्राणि	३७४—४०२
६४ अनात्मश्रीविगर्हणप्रकरणम्	४०३—४०४
६५ आत्मानात्मविचारः	४०५—४१४
६६ जीवन्मुक्तानंदलहरी	४१५—४१७
६७ वाक्यसुधा	४१८—४२१
६८ अध्यात्मपटलविवरणम्	४२२—४३५
६९ सनत्सुजातीयभाष्यम्	४३६—५०४
७० विष्णुसहस्रनामभाष्यम्	५०५—५८४

श्रीशंकराचार्यविरचितप्रकरणग्रंथसंग्रहः ।

॥ अपरोक्षानुभूतिः ॥

श्रीहरिं परमानंदमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥
अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेषा प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥
स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥
ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ४ ॥
नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् ।
एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ॥ ५ ॥
सदैव वासनात्यागः शमोऽयमिति शब्दितः ।
निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ६ ॥
विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।
सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥ ७ ॥
निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता ।
चित्तैकाग्र्यं तु सल्लक्ष्ये [illegible] स्मृतम् ॥ ८ ॥
संसारबंधनिर्मुक्तिः कथं मे स्यात्कदा विभो ।

इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥
उक्तसाधनयुक्तेन विचारः पुरुषेण हि ।
कर्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ १० ॥
नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः ।
यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ॥ ११ ॥
कोऽहं कथमिदं जातं को वा कर्ताऽस्य विद्यते ।
उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥ १२ ॥
नाहं भूतगणो देहो नाहं चाक्षगणस्तथा ।
एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः ॥ १३ ॥
अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते ।
संकल्पो विविधः कर्ता विचारः सोऽयमीदृशः ॥ १४ ॥
एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम् ।
यथैव मृद्घटादीनां विचारः सोऽयमीदृशः ॥ १५ ॥
अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः ।
तदहं नात्र संदेहो विचारः सोऽयमीदृशः ॥ १६ ॥
आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १७ ॥
आत्मा नियामकश्चान्तर्देहो बाह्योऽनियामकः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १८ ॥
आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १९ ॥
आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते ।
तयोरैक्यं प्रपश्यन्ति परम् ॥ २० ॥
आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २१ ॥

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् ।
नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि ॥ २२ ॥
देहोऽहमित्ययं मूढो मत्वा तिष्ठत्यहो जनः ।
ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥
ब्रह्मैवाहं समः शान्तः सच्चिदानंदलक्षणः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥
निर्विकारो निराकारो निरवद्योऽहमव्ययः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥
निरामयो निराभासो निर्विकल्पोऽहमाततः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २६ ॥
निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २७ ॥
निर्मलो निश्चलोऽनंतः शुद्धोऽहमजरोऽमरः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २८ ॥
स्वदेहे शोभनं सन्तं पुरुषाख्यं च संमतम् ।
किं मूर्ख शून्यमात्मानं देहातीतं करोषि भो ॥ २९ ॥
स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पूरुषम् ।
देहातीतं सदाकारं सदुर्दर्शं भवादृशैः ॥ ३० ॥
अहंशब्देन विख्यात एक एव स्थितः परः ।
स्थूलत्वान्नैकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥
अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः ।
ममायमिति निर्देशात्कथं स्याद्देहकः पुमान् ॥ ३२ ॥
अहं विकारहीनस्तु देहो नित्यं [illegible] ।
इति प्रतीयते साक्षात्कथं स्याद्देहकः पुमान् ॥ ३३ ॥
यस्मात्परमिति श्रुत्या तया

विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ॥ ३४ ॥
सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते ।
अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ॥ ३५ ॥
असंगः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च ।
अनंतमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥ ३६ ॥
तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः ।
जडः परप्रकाश्योऽयं कथं स्याद्देहकः पुमान् ॥ ३७ ॥
प्रोक्तोऽपि कर्मकांडेन ह्यात्मा देहाद्विलक्षणः ।
नित्यश्च तत्फलं भुंक्ते देहपातादनंतरम् ॥ ३८ ॥
लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च ।
अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयम् ॥ ३९ ॥
एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः ।
सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥
इत्यात्मदेहभावेन प्रपंचस्यैव सत्यता ।
यथोक्ता तर्कशास्त्रेण ततः किं पुरुषार्थता ॥ ४१ ॥
इत्यात्मदेहभेदेन देहात्मत्वं निवारितम् ।
इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥
चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् ।
जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥
रज्ज्वज्ञानात्क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ ४४ ॥
उपादानं प्रपंचस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात्सर्वप्रपंचोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ४५ ॥
व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥

श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि ।
कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥
दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ।
इह पश्यति नानात्वं मायया वंचितो नरः ॥ ४८ ॥
ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः ।
तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत् ॥ ४९ ॥
ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।
कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥ ५० ॥
सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ५१ ॥
स्वल्पमप्यंतरं कृत्वा जीवात्मपरमात्मनोः ।
योऽवतिष्ठति मूढात्मा भयं तस्याभिभाषितम् ॥ ५२ ॥
यत्राज्ञानाद्भवेद्द्वैतमितरस्तत्र पश्यति ।
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥
यस्मिन्सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ।
न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥ ५४ ॥
अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ।
इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥ ५५ ॥
अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥
स्वप्नो जागरणेऽलीकः स्वप्नेऽपि न हि जागरः ।
द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥
त्रयमेवं भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥
यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम् ।

तद्वद्ब्रह्मणि जीवत्वं भ्रांत्या पश्यति न स्वतः ॥ ५९ ॥
यथा मृदि घटो नाम कनके कुंडलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥ ६० ॥
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१ ॥
यथैव शून्ये वेतालो गंधर्वाणां पुरं यथा ।
यथाऽऽकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ ६२ ॥
यथा तरंगकल्लोलैर्जलमेव स्फुरत्यलम् ।
पात्ररूपेण ताम्रं हि ब्रह्मांडौघैस्तथाऽऽत्मता ॥ ६३ ॥
घटनाम्ना यथा पृथ्वी पटनाम्ना हि तंतवः ।
जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥
सर्वोऽपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः ।
अज्ञानान्न विजानन्ति मृदेव हि घटादिकम् ॥ ६५ ॥
कार्यकारणता नित्यमास्ते घटमृदोर्यथा ।
तथैव श्रुतियुक्तिभ्यां प्रपंचब्रह्मणोरिह ॥ ६६ ॥
गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् ।
वीक्ष्यमाणे प्रपंचेऽपि ब्रह्मैवाभाति भासुरम् ॥ ६७ ॥
सदैवात्मा विशुद्धोऽपि ह्यशुद्धो भाति वै सदा ।
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ॥ ६८ ॥
यथैव मृन्मयः कुंभस्तद्वद्देहोऽपि चिन्मयः ।
आत्मानात्मविभागोऽयं मुधैव क्रियते बुधैः ॥ ६९ ॥
सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७० ॥
घटत्वेन यथा पृथ्वी पटत्वेनेव तंतवः ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७१ ॥

कनकं कुंडलत्वेन तरंगत्वेन वै जलम् ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७२ ॥
चोरत्वेन यथा स्थाणुर्जलत्वेन मरीचिका ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७३ ॥
गृहत्वेनेव काष्ठानि खड्गत्वेनेव लोहता ।
विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७४ ॥
यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७५ ॥
पोतेन गच्छतः पुंसः सर्वं भातीव चंचलम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥
पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥
चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७८ ॥
अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७९ ॥
महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८० ॥
सूक्ष्मत्वे सर्ववस्तूनां स्थूलत्वं चोपनेत्रतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८१ ॥
काचभूमौ जलत्वं वा जलभूमौ हि काचता ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८२ ॥
यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८३ ॥
अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८४ ॥
यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८५ ॥
यथा शशी जले भाति चंचलत्वेन कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८६ ॥
एवमात्मन्यविद्यातो देहाध्यासो हि जायते ।
स एवात्मा परिज्ञातो लीयते च परात्मनि ॥ ८७ ॥
सर्वमात्मतया ज्ञातं जगत्स्थावरजंगमम् ।
अभावात्सर्वभावानां देहानां चात्मता कुतः ॥ ८८ ॥
आत्मानं सततं जानन् कालं नय महामते ।
प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि ॥ ८९ ॥
उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुंचति ।
इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ॥ ९० ॥
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्यत्वाद्यथा स्वप्नो विबोधतः ॥ ९१ ॥
कर्म जन्मान्तरकृतं प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥
स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः ॥ ९३ ॥
उपादानं प्रपंचस्य कथ्यते ।
अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥
यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ ९५ ॥
रज्जुरूपे परिज्ञाते सर्पभ्रांतिर्न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपंचः शून्यतां व्रजेत् ॥ ९६ ॥

देहस्यापि प्रपंचत्वात्प्रारब्धावस्थितिः कुतः ।
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥ ९७ ॥
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ॥ ९८ ॥
उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः ।
वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ॥ ९९ ॥
त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये ।
तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥ १०० ॥
नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः ।
तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥ १०१ ॥
यमो हि नियमस्त्यागो मौनं देशश्च कालतः ।
आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः ॥ १०२ ॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि वै क्रमात् ॥ १०३ ॥
सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः ।
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १०४ ॥
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानंदो नियमात्क्रियते बुधैः ॥ १०५ ॥
त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ १०६ ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भजेत्सर्वदा बुधः ॥ १०७ ॥
वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ।
प्रपंचो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ १०८ ॥
इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् ।

गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १०९ ॥
आदावंते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ११० ॥
कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टो ह्यखंडानंद अद्वयः ॥ १११ ॥
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनम् ।
आसनं तद्विजानीयान्नेतरत्सुखनाशनम् ॥ ११२ ॥
सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययम् ।
यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ ११३ ॥
यन्मूलं सर्वभूतानां यन्मूलं चित्तबंधनम् ।
मूलबंधः सदा सेव्यो योगोऽसौ राजयोगिनाम् ॥ ११४ ॥
अंगानां समतां विद्यात्समे ब्रह्मणि लीयते ।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ ११५ ॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ ११६ ॥
द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत् ।
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी ॥ ११७ ॥
चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।
विरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ११८ ॥
निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥ ११९ ॥
ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः ।
अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥ १२० ॥
विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो ॥ १२१ ॥

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
मनसो धारणं चैव धारणा सा परा मता ॥ १२२ ॥
ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया स्थितिः ।
ध्यानशब्देन विख्याता परमानंददायिनी ॥ १२३ ॥
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ १२४ ॥
एवं चाकृतिमानंदं तावत्साधु समभ्यसेत् ।
वश्यो यावत्क्षणात्पुंसः प्रयुक्तः संभवेत्स्वयम् ॥ १२५ ॥
ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ।
तत्स्वरूपं न चैकस्य विषयो मनसो गिराम् ॥ १२६ ॥
समाधौ क्रियमाणे तु विघ्ना आयान्ति वै बलात् ।
अनुसंधानराहित्यमालस्यं भोगलालसम् ॥ १२७ ॥
लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता ।
एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः ॥ १२८ ॥
भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ।
पूर्णवृत्त्या हि पूर्णत्वं तथा पूर्णत्वमभ्यसेत् ॥ १२९ ॥
ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ।
वृथैव ते तु जीवन्ति पशुभिश्च समा नराः ॥ १३० ॥
ये हि वृत्तिं विजानन्ति ये ज्ञात्वा वर्धयन्त्यपि ।
ये वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये ॥ १३१ ॥
येषां वृत्तिः समावृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥ १३२ ॥
कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः ।
ते ह्यज्ञानितमा नूनं पुनरायान्ति यान्ति च ॥ १३३ ॥
निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।

यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ १३४ ॥
कार्ये कारणताऽऽयाता कारणे न हि कार्यता ।
कारणत्वं ततो गच्छेत्कार्याभावे विचारतः ॥ १३५ ॥
अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः ॥ १३६ ॥
अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥ १३७ ॥
कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।
अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति ॥ १३८ ॥
कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् ।
कारणत्वं ततो नश्येदवशिष्टं भवेन्मुनिः ॥ १३९ ॥
भावितं तीव्रवेगेन वस्तु यन्निश्चयात्मना ।
पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥ १४० ॥
अदृश्यं भावरूपं च सर्वमेतच्चिदात्मकम् ।
सावधानतया नित्यं स्वात्मानं भावयेद्बुधः ॥ १४१ ॥
दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत् ।
विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥ १४२ ॥
एभिरंगैः समायुक्तो राजयोग उदाहृतः ।
किंचित्पक्वकषायाणां हठयोगेन संयुतः ॥ १४३ ॥
परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥ १४४ ॥

इति अपरोक्षानुभूतिः समाप्ता ॥

॥ आत्मबोधः ॥

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥ १ ॥
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥ २ ॥
अविरोधितया कर्म नाविद्यां विनिवर्तयेत् ।
विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत् ॥ ३ ॥
अविच्छिन्न इवाज्ञानात्तन्नाशे सति केवलः ।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव ॥ ४ ॥
अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्मलम् ।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत् ॥ ५ ॥
संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः ।
स्वकाले सत्यवद्भाति प्रबोधे सत्यसद्भवेत् ॥ ६ ॥
तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा ।
यावन्न ज्ञायते ब्रह्म सर्वाधिष्ठानमद्वयम् ॥ ७ ॥
उपादानेऽखिलाधारे जगन्ति परमेश्वरे ।
सर्गस्थितिलयान्यान्ति बुद्बुदानीव वारिणि ॥ ८ ॥
सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः ।
व्यक्तयो विविधाः सर्वा हाटके कटकादिवत् ॥ ९ ॥
यथाऽकाशो हृषीकेशो नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशे केवलो भवेत् ॥ १० ॥
नानोपाधिवशादेव ।
आत्मन्यारोपितास्तोये रसवर्णादिभेदवत् ॥ ११ ॥

पंचीकृतमहाभूतसंभवं कर्मसंचितम् ।
शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ १२ ॥
पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितम् ।
अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥ १३ ॥
अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥ १४ ॥
पंचकोशादियोगेन तत्तन्मय इव स्थितः ।
शुद्धात्मा नीलवस्त्रादियोगेन स्फटिको यथा ॥ १५ ॥
वपुस्तुषादिभिः कोशैर्युक्तं युक्त्यवघाततः ।
आत्मानमान्तरं शुद्धं विविंच्यात्तंडुलं यथा ॥ १६ ॥
सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते ।
बुद्धावेवावभासेत स्वच्छेषु प्रतिबिंबवत् ॥ १७ ॥
देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम् ।
तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा ॥ १८ ॥
व्यापृतेष्विंद्रियेष्वात्मा व्यापारीवाविवेकिनाम् ।
दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ १९ ॥
आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः ।
स्वक्रियार्थेषु वर्तन्ते सूर्यालोकं यथा जनाः ॥ २० ॥
देहेंद्रियगुणान्कर्माण्यमले सच्चिदात्मनि ।
अध्यस्यन्त्यविवेकेन गगने नीलतादिवत् ॥ २१ ॥
अज्ञानान्मानसोपाधेः कर्तृत्वादीनि चात्मनि ।
कल्प्यन्तेऽम्बुगते चंद्रे चलनादि यथांभसः ॥ २२ ॥
रागेच्छासुखदुःखादि बुद्धौ सत्यां प्रवर्तते ।
सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेस्तु नात्मनः ॥ २३ ॥
प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता ।

स्वभावः सच्चिदानंदनित्यनिर्मलतात्मनः ॥ २४ ॥
आत्मनः सच्चिदंशश्च बुद्धेर्वृत्तिरिति द्वयम् ।
संयोज्य चाविवेकेन जानामीति प्रवर्तते ॥ २५ ॥
आत्मनो विक्रिया नास्ति बुद्धेर्बोधो न जात्वपि ।
जीवः सर्वमलं ज्ञात्वा कर्ता द्रष्टेति मुह्यति ॥ २६ ॥
रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत् ।
नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत् ॥ २७ ॥
आत्मावभासयत्येको बुद्ध्यादीनींद्रियाणि हि ।
दीपो घटादिवत्स्वात्मा जडैस्तैर्नावभास्यते ॥ २८ ॥
स्वबोधे नान्यबोधेच्छा बोधरूपतयात्मनः ।
न दीपस्यान्यदीपेच्छा यथा स्वात्मप्रकाशने ॥ २९ ॥
निषिध्य निखिलोपाधीन्नेति नेतीति वाक्यतः ।
विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनोः ॥ ३० ॥
आविद्यकं शरीरादि दृश्यं बुद्बुदवत्क्षरम् ।
एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलम् ॥ ३१ ॥
देहान्यत्वान्न मे जन्मजराकार्श्यलयादयः ।
शब्दादिविषयैः संगो निरिंद्रियतया न च ॥ ३२ ॥
अमनस्त्वान्न मे दुःखरागद्वेषभयादयः ।
अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिशासनात् ॥ ३३ ॥
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरंजनः ।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥ ३४ ॥
अहमाकाशवत्सर्वं बहिरंतर्गतोऽच्युतः ।
सदा सर्वसमः सिद्धो निःसंगो निर्मलोऽचलः ॥ ३५ ॥
नित्यशुद्धविमुक्तैकमखंडानंदमद्वयम् ।
सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत् ॥ ३६ ॥

एवं निरंतरकृता ब्रह्मैवास्मीति वासना ।
हरत्यविद्याविक्षेपान्रोगानिव रसायनम् ॥ ३७ ॥
विविक्तदेश आसीनो विरागो विजितेंद्रियः ।
भावयेदेकमात्मानं तमनंतमनन्यधीः ॥ ३८ ॥
आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः ।
भावयेदेकमात्मानं निर्मलाकाशवत्सदा ॥ ३९ ॥
रूपवर्णादिकं सर्वं विहाय परमार्थवित् ।
परिपूर्णचिदानंदस्वरूपेणावतिष्ठते ॥ ४० ॥
ज्ञातृज्ञानज्ञेयभेदः परात्मनि न विद्यते ।
चिदानंदैकरूपत्वाद्दीप्यते स्वयमेव सः ॥ ४१ ॥
एवमात्मारणौ ध्यानमथने सततं कृते ।
उदितावगतिज्वाला सर्वज्ञानेंधनं दहेत् ॥ ४२ ॥
अरुणेनेव बोधेन पूर्वं संतमसे हृते ।
तत आविर्भवेदात्मा स्वयमेवांशुमानिव ॥ ४३ ॥
आत्मा तु सततं प्राप्तोऽप्यप्राप्तवदविद्यया ।
तन्नाशे प्राप्तवद्भाति स्वकंठाभरणं यथा ॥ ४४ ॥
स्थाणौ पुरुषवद्भ्रांत्या कृता ब्रह्मणि जीवता ।
जीवस्य तात्त्विके रूपे तस्मिन्दृष्टे निवर्तते ॥ ४५ ॥
तत्त्वस्वरूपानुभवादुत्पन्नं ज्ञानमंजसा ।
अहं ममेति चाज्ञानं बाधते दिग्भ्रमादिवत् ॥ ४६ ॥
सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितम् ।
एकं च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ॥ ४७ ॥
आत्मैवेदं जगत्सर्वमात्मनोऽन्यन्न किंचन ।
मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्षते ॥ ४८ ॥
जीवन्मुक्तस्तु तद्विद्वान्पूर्वोपाधिगुणांस्त्यजेत् ।

स सच्चिदादिधर्मत्वं भेजे भ्रमरकीटवत् ॥ ४९ ॥
तीर्त्वा मोहार्णवं हत्वा रागद्वेषादिराक्षसान् ।
योगी शांतिसमायुक्त आत्मा रामो विराजते ॥ ५० ॥
बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः ।
घटस्थदीपवच्छश्वदंतरेव प्रकाशते ॥ ५१ ॥
उपाधिस्थोऽपि तद्धर्मैरलिप्तो व्योमवन्मुनिः ।
सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ॥ ५२ ॥
उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः ।
जले जलं वियद्व्योम्नि तेजस्तेजसि वा यथा ॥ ५३ ॥
यल्लाभान्नापरो लाभो यत्सुखान्नापरं सुखम् ।
यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत् ॥ ५४ ॥
यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः ।
यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मेत्यवधारयेत् ॥ ५५ ॥
तिर्यगूर्ध्वमधः पूर्णं सच्चिदानंदमद्वयम् ।
अनंतं नित्यमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५६ ॥
अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यतेऽव्ययम् ।
अखंडानंदमेकं यत्तद्ब्रह्मेत्यवधारयेत् ॥ ५७ ॥
अखंडानंदरूपस्य तस्यानंदलवाश्रिताः ।
ब्रह्माद्यास्तारतम्येन भवंत्यानंदिनोऽखिलाः ॥ ५८ ॥
तद्युक्तमखिलं वस्तु व्यवहारश्चिदन्वितः ।
तस्मात्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ॥ ५९ ॥
अनण्वस्थूलमह्रस्वमदीर्घमजमव्ययम् ।
अरूपगुणवर्णाख्यं तद्ब्रह्मेत्यवधारयेत् ॥ ६० ॥
यद्भासा भासतेऽर्कादि भास्यैर्यत्तु न भास्यते ।
येन सर्वमिदं भाति तद्ब्रह्मेत्यवधारयेत् ॥ ६१ ॥

स्वयमंतर्बहिर्व्याप्य भासयन्नखिलं जगत् ।
ब्रह्म प्रकाशते वह्निप्रतप्तायसपिंडवत् ॥ ६२ ॥
जगद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्न किंचन ।
ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ ६३ ॥
दृश्यते श्रूयते यद्यद्ब्रह्मणोऽन्यन्न तद्भवेत् ।
तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानंदमद्वयम् ॥ ६४ ॥
सर्वगं सच्चिदानंदं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षेत भास्वंतं भानुमंधवत् ॥ ६५ ॥
श्रवणादिभिरुद्दीप्तज्ञानाग्निपरितापितः ।
जीवः सर्वमलान्मुक्तः स्वर्णवद्द्योतते स्वयम् ॥ ६६ ॥
हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् ।
सर्वव्यापी सर्वधारी भाति भासयतेऽखिलम् ॥ ६७ ॥
दिग्देशकालाद्यनपेक्ष्य सर्वगं
शीतादिहृन्नित्यसुखं निरंजनम् ।
यः स्वात्मतीर्थं भजते विनिष्क्रियः ।
स सर्ववित्सर्वगतोऽमृतो भवेत् ॥ ६८ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्य-
पादशिष्यस्य श्रीशंकरभगवतः कृतौ
आत्मबोधः समाप्तः ॥

॥ तत्त्वोपदेशः ॥

तत्त्वंपदार्थशुद्ध्यर्थं गुरुः शिष्यं वचोऽब्रवीत् ।
वाक्ये तत्त्वमसीत्यत्र त्वंपदार्थं विवेचय ॥ १ ॥
न त्वं देहोऽसि दृश्यत्वादुपजात्यादिमत्त्वतः ।
भौतिकत्वादशुद्धत्वादनित्यत्वात्तथैव च ॥ २ ॥
अदृश्यो रूपहीनस्त्वं जातिहीनोऽप्यभौतिकः ।
शुद्धनित्योऽसि दृग्रूपो घटो यद्वन्न दृग्भवेत् ॥ ३ ॥
न भवानिंद्रियाण्येषां करणत्वेन या श्रुतिः ।
प्रेरकस्त्वं पृथक्तेभ्यो न कर्ता करणं भवेत् ॥ ४ ॥
नानैतान्येकरूपस्त्वं भिन्नस्तेभ्यः कुतः शृणु ।
न चैकेंद्रियरूपस्त्वं सर्वत्राहंप्रतीतितः ॥ ५ ॥
न तेषां समुदायोऽसि तेषामन्यतमस्य च ।
विनाशेऽप्यात्मधीस्तावदस्ति स्यान्नैवमन्यथा ॥ ६ ॥
प्रत्येकमपि तान्यात्मा नैव तत्र नयं शृणु ।
नानास्वामिकदेहोऽयं नश्येद्भिन्नमताश्रयः ॥ ७ ॥
नानात्माभिमतं नैव विरुद्धविषयत्वतः ।
स्वाम्यैक्ये तु व्यवस्था स्यादेकपार्थिवदेशवत् ॥ ८ ॥
मनस्त्वं न वा प्राणो जडत्वादेव चैतयोः ।
गतमन्यत्र मे चित्तमित्यन्यत्वानुभूतितः ॥ ९ ॥
क्षुत्तृड्भ्यां पीडितः प्राणो ममायं चेति भेदतः ॥
तयोर्द्रष्टा पृथक्ताभ्यां घटद्रष्टा घटाद्यथा ॥ १० ॥
सुप्तौ लीनास्ति या बोधे सर्वं व्याप्नोति देहकम् ॥
चिच्छायया च संबद्धा न सा बुद्धिर्भवान्द्विज ॥ ११ ॥

नानारूपवती बोधे सुप्तौ लीनातिचंचला ॥
यतो दृगेकरूपस्त्वं पृथक्तस्य प्रकाशकः ॥ १२ ॥
सुप्तौ देहाद्यभावेऽपि साक्षी तेषां भवान्यतः ॥
स्वानुभूतिस्वरूपत्वान्नान्यस्तस्यास्तिभासकः ॥ १३ ॥
प्रमाणं बोधयन्तं तं बोधं मानेन ये जनाः ॥
बुभुत्स्यन्ते त एधोभिर्दग्धुं वांछन्ति पावकम् ॥ १४ ॥
विश्वमात्मानुभवति तेनासौ नानुभूयते ॥
विश्वं प्रकाशयत्यात्मा तेनासौ न प्रकाश्यते ॥ १५ ॥
ईदृशं तादृशं नैतन्न परोक्षं सदैव यत् ॥
तद्ब्रह्म त्वं न देहादिदृश्यरूपोऽसि सर्वदृक् ॥ १६ ॥
इदंत्वेनैव यद्भाति सर्वं तच्च निषिध्यते ॥
अवाच्यतत्त्वमनिदं न वेद्यं स्वप्रकाशतः ॥ १७ ॥
सत्यं ज्ञानमनंतं च ब्रह्मलक्षणमुच्यते ॥
सत्यत्वाज्ज्ञानरूपत्वादनंतत्वात्त्वमेव हि ॥ १८ ॥
सति देहाद्युपाधौ स्याज्जीवस्तस्य नियामकः ॥
ईश्वरः शक्त्युपाधित्वाद्द्वयोर्बाधे स्वयंप्रभः ॥ १९ ॥
अपेक्ष्यतेऽखिलैर्मानैर्न यन्मानमपेक्षते ॥
वेदवाक्यं प्रमाणं तद्ब्रह्मात्मावगतौ मतम् ॥ २० ॥
अतो हि तत्त्वमस्यादिवेदवाक्यं प्रमाणतः ॥
ब्रह्मणोऽस्ति यया युक्त्या सास्माभिः संप्रकीर्त्यते ॥ २१ ॥
शोधिते त्वंपदार्थे हि तत्त्वमस्यादि चिंतितम् ॥
संभवेन्नान्यथा तस्माच्छोधनं कृतमादितः ॥ २२ ॥
देहेंद्रियादिधर्मान्यः स्वात्मन्यारोपयन्मृषा ॥
कर्तृत्वाद्यभिमानी च वाच्यार्थस्त्वंपदस्य सः ॥ २३ ॥
देहेंद्रियादिसाक्षी यस्तेभ्यो भाति विलक्षणः ॥

स्वयं बोधस्वरूपत्वाल्लक्ष्यार्थस्त्वंपदस्य सः ॥ २४ ॥
वेदांतवाक्यसंवद्येविश्वातीताक्षराद्वयम् ॥
विशुद्धं यत्स्वसंवेद्यं लक्ष्यार्थस्तत्पदस्य सः ॥ २५ ॥
सामानाधिकरण्यं हि पदयोस्तत्त्वयोर्द्वयोः ॥
संबंधस्तेन वेदान्तैर्ब्रह्मैक्यं प्रतिपाद्यते ॥ २६ ॥
भिन्नप्रवृत्तिहेतुत्वे पदयोरेकवस्तुनि ॥
वृत्तित्वं यत्तथैवैक्यं विभक्त्यंतकयोस्तयोः ॥ २७ ॥
सामानाधिकरण्यं तत्संप्रदायिभिरीरितम् ॥
तथा पदार्थयोरेव विशेषणविशेष्यता ॥ २८ ॥
अयं सः सोऽयमितिवत्संबंधो भवति द्वयोः ।
प्रत्यक्त्वं सद्वितीयत्वं परोक्षत्वं च पूर्णता ॥ २९ ॥
परस्परविरुद्धं स्यात्ततो भवति लक्षणा ॥
लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनोः ॥ ३० ॥
मानांतरोपरोधाच्च मुख्यार्थस्यापरिग्रहे ॥
मुख्यार्थस्याविनाभूते प्रवृत्तिर्लक्षणोच्यते ॥ ३१ ॥
त्रिविधा लक्षणा ज्ञेया जहत्यजहती तथा ॥
अन्योभयात्मिका ज्ञेया तत्राद्या नैव संभवेत् ॥ ३२ ॥
वाच्यार्थमखिलं त्यक्त्वा वृत्तिः स्याद्या तदन्विते ॥
गंगायां घोष इतिवज्जहती लक्षणा हि सा ॥ ३३ ॥
वाच्यार्थस्यैकदेशस्य प्रकृते त्याग इष्यते ॥
जहती संभवेन्नैव संप्रदायविरोधतः ॥ ३४ ॥
वाच्यार्थमपरित्यज्य वृत्तिरन्यार्थके तु या ॥
कथितेयमजहती शोणोऽयं धावतीतिवत् ॥ ३५ ॥
न संभवति साप्यत्र वाच्यार्थेऽतिविरोधतः ॥
विरोधांशपरित्यागो दृश्यते प्रकृते यतः ॥ ३६ ॥

वाच्यार्थस्यैकदेशं च परित्यज्यैकदेशकम् ॥
या बोधयति सा ज्ञेया तृतीया भागलक्षणा ॥
सोऽयं विप्र इदं वाक्यं बोधयत्यादितस्तथा ॥
तत्कालत्वविशिष्टं च तथैतत्कालसंयुतम् ॥ ३८ ॥
अतस्तयोर्विरुद्धं तत्तत्कालत्वादिधर्मकम् ॥
त्यक्त्वा वाक्यं यथा विप्रपिंडं बोधयतीरितम् ॥
तथैव प्रकृते तत्त्वमसीत्यत्र श्रुतौ शृणु ॥
प्रत्यक्त्वादीन्परित्यज्य जीवधर्मांस्त्वमःपदात् ॥
सर्वज्ञत्वपरोक्षादीन्परित्यज्य ततःपदात् ॥
शुद्धं कूटस्थमद्वैतं बोधयत्यादरात्परम् ॥ ४१ ॥
तत्त्वमोः पदयोरैक्यमेव तत्त्वमसीत्यलम् ॥
इत्थमैक्यावबोधेन सम्यग्ज्ञानं दृढं नयैः ॥ ४२ ॥
अहं ब्रह्मेति विज्ञानं यस्य शोकं तरत्यसौ ॥
आत्मा प्रकाशमानोऽपि महावाक्यैस्तथैकता ॥ ४३ ॥
तत्त्वमोर्बोध्यतेऽथापि पौर्वापर्यानुसारतः ॥
तथापि शक्यते नैव श्रीगुरोः करुणां विना ॥ ४४ ॥
अपरोक्षयितुं लोके मूढैः पंडितमानिभिः ॥
अंतःकरणसंशुद्धौ स्वयं ज्ञानं प्रकाशते ॥ ४५ ॥
वेदवाक्यैरतः किं स्याद्गुरुणेति न सांप्रतम् ॥
आचार्यवान्पुरुषो हि वेदेत्येवं श्रुतिर्जगौ ॥ ४६ ॥
अनादाविह संसारे बोधको गुरुरेव हि ॥
अतो ब्रह्मात्मवस्त्वैक्यं ज्ञात्वा दृश्यमसत्तया ॥ ४७ ॥
अद्वैते ब्रह्मणि स्थेयं प्रत्यग्ब्रह्मात्मना सदा ॥
तत्प्रत्यक्षात्परिज्ञातमद्वैतब्रह्मचिद्घनम् ॥ ४८ ॥
प्रतिपाद्यं तदेवात्र वेदांतैर्न द्वयं जडम् ॥

सुखरूपं चिदद्वैतं दुःखरूपमसज्जडम् ॥ ४९ ॥
वेदांतैस्तदद्वयं सम्यङ् निर्णीतं वस्तुतो नयात् ।
अद्वैतमेव सत्यं त्वं विद्धि द्वैतमसत्सदा ॥ ५० ॥
शुद्धे कथमशुद्धः स्याद्दृश्यं मायामयं ततः ।
शुक्तौ रूप्यं मृषा यद्वत्तथा विश्वं परात्मनि ॥ ५१ ॥
विद्यते न स्वतः सत्त्वं नासतः सत्त्वमस्ति वा ।
बाध्यत्वान्नैव सद्द्वैतं नासत्प्रत्यक्षभानतः ॥ ५२ ॥
सदसन्न विरुद्धत्वादतोऽनिर्वाच्यमेव तत् ।
यः पूर्वमेक एवासीत्सृष्ट्वा पश्चादिदं जगत् ॥ ५३ ॥
प्रविष्टो जीवरूपेण स एवात्मा भवान्परः ।
सच्चिदानंद एव त्वं विस्मृत्यात्मतया परम् ॥ ५४ ॥
जीवभावमनुप्राप्तः स एवात्मासि बोधतः ।
अद्वयानंदचिन्मात्रः शुद्धः साम्राज्यमागतः ॥ ५५ ॥
कर्तृत्वादीनि यान्यासंस्त्वयि ब्रह्माद्वये परे ।
तानीदानीं विचार्य त्वं किंस्वरूपाणि वस्तुतः ॥ ५६ ॥
अत्रैव शृणु वृत्तांतमपूर्वं श्रुतिभाषितम् ।
कश्चिद्गांधारदेशीयो महारत्नविभूषितः ॥ ५७ ॥
स्वगृहे स्वांगणे सुप्तः प्रमत्तः सन्कदाचन ।
रात्रौ चौरः समागत्य भूषणानां प्रलोभितः ॥ ५८ ॥
बद्ध्वा देशांतरं चौरैर्नीतः सन्गहने वने ।
भूषणान्यपहृत्यापि बद्धाक्षकरपादकः ॥ ५९ ॥
निक्षिप्तो विपिनेऽतीव कुशकंटकवृश्चिकैः ।
व्यालव्याघ्रादिभिश्चैव संकुले तरुसंकटे ॥ ६० ॥
व्यालादिदुष्टसत्त्वेभ्यो महारण्ये भयातुरः ॥
शिलाकंटकदर्भाद्यैर्देहस्य प्रतिकूलकैः ॥ ६१ ॥

क्रियमाणे विलुठने विशीर्णांगोऽसमर्थकः ।
क्षुत्तृडातपवाय्वग्न्यादिभिस्तप्तोऽतितापकैः ॥ ६२ ॥
बंधमुक्तौ तथा देशप्राप्तावेव सुदुःखधीः ।
ईदृशे कंचिदाक्रोशनैकं तत्रैव तस्थिवान् ॥ ६३ ॥
तथा रागादिभिर्वर्गैः शत्रुभिर्दुःखदायिभिः ।
चौरैर्देहाभिमानाद्यैः स्वानंदधनहारिभिः ॥ ६४ ॥
ब्रह्मानंदे प्रमत्तः स्वाज्ञाननिद्रावशीकृतः ।
बद्धस्त्वं बंधनैर्भोगतृष्णाज्वरादिभिर्दृढम् ॥ ६५ ॥
अद्वयानंदरूपात्त्वां प्रच्याव्यातीव धूर्तकैः ।
दूरनीतोऽसि देहेषु संसारारण्यभूमिषु ॥ ६६ ॥
सर्वदुःखनिदानेषु शरीरादित्रयेषु च ।
नानायोनिषु कर्मौघवासनानिर्मितासु च ॥ ६७ ॥
प्रवेशितोऽसि सृष्टोऽसि बद्धः स्वानंददृष्टितः ।
अनादिकालमारभ्य दुःखं चानुभवन्सदा ॥ ६८ ॥
जन्ममृत्युजरादोषनरकादिपरंपराम् ॥
निरंतरं विषण्णोऽनुभवन्नत्यंतशोकवान् ॥ ६९ ॥
अविद्याभूतबंधस्य निवृत्तौ दुःखदस्य च ।
स्वरूपानंदसंप्राप्तौ सत्योपायं न लब्धवान् ॥ ७० ॥
यथा गांधारदेशीयश्चिरं दैवाद्दयालुभिः ।
कैश्चित्पांथैः परिप्राप्तैर्मुक्तदृष्ट्यादिबंधनः ॥ ७१ ॥
सः स्वस्थैरुपदिष्टश्च पंडितो निश्चितात्मकः ।
ग्रामाद्ग्रामांतरं गच्छेन्मेधावी मार्गतत्परः ॥ ७२ ॥
गत्वा गांधारदेशं सः स्वगृहं प्राप्य पूर्ववत् ।
बांधवैः संपरिष्वक्तः सुखी भूत्वा स्थितोऽभवत् ॥ ७३ ॥
त्वमप्येवमनेकेषु दुःखदायिषु जन्मसु ।

भ्रांतो दैवाच्छुभे मार्गे जातश्रद्धः सुकर्मकृत् ॥ ७४ ॥
वर्णाश्रमाचारपरोऽवाप्तपुण्यमहोदयः ।
ईश्वरानुग्रहाल्लब्धो ब्रह्मविद्गुरुसत्तमः ॥ ७५ ॥
विधिवत्कृतसंन्यासो विवेकादियुतः सुधीः ।
प्राप्तो ब्रह्मोपदेशोऽद्य वैराग्याभ्यासतः परम् ॥ ७६ ॥
पंडितस्तत्र मेधावी युक्त्या वस्तु विचारयन् ।
निदिध्यासनसंपन्नः प्राप्तो हि त्वं परं पदम् ॥ ७७ ॥
अतो ब्रह्मात्मविज्ञानमुपदिष्टं यथाविधि ।
मयाचार्येण ते धीर सम्यक्तत्र प्रयत्नवान् ॥ ७८ ॥
भूत्वा विमुक्तबंधस्त्वं छिन्नद्वैतात्मसंशयः ।
निर्द्वंद्वो निःस्पृहो भूत्वा विचरस्व यथासुखम् ॥ ७९ ॥
वस्तुतो निष्प्रपंचोऽसि नित्यमुक्तः स्वभावतः ।
न ते बंधविमोक्षौ स्तः कल्पितौ तौ यतस्त्वयि ॥ ८० ॥
न विरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ८१ ॥
श्रुतिसिद्धांतसारोऽयं तथैव त्वं स्वया धिया ।
संविचार्य निदिध्यास्य निजानंदात्मकं परम् ॥ ८२ ॥
साक्षात्कृत्वा परिच्छिन्नाद्वैतब्रह्माक्षरं स्वयम् ।
जीवन्नेव विनिर्मुक्तो विश्रांतः शांतिमाश्रय ॥ ८३ ॥
विचारणीया वेदान्ता वंदनीयो गुरुः सदा ।
गुरूणां वचनं पथ्यं दर्शनं सेवनं नृणाम् ॥ ८४ ॥
गुरुर्ब्रह्म स्वयं साक्षात्सेव्यो वंद्यो मुमुक्षुभिः ।
नोद्वेजनीय एवायं कृतज्ञेन विवेकिना ॥ ८५ ॥
यावदायुस्त्वया वंद्यो वेदांतो गुरुरीश्वरः ।
मनसा कर्मणा वाचा श्रुतिरेवैष निश्चयः ॥ ८६ ॥

भावाद्वैतं सदा कुर्यात्क्रियाद्वैतं न कर्हिचित् ।
अद्वैतं त्रिषु लोकेषु नाद्वैतं गुरुणा सह ॥ ८७ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीशंकरभगवतः कृतौ तत्त्वोपदेशः संपूर्णः ॥

॥ प्रौढानुभूतिः ॥

प्रौढप्रौढनिजानुभूतिगलितद्वैतेंद्रजालो गुरो-
गूढं गूढमघौघदुष्टकुधियां स्पष्टं सुधीशालिनाम् ।
स्वांते सम्यगिहानुभूतमपि सच्छिष्यावबोधाय तत्
सत्यं संस्मृतवान्समस्तजगतां नैजं निजालोकनात् ॥ १ ॥
द्वैतं मय्यखिलं समुत्थितमिदं मिथ्या मनःकल्पितं
तोयं तोयविवर्जिते मरुतले भ्रांत्यैव सिद्धं न हि ॥
यद्येवं खलु दृश्यमेतदखिलं नाहं न वा तन्मम
प्रौढानंदचिदेकसन्मयवपुः शुद्धोऽस्म्यखंडोऽस्म्यहम् ॥ २ ॥
देहो नाहमचेतनोऽयमनिशं कुड्यादिवन्निश्चितो
नाहं प्राणमयोऽपि वा दृतिधृतो वायुर्यथा निश्चितः
सोऽहं नापि मनोमयः कपिचलः कार्पण्यदुष्टो न वा
बुद्धिर्बुद्धकुवृत्तिकेव कुहना नाज्ञानमंधंतमः ॥ ३ ॥
नाहं खादिरपि स्फुटं मरुतलभ्राजत्पयः साम्यत-
स्तेभ्यो नित्यविलक्षणोऽखिलदृशिः सौरप्रकाशो यथा ।
दृश्यैः संगविवर्जितो गगनवत्संपूर्णरूपोऽस्म्यहं
वस्तुस्थित्यनुरोधतस्त्वहमिदं वीच्यादि सिंधुर्यथा ॥ ४ ॥
निर्द्वैतोऽस्म्यहमस्मि निर्मलचिदाकाशोऽस्मि पूर्णोऽस्म्यहं
निर्देहोऽस्मि निरिंद्रियोऽस्मि नितरां निष्प्राणवर्गोऽस्म्यहम् ।
निर्मुक्ताशुभमानसोऽस्मि विगलद्विज्ञानकोशोऽस्म्यहं
निर्मायोऽस्मि निरंतरोऽस्मि विपुलप्रौढप्रकाशोऽस्म्यहम् ॥ ५ ॥
मत्तोऽन्यन्न हि किंचिदस्ति यदि चिद्भास्यं ततस्तन्मृषा
गुंजावह्निवदेव सर्वकलनाधिष्ठानभूतोऽस्म्यहम् ॥
सर्वस्यापि दृगस्म्यहं समरसः शांतोऽस्म्यपापोऽस्म्यहं

पूर्णोऽस्मि द्वयवर्जितोऽस्मि विपुलाकाशोऽस्मि नित्योऽस्म्यहम् ॥६॥
मय्यस्मिन्परमार्थके श्रुतिशिरोवेद्ये स्वतो भासने
का वा विप्रतिपत्तिरेतदखिलं भात्येव यत्संनिधेः ॥
सौरालोकवशात्प्रतीतमखिलं पश्यन्न तस्मिन्जनः
संदिग्धोऽस्त्यत एव केवलशिवः कोऽपि प्रकाशोऽस्म्यहम् ॥ ७ ॥
नित्यस्फूर्तिमयोऽस्मि निर्मलसदाकाशोऽस्मि शांतोऽस्म्यहं
नित्यानंदमयोऽस्मि निर्गतमहामोहांधकारोऽस्म्यहम् ॥
विज्ञातं परमार्थतत्त्वमखिलं नैजं निरस्ताशुभं
मुक्तप्राप्यमपास्तभेदकलनाकैवल्यसंज्ञोऽस्म्यहम् ॥ ८ ॥
स्वाप्नद्वैतवदेव जाग्रतमपि द्वैतं मनोमात्रकं
मिथ्येत्येव विहाय सच्चिदमलस्वांतैकरूपोऽस्म्यहम् ॥
यद्वा वेद्यमशेषमेतदनिशं मद्रूपमेवेत्यपि
ज्ञात्वा त्यक्तमरुन्महोदधिरिव प्रौढो गभीरोऽस्म्यहम् ॥ ९ ॥
गंतव्यं किमिहास्ति सर्वपरिपूर्णस्याप्यखंडाकृतेः
कर्तव्यं किमिहास्ति निष्क्रियतनोर्मोक्षैकरूपस्य मे ॥
निर्द्वैतस्य न हेयमन्यदपि वा नोवाप्युपेयांतरं
शांतोऽद्यास्मि विमुक्ततोयविमलो मेघो यथा निर्मलः ॥ १० ॥
किं नः प्राप्तमितः पुरा किमधुना लब्धं विचारादिना
यस्मात्तत्सुखरूपमेव सततं जाज्वल्यमानोऽस्म्यहम् ॥
किं वापेक्ष्यमिहापि मय्यतितरां मिथ्याविचारादिकं
द्वैताद्वैतविवर्जिते समरसे मौनं परं संमतम् ॥ ११ ॥
श्रोतव्यं च किमस्ति पूर्णसुदृशो मिथ्यापरोक्षस्य मे ।
मंतव्यं च न मेऽस्ति किंचिदपि वा निःसंशयज्योतिषः ॥
ध्यातृध्येयविभेदहानिवपुषो न ध्येयमस्त्येव मे
सर्वात्मैकमहारसस्य सततं नो वा समाधिर्मम ॥ १२ ॥

आत्मानात्मविवेचनापि मम नो विद्वत्कृता रोचते-
ऽनात्मा नास्ति यदस्ति गोचरवपुः को वा विवेक्तुं क्षमी ॥
मिथ्यावादविचारचिंतनमहो कुर्वन्त्यदृष्टात्मका
भ्रांता एव न पारगा दृढधियस्तूष्णीं शिलावत्स्थिताः ॥ १३ ॥
वस्तुस्थित्यनुरोधतस्त्वहमहो कश्चित्पदार्थो न चा-
प्येवं कोऽपि बिभामि संततदृशी वाङ्मानसागोचरः ॥
निष्पापोऽस्म्यभयोऽस्म्यहं विगतदुःशंकाकलंकोऽस्म्यहं
संशान्तानुपमानशीतलमहः प्रौढप्रकाशोऽस्म्यहम् ॥ १४ ॥
योऽहं पूर्वमितः प्रशान्तकलनाशुद्धोऽस्मि बुद्धोऽस्म्यहं
यस्मान्मत्त इदं समुत्थितमभूदेतन्मया धार्यते ॥
मय्येव प्रलयं प्रयाति निरधिष्ठानाय तस्मै सदा
सत्यानंदचिदात्मकाय विपुलप्रज्ञाय मह्यं नमः ॥ १५ ॥
सत्ताचित्सुखरूपमस्ति सततं नाहं च न त्वं मृषा
नेदं वापि जगत्प्रदृष्टमखिलं नास्तीति जानीहि भो ॥
यत्प्रोक्तं करुणावशात्त्वयि मया तत्सत्यमेतत्स्फुटं
श्रद्धत्स्वानघ शुद्धबुद्धिरसि चेन्मात्रास्तु ते संशयः ॥ १६ ॥
स्वारस्यैकसुबोधचारुमनसे प्रौढानुभूतिस्त्वियं
दातव्या न तु मोहदुग्धकुधिये दुष्टांतरंगाय च ॥
येयं रम्यविदर्पितोत्तमशिरः प्राप्ता चकास्ति स्वयं
सा चेन्मर्कटहस्तदेशपतिता किं राजते केतकी ॥ १७ ॥

इति प्रौढानुभूतिः समाप्ता ॥

॥ ब्रह्मज्ञानावलीमाला ॥

सकृच्छ्रवणमात्रेण ब्रह्मज्ञानं यतो भवेत् ।
ब्रह्मज्ञानावलीमाला सर्वेषां मोक्षसिद्धये ॥ १ ॥
असंगोऽहमसंगोऽहमसंगोऽहं पुनः पुनः ।
सच्चिदानंदरूपोऽहमहमेवाहमव्ययः ॥ २ ॥
नित्यशुद्धविमुक्तोऽहं निराकारोऽहमव्ययः ।
भूमानंदस्वरूपोऽहमहमेवाहमव्ययः ॥ ३ ॥
नित्योऽहं निरवद्योऽहं निराकारोऽहमच्युतः ।
परमानंदरूपोऽहमहमेवाहमव्ययः ॥ ४ ॥
शुद्धचैतन्यरूपोऽहमात्मारामोऽहमेव च ।
अखंडानंदरूपोऽहमहमेवाहमव्ययः ॥ ५ ॥
प्रत्यक्चैतन्यरूपोऽहं शांतोऽहं प्रकृतेः परः ।
शाश्वतानंदरूपोऽहमहमेवाहमव्ययः ॥ ६ ॥
तत्त्वातीतः परात्माहं मध्यातीतः परः शिवः ।
मायातीतः परं ज्योतिरहमेवाहमव्ययः ॥ ७ ॥
नानारूपव्यतीतोऽहं चिदाकारोऽहमच्युतः ।
सुखरूपस्वरूपोऽहमहमेवाहमव्ययः ॥ ८ ॥
मायातत्कार्यदेहादि मम नास्त्येव सर्वदा ।
स्वप्रकाशैकरूपोऽहमहमेवाहमव्ययः ॥ ९ ॥
गुणत्रयव्यतीतोऽहं ब्रह्मादीनां च साक्ष्यहम् ।
अनंतानंतरूपोऽहमहमेवाहमव्ययः ॥ १० ॥
अंतर्यामिस्वरूपोऽहं कूटस्थः सर्वगोऽस्म्यहम् ॥
परमात्मस्वरूपोऽहमहमेवाहमव्ययः ॥ ११ ॥
निष्कलोऽहं निष्क्रियोऽहं सर्वात्माद्यः सनातनः ।

अपरोक्षस्वरूपोऽहमहमेवाहमव्ययः ॥ १२ ॥
द्वंद्वादिसाक्षिरूपोऽहमचलोऽहं सनातनः।
सर्वसाक्षिस्वरूपोऽहमहमेवाहमव्ययः ॥ १३ ॥
प्रज्ञानघन एवाहं विज्ञानघन एव च।
अकर्ताहमभोक्ताहमहमेवाहमव्ययः ॥ १४ ॥
निराधारस्वरूपोऽहं सर्वाधारोऽहमेव च।
आप्तकामस्वरूपोऽहमहमेवाहमव्ययः ॥ १५ ॥
तापत्रयविनिर्मुक्तो देहत्रयविलक्षणः।
अवस्थात्रयसाक्ष्यस्मि चाहमेवाहमव्ययः ॥ १६ ॥
दृग्दृश्यौ द्वौ पदार्थौ स्तः परस्परविलक्षणौ।
दृग्ब्रह्म दृश्यं मायेति सर्ववेदांतडिंडिमः ॥ १७ ॥
अहं साक्षीति यो विद्याद्विविच्यैवं पुनः पुनः ॥
स एव मुक्तः स विद्वानिति वेदांतडिंडिमः ॥ १८ ॥
घटकुड्यादिकं सर्वं मृत्तिकामात्रमेव च।
तद्वद्ब्रह्म जगत्सर्वमिति वेदांतडिंडिमः ॥ १९ ॥
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।
अनेन वेद्यं सच्छास्त्रमिति वेदांतडिंडिमः ॥ २० ॥

॥ इति ब्रह्मज्ञानावलीमाला समाप्ता ॥

॥ लघुवाक्यवृत्तिः ॥

स्थूलो मांसमयो देहो सूक्ष्मः स्याद्वासनामयः ।
ज्ञानकर्मेंद्रियैः सार्धं धीप्राणौ तच्छरीरगौ ॥ १ ॥
अज्ञानं कारणं साक्षी बोधस्तेषां विभासकः ।
बोधाभासो बुद्धिगतः कर्ता स्यात्पुण्यपापयोः ॥ २ ॥
स एव संसरेत्कर्मवशाल्लोकद्वये सदा ।
बोधाभासाच्छुद्धबोधं विविच्यादतियत्नतः ॥ ३ ॥
जागरस्वप्नयोरेव बोधाभासविडंबना ।
सुप्तौ तु तल्लये बोधः शुद्धो जाड्यं प्रकाशयेत् ॥ ४ ॥
जागरेऽपि धियस्तूष्णींभावः शुद्धेन भास्यते ।
धीव्यापाराश्च चिद्भास्याश्चिदाभासेन संयुताः ॥ ५ ॥
वह्नितप्तजलं तापयुक्तं देहस्य तापकम् ।
चिद्भास्या धीस्तदाभासयुक्तान्यं भासयेत्तथा ॥ ६ ॥
रूपादौ गुणदोषादिविकल्पा बुद्धिगाः क्रियाः ।
ताः क्रिया विषयैः सार्धं भासयन्ती चितिर्मता ॥ ७ ॥
रूपाच्च गुणदोषाभ्यां विविक्ता केवला चितिः ।
सैवानुवर्तते रूपरसादीनां विकल्पने ॥ ८ ॥
क्षणे क्षणेऽन्यथाभूता धीविकल्पाश्चितिर्न तु ।
मुक्तासु सूत्रवद्बुद्धिविकल्पेषु चितिस्तथा ॥ ९ ॥
मुक्ताभिरावृतं सूत्रं मुक्तयोर्मध्य ईक्षते ।
तथा वृत्तिविकल्पैश्चित्स्पष्टा मध्ये विकल्पयोः ॥ १० ॥
नष्टे पूर्वविकल्पे तु यावदन्यस्य नोदयः ।
[illegible] स्पष्टं तावद्विभासते ॥ ११ ॥
एकद्वित्रिक्षणेष्वेवं विकल्पस्य निरोधनम् ।

क्रमेणाभ्यस्यतां यत्नाद्ब्रह्मानुभवकांक्षिभिः ॥ १२ ॥
सविकल्पकजीवोऽयं ब्रह्म तन्निर्विकल्पकम् ।
अहं ब्रह्मेति वाक्येन सोऽयमर्थोऽभिधीयते ॥ १३ ॥
सविकल्पकचिद्योऽहं ब्रह्मैकं निर्विकल्पकम् ।
स्वतःसिद्धा विकल्पास्ते निरोद्धव्याः प्रयत्नतः ॥ १४ ॥
शक्यः सर्वनिरोधेन समाधिर्योगिनां प्रियः ।
तदशक्तौ क्षणं रुद्ध्वा श्रद्धालुर्ब्रह्मतात्मनः ॥ १५ ॥
श्रद्धालुर्ब्रह्मतां स्वस्य चिंतयेद्बुद्धिवृत्तिभिः ।
वाक्यवृत्त्या यथाशक्ति ज्ञात्वाद्धाभ्यस्यतां सदा ॥ १६ ॥
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥ १७ ॥
देहात्मधीवद्ब्रह्मात्मधीदार्ढ्ये कृतकृत्यता ।
यदा तदायं म्रियतां मुक्तोऽसौ नात्र संशयः ॥ १८ ॥

॥ इति लघुवाक्यवृत्तिः समाप्ता ॥

॥ वाक्यवृत्तिः ॥

सर्गस्थितिप्रलयहेतुमचिंत्यशक्तिं
   विश्वेश्वरं विदितविश्वमनंतमूर्तिम् ॥
निर्मुक्तबंधनमपारसुखांबुराशिं
   श्रीवल्लभं विमलबोधघनं नमामि ॥ १ ॥
यस्य प्रसादादहमेव विष्णु -
   र्मय्येव सर्वं परिकल्पितं च ॥
इत्थं विजानामि सदात्मरूपं
   तस्यांघ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥ २ ॥
तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः ।
शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति ॥ ३ ॥
अनायासेन येनास्मान्मुच्येय भवबंधनात् ।
तन्मे संक्षिप्य भगवन्केवलं कृपया वद ॥ ४ ॥
साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते ।
इदं तदिति विस्पष्टं सावधानमनाः शृणु ॥ ५ ॥
तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः ।
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥ ६ ॥
को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः ।
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत् ॥ ७ ॥
अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि ।
यस्त्वं पृच्छसि मां कोऽहं ब्रह्मैवासि न संशयः ॥ ८ ॥
पदार्थमेव जानामि नाद्यापि भगवन् स्फुटम् ।
अहं ब्रह्मेति वाक्यार्थं प्रतिपद्ये कथं वद ॥ ९ ॥
सत्यमाह भवानत्र विगानं नैव विद्यते ॥

हेतुः पदार्थबोधो हि वाक्यार्थावगतेरिह ॥ १० ॥
अंतःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ।
आनंदरूपः सत्यः सन्किं नात्मानं प्रपद्यसे ॥ ११ ॥
सत्यानंदस्वरूपं धीसाक्षिणं ज्ञानविग्रहम् ।
चिंतयात्मतया नित्यं त्यक्त्वा देहादिगां धियम् ॥ १२ ॥
रूपादिमान्यतः पिंडस्ततो नात्मा घटादिवत् ।
वियदादिमहाभूतविकारत्वाच्च कुंभवत् ॥ १३ ॥
अनात्मा यदि पिंडोऽयमुक्तहेतुबलान्मतः ।
करामलकवत्साक्षादात्मानं प्रतिपादय ॥ १४ ॥
घटद्रष्टा घटाद्भिन्नः सर्वथा न घटो यथा ।
देहद्रष्टा तथा देहो नाहमित्यवधारय ॥ १५ ॥
एवमिंद्रियदृङ्नाहमिंद्रियाणीति निश्चिनु ।
मनो बुद्धिस्तथा प्राणो नाहमित्यवधारय ॥ १६ ॥
संघातोऽपि तथा नाहमिति दृश्यविलक्षणम् ।
द्रष्टारमनुमानेन निपुणं संप्रधारय ॥ १७ ॥
देहेंद्रियादयो भावा हानादिव्यापृतिक्षमाः ।
यस्य संनिधिमात्रेण सोऽहमित्यवधारय ॥ १८ ॥
अनापन्नविकारः सन्नयस्कांतवदेव यः ।
बुद्ध्यादींश्चालयेत्प्रत्यक् सोऽहमित्यवधारय ॥ १९ ॥
अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ।
देहेंद्रियमनःप्राणाः सोऽहमित्यवधारय ॥ २० ॥
अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम् ।
एवं यो वेद धीवृत्तिं सोऽहमित्यवधारय ॥ २१ ॥
स्वप्नजागरिते सुप्तिं भावाभावौ धियां तथा ।
यो वेत्त्यविक्रियः साक्षात्सोऽहमित्यवधारय ॥ २२ ॥

घटावभासको दीपो घटादन्यो यथेष्यते ।
देहावभासको देही तथाऽहं बोधविग्रहः ॥ २३ ॥
पुत्रवित्तादयो भावा यस्य शेषतया प्रियाः ।
द्रष्टा सर्वप्रियतमः सोऽहमित्यवधारय ॥ २४ ॥
परप्रेमास्पदतया मा न भूवमहं सदा ।
भूयासमिति यो द्रष्टा सोऽहमित्यवधारय ॥ २५ ॥
यः साक्षिलक्षणे बोधस्त्वंपदार्थः स उच्यते ।
साक्षित्वमपि बोद्धृत्वमविकारितयाऽऽत्मनः ॥ २६ ॥
देहेंद्रियमनःप्राणाहंकृतिभ्यो विलक्षणः ।
प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः ॥ २७ ॥
त्वमर्थमेवं निश्चित्य तदर्थं चिंतयेत्पुनः ।
अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च ॥ २८ ॥
निरस्ताशेषसंसारदोषोऽस्थूलादिलक्षणः ।
अदृश्यत्वादिगुणकः पराकृततमोमलः ॥ २९ ॥
निरस्तातिशयानंदः सत्यः प्रज्ञानविग्रहः ।
सत्तास्वलक्षणः पूर्णः परमात्मेति गीयते ॥ ३० ॥
सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता ।
वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय ॥ ३१ ॥
यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितम् ।
मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय ॥ ३२ ॥
यदानंत्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ ।
तत्कार्यत्वं प्रपंचस्य तद्ब्रह्मेत्यवधारय ॥ ३३ ॥
विजिज्ञास्यतया यच्च वेदान्तेषु मुमुक्षुभिः ।
समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय ॥ ३४ ॥
जीवात्मना प्रवेशश्च नियन्तृत्वं च तान्प्रति ।

श्रूयते यस्य वेदेषु तद्ब्रह्मेत्यवधारय ॥ ३५ ॥
कर्मणां फलदातृत्वं यस्यैव श्रूयते श्रुतौ ।
जीवानां हेतुकर्तृत्वं तद्ब्रह्मेत्यवधारय ॥ ३६ ॥
तत्त्वंपदार्थौ निर्णीतौ वाक्यार्थश्चिंत्यतेऽधुना ।
तादात्म्यमत्र वाक्यार्थस्तयोरेव पदार्थयोः ॥ ३७ ॥
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ।
अखंडैकरसत्वेन वाक्यार्थो विदुषां मतः ॥ ३८ ॥
प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः ।
अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥ ३९ ॥
इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ।
अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ ४० ॥
तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानंदैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥ ४१ ॥
तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ।
लक्ष्यौ तत्त्वंपदार्थौ द्वावुपादाय प्रवर्तते ॥ ४२ ॥
हित्वा द्वौ शबलौ वाच्यौ वाक्यं वाक्यार्थबोधने ।
यथा प्रवर्ततेऽस्माभिस्तथा व्याख्यातमादरात् ॥ ४३ ॥
आलंबनतया भाति योऽस्मत्प्रत्ययशब्दयोः ।
अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥ ४४ ॥
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ।
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥ ४५ ॥
प्रत्यक्परोक्षतैकस्य सद्वितीयत्वपूर्णता ।
विरुध्यते यतस्तस्माल्लक्षणा संप्रवर्तते ॥ ४६ ॥
मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे ।
मुख्यार्थेनाविनाभूते प्रतीतिर्लक्षणोच्यते ॥ ४७ ॥

तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा ।
सोऽयमित्यादिवाक्यस्थपदयोरिव नापरा ॥ ४८ ॥
अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ।
शमादिसहितस्तावदभ्यस्येच्छ्रवणादिकम् ॥ ४९ ॥
श्रुत्याचार्यप्रसादेन दृढो बोधो यदा भवेत् ।
निरस्ताशेषसंसारनिदानः पुरुषस्तदा ॥ ५० ॥
विशीर्णकार्यकरणे भूतसूक्ष्मैरनावृतः ।
विमुक्तकर्मगिनलः सद्य एव विमुच्यते ॥ ५१ ॥
प्रारब्धकर्मवेगेण जीवन्मुक्तो यदा भवेत् ।
कंचित्कालमनारब्धकर्मबंधस्य संक्षये ॥ ५२ ॥
निरस्तातिशयानंदं वैष्णवं परमं पदम् ।
पुनरावृत्तिरहितं कैवल्यं प्रतिपद्यते ॥ ५३ ॥

॥ इति वाक्यवृत्तिः संपूर्णा ॥

॥ सदाचारानुसंधानम् ॥

सच्चिदानंदकंदाय जगदंकुरहेतवे ।
सदोदिताय पूर्णाय नमोऽनंताय विष्णवे ॥ १ ॥
सर्ववेदान्तसिद्धांतैर्ग्रथितं निर्मलं शिवम् ।
सदाचारं प्रवक्ष्यामि योगिनां ज्ञानसिद्धये ॥ २ ॥
प्रातः स्मरामि देवस्य सवितुर्भर्ग आत्मनः ।
वरेण्यं तद्धियो यो नश्चिदानंदे प्रचोदयात् ॥ ३ ॥
अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु ।
यदेकं केवलं ज्ञानं तदेवास्मि परं बृहत् ॥ ४ ॥
ज्ञानाज्ञानविलासोऽयं ज्ञानाज्ञाने च शाम्यति ।
ज्ञानाज्ञाने परित्यज्य ज्ञानमेवावशिष्यते ॥ ५ ॥
अत्यंतमलिनो देहो देही चात्यंतनिर्मलः ।
असंगोऽहमिति ज्ञात्वा शौचमेतत्प्रचक्षते ॥ ६ ॥
मन्मनो मीनवन्नित्यं क्रीडत्यानंदवारिधौ ।
सुस्नातस्तेन पूतात्मा सम्यग्विज्ञानवारिणा ॥ ७ ॥
अथाघमर्षणं कुर्यात्प्राणापाननिरोधतः ।
मनः पूर्णे समाधाय मग्नकुंभो यथार्णवे ॥ ८ ॥
लयविक्षेपयोः संधौ मनस्तत्र निरामिषम् ।
स संधिः साधितो येन स मुक्तो नात्र संशयः ॥ ९ ॥
सर्वत्र प्राणिनां देहे जपो भवति सर्वदा ।
हंसः सोऽहमिति ज्ञात्वा सर्वबंधैर्विमुच्यते ॥ १० ॥
तर्पणं स्वसुखेनैव स्वेंद्रियाणां प्रतर्पणम् ।
मनसा मन आलोक्य स्वयमात्मा प्रकाशते ॥ ११ ॥
आत्मनि ै चित्तमेकाहुतिं क्षिपेत् ।

अग्निहोत्री स विज्ञेयश्चेतरा नामधारकाः ॥ १२ ॥
देहो देवालयः प्रोक्तो देही देवो निरंजनः ।
अर्चितः सर्वभावेन स्वानुभूत्या विराजते ॥ १३ ॥
मौनं स्वाध्ययनं ध्यानं ध्येयं ब्रह्मानुचिंतनम् ।
ज्ञानेनेति तयोः सम्यङ्निषेधात्तत्त्वदर्शनम् ॥ १४ ॥
अतीतानागतं किंचिन्न स्मरामि न चिंतये ।
रागद्वेषं विना प्राप्तं भुंजाम्यत्र शुभाशुभम् ॥ १५ ॥
देहाभ्यासो हि संन्यासो नैव काषायवाससा ।
नाहं देहोऽहमात्मेति निश्चयो न्यासलक्षणम् ॥ १६ ॥
अभयं सर्वभूतानां दानमाहुर्मनीषिणः ।
निजानंदे स्पृहा नान्ये वैराग्यस्यावधिर्मता ॥ १७ ॥
वेदांतश्रवणं कुर्यान्मननं चोपपत्तिभिः ।
योगेनाभ्यसनं नित्यं ततो दर्शनमात्मनः ॥ १८ ॥
शब्दशक्तेरचिंत्यत्वाच्छब्दादेवापरोक्षधीः ।
प्रसुप्तः पुरुषो यद्वच्छब्देनैवावबुध्यते ॥ १९ ॥
आत्मानात्मविवेकेन ज्ञानं भवति निश्चलम् ।
गुरुणा बोधितः शिष्यः शब्दब्रह्मातिवर्तते ॥ २० ॥
न त्वं देहो नेंद्रियाणि न प्राणो न मनो न धीः ।
विकारित्वाद्विनाशित्वाद्दृश्यत्वाच्च घटो यथा ॥ २१ ॥
विशुद्धं केवलं ज्ञानं निर्विशेषं निरंजनम् ।
यदेकं परमानंदं तत्त्वमस्यद्वयं परम् ॥ २२ ॥
शब्दस्याद्यंतयोः सिद्धं मनसोऽपि तथैव च ।
मध्ये साक्षितया नित्यं तदेव त्वं भ्रमं जहि ॥ २३ ॥
स्थूलवैराजयोरैक्यं सूक्ष्महैरण्यगर्भयोः ।
अज्ञानमाययोरैक्यं प्रत्यग्विज्ञानपूर्णयोः ॥ २४ ॥

चिन्मात्रैकरसे विष्णौ ब्रह्मात्मैक्यस्वरूपके ।
भ्रमेणैव जगज्जातं रज्ज्वां सर्पभ्रमो यथा ॥ २५ ॥
तार्किकाणां तु जीवेशौ वाच्यावेतौ विदुर्बुधाः ।
लक्ष्यौ च सांख्ययोगाभ्यां वेदांतैरैक्यता तयोः ॥ २६ ॥
कार्यकारणवाच्यांशौ जीवेशौ यौ जहच्च तौ ।
अजहच्च तयोर्लक्ष्यौ चिदंशावेकरूपिणौ ॥ २७ ॥
कर्मशास्त्रे कुतो ज्ञानं तर्के नैवास्ति निश्चयः ।
सांख्ययोगौ भिदापन्नौ शाब्दिकाः शब्दतत्पराः ॥ २८ ॥
अन्ये पाषंडिनः सर्वे ज्ञानवार्तासुदुर्लभाः ।
एकं वेदांतविज्ञानं स्वानुभूत्या विराजते ॥ २९ ॥
अहं ममेत्ययं बंधो ममाहं नेति मुक्तता ।
बंधमोक्षौ गुणैर्भातो गुणाः प्रकृतिसंभवाः ॥ ३० ॥
ज्ञानमेकं सदा भाति सर्वावस्थासु निर्मलम् ।
मंदभाग्या न जानन्ति स्वरूपं केवलं बृहत् ॥ ३१ ॥
संकल्पसाक्षि यज्ज्ञानं सर्वलोकैकजीवनम् ।
तदेवास्मीति यो वेद स मुक्तो नात्र संशयः ॥ ३२ ॥
प्रमाता च प्रमाणं च प्रमेयं प्रमितिस्तथा ।
यस्य भासावभासन्ते मानं ज्ञानाय तस्य किम् ॥ ३३ ॥
अर्थाकारा भवेद्वृत्तिः फलेनार्थः प्रकाशते ।
अर्थज्ञानं विजानाति स एवार्थः प्रकाशते ॥ ३४ ॥
वृत्तिव्याप्यत्वमेवास्तु फलव्याप्तिः कथं भवेत् ।
स्वप्रकाशस्वरूपत्वात्सिद्धत्वाच्च चिदात्मनः ॥ ३५ ॥
चित्तं चैतन्यमात्रेण संयोगाच्चेतना भवेत् ।
अर्थादर्थांतरे वृत्तिर्गन्तुं चलति चांतरे ॥ ३६ ॥
निराधारा निर्विकारा या दशा सोन्मनी स्मृता ।

चित्तं चिदिति जानीयात्तकाररहितं यदा ॥ ३७ ॥
तकारो विषयाध्यासो जपारागो यथा मणौ ।
ज्ञेयवस्तुपरित्यागाज्ज्ञानं तिष्ठति केवलम् ॥ ३८ ॥
त्रिपुटी क्षीणतामेति ब्रह्मनिर्वाणमृच्छति ।
मनोमात्रमिदं सर्वं तन्मनो ज्ञानमात्रकम् ॥ ३९ ॥
अज्ञानं भ्रम इत्याहुर्विज्ञानं परमं पदम् ।
अज्ञानं चान्यथाज्ञानं मायामेतां वदन्ति ते ॥ ४० ॥
ईश्वरं मायिनं विद्यान्मायातीतं निरंजनम् ।
सदानंदे चिदाकाशे माया मेघस्तडिन्मनः ॥ ४१ ॥
अहंता गर्जनं तत्र धारासारा हि वृत्तयः ।
महामोहांधकारेऽस्मिन्देवो वर्षति लीलया ॥ ४२ ॥
तस्या वृष्टेर्विरामाय प्रबोधैकसमीरणः ।
ज्ञानं दृग्दृश्ययोर्भावं विज्ञानं दृश्यशून्यता ॥ ४३ ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं तज्ज्ञानं ज्ञानमुच्यते ॥ ४४ ॥
विज्ञानं चोभयोरैक्यं क्षेत्रज्ञपरमात्मनोः ।
परोक्षं शास्त्रजं ज्ञानं विज्ञानं चात्मदर्शनम् ॥ ४५ ॥
आत्मनो ब्रह्मणः सम्यगुपाधिद्वयवर्जितम् ।
त्वमर्थविषयं ज्ञानं विज्ञानं तत्पदाश्रयम् ॥ ४६ ॥
पदयोरैक्यबोधस्तु ज्ञानविज्ञानसंज्ञितम् ।
आत्मानात्मविवेकस्य ज्ञानमाहुर्मनीषिणः ॥ ४७ ॥
अज्ञानं चान्यथा लोके विज्ञानं तन्मयं जगत् ।
अन्वयव्यतिरेकाभ्यां सर्वत्रैकं प्रपश्यति ॥ ४८ ॥
यत्तु वृत्तिजं ज्ञानं विज्ञानं ज्ञानमात्रकम् ।
अज्ञानध्वंसकं ज्ञानं विज्ञानं चोभयात्मकम् ॥ ४९ ॥

ज्ञानविज्ञाननिष्ठोऽयं तत्सद्ब्रह्मणि चार्पणम् ।
भोक्ता सत्त्वगुणः शुद्धो भोगानां साधनं रजः ॥ ५० ॥
भोग्यं तमोगुणः प्राहुरात्मा चैषां प्रकाशकः ।
ब्रह्माध्ययनसंयुक्तो ब्रह्मचर्यारतः सदा ॥ ५१ ॥
सर्वं ब्रह्मेति यो वेद ब्रह्मचारी स उच्यते ।
गृहस्थो गुणमध्यस्थः शरीरं गृहमुच्यते ॥ ५२ ॥
गुणाः कुर्वन्ति कर्माणि नाहं कर्तेति बुद्धिमान् ।
किमुग्रैश्च तपोभिश्च यस्य ज्ञानमयं तपः ॥ ५३ ॥
हर्षामर्षविनिर्मुक्तो वानप्रस्थः स उच्यते ।
स गृही यो गृहातीतः शरीरं गृहमुच्यते ॥ ५४ ॥
सदाचारमिमं नित्यं योऽनुसंदधते बुधः ।
संसारसागराच्छीघ्रं स मुक्तो नात्र संशयः ॥ ५५ ॥

॥ इति सदाचारानुसंधानं संपूर्णम् ॥

॥ स्वात्मनिरूपणम् ॥

श्रीगुरुचरणद्वंद्वं वंदेऽहं मथितदुःसहद्वंद्वम् ।
भ्रांतिग्रहोपशांतिं पांसुमयं यस्य भसितमातनुते ॥ १ ॥
देशिकवरं दयालुं वंदेऽहं निहतनिखिलसंदेहम् ।
यच्चरणद्वयमद्वयमनुभवमुपदिशति तत्पदस्यार्थम् ॥ २ ॥
संसारदावपावकसंतप्तः सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैः शिष्यः प्रबोध्यते गुरुणा ॥ ३ ॥
अस्ति स्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः ।
अत्रापि संशयश्चेत् संशयिता यः स एव भवसि त्वम् ॥ ४ ॥
नाहमिति वेत्ति योऽसौ सत्यं ब्रह्मैव वेत्ति नास्तीति ।
अहमस्मीति विजानन्ब्रह्मैवासौ स्वयं विजानाति ॥ ५ ॥
ब्रह्म त्वमेव तस्मान्नाहं ब्रह्मेति मोहमात्रमिदम् ।
मोहेन भवति भेदः क्लेशाः सर्वे भवन्ति तन्मूलाः ॥ ६ ॥
न क्लेशपंचकमिदं भजते कृतकोशपंचकविवेकः ।
अत एव पंच कोशान् कुशलधियः संततं विचिन्वन्ति ॥ ७ ॥
अन्नप्राणमनोमयविज्ञानानंदपंचकोशानाम् ।
एकैकान्तरभाजां भजति विवेकात्प्रकाश्यतामात्मा ॥ ८ ॥
वपुरिदमन्नमयाख्यः कोशो नात्मा जडो घटप्रायः ।
प्रागुत्पत्तेः पश्चात्तदभावस्यापि दृश्यमानत्वात् ॥ ९ ॥
कोशः प्राणमयोऽयं वायुविशेषो वपुष्यवच्छिन्नः ।
अस्य कथमात्मता स्यात् क्षुत्तृष्णाभ्यामुपेयुषः पीडाम् ॥ १० ॥
कुरुते वपुष्यहंतां गेहादौ यः करोति ममतां च ।
रागद्वेषविधेयो नासावात्मा मनोमयः कोशः ॥ ११ ॥
सुप्तौ स्वयं विलीना बोधे व्याप्ता कलेवरं सकलम् ।

विज्ञानशब्दवाच्या चित्प्रतिबिंबो न बुद्धिरप्यात्मा ॥ १२ ॥
सुप्तिगतैः सुखलेशैरभिमनुते यः सुखी भवामीति ।
आनंदकोशनामा सोऽहंकारः कथं भवेदात्मा ॥ १३ ॥
यः स्फुरति बिंबभूतः स भवेदानन्द एव सकलात्मा ।
प्रागूर्ध्वमपि च सत्त्वादविकारित्वादबाध्यमानत्वात् ॥ १४ ॥
अन्नमयादेरस्मादपरं यदि नानुभूयते किंचित् ।
अनुभविताऽन्नमयादेरस्तीत्यस्मिन्न कश्चिदपलापः ॥ १५ ॥
स्वयमेवानुभवत्वाद्यद्यप्येतस्य नानुभाव्यत्वम् ।
सकृदप्यभावशंका न भवेद्बोधस्वरूपसत्तायाः ॥ १६ ॥
अनुभवति विश्वमात्मा विश्वेनासौ न चानुभूयेत ।
न खलु प्रकाश्यतेऽसौ विश्वमशेषं प्रकाशयन्भानुः ॥ १७ ॥
तदिदं तादृशमीदृशमेतावत्तावदिति च यन्न भवेत् ।
ब्रह्म तदित्यवधेयं नो चेद्विषयो भवेत्परोक्षं च ॥ १८ ॥
इदमिदमिति प्रतीते वस्तुनि सर्वत्र बाध्यमानेऽपि ।
अनिदमबाध्यं तत्त्वं सत्त्वादेतस्य न च परोक्षत्वम् ॥ १९ ॥
नावेद्यमपि परोक्षं भवति ब्रह्म स्वयंप्रकाशत्वात् ।
सत्यं ज्ञानमनंतं ब्रह्मेत्येतस्य लक्षणं प्रथते ॥ २० ॥
सति कोशशक्त्युपाधौ संभवतस्तस्य जीवतेश्वरते ।
नो चेत्तयोरभावाद्विगतविशेषं विभाति निजरूपम् ॥ २१ ॥
सति सकलदृश्यबाधे न किमप्यस्तीति लोकसिद्धं चेत् ।
यन्न किमपीति सिद्धं ब्रह्म तदेवेति वेदतः सिद्धम् ॥ २२ ॥
एवं मतिरहितानां तत्त्वमसीत्यादिवाक्यचिंतनया ।
प्रतिभात्येष परोक्षवदात्मा प्रत्यक्प्रकाशमानोऽपि ॥ २३ ॥
तस्मात्पदार्थशोधनपूर्वं वाक्यस्य चिंतयन्नर्थम् ।
देशिकदयाप्रभावादपरोक्षयति क्षणेन चात्मानम् ॥ २४ ॥

देहेंद्रियादिधर्मानात्मन्यारोपयन्नभेदेन ।
कर्तृत्वाद्यभिमानी बोधः स्यात्त्वंपदस्य वाच्योऽर्थः ॥ २५ ॥
देहस्य चेंद्रियाणां साक्षी तेभ्यो विलक्षणत्वेन ।
प्रतिभाति योऽवबोधः प्रोक्तोऽसौ त्वंपदस्य लक्ष्योऽर्थः ॥ २६ ॥
वेदावसानवाचा संवेद्यं सकलजगदुपादानम् ।
सर्वज्ञताद्युपेतं चैतन्यं तत्पदस्य वाच्योऽर्थः ॥ २७ ॥
विविधोपाधिविमुक्तं विश्वातीतं विशुद्धमद्वैतम् ।
अक्षरमनुभववेद्यं चैतन्यं तत्पदस्य लक्ष्योऽर्थः ॥ २८ ॥
सामानाधिकरण्यं तदनु विशेषणविशेष्यता चेति ।
अथ लक्ष्यलक्षकत्वं भवति पदार्थात्मनां च संबंधः ॥ २९ ॥
एकत्र वृत्तिरर्थे शब्दानां भिन्नवृत्तिहेतूनाम् ।
सामानाधिकरण्यं भवतीत्येवं वदन्ति लाक्षणिकाः ॥ ३० ॥
प्रत्यक्त्वपरोक्षत्वे परिपूर्णत्वं च सद्वितीयत्वम् ।
इतरेतरं विरुद्धं तत इह भवितव्यमेव लक्षणया ॥ ३१ ॥
मानान्तरोपरोधात् मुख्यार्थस्यापरिग्रहे जाते ।
मुख्याविनाकृतेऽर्थे या वृत्तिः सैव लक्षणा प्रोक्ता ॥ ३२ ॥
निखिलमपि वाच्यमर्थं त्यक्त्वा वृत्तिस्तदन्वितेऽन्यार्थे ।
जहतीति लक्षणा स्यात् गंगायां घोषवदिह न ग्राह्या ॥ ३३ ॥
वाच्यार्थमत्यजन्त्या यस्या वृत्तेः प्रवृत्तिरन्यार्थे ।
इयमजहतीति कथिता शोणो धावतिवदत्र न ग्राह्या ॥ ३४ ॥
जहदजहतीति सा स्याद्या वाच्यार्थैकदेशमपहाय ।
बोधयति चैकदेशं सोऽयं द्विज इतिवदाश्रयेदेनाम् ॥ ३५ ॥
सोऽयं द्विज इति वाक्यं त्यक्त्वा प्रत्यक्परोक्षदेशाद्यम् ।
द्विजमात्रलक्षकत्वात्कथयत्यैक्यं पदार्थयोरुभयोः ॥ ३६ ॥
तद्वत्तत्त्वमसीति त्यक्त्वा प्रत्यक्परोक्षतादीनि ।

चिद्वस्तु लक्षयित्वा बोधयति स्पष्टमसिपदेनैक्यम् ॥ ३७ ॥
इत्थं बोधितमर्थं महता वाक्येन दर्शितैक्येन ।
अहमित्यपरोक्षयतां वेदो वेदयति वीतशोकत्वम् ॥ ३८ ॥
प्रायः प्रवर्तकत्वं विधिवचसां लोकवेदयोर्दृष्टम् ।
सिद्धं बोधयतोऽर्थं कथमिव तद्भवति तत्त्वमस्यादेः ॥ ३९ ॥
विधिरेव न प्रवृत्तिं जनयत्यभिलषितवस्तुबोधोऽपि ।
राजा याति सुतोऽभूत् इति बोधेन प्रवर्तते लोकः ॥ ४० ॥
ऐक्यपरैः श्रुतिवाक्यैरात्मा शश्वत्प्रकाश्यमानोऽपि ।
देशिकदयाविहीनैरपरोक्षयितुं न शक्यते पुरुषैः ॥ ४१ ॥
विरहितकाम्यनिषिद्धो विहितानुष्ठाननिर्मलस्वान्तः ।
भजति स्वमेव बोधं गुरुणा किमिति त्वया न मंतव्यम् ॥ ४२ ॥
कर्मभिरेव न बोधः प्रभवति गुरुणा विना दयानिधिना ।
आचार्यवान्हि पुरुषो वेदेत्यर्थस्य वेदसिद्धत्वात् ॥ ४३ ॥
वेदोऽनादितया वा यद्वा परमेश्वरप्रणीततया ।
भवति परमं प्रमाणं बाधो नास्ति स्वतश्च परतो वा ॥ ४४ ॥
नापेक्षते यदन्यद्यदपेक्षन्तेऽखिलानि मानानि ।
वाक्यं तन्निगमानां मानं ब्रह्माद्यतींद्रियावगतौ ॥ ४५ ॥
मानं प्रबोधयन्तं बोधं मानेन ये बुभुत्सन्ते ।
एधोभिरेव दहनं दग्धुं वांछन्ति ते महात्मानः ॥ ४६ ॥
वेदोऽनादिरमुष्य व्यंजक ईशः स्वयंप्रकाशात्मा ।
तदभिव्यक्तिमुदीक्ष्य प्रोक्तोऽसौ सूरिभिः प्रमाणमिति ॥ ४७ ॥
रूपाणामवलोके चक्षुरिवान्यन्न कारणं दृष्टम् ।
तद्वददृष्टावगतौ वेदवदन्यो न वेदको हेतुः ॥ ४८ ॥
निगमेषु निश्चितार्थं तंत्रे कश्चिद्यदि प्रकाशयति ।
तदिदमनुवादमात्रं प्रामाण्यं तस्य सिध्यति न किंचित् ॥ ४९ ॥

अंशद्वयवति निगमे साधयति द्वैतमेव कोऽप्यंशः।
अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंऽशः ॥ ५० ॥
अद्वैतमेव सत्यं तस्मिन्द्वैतं न सत्यमध्यस्तम्।
रजतमिव शुक्तिकायां मृगतृष्णायामिवोदकस्फुरणम् ॥ ५१ ॥
आरोपितं यदि स्यादद्वैतं वस्त्ववस्तुनि द्वैते।
तदयुक्तमेव यस्मात्सत्येऽध्यासो भवत्यसत्यानाम् ॥ ५२ ॥
यद्यारोपणमुभयोस्तद्व्यतिरिक्तस्य कस्यचिदभावात्।
आरोपणं न शून्ये तस्मादद्वैतसत्यता ग्राह्या ॥ ५३ ॥
प्रत्यक्षाद्यनवगतं श्रुत्या प्रतिपादनीयमद्वैतम्।
द्वैतं न प्रतिपाद्यं तस्य स्वत एव लोकसिद्धत्वात् ॥ ५४ ॥
अद्वैतं सुखरूपं दुस्सहदुःखं सदा भवेद्द्वैतम्।
यत्र प्रयोजनं स्यात्प्रतिपादयति श्रुतिस्तदेवासौ ॥ ५५ ॥
निगमगिरा प्रतिपाद्यं वस्तु यदानंदरूपमद्वैतम्।
स्वाभाविकं स्वरूपं जीवत्वं तस्य केचन ब्रुवते ॥ ५६ ॥
स्वाभाविकं यदि स्याज्जीवत्वं तस्य विशदविज्ञप्तेः।
सकृदपि न तद्विनाशं गच्छेदुष्णप्रकाशवद्वह्नेः ॥ ५७ ॥
यद्वदयो रसविद्धं कांचनतां याति तद्वदेवासौ।
जीवः साधनशक्त्या परतां यातीति केचिदिच्छन्ति ॥ ५८ ॥
तदिदं भवति न युक्तं गतवति तस्मिश्चिरेण रसवीर्ये।
प्रतिपद्यते प्रणाशं हैमो वर्णोऽप्ययस्समारूढः ॥ ५९ ॥
जीवत्वमपि तथेदं बहुविधसुखदुःखलक्षणोपेतम्।
गतमिव साधनशक्त्या प्रतिभात्येव प्रयाति न विनाशम् ॥ ६० ॥
तस्मात्स्वतो यदि स्याज्जीवः सततं स एव जीवः स्यात्।
एवं यदि परमात्मा परमात्मैवायमिति भवेद्युक्तम् ॥ ६१ ॥
यदि वा परेण साम्यं जीवश्चेद्व्रजति साधनबलेन।

कालेन तदपि कियता नश्यत्येवेति निश्चितं सकलैः ॥ ६२ ॥
तस्मात्परं स्वकीयं देहं मोहात्मकं च संसारम् ।
स्वज्ञानेन ग्रसित्वा पूर्णः स्वयमेव शिष्यते नान्यत् ॥ ६३ ॥
सत्यं ज्ञानमनंतं प्रकृतं परमात्मरूपमद्वैतम् ।
अवबोधयन्ति निखिलाः श्रुतयः स्मृतिभिः समं समस्ताभिः ॥६४॥
एकत्वबोधकानां निखिलानां निगमवाक्यजालानाम् ।
वाक्यान्तराणि सकलान्यभिधीयन्तेऽस्य शेषभूतानि ॥ ६५ ॥
यस्मिन्मिहिरवदुदिते तिमिरवदपयान्ति कर्तृताऽऽदीनि ।
ज्ञानं विरहितभेदं कथमिव तद्भवति तत्त्वमस्यादेः ॥ ६६ ॥
कर्मप्रकरणनिष्ठं ज्ञानं कर्मांगमिष्यते प्राज्ञैः ।
भिन्नप्रकरणभाजः कर्मांगत्वं कथं भवेज्ज्ञप्तेः ॥ ६७ ॥
अधिकारिविषयभेदौ कर्मज्ञानात्मकावुभौ कांडौ ।
एवं सति कथमनयोरंगांगित्वं परस्परं घटते ॥ ६८ ॥
ज्ञानं कर्मणि न स्याज्ज्ञाने कर्मेदमपि तथा न स्यात् ।
तत्कथमनयोरुभयोस्तपनतमोवत्समुच्चयो घटते ॥ ६९ ॥
तस्मान्मोहनिवृत्तौ ज्ञानं न सहायमन्यदर्थयते ।
यद्वद्घनतरतिमिरप्रकरपरिध्वंसने सहस्रांशुः ॥ ७० ॥
ज्ञानं तदेवममलं साक्षी विश्वस्य भवति परमात्मा ।
संबध्यते न धर्मैः साक्षी तैरेव सच्चिदानंदः ॥ ७१ ॥
रज्ज्वादेरुरगाद्यैः संबंधवदस्य दृश्यसंबंधः ।
सततमसंगोऽयमिति श्रुतिरप्यमुमर्थमेव साधयति ॥ ७२ ॥
कर्तृ च कर्म च यस्य स्फुरति ब्रह्मैव तन्न जानाति ।
यस्य न कर्तृ न कर्म स्फुटतरमयमेव वेदितुं क्रमते ॥ ७३ ॥
कर्तृत्वादिकमेतन्मायाशक्त्या प्रतीयते निखिलम् ।
इति केचिदाहुरेषा भ्रान्तिर्ब्रह्मातिरेकतो नान्यत् ॥ ७४ ॥

तस्मिन्ब्रह्मणि विदिते विश्वमशेषं भवेदिदं विदितम् ।
कारणमृदि विदितायां घटकरकाद्या यथाऽवगम्यन्ते ॥ ७५ ॥
तदिदं कारणमेकं विगतविशेषं विशुद्धचिद्रूपम् ।
तस्मात्सदेकरूपान्मायोपहितादभूदिदं विश्वम् ॥ ७६ ॥
कारणमसदिति केचित्कथयन्त्यसतो भवेन्न कारणता ।
अंकुरजननी शक्तिः सति खलु बीजे समीक्ष्यते सकलैः ॥ ७७ ॥
कारणमसदिति कथयन् वंध्यापुत्रेण निर्वहेत्कार्यम् ।
किंच मृगतृष्णिकांभः पीत्वोदन्यां महीयसीं शमयेत् ॥ ७८ ॥
यस्मान्न सोऽयमसतो वादः संभवति शास्त्रयुक्तिभ्याम् ।
तस्मात्सदेव तत्त्वं सर्वेषां भवति कारणं जगताम् ॥ ७९ ॥
जगदाकारतयाऽपि प्रथते गुरुशिष्यविग्रहतयाऽपि ।
ब्रह्माकारतयाऽपि प्रतिभातीदं परात्परं तत्त्वम् ॥ ८० ॥
सत्यं जगदिति भानं संसृतये स्यादपक्वचित्तानाम् ।
तस्मादसत्यमेतन्निखिलं प्रतिपादयन्ति निगमान्ताः ॥ ८१ ॥
परिपक्वमानसानां पुरुषवराणां पुरातनैः सुकृतैः ।
ब्रह्मैवेदं सर्वं जगदिति भूयः प्रबोधयत्येषः ॥ ८२ ॥
अनवगतकांचनानां भूषणधीरेव भूषणे हैमे ।
एवमविवेकभाजां जगति जनानां न तात्त्विकी धिषणा ॥ ८३ ॥
अहमालंबनसिद्धं कस्य परोक्षं भवेदिदं ब्रह्म ।
तदपि विचारविहीनैरपरोक्षयितुं न शक्यते मुग्धैः ॥ ८४ ॥
अहमिदमिति च मतिभ्यां सततं व्यवहरति सर्वलोकोऽपि ।
प्रथमा प्रतीचि चरमा निवसति वपुरिन्द्रियादिबाह्येऽर्थे ॥ ८५ ॥
वपुरिन्द्रियादिविषये याऽहंबुद्धिर्महत्यसौ भ्रान्तिः ।
तद्बुद्धिरतस्मिन्नित्यध्यासत्वेन शास्यमानत्वात् ॥ ८६ ॥
तस्मादशेषसाक्षी परमात्मैवाहमर्थ इत्युचितम् ।

अजडवदेव जडोऽयं सत्संबंधाद्भवत्यहंकारः ॥ ८७ ॥
तस्मात्सर्वशरीरेष्वहमहमित्येव भासते स्पष्टः ।
यः प्रत्ययो विशुद्धस्तस्य ब्रह्मैव भवति मुख्योऽर्थः ॥ ८८ ॥
गोशब्दार्थो गोत्वं तदपि व्यक्तिः प्रतीयतेऽर्थतया ।
अहमर्थः परमात्मा तद्वद्भ्रान्त्या भवत्यहंकारः ॥ ८९ ॥
दग्धृत्वादिकमयसः पावकसंगेन भासते यद्वत् ।
तद्वच्चेतनसंगादहमि प्रतिभान्ति कर्तृताऽऽदीनि ॥ ९० ॥
देहेंद्रियादिदृश्यव्यतिरिक्तं विमलमतुलमद्वैतम् ।
अहमर्थ इति विदित्वा तद्व्यतिरिक्तं न कल्पयेत्किंचित् ॥ ९१ ॥
यद्वत्सुखदुःखानामवयवभेदादनेकता देहे ।
तद्वदिहासति भेदेऽप्यनुभववैचित्र्यमात्मनामेषाम् ॥ ९२ ॥
किमिदं किमस्य रूपं कथमिदमासीदमुष्य को हेतुः ।
इति न कदाऽपि विचिंत्यं चिन्त्यं मायेति धीमता विश्वम् ॥९३॥
दंतिनि दारुविकारे दारु तिरोभवति सोऽपि तत्रैव ।
जगति तथा परमात्मा परमात्मन्यपि जगत्तिरोधत्ते ॥ ९४ ॥
आत्ममये महति पटे विविधजगच्चित्रमात्मना लिखितम् ।
स्वयमेव केवलमसौ पश्यन्प्रमुदं प्रयाति परमात्मा ॥ ९५ ॥
चिन्मात्रममलमक्षयमद्वयमानन्दमनुभवारूढम् ।
ब्रह्मैवास्ति तदन्यन्न किमप्यस्तीति निश्चयो विदुषाम् ॥ ९६ ॥
व्यवहारस्य दशेयं विद्याऽविद्येति भेदपरिभाषा ।
नास्त्येव तत्त्वदृष्ट्या तत्त्वं ब्रह्मैव नान्यदस्त्यस्मात् ॥ ९७ ॥
अस्त्यन्यदिति मतं चेत्तदपि ब्रह्मैव चास्तितारूपम् ।
व्यतिरिक्तमस्तितायाः शून्यमेव तत्सिद्धम् ॥ ९८ ॥
तत्त्वावबोधशक्त्या सुस्थितया बाधिताऽपि सा माया ।
आदेहपातमेषां आभात्यात्मानमपि निजं विदुषाम् ॥ ९९ ॥

एष विशेषो विदुषां पश्यन्तोऽपि प्रपंचसंसारम् ।
पृथगात्मनो न किंचित् पश्येयुः सकलनिगमनिर्णीतात् ॥ १०० ॥
किं चिंत्यं किमचिंत्यं किं कथनीयं किमप्यकथनीयम् ।
किं कृत्यं किमकृत्यं निखिलं ब्रह्मेति जानतां विदुषाम् ॥ १०१ ॥
निखिलं दृश्यविशेषं दृग्रूपत्वेन पश्यतां विदुषाम् ।
बंधो नाऽपि न मुक्तिर्न परात्मत्वं न चाऽपि जीवत्वम् ॥ १०२ ॥
असकृदनुचिंतितानामव्याहततरनिजोपदेशानाम् ।
प्रामाण्यपरमसीम्नां निगमनमिदमेव निखिलनिगमानाम् ॥ १०३ ॥
इति बोधितः स गुरुणा शिष्यो हृष्टः प्रणम्य तं पदयोः ।
स्वानुभवसिद्धमर्थं स्वयमेवान्तर्विचारयामास ॥ १०४ ॥
अजरोऽहमक्षरोऽहं प्राज्ञोऽहं प्रत्यगात्मबोधोऽहम् ।
परमानंदमयोऽहं परमशिवोऽहं भवामि परिपूर्णः ॥ १०५ ॥
आद्योऽहमात्मभाजामात्मानंदानुभूतिरसिकोऽहम् ।
आबालगोपमखिलैरहमित्यनुभूयमानमहिमाऽहम् ॥ १०६ ॥
इंद्रियसुखविमुखोऽहं निजसुखबोधानुभूतिभरितोऽहम् ।
इतिमतिदूरतरोऽहं भावेतरसुखनिषक्तचित्तोऽहम् ॥ १०७ ॥
ईशोऽहमीश्वराणां ईर्ष्याद्वेषानुषंगरहितोऽहम् ।
ईक्षणविषयमतीनामीप्सितपुरुषार्थसाधनपरोऽहम् ॥ १०८ ॥
उदयोऽहमेव जगतामुपनिषदुद्यानकृतविहारोऽहम् ।
उद्वेलशोकसागरवाडवमुखहव्यवाहनार्चिरहम् ॥ १०९ ॥
ऊर्जस्वलनिजविभवैरूर्ध्वमधस्तिर्यगश्नुवानोऽहम् ।
ऊहापोहविचारैरुररीकृतवत्प्रतीयमानोऽहम् ॥ ११० ॥
ऋषिरहमृषिगणकोऽहं सृष्टिरहं सृज्यमानमहमेव ।
ऋद्धिरहं वृद्धिरहं तृप्तिरहं तृप्तिदीपदीप्तिरहम् ॥ १११ ॥
एकोऽहमेतदीदृशमेवमितिस्फुरितभेदरहितोऽहम् ।

एष्टव्योऽहमनीहैरंतस्सुकृतानुभूतिभूतोऽहम् ॥ ११२ ॥
ऐक्यावभासकोऽहं वाक्यपरिज्ञानपावनमतीनाम् ।
ऐशमहमेव तत्त्वं नैशतमःप्रायमोहमिहिरोऽहम् ॥ ११३ ॥
ओजोऽहमोषधीनामोतप्रोतायमानभुवनोऽहम् ।
ओंकारसारसोल्लसदात्मसुखामोदमत्तभृंगोऽहम् ॥ ११४ ॥
औषधमहमशुभानामौपाधिकधर्मजालरहितोऽहम् ।
औदार्यातिशयोऽहं विविधचतुर्वर्गवितरणपरोऽहम् ॥ ११५ ॥
अंकुशमहमखिलानां महत्तया मत्तवारणेंद्राणाम् ।
अंबरमिव विमलोऽहं शंबररिपुजातविकृतिरहितोऽहम् ॥ ११६ ॥
अस्तविकल्पमतीनामस्खलदुपदेशगम्यमानोऽहम् ।
अस्थिरसुखविमुखोऽहं सुस्थिरसुखबोधसंपदुचितोऽहम् ॥ ११७ ॥
करुणारसभरितोऽहं कवलितकमलासनादिलोकोऽहम् ।
कलुषाकृतिरहितोऽहं कल्मषसुकृतोपलेपरहितोऽहम् ॥ ११८ ॥
खानामगोचरोऽहं खातीतोऽहं खपुष्पभवगोऽहम् ।
खलजनदुरासदोऽहं खंडज्ञानापनोदनपरोऽहम् ॥ ११९ ॥
गलितद्वैतकथोऽहं देहीभवदखिलमूलहृदयोऽहम् ।
गन्तव्योऽहमनीहैर्गत्यागतिरहितपूर्णबोधोऽहम् ॥ १२० ॥
घनतरविमोहतिमिरप्रकरप्रध्वंसभानुनिकरोऽहम् ।
घटिकावासररजनीवत्सरयुगकल्पकालभेदोऽम् ॥ १२१ ॥
चरदचरदात्मकोऽहं चतुरमतिश्लाघनीयचरितोऽहम् ।
चपलजनदुर्गमोऽहं चंचलभवजलधिपारदेशोऽहम् ॥ १२२ ॥
छंदस्सिंधुनिगूढज्ञानसुखास्वादमोदमानोऽहम् ।
छलपदविहितमतीनां छन्नोऽहं शान्तिमार्गगम्योऽहम् ॥ १२३ ॥
जलजासनादिगोचरपंचमहाभूतमूलभूतोऽहम् ।
जगदानंदकरोऽहं जन्मजरामरणरोगरहितोऽहम् ॥ १२४ ॥

झंकृतिहुंकृतिशिंजितबृंहितमुखविविधनादभेदोऽहम् ।
झटितिघटितात्मवेदनदीपपरिस्फुरितहृदयभवनोऽहम् ॥ १२५ ॥
ज्ञानमहं ज्ञेयमहं ज्ञाताऽहं ज्ञानसाधनगणोऽहम् ।
ज्ञातृज्ञानज्ञेयविनाकृतमस्तित्वमात्रमेवाहम् ॥ १२६ ॥
तत्त्वातीतपदोऽहं तनुरहमस्मीतिभावरहितोऽहम् ।
तामसदुरधिगमोऽहं तत्त्वंपदबोधबोध्यहृदयोऽहम् ॥ १२७ ॥
दैवतदैत्यनिशाचरमानवतिर्यङ्महीधरादिरहम् ।
देहेंद्रियरहितोऽहं दक्षिणपूर्वादिदिग्विभागोऽहम् ॥ १२८ ॥
धर्माधर्ममयोऽहं धर्माधर्मादिबंधरहितोऽहम् ।
धार्मिकजनसुलभोऽहं धन्योऽहं धातुरादिभूतोऽहम् ॥ १२९ ॥
नामादिविरहितोऽहं नरकस्वर्गापवर्गरहितोऽहम् ।
नादान्तवेदितोऽहं नानागमनिखिलविश्वसारोऽहम् ॥ १३० ॥
परजीवभेदबाधकपरमार्थज्ञानशुद्धचित्तोऽहम् ।
प्रकृतिरहं विकृतिरहं परिणतिरहमस्मि भागधेयानाम् ॥ १३१ ॥
फणधरभूधरवारणविग्रहविधृतप्रपंचसारोऽहम् ।
फालतलोदितलोचनपावकपरिभूतपंचबाणोऽहम् ॥ १३२ ॥
बद्धो भवामि नाहं बंधान्मुक्तस्तथापि नैवाहम् ।
बोध्यो भवामि नाहं बोधोऽहं नैव बोधको नाहम् ॥ १३३ ॥
भक्तिरहं भजनमहं भुक्तिरहं भुक्तिमुक्तिरहमेव ।
भूतानुशासनोऽहं भूतभवद्भव्यमूलभूतोऽहम् ॥ १३४ ॥
मान्योऽहमस्मि महतां मंदमतीनाममाननीयोऽहम् ।
मदरागमानमोहितमानसदुर्वासनादुरापोऽहम् ॥ १३५ ॥
यजनयजमानयाजकयागमयोऽहं यमादिरहितोऽहम् ।
यमवरुणयक्षवासवराक्षसमरुदीशवह्निरूपोऽहम् ॥ १३६ ॥
रक्षाविधानशिक्षावीक्षितलीलावलोकमहिमाऽहम् ।

रजनीदिवसविरामस्फुरदनुभूतिप्रमाणसिद्धोऽहम् ॥ १३७ ॥
लक्षणलक्ष्यमयोऽहं लाक्षणिकोऽहं लयादिरहितोऽहम् ।
लाभालाभमयोऽहं लब्धव्यानामलभ्यमानोऽहम् ॥ १३८ ॥
वर्णाश्रमरहितोऽहं वर्णमयोऽहं वरेण्यगण्योऽहम् ।
वाचामगोचरोऽहं वचसामर्थेन गम्यमानोऽहम् ॥ १३९ ॥
शमदमविरहितमनसां शास्त्रशतैरप्यगम्यमानोऽहम् ।
शरणमहमेव विदुषां शकलीकृतविविधसंशयगणोऽहम् ॥ १४० ॥
षड्भावविरहितोऽहं षड्गुणरहितोऽहमहितरहितोऽहम् ।
षट्कोशविरहितोऽहं षट्त्रिंशत्तत्त्वजालरहितोऽहम् ॥ १४१ ॥
संवित्सुखात्मकोऽहं समाधिसंकल्पकल्पवृक्षोऽहम् ।
संसारविरहितोऽहं साक्षात्कारोऽहमात्मविद्यायाः ॥ १४२ ॥
हव्यमहं कव्यमहं हेयोपादेयभावशून्योऽहम् ।
हरिरहमस्मि हरोऽहं विधिरहमेवास्मि कारणं तेषाम् ॥ १४३ ॥
क्षालितकलुषमयोऽहं क्षपितभवक्लेशजालहृदयोऽहम् ।
क्षान्त्याद्यक्षरसुघटितविविधव्यवहारमूलमहमेव ॥ १४४ ॥
बहुभिः किमेभिरुक्तैरहमेवेदं चराचरं विश्वम् ।
शीकरफेनतरंगाः सिंधोरपराणि न खलु वस्तूनि ॥ १४५ ॥
शरणं न भवति जननी न पिता न सुता न सोदरा नान्ये ।
परमं शरणमिदं स्याच्चरणं मम मूर्ध्नि देशिकन्यस्तम् ॥ १४६ ॥
आस्ते देशिकचरणं निरवधिरास्ते तदीक्षणे करुणा ।
आस्ते किमपि तदुक्तं किमतः परमास्ति जन्मसाफल्यम् ॥१४७॥
कारुण्यसारसान्द्राः कांक्षितवरदानकल्पकविशेषाः ।
श्रीगुरुचरणकटाक्षाः शिशिराः शमयन्ति चित्तसंतापम् ॥ १४८ ॥
कवलितचंचलचेतोगुरुतरमंडूकजातपरितोषा ।
शेते हृदयगुहायां चिरतरमेकैव चिन्मयी भुजगी ॥ १४९ ॥

मयि सुखबोधपयोधौ महति ब्रह्मांडबुद्बुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा पुनस्तिरोधत्ते ॥ १५० ॥
गुरुकरुणयैव नावा प्राक्तनभाग्यानुकूलमारुतया ।
दुस्सहदुःखतरंगैस्तुंगः संसारसागरस्तीर्णः ॥ १५१ ॥
सति तमसि मोहरूपे विश्वमपश्यं तदेतदित्यखिलम् ।
उदितवति बोधभानौ किमपि न पश्यामि किं न्विदं चित्रम् ॥१५२॥
इत्यात्मबोधलाभं मुहुरनुचिंत्य प्रमोदमानेन ।
प्रारब्धकर्मणोऽन्ते परं पदं प्राप्यते हि कैवल्यम् ॥ १५३ ॥
मोहांधकारहरणं संसारोद्वेलसागरोत्तरणम् ।
स्वात्मनिरूपणमेतत्प्रकरणमंतर्विचिंत्यतां सद्भिः ॥ १५४ ॥

॥ इति स्वात्मनिरूपणं संपूर्णम् ॥

॥ अद्वैतानुभूतिः ॥

अहमानंदसत्यादिलक्षणः केवलः शिवः ।
सदानंदादिरूपं यत्तेनाहमचलोऽद्वयः ॥ १ ॥
अक्षिदोषाद्यथैकोऽपि द्वयवद्भाति चंद्रमाः ।
एकोऽप्यात्मा तथा भाति द्वयवन्मायया मृषा ॥ २ ॥
अक्षिदोषविहीनानामेक एव यथा शशी ।
मायादोषविहीनानामात्मैवैकस्तथा सदा ॥ ३ ॥
द्वित्वं भात्यक्षिदोषेण चंद्रे स्वे मायया जगत् ।
द्वित्वं मृषा यथा चंद्रे मृषा द्वैतं तथाऽऽत्मनि ॥ ४ ॥
आत्मनः कार्यमाकाशो विनात्मानं न संभवेत् ।
कार्यस्य पूर्णता सिद्धा किं पुनः पूर्णतात्मनः ॥ ५ ॥
कार्यभूतो यथाकाश एक एव नहि द्विधा ।
हेतुभूतस्तथात्मायमेक एव विजानतः ॥ ६ ॥
एकोऽपि द्वयवद्भाति यथाकाश उपाधितः ॥ ७ ॥
कारणोपाधिचैतन्यं कार्यसंस्थाच्चितोऽधिकम् ।
न घटाभ्रान्मृदाकाशः कुत्रचिन्नाधिको भवेत् ॥ ८ ॥
निर्गतोपाधिराकाश एक एव यथा भवेत् ।
एक एव तथात्मायं निर्गतोपाधिकः सदा ॥ ९ ॥
आकाशादन्य आकाश आकाशस्य यथा नहि ।
एकत्वादात्मनो नान्य आत्मा सिध्यति चात्मनः ॥ १० ॥
मेघयोगाद्यथा नीरं करकाकारतामियात् ।
मायायोगात्तथैवात्मा प्रपंचाकारतामियात् ॥ ११ ॥
वर्षोपल इवाभाति नीरमेवाभ्रयोगतः ।
वर्षोपलविनाशेन नीरनाशो यथा नहि ॥ १२ ॥

आत्मैवायं तथा भाति मायायोगात्प्रपंचवत् ।
प्रपंचस्य विनाशेन स्वात्मनाशो नहि क्वचित् ॥ १३ ॥
जलादन्य इवाभाति जलोत्थो बुद्बुदो यथा ।
तथात्मनः पृथगिव प्रपंचोऽयमनेकधा ॥ १४ ॥
यथा बुद्बुदनाशेन जलनाशो न कर्हिचित् ।
तथा प्रपंचनाशेन नाशः स्यादात्मनो न हि ॥ १५ ॥
अहिनिर्ल्वयनीजातः शुच्यादिर्नाहिमाप्नुयात् ।
तथा स्थूलादिसंभूतः शुच्यादिर्नाप्नुयादिमम् ॥ १६ ॥
त्यक्तां त्वचमहिर्यद्वदात्मत्वेन न मन्यते ।
आत्मत्वेन सदा ज्ञानी त्यक्तदेहत्रयं तथा ॥ १७ ॥
अहिनिर्ल्वयनीनाशादहेर्नाशो यथा नहि ।
देहत्रयविनाशेन नात्मनाशस्तथा भवेत् ॥ १८ ॥
तक्रादिलवणोपेतमज्ञैर्लवणवद्यथा ।
आत्मा स्थूलादिसंयुक्तो दृष्यते स्थूलकादिवत् ॥ १९ ॥
अयःकाष्ठादिकं यद्वद्वह्निवद्वह्नियोगतः ।
भाति स्थूलादिकं सर्वमात्मवत्स्वात्मयोगतः ॥ २० ॥
दाहको नैव दाह्यं स्याद्दाह्यं तद्वन्न दाहकः ।
नैवात्मायमनात्मा स्यादनात्मायं न चात्मकः ॥ २१ ॥
प्रमेयादित्रयं सार्धं भानुना घटकुडयवत् ।
येन भाति स एवाहं प्रमेयादिविलक्षणः ॥ २२ ॥
भानुस्फुरणतो यद्वत्स्फुरतीव घटादिकम् ।
स्फुरतीव प्रमेयादिरात्मस्फुरणतस्तथा ॥ २३ ॥
पिष्टादिर्गुलसंपर्काद्गुलवत्प्रीतिमान्यथा ।
आत्मयोगात्प्रमेयादिरात्मवत्प्रीतिमान्भवेत् ॥ २४ ॥
घटनीरान्नपिष्टानामुष्णत्वं वह्नियोगतः ।

वह्निं विना कथं तेषामुष्णता स्याद्यथा क्वचित् ॥ २५ ॥
भूतभौतिकदेहानां स्फूर्तिता स्वात्मयोगतः ।
विनात्मानं कथं तेषां स्फूर्तिता स्यात्तथा क्वचित् ॥ २६ ॥
नानाविधेषु कुंभेषु वसत्येकं नभो यथा ।
नानाविधेषु देहेषु तद्वदेको वसाम्यहम् ॥ २७ ॥
नानाविधत्वं कुंभानां न यात्येव यथा नभः ।
नानाविधत्वं देहानां तद्वदेव न याम्यहम् ॥ २८ ॥
यथा घटेषु नष्टेषु घटाकाशो न नश्यति ।
तथा देहेषु नष्टेषु नैव नश्यामि सर्वगः ॥ २९ ॥
उत्तमादीनि पुष्पाणि वर्तन्ते सूत्रके यथा ।
देहा वर्तन्ते मयि सर्वदा ॥ ३० ॥
यथा न संस्पृशेत्सूत्रं पुष्पाणामुत्तमादिता ।
तथा नैकं सर्वगं मां देहानामुत्तमादिता ॥ ३१ ॥
पुष्पेषु तेषु नष्टेषु यद्वत्सूत्रं न नश्यति ।
तथा देहेषु नष्टेषु नैव नश्याम्यहं सदा ॥ ३२ ॥
पर्यंकरज्जुरंध्रेषु नानेवैकापि सूर्यभा ।
एकोऽप्यनेकवद्भाति तथा क्षेत्रेषु सर्वगः ॥ ३३ ॥
रज्जुरंध्रस्थदोषादि सूर्यभां न स्पृशेद्यथा ।
तथा क्षेत्रस्थदोषादि सर्वगं मां न संस्पृशेत् ॥ ३४ ॥
तद्रज्जुरंध्रनाशेषु नैव नश्यति सूर्यभा ।
तथा क्षेत्रविनाशेषु नैव नश्यामि सर्वगः ॥ ३५ ॥
देहो नाहं प्रदृश्यत्वाद्भौतिकत्वान्न चेंद्रियम् ।
प्राणो नाहमनेकत्वान्मनो नाहं चलत्वतः ॥ ३६ ॥
बुद्धिर्नाहं विकारित्वात्तमो नाहं जडत्वतः ।
देहेंद्रियादिकं नाहं विनाशित्वाद्घटादिवत् ॥ ३७ ॥

देहेंद्रियप्राणमनोबुद्ध्यज्ञानानि भासयन् ।
अहंकारं तथा भामि चैतेषामभिमानिनम् ॥ ३८ ॥
सर्वं जगदिदं नाहं विषयत्वादिदं धियः ।
अहं नाहं सुषुप्त्यादौ अहमः साक्षितः सदा ॥ ३९ ॥
सुप्तौ यथा निर्विकारस्तथावस्थाद्वयेऽपि च ।
द्वयोर्मात्राभियोगेन विकारीव विभाम्यहम् ॥ ४० ॥
उपाधिनीलरक्ताद्यैः स्फटिको नैव लिप्यते ।
तथात्मा कोशजैः सर्वैः कामाद्यैर्नैव लिप्यते ॥ ४१ ॥
कालेन भ्राम्यमाणेन भ्रमतीव यथा मही ।
अगोऽप्यात्मा विमूढेन चलतीव प्रदृश्यते ॥ ४२ ॥
देहत्रयमिदं नित्यमात्मत्वेनाभिमन्यते ।
यावत्तावदयं मूढो नानायोनिषु जायते ॥ ४३ ॥
निद्रादेहजदुःखादि जाग्रद्देहं न संस्पृशेत् ।
जाग्रद्देहजदुःखादिस्तथात्मानं न संस्पृशेत् ॥ ४४ ॥
जाग्रद्देहवदाभाति निद्रादेहस्तु निद्रया ।
निद्रादेहविनाशेन जाग्रद्देहो न नश्यति ॥ ४५ ॥
तथायमात्मवद्भाति जाग्रद्देहस्तु जागरात् ।
जाग्रद्देहविनाशेन नात्मा नश्यति कर्हिचित् ॥ ४६ ॥
हित्वायं स्वाप्निकं देहं जाग्रद्देहमपेक्षते ।
जाग्रद्देहप्रबुद्धोऽहं हित्वाऽऽत्मानं यथा तथा ॥ ४७ ॥
स्वप्नभोगे यथैवेच्छा प्रबुद्धस्य न विद्यते ।
असत्स्वर्गादिके भोगे नैवेच्छा ज्ञानिनस्तथा ॥ ४८ ॥
भोक्त्रा बहिर्यथा भोग्यः सर्पो दृषदि कल्पितः ।
रूपशीलादयश्चाल्पभोगा भोग्यस्वरूपकाः ॥ ४९ ॥
ज्ञस्य नास्त्येव संसारो यद्वदज्ञस्य कर्मिणः ।

जानतो नैव भीर्यद्वद्रज्जुसर्पमजानतः ॥ ५० ॥
सैंधवस्य घनो यद्वज्जलयोगाज्जलं भवेत् ।
स्वात्मयोगात्तथा बुद्धिरात्मैव ब्रह्मवेदिनः ॥ ५१ ॥
तोयाश्रयेषु सर्वेषु भानुरेकोऽप्यनेकवत् ।
एकोऽप्यात्मा तथा भाति सर्वक्षेत्रेष्वनेकवत् ॥ ५२ ॥
भानोरन्य इवाभाति जलभानुर्जले यथा ।
आत्मनोऽन्य इवाभासो भाति बुद्धौ तथात्मनः ॥ ५३ ॥
बिंबं विना यथा नीरे प्रतिबिंबो भवेत्कथम् ।
विनात्मानं तथा बुद्धौ चिदाभासो भवेत्कथम् ॥ ५४ ॥
प्रतिबिंबचलत्वाद्या यथा बिंबस्य कर्हिचित् ।
न भवेयुस्तथाऽऽभासकर्तृत्वाद्यास्तु नात्मनः ॥ ५५ ॥
जले शैत्यादिकं यद्वज्जलभानुं न संस्पृशेत् ।
बुद्धेः कर्मादिकं तद्वच्चिदाभासं न संस्पृशेत् ॥ ५६ ॥
बुद्धेः कर्तृत्वभोक्तृत्वदुःखित्वाद्यैस्तु संयुतः ।
चिदाभासो विकारीव शरावस्थांबुभानुवत् ॥ ५७ ॥
शरावस्थोदके नष्टे तत्स्थो भानुर्विनष्टवत् ।
बुद्धेर्लये तथा सुप्तौ नष्टवत्प्रतिभात्ययम् ॥ ५८ ॥
जलस्थार्कं जलं चोर्मिं भासयन्भाति भास्करः ।
आत्माभासं धियं बुद्धेः कर्तृत्वादीनयं तथा ॥ ५९ ॥
मेघावभासको भानुर्मेघच्छन्नोऽवभासते ।
मोहावभासकस्तद्वन्मोहच्छन्नो विभात्ययम् ॥ ६० ॥
भास्यं मेघादिकं भानुर्भासयन्प्रतिभासते ।
तथा स्थूलादिकं भास्यं भासयन्प्रतिभात्ययम् ॥ ६१ ॥
सर्वप्रकाशको भानुः प्रकाश्यैर्नैव दूष्यते ।
सर्वप्रकाशको ह्यात्मा सर्वैस्तद्वन्न दूष्यते ॥ ६२ ॥

मुकुरस्थं मुखं यद्वन्मुखवत्प्रथते मृषा ।
बुद्धिस्थाभासकस्तद्वदात्मवत्प्रथते मृषा ॥ ६३ ॥
मुकुरस्थस्य नाशेन मुखनाशो भवेत्कथम् ।
बुद्धिस्थाभासनाशेन नाशो नैवात्मनः क्वचित् ॥ ६४ ॥
ताम्रकल्पितदेवादिस्ताम्रादन्य इव स्फुरेत् ।
प्रतिभास्यादिरूपेण तथात्मोत्थमिदं जगत् ॥ ६५ ॥
ईशजीवात्मवद्भाति यथैकमपि ताम्रकम् ।
एकोऽप्यात्मा तथैवायमीशजीवादिवन्मृषा ॥ ६६ ॥
यथेश्वरादिनाशेन ताम्रनाशो न विद्यते ।
तथेश्वरादिनाशेन नाशो नैवात्मनः सदा ॥ ६७ ॥
अध्यस्तो रज्जुसर्पोऽयं सत्यवद्रज्जुसत्तया ।
तथा जगदिदं भाति सत्यवत्स्वात्मसत्तया ॥ ६८ ॥
अध्यस्ताहेरभावेन रज्जुरेवावशिष्यते ।
तथा जगदभावेन सदात्मैवावशिष्यते ॥ ६९ ॥
स्फटिके रक्तता यद्वदुपाधेर्नीलतांबरे ।
यथा जगदिदं भाति तथा सत्यमिवाद्वये ॥ ७० ॥
स्फटिके रक्तता मिथ्या मृषा खे नीलता यथा ।
तथा जगदिदं मिथ्या एकस्मिन्नद्वये मयि ॥ ७१ ॥
जीवेश्वरादिभावेन भेदं पश्यति मूढधीः ।
निर्भेदे निर्विशेषेऽस्मिन्कथं भेदो भवेद्ध्रुवम् ॥ ७२ ॥
लिंगस्य धारणादेव शिवोऽयं जीवतां व्रजेत् ।
लिंगनाशे शिवस्यास्य जीवतावेशता कुतः ॥ ७३ ॥
शिव एव सदा जीवो जीव एव सदा शिवः ।
वेत्त्यैक्यमनयोर्यस्तु स आत्मज्ञो न चेतरः ॥ ७४ ॥
क्षीरयोगाद्यथा नीरं क्षीरवद्दृश्यते मृषा ।

आत्मयोगादनात्मायमात्मवद्दृश्यते तथा ॥ ७५ ॥
नीरात्क्षीरं पृथक्कृत्य हंसो भवति नान्यथा ।
स्थूलादेः संपृथक्कृत्य मुक्तो भवति नान्यथा ॥ ७६ ॥
क्षीरनीरविवेकज्ञो हंस एव न चेतरः ।
आत्मानात्मविवेकज्ञो यतिरेव न चेतरः ॥ ७७ ॥
अध्यस्तचोरजः स्थाणोर्विकारः स्यान्नहि क्वचित् ।
नात्मनो निर्विकारस्य विकारो विश्वजस्तथा ७८ ॥
ज्ञाते स्थाणौ कुतश्चोरश्चोराभावे भयं कुतः ।
ज्ञाते स्वस्मिन्कुतो विश्वं विश्वाभावे कुतोऽखिलम् ॥ ७९ ॥
गुणवृत्तित्रयं भाति परस्परविलक्षणम् ।
सत्यात्मलक्षणे यस्मिन्स एवाहं निरंशकः ॥ ८० ॥
देहत्रयमिदं भाति यस्मिन्ब्रह्मणि सत्यवत् ।
तदेवाहं परं ब्रह्म देहत्रयविलक्षणम् ॥ ८१ ॥
जाग्रदादित्रयं यस्मिन्प्रत्यगात्मनि सत्यवत् ।
स एवाहं परं ब्रह्म जाग्रदादिविलक्षणः ॥ ८२ ॥
विश्वादिकत्रयं यस्मिन्परमात्मनि सत्यवत् ।
स एव परमात्माहं विश्वादिकविलक्षणः ॥ ८३ ॥
विराडादित्रयं भाति यस्मिन्साक्षिणि सत्यवत् ।
स एव सच्चिदानंदलक्षणोऽहं स्वयंप्रभः ॥ ८४ ॥

इति अद्वैतानुभूतिः संपूर्णा ॥

॥ दशश्लोकी ॥

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेंद्रियं वा न तेषां समूहः ।
अनैकांतिकत्वात्सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि ।
अनात्माश्रयाहंममाध्यासहाना-
त्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥

न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति ।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ३ ॥

न सांख्यं न शैवं न तत्पांचरात्रं
न जैनं न मीमांसकादेर्मतं वा ।
विशिष्टानुभूत्या विशुद्धात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ४ ॥

न चोर्ध्वं न चाधो न चांतर्न बाह्यं
न मध्यं न तिर्यङ् न पूर्वाऽपरा दिक् ।
वियद्व्यापकत्वादखंडैकरूप-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम ॥ ५ ॥

न शुक्लं न कृष्णं न रक्तं न पीतं
न कुब्जं न पीतं न ह्रस्वं न दीर्घम् ।
अरूपं तथा ज्योतिराकारकत्वात्

तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ६ ॥
न शास्ता न शास्त्रं न शिष्यो न शिक्षा
न च त्वं न चाहं न चायं प्रपंचः ।
स्वरूपावबोधो विकल्पासहिष्णु-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ७ ॥
न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्याऽऽत्मकत्वात्त्रयाणां तुरीय-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ८ ॥
अपि व्यापकत्वाद्धि तत्त्वप्रयोगात्
स्वतस्सिद्धभावादनन्याश्रयत्वात् ।
जगत्तुच्छमेतत्समस्तं तदन्यत्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ९ ॥
न चैकं तदन्यद् द्वितीयं कुतः स्या-
न्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात्
कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥ १० ॥

इति दशश्लोकी समाप्ता ॥

॥ प्रबोधसुधाकरः ॥

॥ देहनिंदाप्रकरणम् ॥

नित्यानंदैकरसं सच्चिन्मात्रं स्वयंज्योतिः ।
पुरुषोत्तममजमीशं वन्दे श्रीयादवाधीशम् ॥ १ ॥
यं वर्णयितुं साक्षाच्छ्रुतिरपि मूकेव मौनमाचरति ।
सोऽस्माकं मनुजानां किं वाचां गोचरो भवति ॥ २ ॥
यद्यप्येवं विदितं तथापि परिभाषितो भवेदेव ।
अध्यात्मशास्त्रसारैर्हरिचिंतनकीर्तनाभ्यासैः ॥ ३ ॥
क्लृप्तैर्बहुभिरुपायैरभ्यासज्ञानभक्त्याद्यैः ।
पुंसो विना विरागं मुक्तेरधिकारिता न स्यात् ॥ ४ ॥
वैराग्यमात्मबोधो भक्तिश्चेति त्रयं गदितम् ।
मुक्तेः साधनमादौ तत्र विरागो वितृष्णता प्रोक्ता ॥ ५ ॥
सा चाहंममताभ्यां प्रच्छन्ना सर्वदेहेषु ।
तत्राहंता देहे ममता भार्यादिविषयेषु ॥ ६ ॥
देहः किमात्मकोऽयं कः संबंधोऽस्य वा विषयैः ।
एवं विचार्यमाणेऽहंताममते निवर्तेते ॥ ७ ॥
स्त्रीपुंसोः संयोगात्संपाते शुक्रशोणितयोः ।
प्रविशञ्जीवः शनकैः स्वकर्मणा देहमाधत्ते ॥ ८ ॥
मातृगुरूदरदर्यां कफमूत्रपुरीषपूर्णायाम् ।
जठराग्निज्वालाभिर्नवमासं पच्यते जंतुः ॥ ९ ॥
दैवात्प्रसूतिसमये शिशुस्तिरश्चीनतां यदा याति ।
शस्त्रैर्विखंडय स तदा बहिरिह निष्कास्यतेऽतिबलात् ॥ १० ॥
अथवा यंत्रच्छिद्राद्यदा तु निःसार्यते प्रबलैः ।
प्रसवसमीरैश्च तदा यः क्लेशः सोऽप्यनिर्वाच्यः ॥ ११ ॥

आधिव्याधिवियोगात्मीयविपत्कलहदीर्घदारिद्र्यैः ।
जन्मानंतरमपि यः क्लेशः किं शक्यते वक्तुम् ॥ १२ ॥
नरपशुविहंगतिर्यग्योनीनां चतुरशीतिलक्षाणाम् ।
कर्मनिबद्धो जीवः परिभ्रमन्यातना भुंक्ते ॥ १३ ॥
चरमस्तत्र नृदेहस्तत्रोज्जन्मान्वयोत्पत्तिः ।
स्वकुलाचारविचारः श्रुतिप्रचारश्च तत्रापि ॥ १४ ॥
आत्मानात्मविवेको नो देहस्य च विनाशिताज्ञानम् ।
एवं सति स्वमायुः प्राज्ञैरपि नीयते मिथ्या ॥ १५ ॥
आयुःक्षणलवमात्रं न लभ्यते हेमकोटिभिः क्वापि ।
तच्चेद्गच्छति सर्वं मृषा ततः काधिका हानिः ॥ १६ ॥
नरदेहातिक्रमणात्प्राप्तौ पश्वादिदेहानाम् ।
स्वतनोरप्यज्ञाने परमार्थस्यात्र का वार्ता ॥ १७ ॥
सततं प्रवाह्यमानैर्वृषभैरश्वैः खरैर्गजैर्महिषैः ।
हा कष्टं क्षुत्क्षामैः श्रांतैर्नो शक्यते वक्तुम् ॥ १८ ॥
रुधिरत्रिधातुमज्जामेदोमांसास्थिसंहतिर्देहः ।
स बहिस्त्वचा पिनद्धस्तस्मान्नो भक्ष्यते काकैः ॥ १९ ॥
नासाग्राद्वदनाद्वा कफं मलं पायुतो विसृजन् ।
स्वयमेवैति जुगुप्सामंतः प्रसृतं च नो वेत्ति ॥ २० ॥
पथि पतितमस्थि दृष्ट्वा स्पर्शभयादन्यमार्गतो याति ।
नो पश्यति निजदेहं चास्थिसहस्रावृतं परितः ॥ २१ ॥
केशावधिनखराग्रादिदमंतः पूतिगंधसंपूर्णम् ।
बहिरपि चागरुचंदनकर्पूराद्यैर्विलेपयति ॥ २२ ॥
यत्नादस्य पिधत्ते स्वाभाविकदोषसंघातम् ।
औपाधिकगुणनिवहं प्रकाशयञ्श्लाघते मूढः ॥ २३ ॥
क्षतमुत्पन्नं देहे यदि न प्रक्षाल्यते त्रिदिनम् ।

तत्रोत्पतन्ति बहवः कृमयो दुर्गंधसंकीर्णाः ॥ २४ ॥
यो देहः सुप्तोऽभूत्सुपुष्पशय्योपशोभिते तल्पे ।
संप्रति स रज्जुकाष्ठैर्नियंत्रितः क्षिप्यते वह्नौ ॥ २५ ॥
सिंहासनोपविष्टं दृष्ट्वा यं मुदमवाप लोकोऽयम् ।
तं कालाकृष्टतनुं विलोक्य नेत्रे निमीलयति ॥ २६ ॥
एवंविधोऽतिमलिनो देहो यत्सत्तया चलति ।
तं विस्मृत्य परेशं वहत्यहंतामनित्येऽस्मिन् ॥ २७ ॥
क्वात्मा सच्चिद्रूपः क मांसरुधिरास्थिनिर्मितो देहः ।
इति यो लज्जति धीमानितरशरीरं स किं मनुते ॥ २८ ॥

विषयनिंदाप्रकरणम् ।

मूढः कुरुते विषयजकर्दमसंमार्जनं मिथ्या ।
दूरदृष्टवृष्टिविरसो देहो गेहं पतत्येव ॥ २९ ॥
भार्या रूपविहीना मनसः क्षोभाय जायते पुंसाम् ।
अत्यंतं रूपाढ्या सा परपुरुषैर्वशीक्रियते ॥ ३० ॥
यः कश्चित्परपुरुषो मित्रं भृत्योऽथवा भिक्षुः ।
पश्यति हि साभिलाषं विलक्षणोदाररूपवतीम् ॥ ३१ ॥
यं कंचित्पुरुषवरं स्वभर्तुरतिसुंदरं दृष्ट्वा ।
मृगयति किं न मृगाक्षी मनसेव परस्त्रियं पुरुषः ॥ ३२ ॥
एवं सुरूपनार्या भर्ता कोपात्प्रतिक्षणं क्षीणः ।
नो लभते सुखलेशं बलिमिव बलिभुग्बहुष्वेकः ॥ ३३ ॥
वनिता नितांतमज्ञा स्वाज्ञामुल्लंघ्य वर्तते यदि सा ।
शत्रोरप्यधिकतरा पराभिलाषिण्यसौ किमुत ॥ ३४ ॥
लोको नापुत्रस्यास्तीति श्रुत्यास्य कः प्रभाषितो लोकः ।
मुक्तिः संसरणं वा तदन्यलोकोऽथवा नाद्यः ॥ ३५ ॥
सर्वेऽपि पुत्रभाजस्तन्मुक्तौ संसृतिर्भवति ।

श्रवणादयोऽप्युपाया मृषा भवेयुस्तृतीयेऽपि ॥ ३६ ॥
तत्प्राप्त्युपायसत्त्वाद्द्वितीयपक्षेऽप्यपुत्रस्य ।
पुत्रेष्ट्यादिकयागप्रवृत्तये वेदवादोऽयम् ॥ ३७ ॥
नानाशरीरकष्टैर्धनव्ययैः साध्यते पुत्रः ।
उत्पन्नमात्रपुत्रे जीवितचिंता गरीयसी तस्य ॥ ३८ ॥
जीवन्नपि किं मूर्खः प्राज्ञः किंवा सुशीलभाग्भविता ।
जारश्चौरः पिशुनः पतितो द्यूतप्रियः क्रूरः ॥ ३९ ॥
पितृमातृबंधुघाती मनसः खेदाय जायते पुत्रः ।
चिंतयति तातनिधनं पुत्रो द्रव्याद्यधीशताहेतोः ॥ ४० ॥
सर्वगुणैरुपपन्नः पुत्रः कस्यापि कुत्रचिद्भवति ।
सोऽल्पायू रुग्णो वा ह्यनपत्यो वा तथापि खेदाय ॥ ४१ ॥
पुत्रात्सद्गतिरिति चेत्तदपि प्रायोऽस्ति युक्त्यसहम् ।
इत्थं शरीरकष्टैर्दुःखं संप्रार्थ्यते मूढैः ॥ ४२ ॥
पितृमातृबंधुभगिनीपितृव्यजामातृमुख्यानाम् ।
मार्गस्थानामिव युतिरनेकयोनिभ्रमात्क्षणिका ॥ ४३ ॥
दैवं यावद्विपुलं यावत्प्रचुरः परोपकारश्च ।
तावत्सर्वे सुहृदो व्यत्ययतः शत्रवः सर्वे ॥ ४४ ॥
अश्नन्ति चेदनुदिनं बंदिन इव वर्णयन्ति संतृप्ताः ।
तच्चेद्द्वित्रदिनांतरमभिनिंदंतः प्रकुप्यन्ति ॥ ४५ ॥
दुर्भरजठरनिमित्तं समुपार्जयितुं प्रवर्तते चित्तम् ।
लक्षावधि बहुवित्तं तथाप्यलभ्यं कपर्दिकामात्रम् ॥ ४६ ॥
लब्धश्चेदधिकोऽर्थः पत्न्यादीनां भवेत्स्वार्थैः ।
नृपचौरतोऽप्यनर्थस्तस्माद्द्रव्योद्यमो व्यर्थः ॥ ४७ ॥
अन्यायमर्थभाजं पश्यति भूतोऽध्वगामिनं चौरः ।
पिशुनो व्यसनप्राप्तिं दायादानां गणः कलहम् ॥ ४८ ॥

पातकभरैरनेकैरर्थं समुपार्जयन्ति राजानः ।
अश्वमतंगजहेतोः प्रतिक्षणं नाश्यते सोऽर्थः ॥ ४९ ॥
राज्यांतराभिगमनाद्रणभंगान्मंत्रिभृत्यदोषाद्वा ।
विषशस्त्रगुप्तघातान्मग्नाश्चिंतार्णवे भूपाः ॥ ५० ॥

मनोनिंदाप्रकरणम् ।

हसति कदाचिद्रौति भ्रांतं सदृश दिशो भ्रमति ।
हृष्टं कदापि रुष्टं शिष्टं दुष्टं च निंदति स्तौति ॥ ५१ ॥
किमपि द्वेष्टि सरोषं ह्यात्मानं श्लाघते कदाचिदपि ।
चित्तं पिशाचमभवद्राक्षस्या तृष्णया व्याप्तम् ॥ ५२ ॥
दंभाभिमानलोभैः कामक्रोधोरुमत्सरैश्चेतः ।
आकृष्यते संमताच्छ्वभिरिव पतितास्थिवन्मार्गे ॥ ५३ ॥
तस्माच्छुद्धविरागो मनोऽभिलषितं त्यजेदर्थम् ।
तदनभिलषितं कुर्यान्निर्व्यापारं ततो भवति ॥ ५४ ॥

विषयनिग्रहप्रकरणम् ।

संसृतिपारावारे ह्यगाधविषयोदकेन संपूर्णे ।
नृशरीरमंबुतरणं कर्मसमीरैरितस्ततश्चलति ॥ ५५ ॥
छिद्रैर्नवभिरुपेतं जीवो नौकापतिर्महानलसः ।
छिद्राणामनिरोधाज्जलपरिपूर्णं पतत्यधः सततम् ॥ ५६ ॥
छिद्राणां तु निरोधात्सुखेन पारं परं याति ।
तस्मादिंद्रियनिग्रहमृते न कश्चित्तरत्यनृतम् ॥ ५७ ॥
पश्यति परस्य युवतिं सकाममपि तन्मनोरथं कुरुते ।
ज्ञात्वैव तदप्राप्तिं व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ५८ ॥
पिशुनैः प्रकाममुदितां परस्य निंदां शृणोति कर्णाभ्याम् ।
तेन परः किं म्रियते व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ५९ ॥
अनृतं परापवादं रसना वदति प्रतिक्षणं तेन ।

परहानिर्लब्धिः का व्यर्थं मनुजोऽतिपापभाग्भवति ॥ ६० ॥
विषयेंद्रिययोर्योगे निमेषसमयेन यत्सुखं भवति ।
विषये नष्टे दुःखं यावज्जीवं च तत्तयोर्मध्ये ॥ ६१ ॥
हेयमुपादेयं वा प्रविचार्य सुनिश्चितं तस्मात् ।
अल्पसुखस्य त्यागादनल्पदुःखं जहाति सुधीः ॥ ६२ ॥
धीवरदत्तमहामिषमश्नन्वैसारिणो म्रियते ।
तद्वद्विषयान्भुंजन्कालाकृष्टो नरः पतति ॥ ६३ ॥
उरगग्रस्तार्धतनुर्भेकोऽश्नातीह मक्षिकाः शतशः ।
एवं गतायुरपि सन्विषयान्समुपार्जयत्यंधः ॥ ६४ ॥

मनोनिग्रहप्रकरणम्

स्वीयोद्गमतोयवहा सागरमुपयाति नीचमार्गेण ।
सा चेदुद्गम एव स्थिरा सती किं न याति वार्धित्वम् ॥ ६५ ॥
एवं मनः स्वहेतुं विचारयत्सुस्थिरं भवेदंतः ।
न बहिर्वोदेति तदा किं नात्मत्वं स्वयं याति ॥ ६६ ॥
वर्षास्वंभःप्रचयात्कूपे गुरुनिर्झरे पयः क्षारम् ।
ग्रीष्मेणैव तु शुष्के माधुर्यं भजति तत्रांभः ॥ ६७ ॥
तद्वद्विषयोद्रिक्तं तमःप्रधानं मनः कलुषम् ।
तस्मिन्विरागशुष्के शनकैराविर्भवेत्सत्त्वम् ॥ ६८ ॥
यं विषयमपि लषित्वा धावति बाह्येंद्रियद्वारा ।
तस्याप्राप्तौ खिद्यति तथा यथा स्वं गतं किंचित् ॥ ६९ ॥
नगनगरदुर्गदुर्गमसरितः परितः परिभ्रमच्चेतः ।
यदि नो लभते विषयं विषयंत्रितमिव खिन्नमायाति ॥ ७० ॥
तुंबीफलं जलांतर्बलादधः क्षिप्तमप्युपैत्यूर्ध्वम् ।
तद्वन्मनः स्वरूपे निहितं यत्नाद्बहिर्याति ॥ ७१ ॥
इह वा पूर्वभवे वा स्वकर्मणैवार्जितं फलं यद्यत् ।

शुभमशुभं वा तत्तद्भोगोऽप्यप्रार्थितो भवति ॥ ७२ ॥
चेतः पशुमशुभपथं प्रधावमानं निराकर्तुम् ।
वैराग्यमेकमुचितं गलकाष्ठं निर्मितं धात्रा ॥ ७३ ॥
निद्रावसरे यत्सुखमेतत्किं विषयजं यस्मात् ।
न हि चेंद्रियप्रदेशावस्थानं चेतसो निद्रा ॥ ७४ ॥
अद्वारतुंगकुड्ये गृहेऽवरुद्धो यथा व्याघ्रः ।
बहुनिर्गमप्रयत्नैः श्रांतस्तिष्ठति पतञ्श्वसंश्च तथा ॥ ७५ ॥
सर्वेंद्रियावरोधादुद्योगशतैरनिर्गमं वीक्ष्य ।
शांतं तिष्ठति चेतो निरुद्यमत्वं तदा याति ॥ ७६ ॥
प्राणस्पंदनिरोधात्सत्संगाद्वासनात्यागात् ।
हरिचरणभक्तियोगान्मनः स्ववेगं जहाति शनैः ॥ ७७ ॥

वैराग्यप्रकरणं

परगृहगृहिणीपुत्रद्रविणानामागमे विनाशे वा ।
कथितौ हर्षविषादौ किंवा स्यातां क्षणं स्थातुः ॥ ७८ ॥
दैवात्स्थितं गतं वा यं कंचिद्विषयमीड्यमल्पं वा ।
नो तुष्यन्न च सीदन्वीक्ष्य गृहेष्वतिथिवन्निवसेत् ॥ ७९ ॥
ममताभिमानशून्यो विषयेषु पराङ्मुखः पुरुषः ।
तिष्ठन्नपि निजसदने न बाध्यते कर्मभिः क्वापि ॥ ८० ॥
कुत्राप्यरण्यदेशे सुनीलतृणवालुकोपचिते ।
शीतलतरुतलभूमौ सुखं शयानस्य पुरुषस्य ॥ ८१ ॥
तरवः पत्रफलाढ्याः सुगंधशीतानिलाः परितः ।
कलकूजितवरविहगाः सरितो मित्राणि किं न स्युः ॥ ८२ ॥
वैराग्यभाग्यभाजः प्रसन्नमनसो निराशस्य ।
अप्रार्थितफलभोक्तुः पुंसो जन्मनि कृतार्थतेह स्यात् ॥ ८३ ॥
द्रव्यं पल्लवतश्च्युतं यदि भवेत्क्वापि प्रमादात्तदा

शोकायाथ तदर्पितं श्रुतवते तोषाय च श्रेयसे ।
स्वातंत्र्याद्विषयाः प्रयान्ति यदमी शोकाय ते स्युश्चिरं
संत्यक्ताः स्वयमेव चेत्सुखमयं निःश्रेयसं तन्वते ॥ ८४ ॥
विस्मृत्यात्मनिवासमुत्कटभवाटव्यां चिरं पर्यट-
न्संतापत्रयदीर्घदावदहनज्वालावलीव्याकुलः ।
वल्गन्फल्गुषु सुप्रदीप्तनयनश्चेतःकुरंगो बला-
दाशापाशवशीकृतोऽपि विषयव्याधैर्मृषा हन्यते ॥ ८५ ॥

आत्मसिद्धिप्रकरणम् ।

उत्पन्नेऽपि विरागे विना प्रबोधं सुखं न स्यात् ।
स भवेद्गुरूपदेशात्तस्माद्गुरुमाश्रयेत्प्रथमम् ॥ ८६ ॥
यद्यपि जलधेरुदकं यद्यपि वा प्रेरकोऽनिलस्तत्र ।
तदपि पिपासाकुलितः प्रतीक्षते चातको मेघम् ॥ ८७ ॥
त्रेधा प्रतीतिरुक्ता शास्त्राद्गुरुतस्तथात्मनस्तत्र ।
शास्त्रप्रतीतिरादौ यद्वन्मधुरो गुडोऽस्तीति ॥ ८८ ॥
अग्रे गुरुप्रतीतिर्दूराद्गुडदर्शनं यद्वत् ।
आत्मप्रतीतिरस्माद्गुडभक्षणजं सुखं यद्वत् ॥ ८९ ॥
रसगंधरूपशब्दस्पर्शा अन्ये पदार्थाश्च ।
कस्मादनुभूयन्ते नो देहान्नेंद्रियग्रामात् ॥ ९० ॥
मृतदेहेंद्रियवर्गो यतो न जानाति दाहजं दुःखम् ।
प्राणश्चेन्निद्रायां तस्करबाधां स किं वेत्ति ॥ ९१ ॥
मनसो यदि वा विषयस्तद्युगपत्किं न जानाति ।
तस्य पराधीनत्वाद्यतः प्रमादस्य कस्त्राता ॥ ९२ ॥
गाढध्वांतगृहांततः क्षितितले दीपं निधायोज्ज्वलं
पंचच्छिद्रमधोमुखं हि कलशं तस्योपरि स्थापयेत् ।
तद्बाह्ये परितोऽनुरंध्रममलां वीणां च कस्तूरिकां

सद्रत्नं व्यजनं न्यसेच्च कलशच्छिद्राध्वनिर्गच्छताम् ॥ ९३ ॥
तेजोंशेन पृथक्पदार्थनिवहज्ञानं हि यज्जायते
तद्रंध्रैः कलशेन वा किमु मृदो भांडेन तैलेन वा ।
किं सूत्रेण न चैतदस्ति रुचिरं प्रत्यक्षबाधादतो
दीपज्योतिरिहैकमेव शरणं देहे तथात्मा स्थितः ॥ ९४ ॥

मायासिद्धिप्रकरणम् ।

चिन्मात्रः परमात्मा ह्यपश्यदात्मानमात्मतया ।
अभवत्सोऽहंनामा तस्मादासीद्विदो मूलम् ॥ ९५ ॥
द्वेधैव भाति तस्मात्पतिश्च पत्नी च तौ भवेतां वै ।
तस्मादयमाकाशस्त्रिधैव परिपूर्यते सततम् ॥ ९६ ॥
सोऽयमपीक्षांचक्रे ततो मनुष्या अजायन्त ।
इत्युपनिषदः प्राहुर्दयितां प्रति याज्ञवल्क्योक्त्या ॥ ९७ ॥
चिरमानंदानुभवात्सुषुप्तिरिव काप्यवस्थाऽभूत् ।
परमात्मनस्तु तस्मात्स्वप्नवदेवोत्थिता माया ॥ ९८ ॥
सदसद्विलक्षणासौ परमात्मसदाश्रयानादिः ।
सा च गुणत्रयरूपा सूते सचराचरं विश्वम् ॥ ९९ ॥
माया तावददृश्या दृश्यं कार्यं कथं जनयेत् ।
तंतुभिरदृश्यरूपैः परोऽत्र दृश्यः कथं भवति ॥ १०० ॥
स्वप्ने सुरतानुभवाच्छुक्रद्रावो यथा शुभे वसने ।
अनृतं रतं प्रबोधे वसनोपहतिर्भवेत्सत्या ॥ १०१ ॥
स्वप्ने पुरुषः सत्यो योषिदसत्या तयोर्युतिश्च मृषा ।
शुक्रद्रावः सत्यस्तद्वत्प्रकृतेऽपि संभवति ॥ १०२ ॥
एवमदृश्या माया तत्कार्यं जगदिदं दृश्यम् ।
माया तावदियं स्याद्या स्वविनाशेन हर्षदा भवति ॥ १०३ ॥
रजनीवातिदुरंता न लक्ष्यतेऽत्र स्वभावोऽस्याः ।

सौदामिनीव नश्यति मुनिभिः संप्रेक्ष्यमाणैव ॥ १०४ ॥
माया ब्रह्मोपगताऽविद्या जीवाश्रया प्रोक्ता ।
चिदचिद्ग्रंथिश्चेतस्तदक्षयं ज्ञेयमा मोक्षात् ॥ १०५ ॥
घटमठकुड्यैरावृतमाकाशं तत्तदाह्वयं भवति ।
तद्वदविद्यावृतमिह चैतन्यं जीव इत्युक्तः ॥ १०६ ॥
ननु कथमावरणं स्यादज्ञानं ब्रह्मणो विशुद्धस्य ।
सूर्यस्येव तमिस्रं रात्रिभवं स्वप्रकाशस्य ॥ १०७ ॥
दिनकरकिरणोत्पन्नैर्मेघैराच्छाद्यते यथा सूर्यः ।
न खलु दीनस्य दिनत्वं तैर्विकृतैः सांद्रसंघातैः ॥ १०८ ॥
अज्ञानेन तथात्मा शुद्धोऽपि च्छाद्यते सुचिरम् ।
न परं तु लोकसिद्धा प्राणिषु तच्चेतनाशक्तिः ॥ १०९ ॥

लिंगदेहादिनिरूपणप्रकरणम् ।

स्थूलशरीरस्यांतर्लिंगशरीरं च तस्यांतः ।
कारणमस्याप्यंतस्ततो महाकारणं तुर्यम् ॥ ११० ॥
स्थूलं निरूपितं प्रागधुना सूक्ष्मादितो ब्रूमः ।
अंगुष्ठमात्रः पुरुषः श्रुतिरिति यत्प्राह तत्सूक्ष्मम् ॥ १११ ॥
सूक्ष्माणि महाभूतान्यसवः पंचेंद्रियाणि पंचैव ।
षोडशमंतःकरणं तत्संघातो हि लिंगतनुः ॥ ११२ ॥
तत्कारणं स्मृतं यत्तस्यांतर्वासनाजालम् ।
तस्य प्रवृत्तिहेतुर्बुद्ध्याश्रयमत्र तुर्यं स्यात् ॥ ११३ ॥
तत्सारभूतबुद्धौ यत्प्रतिफलितं तु शुद्धचैतन्यम् ।
जीवः स उक्त आद्यैर्योऽहमिति स्फूर्तिकृद्वपुषि ॥ ११४ ॥
चरतरतरंगसंगात्प्रतिबिंबं भास्करस्य च चलं स्यात् ।
अस्ति तथा चंचलता चैतन्ये चित्तचांचल्यात् ॥ ११५ ॥
नन्वर्कप्रतिबिंबः सलिलादिषु यः स चावभासयति ।

किमितरपदार्थनिवहं प्रतिबिंबोऽप्यात्मनस्तद्वत् ॥ ११६ ॥
प्रतिफलितं यत्तेजः सवितुः कांस्यादिपात्रेषु ।
तदनु प्रविष्टमंतर्गृहमन्यार्थान्प्रकाशयति ॥ ११७ ॥
चित्प्रतिबिंबस्तद्वद्बुद्धिषु यो जीवतां प्राप्तः ।
नेत्रादींद्रियमार्गैर्बहिरर्थान्सोऽवभासयति ॥ ११८ ॥

अद्वैतप्रकरणम् ।

तदिदं य एवमार्यो वेद ब्रह्माहमस्मीति ।
स इदं सर्वं च स्यात्तस्य हि देवाश्च नेशते भूत्या ॥ ११९ ॥
येषां स भवत्यात्मा योऽन्यामथ देवतामुपास्ते यः ।
अहमन्योऽसावन्यश्चेत्थं यो वेद पशुवत्सः ॥ १२० ॥
इत्युपनिषदामुक्तिस्तथा श्रुतिभर्गवदुक्तिश्च ।
ज्ञानी त्वात्मैवेयं मतिर्ममेत्यत्र युक्तिरपि ॥ १२१ ॥
ऋजु वक्रं वा काष्ठं हुताशदग्धं सदग्नितां याति ।
तत्किं हस्तग्राह्यं ऋजुवक्राकारसत्त्वेऽपि ॥ १२२ ॥
एवं य आत्मनिष्ठो ह्यात्माकारश्च जायते पुरुषः ।
देहीव दृश्यतेऽसौ परं त्वसौ केवलो ह्यात्मा ॥ १२३ ॥
प्रतिफलति भानुरेकोऽनेकशरावोदकेषु यथा ।
तद्वदसौ परमात्मा ह्येकोऽनेकेषु देहेषु ॥ १२४ ॥
दैवादेकशरावे भग्ने किं वा विलीयते सूर्यः ।
प्रतिबिंबचंचलत्वादर्कः किं चंचलो भवति ॥ १२५ ॥
स्वव्यापारं कुरुते यथैकसवितुः प्रकाशेन ।
तद्वच्चराचरमिदं ह्येकात्मसत्तया चलति ॥ १२६ ॥
येनोदकेन कदलीचंपकजात्यादयः प्रवर्धन्ते ।
मूलकपलांडुलशुनास्तेनैवैते विभिन्नरसगंधाः ॥ १२७ ॥
एको हि सूत्रधारः काष्ठप्रकृतीरनेकशो युगपत् ।

स्तंभाग्रपट्टिकायां नर्तयतीह प्रगूढतया ॥ १२८ ॥
गुडखंडशर्कराद्या भिन्नाः स्युर्विकृतयो यथैकेक्षोः ।
केयूरकंकणाद्या यथैकहेम्नो भिदाश्च पृथक् ॥ १२९ ॥
एवं पृथक्स्वभावं पृथगाकारं पृथग्वृत्ति ।
जगदुच्चावचमुच्चैरेकेनैवात्मना चलति ॥ १३० ॥
स्कंधधृतसिद्धमन्नं यावन्नाश्नाति मार्गगस्तावत् ।
स्पर्शभयक्षुत्पीडे तस्मिन्भुक्ते न ते भवतः ॥ १३१ ॥
मानुषमतंगमहिषश्वसूकरादिष्वनुस्यूतम् ।
यः पश्यति जगदीशं स एव भुंक्तेऽद्वयानंदम् ॥ १३२ ॥

कर्तृत्वभोक्तृत्वप्रकरणम् ।

यद्वत्सूर्येऽभ्युदिते स्वव्यवहारं जनः कुरुते ।
तं न करोति विवस्वान्न कारयति तद्वदात्मापि ॥ १३३ ॥
लोहे हुतभुग्व्याप्ते लोहांतरताड्यमानेऽपि ।
तस्यांतर्गतवह्नेः किं स्यान्निर्घातजं दुःखम् ॥ १३४ ॥
निष्ठुरकुठारघातैः काष्ठे संछेद्यमानेऽपि ।
अंतर्वर्ती वह्निः किं घातैश्छेद्यते तद्वत् ॥ १३५ ॥
तनुसंबंधाज्जातैः सुखदुःखैर्लिप्यते नात्मा ।
ब्रूते श्रुतिरपि भूयोऽनश्नन्नन्योऽभिचाकशीत्यादि ॥ १३६ ॥
निशि वेश्मनि प्रदीपे दीप्यति चौरस्तु वित्तमपहरति ।
ईरयति वारयति वा तं दीपः किं तथात्मापि ॥ १३७ ॥
गेहांते दैववशात्कस्मिंश्चित्समुदिते विपन्ने वा ।
दीपस्तुष्यत्यथवा खिद्यति किं तद्वदात्मापि ॥ १३८ ॥

स्वप्रकाशताप्रकरणम् ।

रविचंद्रवह्निदीपप्रमुखाः स्वपरप्रकाशाः स्युः ।
यद्यपि तथाप्यमीभिः प्रकाश्यते क्वापि नैवात्मा ॥ १३९ ॥

चक्षुर्द्वारैव स्यात्परात्मना भानमेतेषाम् ।
यद्वा तेऽपि पदार्था न ज्ञायन्तेऽथ केवलालोकात् ॥ १४० ॥
तत्राप्यक्षिद्वारा सहायभूतो न चेदात्मा ।
नो चेत्सत्यालोके पश्यत्यंधः कथं नार्थान् ॥ १४१ ॥
सत्यात्मन्यपि किं नो ज्ञानं तच्चेंद्रियांतरेण स्यात् ।
अंधे दृक्प्रतिबंधे करसंबंधे पदार्थभानं हि ॥ १४२ ॥
जानाति येन सर्वं केन च तं वा विजानीयात् ।
इत्युपनिषदामुक्तिर्बुध्यत आत्मात्मना तस्मात् ॥ १४३ ॥

नादानुसंधानम् ।

यावत्क्षणं क्षणार्धं स्वरूपपरिचिंतनं क्रियते ।
तावद्दक्षिणकर्णे स्वनाहतः श्रूयते शब्दः ॥ १४४ ॥
सिद्ध्यारंभस्थिरताविश्रमविश्वासबीजशुद्धीनाम् ।
उपलक्षणं हि मनसः परमं नादानुसंधानम् ॥ १४५ ॥
भेरीमृदंगशंखाद्याहतनादे मनः क्षणं रमते ।
किं पुनरनाहतेऽस्मिन्मधुमधुरेऽखंडिते स्वच्छे ॥ १४६ ॥
चित्तं विषयोपरमाद्यथा यथा याति नैश्चल्यम् ।
वेणोरिव दीर्घतरस्तथा तथा श्रूयते नादः ॥ १४७ ॥
नादाभ्यंतर्वर्ति ज्योतिर्यद्वर्तते हि चिरम् ।
तत्र मनो लीनं चेन्न पुनः संसारबंधाय ॥ १४८ ॥
परमानंदानुभवात्सुचिरं नादानुसंधानात् ।
श्रेष्ठश्चित्तलयोऽयं सत्स्वन्यलयेष्वनेकेषु ॥ १४९ ॥

मनोलयः ।

संसारतापतप्तं नानायोनिभ्रमात्परिश्रांतम् ।
लब्ध्वा परमानंदं न चलति चेतः कदा कापि ॥ १५० ॥
अद्वैतानंदभरात्किमिदं कोऽहं च कस्याहम् ।

इति मंथरतां यातं यदा तदा मूर्छितं चेतः ॥ १५१ ॥
चिरतरमात्मानुभवादात्माकारं प्रजायते चेतः ।
सरिदिव सागरयाता समुद्राभावं प्रयात्युच्चैः ॥ १५२ ॥
आत्मन्यनुप्रविष्टं चित्तं नापेक्षते पुनर्विषयान् ।
क्षीरादुद्धृतमाज्यं यथा पुनः क्षीरतां न यातीह ॥ १५३ ॥
दृष्टौ द्रष्टरि दृश्ये यदनुस्यूतं च भानमात्रं स्यात् ।
तत्रोपक्षीणं चेच्चित्तं तन्मूर्छितं भवति ॥ १५४ ॥
याति स्वसंमुखत्वं दृङ्मात्रं वा यदा तदा भवति ।
दृश्यद्रष्टृविभेदो ह्यसंमुखेऽस्मिन्न तद्भवति ॥ १५५ ॥
एकस्मिन्दृङ्मात्रे त्रेधा द्रष्ट्रादिकं हि समुदेति ।
त्रिविधे तस्मिंल्लीने दृङ्मात्रं शिष्यते पश्चात् ॥ १५६ ॥
दर्पणतः प्राक्पश्चादस्ति मुखं प्रतिमुखं तदाभाति ।
आदर्शेऽपि च नष्टे मुखमस्ति मुखे तथैवात्मा ॥ १५७ ॥

प्रबोधः ।

माधुर्यं गुडपिंडे यत्तत्तस्यांशकेऽणुमात्रेऽपि ।
एवं न पृथग्भावो गुडत्वमधुरत्वयोरस्ति ॥ १५८ ॥
अथवा न भिन्नभावः कर्पूरामोदयोरेवम् ।
आत्मस्वरूपमनसां पुंसां जगदात्मतां याति ॥ १५९ ॥
यद्भावानुभवः स्यान्निद्रादौ जागरस्यांते ।
अंतः स चेत्स्थिरः स्याल्लभते हि तदाऽद्वयानंदम् ॥ १६० ॥
अतिगंभीरेऽपारे ज्ञानचिदानंदसागरे स्फारे ।
कर्मसमीरणतरला जीवतरंगावलिः स्फुरति ॥ १६१ ॥
खरतरकरैः प्रदीप्तेऽभ्युदिते चैतन्यतिग्मांशौ ।
स्फुरति मृषैव समंतादनेकविधजीवमृगतृष्णा ॥ १६२ ॥
अंतरदृष्टे यस्मिञ्जगदिदमारात्परिस्फुरति ।

दृष्टे यस्मिन्सकृदपि विलीयते काप्यसद्रूपम् ॥ १६३ ॥
बाह्याभ्यंतरपूर्णः परमानंदार्णवे निमग्नो यः ।
चिरमाप्लुत इव कलशो महाह्रदे जह्नुतनयायाः ॥ १६४ ॥
पूर्णात्पूर्णतरे परात्परतरेऽप्यज्ञातपारे हरौ ।
संवित्स्फारसुधार्णवे विरहिते वीचीतरंगादिभिः ।
भास्वत्कोटिविकासितोज्ज्वलदिगाकाशप्रकाशे परे
स्वानंदैकरसे निमग्नमनसां न त्वं न चाहं जगत् ॥ १६५ ॥

द्विधाभक्तिः ।

चित्ते सत्त्वोत्पत्तौ तडिदिव बोधोदयो भवति ।
तर्ह्येव स स्थिरः स्याद्यदि चित्तं शुद्धिमुपयाति ॥ १६६ ॥
शुध्यति हि नांतरात्मा कृष्णपदांभोजभक्तिमृते ।
वसनमिव क्षारोदैर्भक्त्या प्रक्षाल्यते चेतः ॥ १६७ ॥
यद्वत्समलादर्शे सुचिरं भस्मादिना शुद्धे ।
प्रतिफलति वक्त्रमुच्चैः शुद्धे चित्ते तथा ज्ञानम् ॥ १६८ ॥
जानन्तु तत्र बीजं हरिभक्त्या ज्ञानिनो ये स्युः ।
मूर्तं चैवामूर्तं द्वे एव ब्रह्मणो रूपे ॥ १६९ ॥
इत्युपनिषत्तयोर्वा द्वौ भक्तौ भगवदुपदिष्टौ ।
क्लेशादक्लेशाद्वा मुक्तिः स्यादेतयोर्मध्ये ॥ १७० ॥
स्थूला सूक्ष्मा चेति द्वेधा हरिभक्तिरुद्दिष्टा ।
प्रारंभे स्थूला स्यात्सूक्ष्मा तस्याः सकाशाच्च ॥ १७१ ॥
स्वाश्रमधर्माचरणं कृष्णप्रतिमार्चनोत्सवो नित्यम् ।
विविधोपचारकरणैर्हरिदासैः संगमः शश्वत् ॥ १७२ ॥
कृष्णकथासंश्रवणे महोत्सवः सत्यवादश्च ।
परयुवतौ द्रविणे वा परापवादे पराङ्मुखता ॥ १७३ ॥
ग्राम्यकथासूद्वेगः सुतीर्थगमनेषु तात्पर्यम् ।

यदुपतिकथावियोगे व्यर्थं गतमायुरिति चिंता ॥ १७४ ॥
एवं कुर्वति भक्तिं कृष्णकथानुग्रहोत्पन्ना ।
समुदेति सूक्ष्मभक्तिर्यस्या हरिरंतराविशति ॥ १७५ ॥
स्मृतिसत्पुराणवाक्यैर्यथाश्रुतायां हरेर्मूर्तौ ।
मानसपूजाभ्यासो विजननिवासेऽपि तात्पर्यम् ॥ १७६ ॥
सत्यं समस्तजंतुषु कृष्णस्यावस्थितेर्ज्ञानम् ।
अद्रोहो भूतगणे ततस्तु भूतानुकंपा स्यात् ॥ १७७ ॥
प्रमितयदृच्छालाभे संतुष्टिर्दारपुत्रादौ ।
ममताशून्यत्वमतो निरहंकारत्वमक्रोधः ॥ १७८ ॥
मृदुभाषिता प्रसादो निजनिंदायां स्तुतौ समता ।
सुखदुःखशीतलोष्णद्वंद्वसहिष्णुत्वमापदो न भयम् ॥ १७९ ॥
निद्राहारविहारेष्वनादरः संगराहित्यम् ।
वचने चानवकाशः कृष्णस्मरणेन शाश्वती शांतिः ॥ १८० ॥
केनापि गीयमाने हरिगीते वेणुनादे वा ।
आनंदाविर्भावो युगपत्स्यादष्टसात्त्विकोद्रेकः ॥ १८१ ॥
तस्मिन्ननुभवति मनः प्रगृह्यमाणं परात्मसुखम् ।
स्थिरतां याते तस्मिन्याति मदोन्मत्तदंतिदशाम् ॥ १८२ ॥
जंतुषु भगवद्भावं भगवति भूतानि पश्यति क्रमशः ।
एतादृशी दशा चेत्तदैव हरिदासवर्यः स्यात् ॥ १८३ ॥

ध्यानविधिः ।

यमुनातटनिकटस्थितवृंदावनकानने महारम्ये ।
कल्पद्रुमतलभूमौ चरणं चरणोपरि स्थाप्य ॥ १८४ ॥
तिष्ठन्तं घननीलं स्वतेजसा भासयंतमिह विश्वम् ।
पीतांबरपरिधानं चंदनकर्पूरलिप्तसर्वांगम् ॥ १८५ ॥
आकर्णपूर्णनेत्रं कुंडलयुगमंडितश्रवणम् ।

मंदस्मितमुखकमलं सुकौस्तुभोदारमणिहारम् ॥ १८६ ॥
वलयांगुलीयकाद्यानुज्ज्वलयंतं स्वलंकारान् ।
गलविलुलितवनमालं स्वतेजसापास्तकलिकालम् ॥ १८७ ॥
गुंजारवालिकलितं गुंजापुंजान्विते शिरसि ।
भुंजानं सह गोपैः कुंजांतरवर्तिनं हरिं स्मरत ॥ १८८ ॥
मंदारपुष्पवासितमंदानिलसेवितं परानंदम् ।
मंदाकिनीयुतपदं नमत महानंददं महापुरुषम् ॥ १८९ ॥
सुरभीकृतदिग्वलयं सुरभिशतैरावृतं सदा परितः ।
सुरभीतिक्षपणमहासुरभीमं यादवं नमत ॥ १९० ॥
कंदर्पकोटिसुभवं वांछितफलदं दयार्णवं कृष्णम् ।
त्यक्त्वा कमन्यविषयं नेत्रयुगं द्रष्टुमुत्सहते ॥ १९१ ॥
पुण्यतमामतिसुरसां मनोभिरामां हरेः कथां त्यक्त्वा ।
श्रोतुं श्रवणद्वंद्वं ग्राम्यं कथमादरं भवति ॥ १९२ ॥
दौर्भाग्यमिंद्रियाणां कृष्णे विषये हि शाश्वतिके ।
क्षणिकेषु पापकरणेष्वपि सज्यन्ते यदन्यविषयेषु ॥ १९३ ॥

सगुणनिर्गुणयोरैक्यम् ।

श्रुतिभिर्महापुराणैः सगुणगुणातीतयोरैक्यम् ।
यत्प्रोक्तं गूढतया तदहं वक्ष्येऽतिविशदार्थम् ॥ १९४ ॥
भूतेष्वंतर्यामी ज्ञानमयः सच्चिदानंदः ।
प्रकृतेः परः परात्मा यदुकुलतिलकः स एवायम् ॥ १९५ ॥
ननु सगुणो दृश्यतनुस्तथैकदेशाधिवासश्च ।
स कथं भवेत्परात्मा प्राकृतवद्रागरोषयुतः ॥ १९६ ॥
इतरे दृश्यपदार्था लक्ष्यन्तेऽनेन चक्षुषा सर्वे ।
भगवाननया दृष्ट्या न लक्ष्यते ज्ञानदृग्गम्यः ॥ १९७ ॥
यद्विश्वरूपदर्शनसमये पार्थाय दत्तवान्भगवान् ।

दिव्यं चक्षुस्तस्माद्दृश्यता युज्यते नृहरौ ॥ १९८ ॥
साक्षाद्यथैकदेशे वर्तुलमुपलभ्यते रवेर्बिंबम् ।
विश्वं प्रकाशयति तत्सर्वैः सर्वत्र दृश्यते युगपत् ॥ १९९ ॥
यद्यपि साकारोऽयं तथैकदेशी विभाति यदुनाथः ।
सर्वगतः सर्वात्मा तथाप्ययं सच्चिदानंदः ॥ २०० ॥
एको भगवान्रेमे युगपद्गोपीष्वनेकासु ।
अथवा विदेहजनकश्रुतदेवभूदेवयोर्हरिर्युगपत् ॥ २०१ ॥
अथवा कृष्णाकारां स्वचमूं दुर्योधनोऽपश्यत् ।
तस्माद्व्यापक आत्मा भगवान्हरिरीश्वरः कृष्णः ॥ २०२ ॥
वक्षसि यदा जघान श्रीवत्सः श्रीपतेः स किं द्वेष्यः ।
भक्तानामसुराणामन्येषां वा फलं सदृशम् ॥ २०३ ॥
तस्मान्न कोऽपि शत्रुर्नो मित्रं नाप्युदासीनः ।
नृहरिः सन्मार्गस्थः सफलः शाखीव यदुनाथः ॥ २०४ ॥
लोहशलाकानिवहैः स्पर्शाश्मनि भिद्यमानेऽपि ।
स्वर्णत्वमेति लोहं द्वेषादपि विद्विषां तथा प्राप्तिः ॥ २०५ ॥
नन्वात्मनः सकाशादुत्पन्ना जीवसंततिश्चेयम् ।
जगतः प्रियतर आत्मा तत्प्रकृते नैव संभवति ॥ २०६ ॥
वत्साहरणावसरे पृथग्वयोरूपवासनाभूपान् ।
हरिरजमोहं कर्तुं सवत्सगोपान्विनिर्ममे स्वस्मात् ॥ २०७ ॥
अग्नेर्यथा स्फुलिंगाः क्षुद्रास्तु व्युच्चरन्तीति ।
श्रुत्यर्थं दर्शयितुं स्वतनोरतनोत्स जीवसंदोहम् ॥ २०८ ॥
यमुनातीरनिकुंजे कदाचिदपि वत्सकांश्च चारयति ।
कृष्णे तथार्भगोपेषु च वरगोष्ठेषु चारयत्स्वारात् ॥ २०९ ॥
वत्सं निरीक्ष्य दूराद्गावः स्नेहेन संभ्रांताः ।
तदभिमुखं धावन्त्यः प्रययुर्गोपैश्च दुर्वाराः ॥ २१० ॥

प्रसवभरेण भूयः स्रुतस्तनाः प्राप्य पूर्ववद्वत्सान् ।
पृथुरसनया लिहन्त्यस्तर्णकवत्यः प्रपाययन्प्रमुदा ॥ २११ ॥
गोपा अपि निजबालाञ्जगृहुर्मूर्धानमाघ्राय ।
इत्थमलौकिकलाभस्तेषां तत्र क्षणं ववृधे ॥ २१२ ॥
गोपा वत्साश्चान्या पूर्वं कृष्णात्मका ह्यभवन् ।
तेनात्मनः प्रियत्वं दर्शितमेतेषु कृष्णेन ॥ २१३ ॥
प्रेयः पुत्राद्वित्तात्प्रेयोऽन्यस्माच्च सर्वस्मात् ।
अंतरतरं यदात्मेत्युपनिषदः सत्यताभिहिता ॥ २१४ ॥
नन्वुच्चावचभूतेष्वात्मा सम एव वर्ततेऽथ हरिः ।
दुर्योधनेऽर्जुने वा तरतमभावं कथं नु गतवान्सः ॥ २१५ ॥
बधिरांधपंगुमूका दीर्घाः खर्वाः सरूपाश्च ।
सर्वे विधिना दृष्टाः सवत्सगोपाश्चतुर्भुजास्तेन ॥ २१६ ॥
भूतसमत्वं नृहरेः समो हि मशकेन नागेन ।
लोकैः समस्त्रिभिर्वेत्युपनिषदा भाषितः साक्षात् ॥ २१७ ॥
आत्मा तावदभोक्ता तथैव ननु वासुदेवश्चेत् ।
नानाकैतवयत्नैः पररमणीभिः कथं रमते ॥ २१८ ॥
सुंदरमभिनवरूपं कृष्णं दृष्ट्वा विमोहिता गोप्यः ।
तमभिलषन्त्यो मनसा कामाद्विरहव्यथां प्रापुः ॥ २१९ ॥
गच्छन्त्यस्तिष्ठन्त्यो गृहकृत्यपराश्च भुंजानाः ।
कृष्णं विनान्यविषयं समक्षमपि जातु नाविंदन् ॥ २२० ॥
दुःसहविरहभ्रांत्या स्वपतीन्ददृशुस्तरून्नरांश्च पशून् ।
हरिरयमिति सुप्रीताः सरभसमालिंगयांचक्रुः ॥ २२१ ॥
कापि च कृष्णायन्ती कस्याश्चित्पूतनायन्त्याः ।
अपिबत्स्तनमिति साक्षाद्व्यासो नारायणः प्राह ॥ २२२ ॥
तस्मान्निजनिजदयितान्कृष्णाकारान्व्रजस्त्रियो वीक्ष्य ।

स्वपरनृपतिपत्नीनामंतर्यामी हरिः साक्षात् ॥ २२३ ॥
परमार्थतो विचारे गुडतन्मधुरत्वदृष्टांतात् ।
नश्वरमपि नरदेहं परमात्माकारतां याति ॥ २२४ ॥
किं पुनरनंतशक्तेर्लीलावपुरीश्वरस्येह ।
कर्माण्यलौकिकानि स्वमायया विदधतो नृहरेः ॥ २२५ ॥
मृद्भक्षणेन कुपितां विकसितवदनां स्वमातरं वक्त्रे ।
विश्वमदर्शयदखिलं किं पुनरथ विश्वरूपोऽसौ ॥ २२६ ॥

अनुग्रहः ।

विषविषमस्तनयुगलं पाययितुं पूतना गृहं प्राप्ता ।
तस्याः पृथुभाग्याया आसीत्कृष्णार्पणो देहः ॥ २२७ ॥
अनयत्पृथुतरशकटं निजनिकटं वा कृतापराधमपि ।
कंठाश्लेषविशेषादवधीद्बाल्येऽसुरं कृष्णः ॥ २२८ ॥
यमलार्जुनौ तरू उन्मूल्योलूखलगतश्चिरं खिन्नौ ।
रिंगन्नंगणभूमौ स्वमालयं प्रापयन्नृहरिः ॥ २२९ ॥
नित्यं त्रिदशद्वेषी येन च मृत्योर्वशीकृतः केशी ।
काकः कोऽपि वराको बकोऽप्यशोकं गतो लोकम् ॥ २३० ॥
गोगोपीगोपानां निकरमहिं पीडयन्तमतिवेगात् ।
अनघमघासुरमकरोत्पृथुतरमुरगेश्वरं भगवान् ॥ २३१ ॥
पीत्वारण्यहुताशनमसह्यतत्तेजसो हेतोः ।
दग्धान्मुग्धानखिलाञ्जुगोप गोपान्कृपासिंधुः ॥ २३२ ॥
पातुं गोकुलमाकुलमशनितडिद्वर्षणैः कृष्णः ।
असहाय एकहस्ते गोवर्धनमुद्दधारोच्चैः ॥ २३३ ॥
वासोलोभाकलितं धावद्रजकं शिलातलैर्हत्वा ।
विस्मृत्य तदपराधं विकुंठवासोऽर्पितस्तस्मै ॥ २३४ ॥
त्रेधा वक्रशरीरामतिलंबोष्ठीं स्खलद्वपुर्वचनात् ।

स्रक्चंदनपरितोषात्कुब्जामृज्वाननामकरोत् ॥ २३५ ॥
निहतः पपात हरिणा हरिचरणाग्रेण कुवलयापीडः ।
तुंगोन्मत्तमतंगः पतंगवद्दीपकस्याग्रे ॥ २३६ ॥
युद्धमिषात्सह रंगे श्रीरंगेनांगसंगमं प्राप्य ।
मुष्टिकचाणूराख्यौ ययतुर्निःश्रेयसं सपदि ॥ २३७ ॥
देहकृतादपराधाद्वैकुंठोत्कंठितांतरात्मानम् ।
यदुवरकुलावतंसः कंसं विध्वंसयामास ॥ २३८ ॥
हरिसंदर्शनयोगात्पृथुरणतीर्थे निमज्जते तस्मै ।
भगवान्नु प्रददाद्यः सद्यश्चैद्याय सायुज्यम् ॥ २३९ ॥
मीनादिभिरवतारैर्निहताः सुरविद्विषो बहवः ।
नीतास्ते निजरूपं तत्र च मोक्षस्य का वार्ता ॥ २४० ॥
ये यदुनंदननिहतास्ते तु न भूयः पुनर्भवं प्रापुः ।
तस्मादवताराणामंतर्यामी प्रवर्तकः कृष्णः ॥ २४१ ॥
ब्रह्मांडानि बहूनि पंकजभवान्प्रत्यंडमत्यद्भुता-
न्गोपान्वत्सयुतानदर्शयदजं विष्णूनशेषांश्च यः ।
शंभुर्यच्चरणोदकं स्वशिरसा धत्ते च मूर्तित्रया-
त्कृष्णो वै पृथगस्ति कोऽप्यविकृतः सच्चिन्मयो नीलिमा ॥२४२॥
कृपापात्रं यस्य त्रिपुररिपुरंभोजवसतिः
सुता जह्नोः पूता चरणनखनिर्णेजनजलम् ।
प्रदानं वा यस्य त्रिभुवनपतित्वं विभुरपि
निदानं सोऽस्माकं जयति कुलदेवो यदुपतिः ॥ २४३ ॥
मायाहस्तेऽर्पयित्वा भरणकृतिकृते मोहमूलोद्भवं मां
मातः कृष्णाभिधाने चिरसमयमुदासीनभावं गतासि ।
कारुण्यैकाधिवासे सकृदपि वदनं नेक्षसे त्वं मदीयं
तत्सर्वज्ञे न कर्तुं प्रभवसि भवती किं नु मूलस्य शांतिम् ॥२४४॥

उदासीनः स्तब्धः सततमगुणः संगरहितो
भवांस्तातः कातः परमिह भवेज्जीवनगतिः ।
अकस्मादस्माकं यदि न कुरुते स्नेहमथ त-
द्वसस्व स्वीयांतर्विमलजठरेऽस्मिन्पुनरपि ॥ २४५ ॥
लोकाधीशे त्वयीशे किमिति भवभवा वेदना स्वाश्रितानां
संकोचः पंकजानां किमिह समुदिते मंडले चंडरश्मेः ।
भोगः पूर्वार्जितानां भवति भुवि नृणां कर्मणां चेदवश्यं
तन्मे दृष्टैर्नृपुष्टैर्ननु दनुजनृपैरूर्जितं निर्जितं ते ॥ २४६ ॥

नित्यानंदसुधानिधेरधिगतः सन्नीलमेघः सता-
मौत्कंठ्यप्रबलप्रभंजनभरैराकर्षितो वर्षति ।
विज्ञानामृतमद्भुतं निजवचो धाराभिरारादिदं
चेतश्चातक चेन्न वांछति मृषाक्रांतोऽसि सुप्तोऽसि किम् ॥२४७॥
चेतश्चंचलतां विहाय पुरतः संधाय कोटिद्वयं
तत्रैकत्र निधेहि सर्वविषयानन्यत्र च श्रीपतिम् ।
विश्रांतिर्हितमप्यहो क्व नु तयोर्मध्ये तदालोच्यतां
युक्त्या वानुभवेन यत्र परमानंदश्च तत्सेव्यताम् ॥ २४८ ॥
पुत्रान्पौत्रमथ स्त्रियोऽन्ययुवतीर्वित्तान्यथोऽन्यद्धनं
भोज्यादिष्वपि तारतम्यवशतो नालं समुत्कंठया ।
नैतादृग्यदुनायके समुदिते चेतस्यनंते विभौ
सांद्रानंदसुधार्णवे विहरति स्वैरं यतो निर्भयम् ॥ २४९ ॥
काम्योपासनयार्थयन्त्यनुदिनं किंचित्फलं सेप्सितं
किंचित्स्वर्गमथापवर्गमपरैर्योगादियज्ञादिभिः ।
अस्माकं यदुनंदनांघ्रियुगलध्यानावधानार्थिनां
किं लोकेन दमेन किं नृपतिना स्वर्गापवर्गैश्च किम् ॥ २५० ॥
आश्रितमात्रं पुरुषं स्वाभिमुखं कर्षति श्रीशः ।

लोहमपि चुंबकाश्मा संमुखमात्रं जडं यद्वत् ॥ २५१ ॥
अयमुत्तमोऽयमधमो जात्या रूपेण संपदा वयसा ।
श्लाघ्योऽश्लाघ्यो वेत्थं न वेत्ति भगवाननुग्रहावसरे ॥ २५२ ॥
अंतःस्थभावभोक्ता ततोंऽतरात्मा महामेघः ।
खदिरश्चंपक इव वा प्रवर्षणं किं विचारयति ॥ २५३ ॥
यद्यपि सर्वत्र समस्तथापि नृहरिस्तथाप्येते ।
भक्ताः परमानंदे रमन्ति सदयावलोकेन ॥ २५४ ॥
सुतरामनन्यशरणाः क्षीराद्याहारमंतरा यद्वत् ।
केवलया स्नेहदृशा कच्छपतनयाः प्रजीवन्ति ॥ २५५ ॥
यद्यपि गगनं शून्यं तथापि जलदामृतांशुरूपेण ।
चातकचकोरनाम्नोर्दृढभावात्पूरयत्याशाम् ॥ २५६ ॥
तद्वद्व्रजतां पुंसां दृग्वाङ्मनसामगोचरोऽपि हरिः ।
कृपया फलत्यकस्मात्सत्यानंदामृतेन विपुलेन ॥ २५७ ॥

इति प्रबोधसुधाकरः समाप्तः ॥

॥ प्रश्नोत्तररत्नमालिका ॥

कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान् ।
अमुया कंठस्थितया प्रश्नोत्तररत्नमालिकया ॥ १ ॥
भगवन्किमुपादेयं गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥ २ ॥
त्वरितं किं कर्तव्यं विदुषां संसारसंततिच्छेदः ।
किं मोक्षतरोर्बीजं सम्यग्ज्ञानं क्रियासिद्धम् ॥ ३ ॥
कः पथ्यतरो धर्मः कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पंडितो विवेकी किं विषमवधीरणा गुरुषु ॥ ४ ॥
किं संसारे सारं बहुशोऽपि विचिंत्यमानमिदमेव ।
किं मनुजेष्विष्टतमं स्वपरहितायोद्यतं जन्म ॥ ५ ॥
मदिरेव मोहजनकः कः स्नेहः के च दस्यवो विषयाः ।
का भववल्ली तृष्णा को वैरी यस्त्वनुद्योगः ॥ ६ ॥
कस्माद्भयमिह मरणादंधादिह को विशिष्यते रागी ।
कः शूरो यो ललनालोचनबाणैर्न च व्यथितः ॥ ७ ॥
पातुं कर्णांजलिभिः किममृतमिह युज्यते सदुपदेशः ।
किं गुरुताया मूलं यदेतदप्रार्थनं नाम ॥ ८ ॥
किं गहनं स्त्रीचरितं कश्चतुरो यो न खंडितस्तेन ।
किं दुःखमसंतोषः किं लाघवमधमतो याच्ञा ॥ ९ ॥
किं [illegible] किं जाड्यं पाठतोऽप्यनभ्यासः ।
को जागर्ति विवेकी का निद्रा मूढता जंतोः ॥ १० ॥
नलिनीदलगतजलवत्तरलं किं यौवनं धनं चायुः ।
कथय पुनः के शशिनः किरणसमाः सज्जना एव ॥ ११ ॥
को नरकः परवशता किं सौख्यं सर्वसंगविरतिर्या ।

किं सत्यं भूतहितं प्रियं च किं प्राणिनामसवः ॥ १२ ॥
कोऽनर्थफलो मानः का सुखदा साधुजनमैत्री ।
सर्वव्यसनविनाशे को दक्षः सर्वथा त्यागी ॥ १३ ॥
किं मरणं मूर्खत्वं किं चानर्घं यदवसरे दत्तम् ।
आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम् ॥ १४ ॥
कुत्र विधेयो यत्नो विद्याभ्यासे सदौषधे दाने ।
अवधीरणा क कार्या खलपरयोषित्परधनेषु ॥ १५ ॥
काहर्निशमनुचिंत्या संसारासारता न तु प्रमदा ।
का प्रेयसी विधेया करुणा दीनेषु सज्जने मैत्री ॥ १६ ॥
कंठगतैरप्यसुभिः कस्य ह्यात्मा न शक्यते जेतुम् ।
मूर्खस्य शंकितस्य च विषादिनो वा कृतघ्नस्य ॥ १७ ॥
कः साधुः सद्वृत्तः कमधममाचक्षते त्वसद्वृत्तम् ।
केन जितं जगदेतत्सत्यतितिक्षावता पुंसा ॥ १८ ॥
कस्मै नमांसि देवाः कुर्वन्ति दयाप्रधानाय ।
कस्मादुद्वेगः स्यात्संसारारण्यतः सुधियः ॥ १९ ॥
कस्य वशे प्राणिगणः सत्यप्रियभाषिणो विनीतस्य ।
क स्थातव्यं न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥ २० ॥
कोऽधो योऽकार्यरतः को बधिरो यो हितानि न शृणोति ।
को मूको यः काले प्रियाणि वक्तुं न जानाति ॥ २१ ॥
किं दानमनाकांक्षं किं मित्रं यो निवारयति पापात् ।
कोऽलंकारः शीलं किं वाचां मंडनं सत्यम् ॥ २२ ॥
विद्युद्विलसितचपलं किं दुर्जनसंगतिर्युवतयश्च ।
कुलशीलनिष्प्रकंपाः के कलिकालेऽपि सज्जना एव ॥ २३ ॥
चिंतामणिरिव दुर्लभमिह किं कथयामि तच्चतुर्भद्रम् ।
किं तद्वदन्ति भूयो विधूततमसो विशेषेण ॥ २४ ॥

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ॥ २५ ॥
किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्तमौदार्यम्।
कः पूज्यो विद्वद्भिः स्वभावतः सर्वदा विनीतो यः ॥ २६ ॥
कः कुलकमलदिनेशः सति गुणविभवेऽपि यो नम्रः।
कस्य वशे जगदेतत्प्रियहितवचनस्य धर्मनिरतस्य ॥ २७ ॥
विद्वन्मनोहरा का सत्कविता बोधवनिता च।
कं न स्पृशति विपत्तिः प्रवृद्धवचनानुवर्तिनं दान्तम् ॥ २८ ॥
कस्मै स्पृहयति कमला त्वनलसचित्ताय नीतिवृत्ताय।
त्यजति च कं सहसा द्विजगुरुसुरनिंदाकरं च सालस्यम् ॥ २९ ॥
कुत्र विधेयो वासः सज्जननिकटेऽथवा काश्याम्।
कः परिहार्यो देशः पिशुनयुतो लुब्धभूपश्च ॥ ३० ॥
केनाशोच्यः पुरुषः प्रणतकलत्रेण धीरविभवेन।
इह भुवने कः शोच्यः सत्यपि विभवे न यो दाता ॥ ३१ ॥
किं लघुताया मूलं प्राकृतपुरुषेषु या याच्ञा।
रामादपि कः शूरः स्मरशरनिहतो न यश्चलति ॥ ३२ ॥
किमहर्निशमनुचिंत्यं भगवच्चरणं न संसारः।
चक्षुष्मन्तोऽप्यंधाः के स्युर्ये नास्तिका मनुजाः ॥ ३३ ॥
कः पंगुरिह प्रथितो व्रजति न यो वार्धके तीर्थम्।
किं तीर्थमपि च मुख्यं चित्तमलं यन्निवर्तयति ॥ ३४ ॥
किं स्मर्तव्यं पुरुषैर्हरिनाम सदा न यावनी भाषा।
को हि न वाच्यः सुधिया परदोषश्चानृतं तद्वत् ॥ ३५ ॥
किं संपाद्यं मनुजैर्विद्या वित्तं बलं यशः पुण्यम्।
कः सर्वगुणविनाशी लोभः शत्रुश्च कः कामः ॥ ३६ ॥
का च सभा परिहार्या हीना या वृद्धसचिवेन।

इह कुत्रावहितः स्यान्मनुजः किल राजसेवायाम् ॥ ३७ ॥
प्राणादपि को रम्यः कुलधर्मः साधुसंगश्च ।
का संरक्ष्या कीर्तिः पतिव्रता नैजबुद्धिश्च ॥ ३८ ॥
का कल्पलता लोके सच्छिष्यायार्पिता विद्या ।
कोऽक्षयवटवृक्षः स्याद्विधिवत्सत्पात्रदत्तदानं यत् ॥ ३९ ॥
किं शस्त्रं सर्वेषां युक्तिर्माता च का धेनुः ।
किं नु बलं यद्धैर्यं को मृत्युर्यदवधानरहितत्वम् ॥ ४० ॥
कुत्र विषं दुष्टजने किमिहाशौचं भवेदृणं नृणाम् ।
किमभयमिह वैराग्यं भयमपि किं वित्तमेव सर्वेषाम् ॥ ४१ ॥
का दुर्लभा नराणां हरिभक्तिः पातकं च किं हिंसा ।
को हि भगवत्प्रियः स्याद्योऽन्यं नोद्वेजयेदनुद्विग्नः ॥ ४२ ॥
कस्मात्सिद्धिस्तपसो बुद्धिः क नु भूसुरे कुतो बुद्धिः ।
वृद्धोपसेवया के वृद्धा ये धर्मतत्त्वज्ञाः ॥ ४३ ॥
संभावितस्य मरणादधिकं किं दुर्यशो भवति ।
लोके सुखी भवेत्को धनवान्धनमपि च किं यतश्चेष्टम् ॥ ४४ ॥
सर्वसुखानां वीजं किं पुण्यं दुःखमपि कुतः पापात् ।
कस्यैश्वर्यं यः किल शंकरमाराधयेद्भक्त्या ॥ ४५ ॥
को वर्धते विनीतः को वा हीयेत यो दृप्तः ।
को न प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ॥ ४६ ॥
कुत्रानृतेऽप्यपापं यच्चोक्तं धर्मरक्षार्थम् ।
को धर्मोऽभिमतो यः शिष्टानां निजकुलीनानाम् ॥ ४७ ॥
साधुबलं किं दैवं कः साधुः सर्वदा तुष्टः ।
दैवं किं यत्सुकृतं कः सुकृती श्लाघ्यते च यः सद्भिः ॥ ४८ ॥
गृहमेधिनश्च मित्रं किं भार्या को गृही च यो यजते ।
को यज्ञो यः श्रुत्या विहितः श्रेयस्करो नृणाम् ॥ ४९ ॥

कस्य क्रिया हि सफला यः पुनराचारवाञ्छिष्टः ।
कः शिष्टो यो वेदप्रमाणवान्को हतः क्रियाभ्रष्टः ॥ ५० ॥
को धन्यः संन्यासी को मान्यः पंडितः साधुः ।
कः सेव्यो यो दाता को दाता योऽर्थितृप्तिमातनुते ॥ ५१ ॥
किं भाग्यं देहवतामारोग्यं कः फली कृषिकृत् ।
कस्य न पापं जपतः कः पूर्णो यः प्रजावान्स्यात् ॥ ५२ ॥
किं दुष्करं नराणां यन्मनसो निग्रहः सततम् ।
को ब्रह्मचर्यवान्स्याद्यश्चास्खलितोर्ध्वरेतस्कः ॥ ५३ ॥
का च परदेवतोक्ता चिच्छक्तिः को जगद्भर्ता ।
सूर्यः सर्वेषां को जीवनहेतुः स पर्जन्यः ॥ ५४ ॥
कः शूरो यो भीतत्राता त्राता च कः स गुरुः ।
को हि जगद्गुरुरुक्तः शंभुर्ज्ञानं कुतः शिवादेव ॥ ५५ ॥
मुक्तिं लभेत कस्मान्मुकुंदभक्तेर्मुकुंदः कः ।
यस्तारयेदविद्यां का चाविद्या यदात्मनोऽस्फूर्तिः ॥ ५६ ॥
कस्य न शोको यः स्यादक्रोधः किं सुखं तुष्टिः ।
को राजा रंजनकृत्कश्च श्वा नीचसेवको यः स्यात् ॥ ५७ ॥
को मायी परमेशः क इंद्रजालायते प्रपंचोऽयम् ।
कः स्वप्ननिभो जाग्रद्व्यवहारः सत्यमपि च किं ब्रह्म ॥ ५८ ॥
किं मिथ्या यद्विद्यानाश्यं तुच्छं तु शशविषाणादि ।
का चानिर्वचनीया माया किं कल्पितं द्वैतम् ॥ ५९ ॥
किं पारमार्थिकं स्यादद्वैतं चाज्ञता कुतोऽनादिः ।
वपुषश्च पोषकं किं प्रारब्धं चान्नदायि किं चायुः ॥ ६० ॥
को ब्राह्मणैरुपास्यो गायत्र्यर्काग्निगोचरः शंभुः ।
गायत्र्यामादित्ये चाग्नौ शंभौ च किं नु तत्तत्त्वम् ॥ ६१ ॥
प्रत्यक्षदेवता का माता पूज्यो गुरुश्च कस्तातः ।

कः सर्वदेवतात्मा विद्याकर्मान्वितो विप्रः ॥ ६२ ॥
कश्च कुलक्षयहेतुः संतापः सज्जनेषु योऽकारि ।
केषाममोघवचनं ये च पुनः सत्यमौनशमशीलाः ॥ ६३ ॥
किं जन्म विषयसंगः किमुत्तरं जन्म पुत्रः स्यात् ।
कोऽपरिहार्यो मृत्युः कुत्र पदं विन्यसेच्च दृक्पूते ॥ ६४ ॥
पात्रं किमन्नदाने क्षुधितं कोऽर्च्यो हि भगवदवतारः ।
कश्च भगवान्महेशः शंकरनारायणात्मैकः ॥ ६५ ॥
फलमपि भगवद्भक्तेः किं तल्लोकस्वरूपसाक्षात्त्वम् ।
मोक्षश्च को ह्यविद्यास्तमयः कः सर्ववेदभूरथ चोम् ॥ ६६ ॥
इत्येषा कंठस्था प्रश्नोत्तररत्नमालिका येषाम् ।
ते मुक्ताभरणा इव विमलाश्चाभान्ति सत्समाजेषु ॥ ६७ ॥

॥ इति प्रश्नोत्तररत्नमालिका समाप्ता ॥

॥ ब्रह्मानुचिंतनम् ॥

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तो बद्ध एवान्यथा भवेत् ॥ १ ॥
अहमेव परं ब्रह्म निश्चितं चित्त चिंत्यताम् ।
चिद्रूपत्वादसंगत्वादबाध्यत्वात्प्रयत्नतः ॥ २ ॥
अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
इत्येवं समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ॥ ३ ॥
सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरंतरम् ।
तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥ ४ ॥
अहं ब्रह्मास्मि यो वेद स सर्वं भवति त्विदम् ।
नाभूत्या ईशते देवास्तेषामात्मा भवेद्धि सः ॥ ५ ॥
अन्योऽसावहमन्योऽस्मीत्युपास्ते योऽन्यदेवताम् ।
न स वेद नरो ब्रह्म स देवानां यथा पशुः ॥ ६ ॥
अहमात्मा न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानंदरूपोऽहं नित्यमुक्तस्वभाववान् ॥ ७ ॥
आत्मानं सततं ब्रह्म संभाव्य विहरन्ति ये ।
न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ ८ ॥
आत्मानं सततं ब्रह्म संभाव्य विहरेत्सुखम् ।
क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिंतनम् ॥ ९ ॥
तन्महापातकं हन्ति तमः सूर्योदयो यथा ।
अज्ञानाद्ब्रह्मणो जातमाकाशं बुद्बुदोपमम् ॥ १० ॥
आकाशाद्वायुरुत्पन्नो वायोस्तेजस्ततः पयः ।
अद्भ्यश्च पृथिवी जाता ततो व्रीहियवादिकम् ॥ ११ ॥
पृथिव्यप्सु पयो वह्नौ वह्निर्वायौ नभस्यसौ ।

नभोऽप्यव्याकृते तच्च शुद्धे शुद्धोऽस्म्यहं हरिः ॥ १२ ॥
अहं विष्णुरहं विष्णुरहं विष्णुरहं हरिः ।
कर्तृभोक्त्रादिकं सर्वं तदविद्योत्थमेव च ॥ १३ ॥
अच्युतोऽहमनंतोऽहं गोविंदोऽहमहं हरिः ।
आनंदोऽहमशेषोऽहमजोऽहममृतोऽस्म्यहम् ॥ १४ ॥
नित्योऽहं निर्विकल्पोऽहं निराकारोऽहमव्ययः ।
सच्चिदानंदरूपोऽहं पंचकोशातिगोऽस्म्यहम् ॥ १५ ॥
अकर्ताहमभोक्ताहमसंगः परमेश्वरः ।
सदा मत्संनिधानेन चेष्टते सर्वमिंद्रियम् ॥ १६ ॥
आदिमध्यांतमुक्तोऽहं न बद्धोऽहं कदाचन ।
स्वभावनिर्मलः शुद्धः स एवाहं न संशयः ॥ १७ ॥
ब्रह्मैवाहं न संसारी मुक्तोऽहमिति भावयेत् ।
अशक्नुवन्भावयितुं वाक्यमेतत्सदाऽभ्यसेत् ॥ १८ ॥
यदभ्यासेन तद्भावो भवेद्भ्रमरकीटवत् ।
अत्रापहाय संदेहमभ्यसेत्कृतनिश्चयः ॥ १९ ॥
ध्यानयोगेन मासैकाद्ब्रह्महत्यां व्यपोहति ।
संवत्सरं सदाभ्यासात्सिद्ध्यष्टकमवाप्नुयात् ॥ २० ॥
यावज्जीवं सदाभ्यासाज्जीवन्मुक्तो भवेद्यतिः ।
नाहं देहो न च प्राणो नेंद्रियाणि तथैव च ॥ २१ ॥
न मनोऽहं न बुद्धिश्च नैव चित्तमहंकृतिः ।
नाहं पृथ्वी न सलिलं न च वह्निस्तथानिलः ॥ २२ ॥
न चाकाशो न शब्दश्च न च स्पर्शस्तथा रसः ।
नाहं गंधो न रूपं च न मायाहं न संसृतिः ॥ २३ ॥
सदा साक्षिस्वरूपत्वाच्छिव एवास्मि केवलः ।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥ २४ ॥

मयि सर्वं लयं याति तद्ब्रह्मास्म्यहमद्वयम् ।
सर्वज्ञोऽहमनंतोऽहं सर्वेशः सर्वशक्तिमान् ॥ २५ ॥
आनंदः सत्यबोधोऽहमिति ब्रह्मानुचिंतनम् ।
अयं प्रपंचो मिथ्यैव सत्यं ब्रह्माहमव्ययम् ॥ २६ ॥
अत्र प्रमाणं वेदान्ता गुरवोऽनुभवस्तथा ।
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ॥ २७ ॥
नाहं देहो न मे देहः केवलोऽहं सनातनः ।
एकमेवाद्वितीयं वै ब्रह्मणो नेह किंचन ॥ २८ ॥

हृदयकमलमध्ये दीपवद्वेदसारं
प्रणवमयमतर्क्यं योगिभिर्ध्यानगम्यम् ।
हरिगुरुशिवयोगं सर्वभूतस्थमेकं
सकृदपि मनसा वै चिंतयेद्यः स मुक्तः ॥ २९ ॥

इति ब्रह्मानुचिंतनं समाप्तम् ॥

॥ मोहमुद्गरः ॥

भज गोविंदं भज गोविंदं भज गोविंदं मूढमते ।
प्राप्ते सन्निहिते मरणे न हि न हि रक्षति डुकृञ् करणे ॥ १ ॥
मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ २ ॥
नारीस्तनभरनाभीदेशं दृष्ट्वा मा गा मोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचिंतय वारं वारम् ॥ ३ ॥
नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलम् ।
विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ ४ ॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाज्जीवति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे ॥ ५ ॥
यावत्पवनो निवसति देहे तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ ६ ॥
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीसक्तः ।
वृद्धस्तावच्चिंतामग्नः परे ब्रह्मणि कोऽपि न सक्तः ॥ ७ ॥
का ते कांता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिंतय यदिदं भ्रातः ॥ ८ ॥
सत्संगत्वे निःसंगत्वं निःसंगत्वे निर्मोहत्वम् ।
निर्मोहत्वे निश्चलितत्वं निश्चलितत्वे जीवन्मुक्तिः ॥ ९ ॥
वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ १० ॥
मा कुरु धनजनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ११ ।
दिनयामिन्यौ सायं प्रातः शिशिरवसंतौ पुनरायातः ।

काल: क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥ १२ ॥
का ते कांताधनगतचिंता वातुल किं तव नास्ति नियंता ।
त्रिजगति सज्जनसंगतिरेका भवति भवार्णवतरणे नौका ॥ १३ ॥
जटिली मुंडी लुंचितकेशः काषायांबरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ॥ १४ ॥
अंगं गलितं पलितं मुंडं दशनविहीनं जातं तुंडम् ।
वृद्धो याति गृहीत्वा दंडं तदपि न मुंचत्याशापिंडम् ॥ १५ ॥
अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षातरुतलवासस्तदपि न मुंचत्याशापाशः ॥ १६ ॥
कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीनः सर्वमतेन मुक्तिं न भजति जन्मशतेन ॥ १७ ॥
सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ १८ ॥
योगरतो वा भोगरतो वा संगरतो वा संगविहीनः ।
यस्य ब्रह्मणि रमते चित्तं नंदति नंदति नंदत्येव ॥ १९ ॥
भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ।
सकृदपि येन मुरारिसमर्चा क्रियते तस्य यमेन न चर्चा ॥ २० ॥
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे बहुदुस्तारे कृपयापारे पाहि मुरारे ॥ २१ ॥
रथ्याकर्पटविरचितकंथः पुण्यापण्यविवर्जितपंथः ।
योगी योगनियोजितचित्तो र[illegible] बालोन्मत्तवदेव ॥ २२ ॥
कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ २३ ॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि मय्यसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ २४ ॥

शत्रौ मित्रे पुत्रे बंधौ मा कुरु यत्नं विग्रहसंधौ ।
भव समचित्तः सर्वत्र त्वं वांछस्यचिराद्यदि विष्णुत्वम् ॥ २५ ॥
कामं क्रोधं लोभं मोहं त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ २६ ॥
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् ॥ २७ ॥
सुखतः क्रियते रामाभोगः पश्चाद्धंत शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुंचति पापाचरणम् ॥ २८ ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता रीतिः ॥ २९ ॥
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ३० ॥
गुरुचरणांबुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेंद्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥ ३१ ॥

॥ इति मोहमुद्गरः समाप्तः ॥

॥ योगतारावली ॥

वंदे गुरूणां चरणारविंदे
संदर्शितस्वात्मसुखावबोधे ।
जनस्य ये जांगलिकायमाने
संसारहालाहलमोहशांत्यै ॥ १ ॥
सदाशिवोक्तानि सपादलक्ष-
लयावधानानि वसन्ति लोके ।
नादानुसंधानसमाधिमेकं
मन्यामहे मान्यतमं लयानाम् ॥ २ ॥
सरेचपूरैरनिलस्य कुंभैः
सर्वासु नाडीषु विशोधितासु ।
अनाहताख्यो बहुभिः प्रकारै-
रंतः प्रवर्तेत सदा निनादः ॥ ३ ॥
नादानुसंधान नमोऽस्तु तुभ्यं
त्वां साधनं तत्त्वपदस्य जाने ।
भवत्प्रसादात्पवनेन साकं
विलीयते विष्णुपदे मनो मे ॥ ४ ॥
जालंधरोड्याणनमूलबंधा-
ञ्जल्पन्ति कंठोदरपायुमूलान् ।
बंधत्रयेऽस्मिन्परिचीयमाने
बंधः कुतो दारुणकालपाशात् ॥ ५ ॥
ओड्याणजालंधरमूलबंधै-
रुन्निद्रितायामुरगांगनायाम् ।
प्रत्यङ्मुखत्वात्प्रविशन्सुषुम्नां

गमागमौ मुंचति गंधवाहः ॥ ६ ॥
उत्थापिताधारहुताशनोल्कै-
राकुंचनैः शश्वदपानवायोः ।
संतापिताचंद्रमसः पतंतीं
पीयूषधारां पिबतीह धन्यः ॥ ७ ॥
बंधत्रयाभ्यासविपाकजातां
विवर्जितां रेचकपूरकाभ्याम् ।
विशोषयन्तीं विषयप्रवाहं
विद्यां भजे केवलकुंभरूपाम् ॥ ८ ॥
अनाहते चेतसि सावधानै-
रभ्यासशूरैरनुभूयमाना ।
संस्तंभितश्वासमनःप्रचारा
सा जृंभते केवलकुंभकश्रीः ॥ ९ ॥
सहस्रशः सन्तु हठेषु कुंभाः
संभाव्यते केवलकुंभ एव ।
कुंभोत्तमे यत्र तु रेचपूरौ
प्राणस्य न प्राकृतवैकृताख्यौ ॥ १० ॥
त्रिकूटनाम्नि स्तिमितेंऽतरंगे
खे स्तंभिते केवलकुंभकेन ।
प्राणानिलो भानुशशांकनाड्यौ
विहाय सद्यो विलयं प्रयाति ॥ ११ ॥
प्रत्याहृतः केवलकुंभकेन
प्रबुद्धकुंडल्युपभुक्तशेषः ।
प्राणः प्रतीचीनपथेन मंदं
विलीयते विष्णुपदांतराले ॥ १२ ॥

निरंकुशानां श्वसनोद्गमानां
निरोधनैः केवलकुंभकाख्यैः ।
उदेति सर्वेन्द्रियवृत्तिशून्यो
मरुल्लयः कोऽपि महामतीनाम् ॥ १३ ॥

न दृष्टिलक्ष्याणि न चित्तबंधो
न देशकालौ न च वायुरोधः ।
न धारणाध्यानपरिश्रमो वा
समेधमाने सति राजयोगे ॥ १४ ॥

अशेषदृश्योज्झितदृङ्मयाना-
मवस्थितानामिह राजयोगे ।
न जागरो नापि सुषुप्तिभावो
न जीवितं नो मरणं विचित्रम् ॥ १५ ॥

अहंममत्वाद्यपहाय सर्वं
श्रीराजयोगे स्थिरमानसानाम् ।
न द्रष्टृता नास्ति च दृश्यभावः
सा जृंभते केवलसंविदेव ॥ १६ ॥

नेत्रे ययोन्मेषनिमेषशून्ये
वायुर्यया वर्जितरेचपूरः ।
मनश्च संकल्पविकल्पशून्यं
मनोन्मनी सा मयि संनिधत्ताम् ॥ १७ ॥

चित्तेंद्रियाणां चिरनिग्रहेण
श्वासप्रचारे शमिते यमींद्राः ।
निवातदीपा इव निश्चलांगा
मनोन्मनीमग्नधियो भवन्ति ॥ १८ ॥

उन्मन्यवस्थाधिगमाय विद्व-

न्नुपायमेकं तव निर्दिशामः ।
पश्यन्नुदासीनतया प्रपंचं
संकल्पमुन्मूलय सावधानः ॥ १९ ॥
प्रसह्य संकल्पपरंपराणां
संभेदने संततसावधानम् ।
आलंबनाशादपचीयमानं
शनैः शनैः शांतिमुपैति चेतः ॥ २० ॥
निश्वासलोपैर्निभृतैः शरीरै-
र्नेत्रांबुजैरर्धनिमीलितैश्च ।
आविर्भवन्तीममनस्कमुद्रा-
मालोकयामो मुनिपुंगवानाम् ॥ २१ ॥
अमी यमींद्राः सहजामनस्का-
दहंममत्वे शिथिलायमाने ।
मनोतिगं मारुतवृत्तिशून्यं
गच्छन्ति भावं गगनावशेषम् ॥ २२ ॥
निवर्तयन्तीं निखिलेंद्रियाणि
प्रवर्तयन्तीं परमात्मयोगम् ।
संविन्मयीं तां सहजामनस्कां
कदा गमिष्यामि गतान्यभावः ॥ २३ ॥
प्रत्यग्विमर्शातिशयेन पुंसां
प्राचीनगंधेषु पलायितेषु ।
प्रादुर्भवेत्काचिदजाड्यनिद्रा
प्रपंचचिंतां परिवर्जयन्ती ॥ २४ ॥
विच्छिन्नसंकल्पविकल्पमूले
निःशेषनिर्मूलितकर्मजाले ।

निरंतराभ्यासनितांतभद्रा
सा जृंभते योगिनि योगनिद्रा ॥ २५ ॥
विश्रांतिमासाद्य तुरीयतल्पे
विश्वाद्यवस्थात्रितयोपरिस्थे ।
संविन्मयीं कामपि सर्वकालं
निद्रां सखे निर्विश निर्विकल्पाम् ॥ २६ ॥
प्रकाशमाने परमात्मभानौ
नश्यत्यविद्यातिमिरे समस्ते ।
अहो बुधा निर्मलदृष्टयोऽपि
किंचिन्न पश्यन्ति जगत्समग्रम् ॥ २७ ॥
सिद्धिं तथाविधमनोविलयां समाधौ
श्रीशैलशृंगकुहरेषु कदोपलप्स्ये ।
गात्रं यदा मम लताः परिवेष्टयन्ति
कर्णे यदा विरचयन्ति खगाश्च नीडान् ॥ २८ ॥
विचरतु मतिरेषा निर्विकल्पे समाधौ
कुचकलशयुगे वा कृष्णसारेक्षणानाम् ।
चतुरजडमते वा सज्जनानां मते वा
मतिकृतगुणदोषा मा विभुं न स्पृशन्ति ॥ २९ ॥

॥ इति योगतारावली संपूर्णा ॥

॥ शतश्लोकी ॥

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम् ।
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वाऽलौकिकोऽपि ॥ १ ॥

यद्वच्छ्रीखंडवृक्षप्रसृतपरिमलेनाभितोऽन्येऽपि वृक्षाः
शश्वत्सौगंध्यभाजोऽप्यतनुतनुभृतां तापमुन्मूलयन्ति ।
आचार्याल्लब्धबोधा अपि विधिवशतः सन्निधौ संस्थितानां
त्रेधा तापं च पापं सकरुणहृदयाः स्वोक्तिभिः क्षालयन्ति ॥ २ ॥

आत्मानात्मप्रतीतिः प्रथममभिहिता सत्यमिथ्यात्वयोगात्
द्वेधा ब्रह्मप्रतीतिर्निगमनिगदिता स्वानुभूत्योपपत्त्या ।
आद्या देहानुबंधाद्भवति तदपरा सा च सर्वात्मकत्वात्
आदौ ब्रह्माहमस्मीत्यनुभव उदिते खल्विदं ब्रह्म पश्चात् ॥ ३ ॥

आत्मा चिद्वित्सुखात्माऽनुभवपरिचितः सर्वदेहादियंता
सत्येवं मूढबुद्धिर्भजति ननु जनोऽनित्यदेहात्मबुद्धिम् ।
बाह्योऽस्थिस्नायुमज्जापलरुधिरवसाचर्ममेदोयुगन्त-
र्विण्मूत्रश्लेष्मपूर्णं स्वपरवपुरहो संविदित्वाऽपि भूयः ॥ ४ ॥

देहस्त्रीपुत्रमित्रानुचरहयवृषास्तोषहेतुर्ममेत्थं
सर्वे स्वायुर्नयन्ति प्रथितमलममी मांसमीमांसयेह ।
एते जीवन्ति येन व्यवहृतिपटवो येन सौभाग्यभाज-
स्तं प्राणाधीशमंतर्गतममृतममुं नैव मीमांसयन्ति ॥ ५ ॥

कश्चित्कीटः कथंचित्पटुमतिरभितः कंटकानां कुटीरं
कुर्वंस्तेनैव साकं व्यवहृतिविधये चेष्टते यावदायुः ।
तद्वज्जीवोऽपि नानाचरितसमुदितैः कर्मभिः स्थूलदेहं

निर्मायात्रैव तिष्ठन्ननुदिनममुना साकमभ्येति भूमौ ॥ ६ ॥
स्वीकुर्वन्व्याघ्रवेषं स्वजठरभृतये भीषयन्यश्च मुग्धान्
मत्या व्याघ्रोऽहमित्थं स नरपशुमुखान्बाधते किं नु सत्त्वान् ।
मत्वा स्त्रीवेषधारी स्त्र्यहमिति कुरुते किं नटो भर्तुरिच्छां
तद्वच्छारीर आत्मा पृथगनुभवतो देहतो यः स साक्षी ॥ ७ ॥
स्वं बालं रोदमानं चिरतरसमयं शांतिमानेतुमग्रे
द्राक्षं खार्जूरमाम्रं सुकदलमथवा योजयत्यंबिकाऽस्य ।
तद्वच्चेतोऽतिमूढं बहुजननभवान्मौढ्यसंस्कारयोगात्
बोधोपायैरनेकैरवशमुपनिषद्बोधयामास सम्यक् ॥ ८ ॥
यत्प्रीत्या प्रीतिपात्रं तनुयुवतितनूजार्थमुख्यं स तस्मात्
प्रेयानात्माऽथ शोकास्पदमितरदतः प्रेय एतत्कथं स्यात् ।
भार्याऽऽद्यं जीवितार्थे वितरति च वपुः स्वात्मनः श्रेय इच्छन्
तस्मादात्मानमेव प्रियमधिकमुपासीत विद्वान्न चान्यत् ॥ ९ ॥
यस्माद्यावत्प्रियं स्यादिह हि विषयतस्तावदस्मिन्प्रियत्वं
यावद्दुःखं च यस्माद्भवति खलु ततस्तावदेवाप्रियत्वम् ।
नैकस्मिन्सर्वकालेऽस्त्युभयमपि कदाऽप्यप्रियोऽपि प्रियः स्यात्
प्रेयानप्यप्रियो वा सततमपि ततः प्रेय आत्माख्यवस्तु ॥ १० ॥
श्रेयः प्रेयश्च लोके द्विविधमभिहितं काम्यमात्यंतिकं च
काम्यं दुःखैकबीजं क्षणलवविरसं तच्चिकीर्षन्ति मंदाः ।
ब्रह्मैवात्यंतिकं यन्निरतिशयसुखस्यास्पदं संश्रयन्ते
तत्त्वज्ञास्तच्च काठोपनिषदभिहितं षड्विधायां च वल्ल्याम् ॥ ११ ॥
आत्मांभोधेस्तरंगोऽस्म्यहमिति गमने भावयन्नासनस्थः
संवित्सूत्रानुविद्धो मणिरहमिति वाऽस्मींद्रियार्थप्रतीतौ ।
दृष्टोऽस्म्यात्मावलोकादिति शयनविधौ मग्न आनंदसिंधौ

अंतर्निष्ठो मुमुक्षुः स खलु तनुभृतां यो नयत्येवमायुः ॥ १२ ॥

वैराजव्यष्टिरूपं जगदखिलमिदं नामरूपात्मकं स्या-
दंतःस्थप्राणमुख्यात्प्रचलति च पुनर्वेत्ति सर्वान्पदार्थान् ।
नायं कर्ता न भोक्ता सवितृवदिति यो ज्ञानविज्ञानपूर्णः
साक्षादित्थं विजानन्व्यवहरति परात्मानुसंधानपूर्वम् ॥ १३ ॥

नैर्वेद्यं ज्ञानगर्भं द्विविधमभिहितं तत्र वैराग्यमाद्यं
प्रायो दुःखावलोकाद्भवति गृहसुहृत्पुत्रवित्तैषणादेः ।
अन्यज्ज्ञानोपदेशाद्यदुदितविषये वान्तवद्धेयता स्यात्
प्रव्रज्याऽपि द्विधा स्यान्नियमितमनसां देहतो गेहतश्च ॥ १४ ॥

यः कश्चित्सौख्यहेतोस्त्रिजगति यतते नैव दुःखस्य हेतोः
देहेऽहंता तदुत्था स्वविषयममता चेति दुःखास्पदे द्वे ।
जानन्रोगाभिघाताद्यनुभवति यतोऽनित्यदेहात्मबुद्धि-
र्भार्यापुत्रार्थनाशे विपदमथ परामेति नारातिनाशे ॥ १५ ॥

तिष्ठन्गेहे गृहेशोऽप्यतिथिरिव निजं धाम गंतुं चिकीर्षुः
देहस्थं दुःखसौख्यं न भजति सहसा निर्ममत्वाभिमानः ।
आयात्रायास्यतीदं जलदपटलवद्यातृ यास्यत्यवश्यं
देहाद्यं सर्वमेव प्रविदितविषयो यश्च तिष्ठत्ययत्नः ॥ १६ ॥

शक्त्या निर्मोकतः स्वाद्बहिरहिरिव यः प्रव्रजन्स्वीयगेहात्
छायां मार्गद्रुमोत्थां पथिक इव मनाक् संश्रयेद्देहसंस्थाम् ।
क्षुत्पर्याप्तं तरुभ्यः पतितफलमयं प्रार्थयेद्भैक्ष्यमन्नं
स्वात्मारामं प्रवेष्टुं स खलु सुखमयं प्रव्रजेद्देहतोऽपि ॥ १७ ॥

कामो बुद्धावुदेति प्रथममिह मनस्युद्दिशत्यर्थजातं
तद्गृह्णातींद्रियास्यैस्तदनधिगमतः क्रोध आविर्भवेच्च ।
प्राप्तावर्थस्य संरक्षणमतिरुदितो लोभ एतत्त्रयं स्यात्
सर्वेषां पातहेतुस्तदिह मतिमता त्याज्यमध्यात्मयोगात् ॥ १८ ॥

दानं ब्रह्मार्पणं यत्क्रियत इह नृभिः स्यात्क्षमाऽक्रोधसंज्ञा
श्रद्धाऽऽस्तिक्यं च सत्यं सदिति परमतः सेतुसंज्ञं चतुष्कम् ।
तत्स्याद्बंधाय जंतोरिति चतुर इमान्दानपूर्वैश्चतुर्भिः
तीर्त्वा श्रेयोऽमृतं च श्रयत इह नरः स्वर्गतिं ज्योतिराप्तिम् ॥१९॥
अन्नं देवातिथिभ्योऽर्पितममृतमिदं चान्यथा मोघमन्नं
यश्चात्मार्थं विधत्ते तदिह निगदितं मृत्युरूपं हि तस्य ।
लोकेऽसौ केवलाघो भवति तनुभृतां केवलादी च यः स्यात्
त्यक्त्वा प्राणाग्निहोत्रं विधिवदनुदिनं योऽश्नुते सोऽपि मर्त्यः ॥२०॥
लोके भोजः स एवार्पयति गृहगतायार्थिनेऽन्नं कृशाय
यस्तस्मै पूर्णमन्नं भवति मखविधौ जायतेऽजातशत्रुः ।
सख्ये नान्नार्थिने योऽर्पयति न स सखा सेवमानाय नित्यं
संसक्तायान्नमस्माद्विमुख इव परावृत्तिमिच्छेत्कदर्यात् ॥ २१ ॥
स्वाज्ञानज्ञानहेतू जगदुदयलयौ सर्वसाधारणौ स्तः
जीवेष्वास्वर्णगर्भं श्रुतय इति जगुर्हूयते स्वप्रबोधे ।
विश्वं ब्रह्मण्यबोधे जगति पुनरिदं हूयते ब्रह्म यद्वत्
शुक्तौ रौप्यं च रौप्येऽधिकरणमथवा हूयतेऽन्योन्यमोहात् ॥२२॥
तुच्छत्वान्नासदासीद्गगनकुसुमवद्भेदकं नो सदासीत्
किंत्वाभ्यामन्यदासीद्व्यवहृतिगतिसन्नास लोकस्तदानीम् ।
किंत्वर्वागेव शुक्तौ रजतवदपरो नो विराड्व्योमपूर्वः
शर्मण्यात्मन्यथैतत्कुहकसलिलवत्किं भवेदावरीवः ॥ २३ ॥
बंधो जन्मात्ययात्मा यदि न पुनरभूत्तर्हि मोक्षोऽपि नासीत्
यद्वद्रात्रिर्दिनं वा न भवति तरणौ किंतु दृग्दोष एषः ।
अप्राणं शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं
तस्मादन्यच्च नासीत्परिवृतमजया जीवभूतं तदेव ॥ २४ ॥
प्रागासीद्भावरूपं तम इति तमसा गूढमस्मादतर्क्यं

क्षीरांतर्यद्वदंभो जनिरिह जगतो नामरूपात्मकस्य ।
कामाद्धातुः सिसृक्षोरनुगतजगतः कर्मभिः संप्रवृत्तात्
रेतोरूपैर्मनोभिः प्रथममनुगतैः संततैः कार्यमाणैः ॥ २५ ॥

चत्वारोऽस्याः कपर्दा युवतिरथ भवेन्नूतना नित्यमेषा
माया वा पेशला स्यादघटितघटनापाटवं याति यस्मात् ।
स्यादारंभे घृतास्या श्रुतिभववयुनान्येवमाच्छादयन्ती
तस्यामेतौ सुपर्णाविव परपुरुषौ तिष्ठतोऽर्थप्रतीत्या ॥ २६ ॥

एकस्तत्रास्त्यसंगस्तदनु तदपरोऽज्ञानसिंधुं प्रविष्टो
विस्मृत्यात्मस्वरूपं स विविधजगदाकारमाभासमैक्षत् ।
बुद्ध्याऽन्तर्यावदैक्षद्विसृजति तमजा सोऽपि तामेवमेक-
स्तावद्विप्रास्तमेकं कथमपि बहुधा कल्पयन्ति स्ववाग्भिः ॥ २७

नायाति प्रत्यगात्मा प्रजननसमये नैव यात्यंतकाले
यत्सोऽखंडोऽस्ति लैंगं मन इह विशति प्रव्रजत्यूर्ध्वमर्वाक् ।
तत्कार्श्यं स्थूलतां वा न भजति वपुषः किंतु संस्कारजाते
तेजोमात्रा गृहीत्वा व्रजति पुनरिहायाति तैस्तैस्सहैव ॥ २८ ॥

आसीत्पूर्वं सुबंधुर्भृशमवनिसुरो यः पुरोधाः सनाते-
र्ब्राह्मयात्कूटाभिचारात्स खलु मृतिमितस्तन्मनोऽगात्कृतान्तम् ।
तद्भ्राता श्रौतमंत्रैः पुनरनयदिति प्राह सूक्तेन वेदः
तस्मादात्माभियुक्तं व्रजति ननु मनः कर्हिचिन्नांतरात्मा ॥ २९ ॥

एको निष्कंप आत्मा प्रचलति मनसा धावमानेन तस्मिन्
तिष्ठन्नग्रेऽथ पश्चान्न हि तमनुगतं जानते चक्षुराद्याः ।
यद्वत्पाथस्तरंगः प्रचलति परितो धावमानैस्तदंतः
प्राक्पश्चादस्ति तेषां पवनसमुदितैस्तैः प्रशान्तैर्यथावत् ॥ ३० ॥

एकाक्यासीत्स पूर्वं मृगयति विषयानानुपूर्व्याऽन्तरात्मा
जाया मे स्यात्प्रजा वा धनमुपकरणं कर्म कुर्वंस्तदर्थम् ।

क्लेशैः प्राणावशेषैर्महदपि मनुते नान्यदस्माद्वरीय-
स्त्वेकालाभेऽप्यकृत्स्नो मृत इव विरमत्येकहान्याऽकृतार्थः ॥३१॥
नात्सीत्पूर्वं न पश्चादतनुदिनकराच्छादको वारिवाहः
दृश्यः किं त्वंतराऽसौ स्थगयति स दृशं पश्यतो नार्कबिंबम्।
नो चेदेवं विनाऽर्कं जलधरपटलं भासते तर्हि कस्मात्
तद्वद्विश्वं पिधत्ते दृशमथ न परं भासकं चालकं स्वम् ॥ ३२ ॥
भुंजानः स्वप्नराज्यं ससकलविभवो जागरं प्राप्य भूयः
राज्यभ्रष्टोऽहमित्थं न भजति विषमं तन्मृषा मन्यमानः।
स्वप्ने कुर्वन्नगम्यागमनमुखमघं तेन न प्रत्यवायी
तद्वज्जाग्रद्दशायां व्यवहृतिमखिलां स्वप्नवद्विस्मरेच्चेत् ॥ ३३ ॥
स्वप्नावस्थाऽनुभूतं शुभमथ विषमं तन्मृषा जागरे स्यात्
जाग्रत्यां स्थूलदेहव्यवहृतिविषयं तन्मृषा स्वापकाले।
इत्थं मिथ्यात्वसिद्धावनिशमुभयथा सज्जते तत्र मूढः
सत्ये तद्भासकेऽस्मिन्निह हि कुत इदं तन्न विद्मो वयं हि ॥३४॥
जीवन्तं जाग्रतीह स्वजनमथ मृतं स्वप्नकाले निरीक्ष्य
निर्वेदं यात्यकस्मान्मृतममृतममुं वीक्ष्य हर्षं प्रयाति।
स्मृत्वाऽप्येतस्य जंतोर्निधनमसुयुतिं भाषते तेन साकं
सत्येवं भाति भूयोऽल्पकसमयवशात्सत्यता वा मृषात्वम् ॥३५॥
स्वाप्नस्त्रीसंगसौख्यादपि भृशमसतो या च रेतश्च्युतिः स्यात्
सा दृश्या तद्वदेतत्स्फुरति जगदसत्कारणं सत्यकल्पम्।
स्वप्ने सत्यः पुमान्स्याद्युवतिरिह मृषैवानयोः संयुतिश्च
प्रातः शुक्रेण वस्त्रोपहतिरिति यतः कल्पनामूलमेतत् ॥ ३६ ॥
पश्यन्त्यारामसस्य प्रतिदिवसममी जंतवः स्वापकाले
पश्यत्येनं न कश्चित्करणगणमृते मायया क्रीडमानम्।
जाग्रत्यर्थव्रजानामथ च तनुभृतां भासकं चालकं वा

नो जानीते सुषुप्तौ परमसुखमयं कश्चिदाश्चर्यमेतत् ॥ ३७ ॥

स्वप्ने मंत्रोपदेशः श्रवणपरिचितः सत्य एष प्रबोधे
स्वप्नादेव प्रसादादभिलषितफलं सत्यतां प्रातरेति ।
सत्यप्राप्तिस्त्वसत्यादपि भवति तथा किंच तत्स्वप्रकाशं
येनेदं भाति सर्वं चरमचरमथोच्चावचं दृश्यजातम् ॥ ३८ ॥

मध्यप्राणं सुषुप्तौ स्वजनिमनुविशन्त्यग्निसूर्यादयोऽमी
वागाद्याः प्राणवायुं तदिह निगदिता ग्लानिरेषां न वायोः ।
तेभ्यो दृश्यावभासो भ्रम इति विदितः शुक्तिकारौप्यकल्पः
प्राणायामव्रतं तच्छ्रुतिशिरसि मतं स्वात्मलब्धौ न चान्यत् ॥३९

नोऽकस्मादार्द्रमेधः स्पृशति च दहनः किंतु शुष्कं निदाघा-
दार्द्रं चेतोऽनुबंधैः कृतसुकृतमपि स्वोक्तकर्मप्रजार्थैः ।
तद्वज्ज्ञानाग्निरेतत्स्पृशति न सहसा किंतु वैराग्यशुष्कं
तस्माच्छुद्धो विरागः प्रथममभिहितस्तेन विज्ञानसिद्धिः ॥ ४०

यत्किंचिन्नामरूपात्मकमिदमसदेवोदितं भाति भूमौ
येनानेकप्रकारैर्व्यवहरति जगद्येन तेनेश्वरेण ।
तद्वत्प्रच्छादनीयं निभृतरशनया यद्वदेष द्विजिह्व-
स्तेन त्यक्तेन भोज्यं सुखमनतिशयं मा गृधोऽन्यद्धनाद्यम् ॥४१

जीवन्मुक्तिर्मुमुक्षोः प्रथममथ ततो मुक्तिरात्यंतिकी च
तेऽभ्यासज्ञानयोगाद्गुरुचरणकृपाऽपांगसंगेन लब्धात् ।
अभ्यासोऽपि द्विधा स्यादधिकरणवशाद्दैहिको मानसश्च
शारीरस्त्वासनाद्यो ह्युपरतिरपरो ज्ञानयोगः पुरोक्तः ॥ ४२ ॥

सर्वानुन्मूल्य कामान् हृदि कृतनिलयान्क्षिप्तशंकूनिवोच्चैः
दीर्यद्देहाभिमानस्त्यजति चपलतामात्मदत्तावधानः ।
यात्यूर्ध्वस्थानमुच्चैः नाडिकाभिर्विचित्रं

नीलश्वेतारुणाभिः स्रवदमृतभरं गृह्यमाणात्मसौख्यः ॥ ४३ ॥
प्रापश्यद्विश्वमात्मेत्ययमिह पुरुषः शोकमोहाद्यतीतः
शुक्रं ब्रह्माध्यगच्छत्स खलु सकलवित्सर्वसिद्ध्यास्पदं हि ।
विस्मृत्य स्थूलसूक्ष्मप्रभृतिवपुरसौ सर्वसंकल्पशून्यो
जीवन्मुक्तस्तुरीयं पदमधिगतवान्पुण्यपापैर्विहीनः ॥ ४४ ॥

यः सत्त्वाकारवृत्तौ प्रतिफलति युवा देहमात्रावृतोऽपि
तद्धर्मैर्बाल्यवार्द्धर्यादिभिरनुपहतः प्राण आविर्बभूव ।
श्रेयान्साध्यस्तमेतं सुनिपुणमतयः सत्यसंकल्पभाजो
ह्यभ्यासादेवयन्तः परिणतमनसा साकमूर्ध्वं नयन्ति ॥ ४५ ॥
प्रायोऽकामोऽस्तकामो निरतिशयसुखायात्मकामस्तदाऽसौ
तत्प्राप्तावाप्तकामः स्थितचरमदशस्तस्य देहावसाने ।
प्राणा नैवोत्क्रमन्ति क्रमविरतिमिताः स्वस्वहेतौ तदानीं
कायं जीवो विलीनो लवणमिव जलेऽखंड आत्मैव पश्चात् ॥४६॥
पिंडीभूतं यदंतर्जलनिधिसलिलं याति तत्सैंधवाख्यं
भूयः प्रक्षिप्तमस्मिन्विलयमुपगतं नामरूपे जहाति ।
प्राज्ञस्तद्वत्परात्मन्यथ भजति लयं तस्य चेतो हिमांशौ
वागग्नौ चक्षुरर्के पयसि पुनरसृग्रेतसी दिक्षु कर्णौ ॥ ४७ ॥
क्षीरांतर्यद्वदाज्यं मधुरिमविदितं तत्पृथग्भूतमस्मात्
भूतेषु ब्रह्म तद्वद्व्यवहृतिविदितं श्रांतविश्रांतिबीजम् ।
यं लब्ध्वा लाभमन्यं तृणमिव मनुते यत्र नोदेति भीतिः
सान्द्रानंदं यदंतः स्फुरति तदमृतं विद्धयतो ह्यन्यदार्तम् ॥ ४८ ॥
ओतः प्रोतश्च तंतुष्विह विततपटश्चित्रवर्णेषु चित्रः
तस्मिञ्जिज्ञास्यमाने ननु भवति पटः सूत्रमात्रावशेषः ।
तद्वद्विश्वं विचित्रं नगनगरनरग्रामपश्वादिरूपं
प्रोतं वैराजरूपे स वियति तदपि ब्रह्मणि प्रोतमोतम् ॥ ४९ ॥

रूपं रूपं प्रतीदं प्रतिफलनवशात्प्रातिरूप्यं प्रपेदे
ह्येको द्रष्टा द्वितीयो भवति च सलिले सर्वतोऽनंतरूपः ।
इंद्रो मायाभिरास्ते श्रुतिरिति वदति व्यापकं ब्रह्म तस्मात्
जीवत्वं यात्यकस्मादतिविमलतरे बिंबितं बुद्ध्युपाधौ ॥ ५० ॥

तज्ज्ञाः पश्यन्ति बुद्ध्या परमबलवतो माययाऽक्तं पतंगं
बुद्धावंतःसमुद्रे प्रतिफलितमरीच्यास्पदं वेधसस्तम् ।
यादृग्यावानुपाधिः प्रतिफलति तथा ब्रह्म तस्मिन्यथाऽऽस्यं
प्राप्तादर्शानुरूपं प्रतिफलति यथाऽवस्थितं सत्सदैव ॥ ५१ ॥

एको भानुस्तटस्थः प्रतिफलनवशाद्यस्त्वनेकोदकान्त-
र्नानात्वं यात्युपाधिस्थितिगतिसमतां चापि तद्वत्परात्मा ।
भूतेषूच्चावचेषु प्रतिफलति इवाभाति तावत्स्वभावा-
वच्छिन्नो यः परं तु स्फुटमनुपहतो भाति तावत्स्वभावैः ॥ ५२ ॥

यद्वत्पीयूषरश्मौ दिनकरकिरणैर्बिंबितैरेति सांद्रं
नाशं नैशं तमिस्रं गृहगतमथवा मूर्च्छितैः कांस्यपात्रे ।
तद्वद्बुद्धौ परात्मद्युतिभिरनुपदं बिंबिताभिः समंता-
द्भासन्ते हींद्रियास्यप्रभृतिभिरनिशं रूपमुख्याः पदार्थाः ॥ ५३ ॥

पूर्णात्मानात्मभेदात्त्रिविधमिह परं बुद्ध्यवच्छिन्नमन्यत्
तत्रैवाभासमात्रं गगनमिव जले त्रिप्रकारं विभाति ।
अंभोऽवच्छिन्नमस्मिन्प्रतिफलितमतः पाथसोऽतर्बहिश्च
पूर्णावच्छिन्नयोगे व्रजति लयमविद्या स्वकार्यैः सहैव ॥ ५४ ॥

दृश्यन्ते दारुनार्यो युगपदगणिताः स्तंभसूत्रप्रयुक्ताः
संगीतं दर्शयन्त्यो व्यवहृतिमपरां लोकसिद्धां च सर्वाम् ।
सर्वत्रानुप्रविष्टादभिनवविभवाद्यावदर्थानुबंधात्
तद्वत्सूत्रात्मसंज्ञाद्व्यवहरति जगद्भूर्भुवस्स्वर्महान्तम् ॥ ५५ ॥

तत्सत्यं यत्त्रिकालेष्वनुपहतमदः प्राणदिग्व्योममुख्यं

यस्मिन्विश्रान्तमास्ते तदिह निगदितं ब्रह्म सत्यस्य सत्यम् ।
नास्त्यन्यत्किंच यद्वत्परमधिकमतो नाम सत्यस्य सत्यं
सच्च त्यच्चेति मूर्ताद्युपहितमवरं सत्यमस्यापि सत्यम् ॥ ५६ ॥
यत्किंचिद्भात्यसत्यं व्यवहृतिविषये रौप्यसर्पाम्बुमुख्यं
तद्वै सत्याश्रयेणेत्ययमिह नियमः सावधिर्लोकसिद्धः ।
तद्वत्सत्यस्य सत्ये जगदखिलमिदं ब्रह्मणि प्राविरासीत्
मिथ्याभूतं प्रतीतं भवति खलु यतस्तच्च सत्यं वदन्ति ॥५७॥
यत्राकाशावकाशः कलयति च कलामात्रतां यत्र कालो
यत्रैवाशावसानं बृहदिह हि विराट् पूर्वमर्वागिवास्ते ।
सूत्रं यत्राविरासीन्महदपि महतस्तद्धि पूर्णाच्च पूर्णं
संपूर्णादर्णवादेरपि भवति यथा पूर्णमेकार्णवांभः ॥ ५८ ॥
अंतः सर्वौषधीनां पृथगमितरसैर्गंधवीर्यैर्विपाकै-
रेकं पाथोदपाथः परिणमति यथा तद्वदेवान्तरात्मा ।
नानाभूतस्वभावैर्वहति वसुमती येन विश्वं पयोदो
वर्षत्युच्चैर्हुताशः पचति दहति वा येन सर्वान्तरोऽसौ ॥ ५९ ॥
भूतेष्वात्मानमात्मन्यनुगतमखिलं भूतजातं प्रपश्येत्
प्रायः पाथस्तरंगान्वयवदथ चिरं सर्वमात्मैव पश्येत् ।
एकं ब्रह्माद्वितीयं श्रुतिशिरसि मतं नेह नानाऽस्ति किंचित्
मृत्योराप्नोति मृत्युं स इह जगदिदं यस्तु नानेव पश्येत् ॥ ६० ॥
प्राक्पश्चादस्ति कुंभाद्गगनमिदमिति प्रत्यये सत्यपीदं
कुंभोत्पत्तावुदेति प्रलयमुपगते नश्यतीत्यन्यदेशम् ।
नीते कुंभेन साकं व्रजति भजति वा तत्प्रमाणानुकारौ
इत्थं मिथ्याप्रतीतिः स्फुरति तनुभृतां विश्वतस्तद्वदात्मा ॥ ६१ ॥
यावत्पिंडो गुडस्य स्फुरति मधुरिमैवास्ति सर्वोऽपि तावान्
यावान्कर्पूरपिंडः परिणमति सदामोद एवात्र तावान् ।

विश्वं यावद्विभाति द्रुमनगनगरारामचैत्याभिरामं
तावच्चैतन्यमेकं प्रविकसति यतोऽन्ते तदात्मावशेषम् ॥ ६२ ॥
वाद्याघ्रादानुभूतिर्यदपि तदपि सा नूनमाघातगम्या
वाद्याघातध्वनीनां न पृथगनुभवः किंतु तत्साहचर्यात् ।
मायोपादानमेतत्सहचरितमिव ब्रह्मणाऽऽभाति तद्वत्
तस्मिन्प्रत्यक्प्रतीते न किमपि विषयीभावमाप्नोति यस्मात् ॥६३॥
दृष्टः साक्षादिदानीमिह खलु जगतामीश्वरः संविदात्मा
विज्ञातः स्थाणुरेको गगनवदभितः सर्वभूतान्तरात्मा ।
दृष्टं ब्रह्मातिरिक्तं सकलमिदमसद्रूपमाभासमात्रं
शुद्धं ब्रह्माहमस्मीत्यविरतमधुनाऽत्रैव तिष्ठेदनीहः ॥ ६४ ॥
इंद्रेंद्राण्योः प्रकामं सुरतसुखजुषोः स्याद्रतान्तः सुषुप्ति-
स्तस्यामानंदसांद्रं पदमतिगहनं यत्स आनंदकोशः ।
तस्मिन्नो वेद किंचिन्निरतिशयसुखाभ्यंन्तरे लीयमानो
दुःखी स्याद्बोधितः सन्निति कुशलमतिर्बोधयेन्नैव सुप्तम् ॥ ६५ ॥
सर्वे नंदन्ति जीवा अधिगतयशसा गृह्णता चक्षुरादीन्
अंतः सर्वोपकर्त्रा बहिरपि च सुषुप्तौ यथा तुल्यसंस्थाः ।
एतेषां किल्बिषस्पृग्जठरभृतिकृते यो बहिर्वृत्तिरास्ते
त्वक्चक्षुःश्रोत्रनासारसनवशमितो याति शोकं च मोहम् ॥६६॥
जाग्रत्यामंतरात्मा विषयसुखकृतेऽनेकयत्नान्विधास्यन्
श्राम्यत्सर्वेंद्रियौघोऽधिगतमपि सुखं विस्मरन्याति निद्राम् ।
विश्रामाय स्वरूपे त्वतितरसुलभं तेन चातींद्रियं हि
सुखं सर्वोत्तमं स्यात्परिणतिविरसादिंद्रियोत्थात्सुखाच्च ॥ ६७ ॥
पक्षावभ्यस्य पक्षी जनयति मरुतं तेन यात्युच्चदेशं
लब्ध्वा वायुं महान्तं श्रममपनयति स्वीयपक्षौ प्रसार्य ।
दुःसंकल्पैर्विकल्पैर्विषयमनु कदर्थीकृतं चित्तमेतत्

खिन्नं विश्रामहेतोः स्वपिति चिरमहो हस्तपादान्प्रसार्य ॥ ६८ ॥

आश्लिष्यात्मानमात्मा न किमपि सहसैवान्तरं वेद बाह्यं
यद्वत्कामी विदेशात्सदनमुपगतो गाढमाश्लिष्य कान्ताम् ।
यात्यस्तं तत्र लोकव्यवहृतिरखिला पुण्यपापानुबंधः
शोको मोहो भयं वा समविषममिदं न स्मरत्येव किंचित् ॥६९॥

अल्पानल्पप्रपंचप्रलय उपरतिश्चेंद्रियाणां सुखाप्ति-
र्जीवन्मुक्तौ सुषुप्तौ त्रितयमपि समं किंतु तत्रास्ति भेदः ।
प्राक्संस्कारात्प्रसुप्तः पुनरपि च परावृत्तिमेति प्रबुद्धो
नश्यत्संस्कारजातो न स किल पुनरावर्तते यश्च मुक्तः ॥ ७० ॥

आनंदान्यश्च सर्वाननुभवति नृपः सर्वसंपत्समृद्धः
तस्यानंदः स एकः स खलु शतगुणः संप्रदिष्टः पितॄणाम् ।
आदेवब्रह्मलोकं शतशतगुणितास्ते यदंतर्गताः स्युः
ब्रह्मानंदः स एकोऽस्त्यथ विषयसुखान्यस्य मात्रा भवन्ति ॥७१॥

यत्रानंदाश्च मोदाः प्रमुद इति मुदश्चासते सर्व एते
यत्राप्ताः सर्वकामाः स्युरखिलविरमात्केवलीभाव आस्ते ।
मां तत्रानंदसांद्रे कृधि चिरममृतं सोमपीयूषपूर्णां
धारामिंद्राय देहीत्यपि निगमगिरो भ्रूयुगान्तर्गताय ॥ ७२ ॥

आत्माऽकंपः सुखात्मा स्फुरति तदपरा त्वन्यथैव स्फुरन्ती
स्थैर्यं वा चंचलत्वं मनसि परिणतिं याति तत्रत्यमस्मिन् ।
चांचल्यं दुःखहेतुर्मनस इदमहो यावदिष्टार्थलब्धिः
तस्यां यावत्स्थिरत्वं मनसि विषयजं स्यात्सुखं तावदेव ॥७३॥

यद्वत्सौख्यं रतान्ते निमिषमिह मनस्येकताने रसे स्यात्
स्थैर्यं यावत्सुषुप्तौ सुखमनतिशयं तावदेवाथ मुक्तौ ।
नित्यानंदः प्रशान्ते हृदि तदिह सुखस्थैर्ययोः साहचर्यं
नित्यानंदस्य मात्रा विषयसुखमिदं युज्यते तेन वक्तुम् ॥ ७४ ॥

श्रान्तं स्वान्तं सबाह्यव्यवहृतिभिरिदं ताः समाकृष्य सर्वा-
स्तत्तत्संस्कारयुक्तं ह्युपरमति परावृत्तमिच्छन्निदानम् ।
स्वप्नान्संस्कारजातप्रजनितविषयान्स्वाप्नदेहेऽनुभूतान्
प्रोज्झ्यान्तः प्रत्यगात्मप्रवणमिदमगाद्भूरि विश्राममस्मिन् ॥७५॥
स्वप्ने भोगः सुखादेर्भवति ननु कुतः साधने मूर्च्छमाने
स्वाप्नं देहान्तरं तद्व्यवहृतिकुशलं नव्यमुत्पद्यते चेत् ।
तत्सामग्र्या अभावात्कुत इदमुदितं तद्धि सांकल्पिकं चेत्
तत्किं स्वाप्ने रतान्ते वपुषि निपतिते दृश्यते शुक्रमोक्षः ॥७६॥
भीत्या रोदित्यनेन प्रवदति हसति श्लाघते नूनमस्मात्
स्वप्नेऽप्यंगेऽनुबंधं त्यजति न सहसा मूर्च्छितेऽप्यंतरात्मा ।
पूर्वं ये येऽनुभूतास्तनुयुवतिहयव्याघ्रदेशादयोऽर्था-
स्तत्संस्कारस्वरूपान्सृजति पुनरमूञ्श्रित्य संस्कारदेहम् ॥ ७७ ॥
संधौ जाग्रत्सुषुप्त्योरनुभवविदिता स्वाप्न्यवस्था द्वितीया
तत्रात्मज्योतिरास्ते पुरुष इह समाकृष्य सर्वेंद्रियाणि ।
संवेश्य स्थूलदेहं समुचितशयने स्वीयभासाऽन्तरात्मा
पश्यन्संस्काररूपानभिमतविषयान्याति कुत्रापि तद्वत् ॥ ७८ ॥
रक्षन्प्राणैः कुलायं निजशयनगतं श्वासमात्रावशेषै-
र्मा भूत्तत्प्रेतकल्पाकृतिकमिति पुनः सारमेयादिभक्ष्यम् ।
स्वप्ने स्वीयप्रभावात्सृजति हयरथान्निम्नगाः पल्वलानि
क्रीडास्थानान्यनेकान्यपि सुहृदबलापुत्रमित्रानुकारान् ॥ ७९ ॥
मातंगव्याघ्रदस्युद्विषदुरगकपीन्कुत्रचित्प्रेयसीभिः
क्रीडन्नास्ते हसन्वा विहरति कुहचिन्मृष्टमश्नाति चान्नम् ।
म्लेच्छत्वं प्राप्तवानस्म्यहमिति कुहचिच्छंकितः स्वीयलोका-
दास्ते व्याघ्रादिभीत्या प्रचलति कुहचिद्रोदिति ग्रस्यमानः ॥८०॥
यो यो दृग्गोचरोऽर्थो भवति स स तदा तद्गतात्मस्वरूपा-

ऽविज्ञानोत्पद्यमानः स्फुरति ननु यथा शुक्तिकाऽज्ञानहेतुः ।
रौप्याभासो मृषैव स्फुरति च किरणज्ञानतोंऽभो भुजंगो
रज्ज्वज्ञानान्निमेषं सुखभयकृदतो दृष्टिसृष्टं किलेदम् ॥ ८१ ॥
मायाऽध्यासाश्रयेण प्रविततमखिलं यन्मया तेन मत्स्था-
न्येतान्येतेषु नाहं यदपि हि रजतं भाति शुक्तौ न रौप्ये ।
शुक्त्यंशस्तेन भूतान्यपि मयि न वसन्तीति विष्वग्विनेता
प्राहास्माद्दृश्यजातं सकलमपि मृषैवेंद्रजालोपमेयम् ॥ ८२ ॥
हेतुः कर्मैव लोके सुखतदितरयोरेवमज्ञोऽविदित्वा
मित्रं वा शत्रुरित्थं व्यवहरति मृषा याज्ञवल्क्यार्तभागौ ।
यत्कर्मैवोचतुः प्राग्जनकनृपगृहे चक्रतुस्तत्प्रशंसां
वंशोत्तंसो यदूनामिति वदति न कोऽप्यत्र तिष्ठत्यकर्मा ॥ ८३ ॥
वृक्षच्छेदे कुठारः प्रभवति यदपि प्राणिनोद्यस्तथाऽपि
प्रायोऽन्नं तृप्तिहेतुस्तदपि निगदितं कारणं भोक्तृयत्नः ।
प्राचीनं कर्म तद्वद्विषमसमफलप्राप्तिहेतुस्तथाऽपि
स्वातंत्र्यं नश्वरेऽस्मिन्न हि खलु घटते प्रेरकोऽस्यान्तरात्मा ॥८४॥
स्मृत्या लोकेषु वर्णाश्रमविहितमदो नित्यकाम्यादि कर्म
सर्वं ब्रह्मार्पणं स्यादिति निगमगिरः संगिरन्तेऽतिरम्यम् ।
यन्नासानेत्रजिह्वाकरचरणशिरःश्रोत्रसन्तर्पणेन
तुष्येदंगीव साक्षात्तरुरिव सकलो मूलसंतर्पणेन ॥ ८५ ॥
यः प्रैत्यात्मानभिज्ञः श्रुतिविदपि तथाकर्मकृत्कर्मणोऽस्य
नाशः स्यादल्पभोगात्पुनरवतरणे दुःखभोगो महीयान् ।
आत्माभिज्ञस्य लिप्सोरपि भवति महान्शाश्वतः सिद्धिभोगो
ह्यात्मा तस्मादुपास्यः खलु तदधिगमे सर्वसौख्यान्यलिप्सोः ॥८६॥
सूर्याद्यैरर्थभानं न हि भवति पुनः केवलैर्नात्र चित्रं
सूर्यात्सूर्यप्रतीतिर्न भवति सहसा नापि चन्द्रस्य चन्द्रात् ।

अग्नेरग्नेश्च किन्तु स्फुरति रविमुखं चक्षुषश्चिरप्रयुक्तात्
आत्मज्योतिस्ततोऽयं पुरुष इह महो देवतानां च चित्रम् ॥८७॥
प्राणेनाम्भांसि भूयः पिबति पुनरसावन्नमश्नाति तत्र
तत्पाकं जाठरोऽग्निस्तदुपहितबलो द्राक् शनैर्वा करोति ।
व्यानः सर्वांगनाडीष्वथ नयति रसं प्राणसंतर्पणार्थं
निस्सारं पूतिगंधं त्यजति बहिरयं देहतोऽपानसंज्ञः ॥ ८८ ॥
व्यापारं देहसंस्थः प्रतिवपुरखिलं पंचवृत्त्यात्मकोऽसौ
प्राणः सर्वेंद्रियाणामधिपतिरनिशं सत्तया निर्विवादम् ।
यस्येत्थं चिद्घनस्य स्फुटमिह कुरुते सोऽस्मि सर्वस्य साक्षी
प्राणस्य प्राण एषोऽप्यखिलतनुभृतां चक्षुषश्चक्षुरेषः ॥ ८९ ॥
यं भान्तं चिद्घनैकं क्षितिजलपवनादित्यचंद्रादयो ये
भासा तस्यैव चानु प्रविरलगतयो भान्ति तस्मिन्वसन्ति ।
विद्युत्पुंजोऽग्निसंघोऽप्युडुगणविततिर्भासयेत्किं परेशं
ज्योतिश्शान्तं ह्यनंतं कविमजममरं शाश्वतं जन्मशून्यम् ॥ ९० ॥
तद्ब्रह्मैवाहमस्मीत्यनुभव उदितो यस्य कस्यापि चेद्वै
पुंसः श्रीसद्गुरूणामतुलितकरुणापूर्णपीयूषदृष्ट्या ।
जीवन्मुक्तः स एव भ्रमविधुरमना निर्गतेऽनाद्युपाधौ
नित्यानंदैकधाम प्रविशति परमं नष्टसंदेहवृत्तिः ॥ ९१ ॥
नो देहो नेंद्रियाणि क्षरमतिचपलं नो मनो नैव बुद्धिः
प्राणो नैवाहमस्मीत्यखिलजडमिदं वस्तुजातं कथं स्याम् ।
नाहंकारो न दारा गृहसुतसुजनक्षेत्रवित्तादि दूरं
साक्षी चित्प्रत्यगात्मा निखिलजगदधिष्ठानभूतः शिवोऽहम् ॥९२॥
दृश्यं यद्रूपमेतद्भवति च विशदं नीलपीताद्यनेकं
सर्वस्यैतस्य दृग्वै स्फुरदनुभवतो लोचनं चैकरूपम् ।

तद्दृश्यं मानसं दृक्परिणतविषयाकारधीवृत्तयोऽपि
दृश्या दृग्रूप एव प्रभुरिह स तथा दृश्यते नैव साक्षी ॥ ९३ ॥
रज्ज्वज्ञानाद्भुजंगस्तदुपरि सहसा भाति मंदांधकारे
स्वात्माज्ञानात्तथाऽसौ भृशमसुखमभूदात्मनो जीवभावः ।
आप्तोक्त्याऽहिभ्रमान्ते स च खलु विदिता रज्जुरेका तथाऽहं
कूटस्थो नैव जीवो निजगुरुवचसा साक्षिभूतः शिवोऽहम् ॥९४॥
किं ज्योतिस्ते वदस्वाहनि रविरिह मे चंद्रदीपादि रात्रौ
स्यादेवं भानुदीपादिकपरिकलने किं तव ज्योतिरस्ति ।
चक्षुस्तन्मीलने किं भवति च सुतरां धीर्धियः किं प्रकाशे
तत्रैवाहं ततस्त्वं तदसि परमकं ज्योतिरस्मि प्रभोऽहम् ॥ ९५ ॥
कंचित्कालं स्थितः कौ पुनरिह भजते नैव देहादिसंघं
यावत्प्रारब्धभोगं कथमपि स सुखं चेष्टतेऽसंगबुद्ध्या ।
निर्द्वंद्वो नित्यशुद्धो विगलितममताऽहंकृतिर्नित्यतृप्तो
ब्रह्मानंदस्वरूपः स्थिरमतिरचलो निर्गताशेषमोहः ॥ ९६ ॥
जीवात्मब्रह्मभेदं दलयति सहसा यत्प्रकाशैकरूपं
विज्ञानं तच्च बुद्धौ समुदितमतुलं यस्य पुंसः पवित्रम् ।
माया तेनैव तस्य क्षयमुपगमिता संसृतेः कारणं या
नष्टा सा कार्यकर्त्री पुनरपि भविता नैव विज्ञानमात्रात् ॥ ९७ ॥
विश्वं नेति प्रमाणाद्विगलितजगदाकारभानस्त्यजेद्वै
पीत्वा यद्वत्फलांभस्त्यजति च सुतरां तत्फलं सौरभाढ्यम् ।
सम्यक्सच्चिद्घनैकामृतसुखकवलास्वादपूर्णो हृदाऽसौ
ज्ञात्वा निस्सारमेवं जगदखिलमिदं स्वप्रभः शांतचित्तः ॥ ९८ ॥
क्षीयन्ते चास्य कर्माण्यपि खलु हृदयग्रंथिरुद्भिद्यते वै
छिद्यन्ते संशया ये जनिमृतिफलदा दृष्टमात्रे परेशे ।
तस्मिंश्चिन्मात्ररूपे गुणमलरहिते तत्त्वमस्यादिलक्ष्ये

कूटस्थे प्रत्यगात्मन्यखिलविधिमनोऽगोचरे ब्रह्मणीशे ॥ ९९ ॥
आदौ मध्ये तथाऽन्ते जनिमृतिफलदं कर्ममूलं विशालं
ज्ञात्वा संसारवृक्षं भ्रममदमुदिताशोकताऽनेकपत्रम् ।
कामक्रोधादिशाखं सुतपशुवनिताकन्यकापक्षिसंघं
छित्त्वाऽसंगासिनैनं पटुमतिरभितश्चिन्तयेद्वासुदेवम् ॥ १०० ॥
जातं मय्येव सर्वं पुनरपि मयि तत्संस्थितं चैव विश्वं
सर्वं मय्येव याति प्रविलयमिति तद्ब्रह्म चैवाहमस्मि ।
यस्य स्मृत्या च यज्ञाद्यखिलशुभविधौ सुप्रयातीह कार्यं
न्यूनं संपूर्णतां वै तमहमतिमुदैवाच्युतं संनतोऽस्मि ॥ १०१ ॥

इति शतश्लोकी समाप्ता ॥

॥ स्वात्मप्रकाशिका ॥

जगत्कारणमज्ञानमेकमेव चिदन्वितम् ।
एक एव मनः साक्षी जानात्येवं जगत्त्रयम् ॥ १ ॥
विवेकयुक्तबुद्ध्याहं जानाम्यात्मानमद्वयम् ।
तथापि बंधमोक्षादिव्यवहारः प्रतीयते ॥ २ ॥
विवर्तोऽपि प्रपंचो मे सत्यवद्भाति सर्वदा ।
इति संशयपाशेन बद्धोऽहं छिंद्धि संशयम् ॥ ३ ॥
एवं शिष्यवचः श्रुत्वा गुरुराहोत्तरं स्फुटम् ।
नाज्ञानं नच बुद्धिश्च न जगन्न च साक्षिता ॥ ४ ॥
गंधमोक्षादयः सर्वे कृताः सत्येऽद्वये त्वयि ।
भातीत्युक्ते जगत्सर्वं सद्रूपं ब्रह्म तद्भवेत् ॥ ५ ॥
सर्पादौ रज्जुसत्तेव ब्रह्मसत्तैव केवलम् ।
प्रपंचाधाररूपेण वर्तते सज्जगन्न हि ॥ ६ ॥
यथेक्षुमभिसंव्याप्य शर्करा वर्तते तथा ।
आश्चर्यब्रह्मरूपेण त्वं व्याप्तोऽसि जगत्त्रयम् ॥ ७ ॥
मरुभूमौ जलं सर्वं मरुभूमात्रमेव तत् ।
जगत्त्रयमिदं सर्वं चिन्मात्रं सुविचारतः ॥ ८ ॥
ब्रह्मादिस्तंबपर्यंताः प्राणिनस्त्वयि कल्पिताः ।
बुद्बुदादितरंगांता विकाराः सागरे यथा ॥ ९ ॥
तरंगत्वं ध्रुवं सिंधुर्न वांछति यथा तथा ।
विषयानंदवांछा ते महदानंदरूपतः ॥ १० ॥
पिष्टं व्याप्य गुडं यद्वन्माधुर्यं न हि वांछति ।
पूर्णानंदो जगद्व्याप्य तदानंदं न वांछति ॥ ११ ॥
दारिद्र्याशा यथा नास्ति संपन्नस्य तथा तव ।

ब्रह्मानंदनिमग्नस्य विषयाशा न संभवेत् ॥ १२ ॥
विषं दृष्ट्वाऽमृतं दृष्ट्वा विषं त्यजति बुद्धिमान् ।
आत्मानमपि दृष्ट्वा त्वं त्यजानात्मानमादरात् ॥ १३ ॥
घटावभासको भानुर्घटनाशे न नश्यति ।
देहावभासकः साक्षी देहनाशे न नश्यति ॥ १४ ॥
निराकारं जगत्सर्वं निर्मलं सच्चिदात्मकम् ।
द्वैताभावात्कथं कस्माद्भयं पूर्णस्य मे वद ॥ १५ ॥
ब्रह्मादिकं जगत्सर्वं त्वय्यानंदे प्रकल्पितम् ।
त्वय्येव लीनं जगत्त्वं कथं लीयसे वद ॥ १६ ॥

न हि प्रपंचो न हि भूतजातं
न चेंद्रियं प्राणगणो न देहः ।
न बुद्धिचित्तं न मनो न कर्ता
ब्रह्मैव सत्यं परमात्मरूपम् ॥ १७ ॥

सर्वं सुखं विद्धि सुदुःखनाशा-
त्सर्वं च सद्रूपमसत्यनाशात् ।
चिद्रूपमेव प्रतिभानयुक्तं
तस्मादखंडं परमात्मरूपम् ॥ १८ ॥

चिदेव देहस्तु चिदेव लोका-
श्चिदेव भूतानि चिदिंद्रियाणि ।
कर्ता चिदंतःकरणं चिदेव
चिदेव सत्यं परमार्थरूपम् ॥ १९ ॥

न मे बंधो न मे मुक्तिर्न मे शास्त्रं न मे गुरुः ।
मायामात्रविलासो हि मायातीतोऽहमद्वयः ॥ २० ॥
राज्यं करोतु विज्ञानी भिक्षामटतु निर्भयः ।
दोषैर्न लिप्यते शुद्धः पद्मपत्रमिवांभसा ॥ २१ ॥

पुण्यानि पापकर्माणि स्वप्नगानि न जाग्रति ।
एवं जाग्रत्पुण्यपापकर्माणि न हि मे प्रभोः ॥ २२ ॥
कायः करोतु कर्माणि वृथा वागुच्यतामिह ।
राज्यं ध्यायतु वा बुद्धिः पूर्णस्य मम का क्षतिः ॥ २३ ॥
प्राणाश्चरन्तु तद्धर्मैः कामैर्वा हन्यतां मनः ।
आनंदामृतपूर्णस्य मम दुःखं कथं भवेत् ॥ २४ ॥
आनंदांबुधिमग्नोऽसौ देहो तत्र न दृश्यते ।
लवणं जलमध्यस्थं यथा तत्र लयं गतम् ॥ २५ ॥
इंद्रियाणि मनः प्राणा अहंकारः परस्परम् ।
जाड्यसंगानिमुत्सृज्य मग्ना मयि चिदर्णवे ॥ २६ ॥
आत्मानमंजसा वेद्मि त्वज्ञानं प्रपलायितम् ।
कर्तृत्वमद्य मे नष्टं कर्तव्यं वापि न क्वचित् ॥ २७ ॥

चिदमृतसुखराशौ चित्तफेनं विलीनं
क्षयमधिगत एव वृत्तिचचत्तरंगः ।
स्तिमितसुखसमुद्रो निर्विचेष्टः सुपूर्णः
कथमिह मम दुःखं सर्वदैकोऽहमस्मि ॥२८॥

आनंदरूपोऽहमखंडबोधः
परात्परोऽहं घनचित्प्रकाशः ।
मेघा यथा व्योम न च स्पृशन्ति
संसारदुःखानि न मां स्पृशन्ति ॥२९॥

अस्थिमांसपुरीषांत्रचर्मलोमसमन्वितः ।
अन्नादः स्थूलदेहः स्यादतोऽहं शुद्धचिद्घनः ॥३०॥
स्थूलदेहाश्रिता एते स्थूलाद्भिन्नस्य मे न हि ।
लिंगं जडात्मकं नाहं चित्स्वरूपोऽहमद्वयः ॥३१॥
क्षुत्पिपासांध्यबाधिर्यकामक्रोधादयोऽखिलाः ।

लिंगदेहाश्रिता ह्येते नैवालिंगस्य मे विभोः ॥ ३२ ॥
अनाद्यज्ञानमेवात्र कारणं देहमुच्यते ।
नाहं कारणदेहोऽपि स्वप्रकाशो निरंजनः ॥ ३३ ॥
जडत्वप्रियमोदत्वधर्माः कारणदेहगाः ।
न सन्ति मम नित्यस्य निर्विकारस्वरूपिणः ॥ ३४ ॥
जीवाद्भिन्नः परेशोऽस्ति परेशत्वं कुतस्तव ।
इत्यज्ञजनसंवादो विचारः क्रियतेऽधुना ॥ ३५ ॥
अधिष्ठानं चिदाभासो बुद्धिरेतत्त्रयं यदा ।
अज्ञानादेकवद्भाति जीव इत्युच्यते तदा ॥ ३६ ॥
अधिष्ठानं न जीवः स्यात्प्रत्येकं निर्विकारतः ।
अवस्तुत्वाच्चिदाभासो नास्ति तस्य च जीवता ॥ ३७ ॥
प्रत्येकं जीवता नास्ति बुद्धेरपि जडत्वतः ।
जीव आभासकूटस्थबुद्धित्रयमतो भवेत् ॥ ३८ ॥
मायाभासो विशुद्धात्मा त्रयमेतन्महेश्वरः ।
मायाभासोऽप्यवस्तुत्वात्प्रत्येकं नेश्वरो भवेत् ॥ ३९ ॥
पूर्णत्वान्निर्विकारत्वाद्विशुद्धत्वान्महेश्वरः ।
जडत्वहेतोर्मायायामीश्वरत्वं नु दुर्घटम् ॥ ४० ॥
तस्मादेतत्त्रयं मिथ्या तदर्थो नेश्वरो भवेत् ।
इति जीवेश्वरौ भातः स्वाज्ञानान्न हि वस्तुतः ॥ ४१ ॥
घटाकाशमठाकाशौ महाकाशे प्रकल्पितौ ।
एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ ॥ ४२ ॥
मायातत्कार्यविलये नेश्वरत्वं च जीवता ।
ततः शुद्धचिदेवाहं चिद्व्योमनिरुपाधितः ॥ ४३ ॥

सत्यचिद्घनमनंतमद्वयं
सर्वदृश्यरहितं निरामयम् ।

यत्पदं विमलमद्वयं शिवं
तत्सदाहमिति मौनमाश्रये ॥ ४४ ॥
पूर्णमद्वयमखंडचेतनं
विश्वभेदकलनादिवर्जितम् ।
अद्वितीयपरसंविदंशकं
तत्सदाहमिति मौनमाश्रये ॥ ४५ ॥
जन्ममृत्युसुखदुःखवर्जितं
जातिनीतिकुलगोत्रदूरगम् ।
चिद्विवर्तजगतोऽस्य कारणं
तत्सदाहमिति मौनमाश्रये ॥ ४६ ॥

उलूकस्य यथा भानावंधकारः प्रतीयते ।
स्वप्रकाशे परानंदे तमो मूढस्य भासते ॥ ४७ ॥
यथा दृष्टिनिरोधार्तो सूर्यो नास्तीति मन्यते ।
तथाऽज्ञानावृतो देही ब्रह्म नास्तीति मन्यते ॥ ४८ ॥
यथाऽमृतं विषाद्भिन्नं विषदोषैर्न लिप्यते ।
न स्पृशामि जडाद्भिन्नो जडदोषान्प्रकाशयन् ॥ ४९ ॥
स्वल्पापि दीपकणिका बहुलं नाशयेत्तमः ।
स्वल्पोऽपि बोधो महतीमविद्यां शमयेत्तथा ॥ ५० ॥
चिद्रूपत्वान्न मे जाड्यं सत्यत्वान्नानृतं मम ।
आनंदत्वान्न मे दुःखमज्ञानाद्भाति तत्त्रयम् ॥ ५१ ॥
कालत्रये यथा सर्पो रज्जौ नास्ति तथा मयि ।
अहंकारादि देहांतं जगन्नास्त्यहमद्वयः ॥ ५२ ॥
भानौ तमःप्रकाशत्वान्नांगीकुर्वन्ति सज्जनाः ।
तमस्तत्कार्यसाक्षीति भ्रांतबुद्धिरहो मयि ॥ ५३ ॥
यथा शीतं जलं वह्निसंबंधादुष्णवद्भवेत् ।

बुद्धितादात्म्यसंबंधात्कर्तृत्वं वस्तुतो न हि ॥ ५४ ॥
जलबिंदुभिराकाशं न सिक्तं न च शुष्यति ।
तथा गंगाजलेनायं न शुद्धो नित्यशुद्धतः ॥ ५५ ॥
वृक्षोत्पन्नफलैर्वृक्षो यथा तृप्तिं न गच्छति ।
मय्यध्यस्तान्नपानाद्यैस्तथा तृप्तिर्न विद्यते ॥ ५६ ॥
स्थाणौ प्रकल्पितश्चोरः स स्थाणुत्वं न बाधते ।
स्वस्मिन्कल्पितजीवश्च स्वं बाधितुमशक्यते ॥ ५७ ॥
अज्ञाने बुद्धिविलये निद्रा सा भण्यते बुधैः ।
विलीनाज्ञानतत्कार्ये मयि निद्रा कथं भवेत् ॥ ५८ ॥
बुद्धेः पूर्णविकासोऽयं जागरः परिकीर्त्यते ।
विकारादिविहीनत्वाज्जागरो मे न विद्यते ॥ ५९ ॥
सूक्ष्मनाडीषु संचारो बुद्धेः स्वप्नः प्रजायते ।
संचारधर्मरहिते स्वप्नो नास्ति तथा मयि ॥ ६० ॥
परिपूर्णस्य नित्यस्य शुद्धस्य ज्योतिषो मम ।
आगंतुकमलाभावात्किं स्नानेन प्रयोजनम् ॥ ६१ ॥
देशाभावात्क गंतव्यं स्थानाभावात्क वा स्थितिः ।
पूर्णे मयि स्थानदेशौ कल्पितावहमद्वयः ॥ ६२ ॥
प्राणसंचारसंशोषात्पिपासा जायते खलु ।
शोषणानर्हचिद्रूपे मय्येषा जायते कथम् ॥ ६३ ॥
नाडीषु पीड्यमानासु वाय्वग्निभ्यां भवेत्क्षुधा ।
तयोः पीडनहेतुत्वात्संविद्रूपे कथं मयि ॥ ६४ ॥
शरीरस्थितिशैथिल्यं श्वेतलोमसमन्वितम् ।
जरा भवति सा नास्ति निरंशे मयि सर्वगे ॥ ६५ ॥
योषित्क्रीडा सुखस्यांतर्गर्वाढ्यं यौवनं किल ।
आत्मानंदे परे पूर्णे मयि नास्ति हि यौवनम् ॥ ६६ ॥

मूढबुद्धिपरिव्याप्तं दुःखानामालयं सदा ।
बाल्यं कोपनशीलांतं न मे सुखजलांबुधेः ॥ ६७ ॥
एवं तत्त्वविचाराब्धौ निमग्नानां सदा नृणाम् ।
परमाद्वैतविज्ञानमपरोक्षं न संशयः ॥ ६८ ॥

इति स्वात्मप्रकाशिका समाप्ता ॥

॥ सर्ववेदान्तसिद्धान्तसारसंग्रहः ॥

अखंडानंदसंबोधो वंदनाद्यस्य जायते ।
गोविंदं तमहं वंदे चिदानंदतनुं गुरुम् ॥ १ ॥
अखंडं सच्चिदानंदमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥ २ ॥
यदालंबो दरं हन्ति सतां प्रत्यूहसंभवम् ।
तदालंबे दयालंबं लंबोदरपदांबुजम् ॥ ३ ॥
वेदान्तशास्त्रसिद्धान्तसारसंग्रह उच्यते ।
प्रेक्षावतां मुमुक्षूणां सुखबोधोपपत्तये ॥ ४ ॥
अस्य शास्त्रानुसारित्वादनुबंधचतुष्टयम् ।
यदेव मूलं शास्त्रस्य निर्दिष्टं तदिहोच्यते ॥ ५ ॥
अधिकारी च विषयः संबंधश्च प्रयोजनम् ।
शास्त्रारंभफलं प्राहुरनुबंधचतुष्टयम् ॥ ६ ॥
चतुर्भिः साधनैः सम्यक्संपन्नो युक्तिदक्षिणः ।
मेधावी पुरुषो विद्वानधिकार्यत्र संमतः ॥ ७ ॥
विषयः शुद्धचैतन्यं जीवब्रह्मैक्यलक्षणम् ।
यत्रैव दृश्यते सर्ववेदान्तानां समन्वयः ॥ ८ ॥
एतदैक्यप्रमेयस्य प्रमाणस्यापि च श्रुतेः ।
संबंधः कथ्यते सद्भिर्बोध्यबोधकलक्षणः ॥ ९ ॥
ब्रह्मात्मैकत्वविज्ञानं सन्तः प्राहुः प्रयोजनम् ।
येन निःशेषसंसारबंधात्सद्यः प्रमुच्यते ॥ १० ॥
प्रयोजनं संप्रवृत्तेः कारणं फललक्षणम् ।
प्रयोजनमनुद्दिश्य न मंदोऽपि प्रवर्तते ॥ ११ ॥
साधनचतुष्टयसंपत्तिर्यस्यास्ति धीमतः पुंसः ।

तस्यैवैतत्फलसिद्धिर्नान्यस्य किंचिदूनस्य ॥ १२ ॥
चत्वारि साधनान्यत्र वदन्ति परमर्षयः ।
मुक्तिर्येषां नु सद्भावे नाभावे सिध्यति ध्रुवम् ॥ १३ ॥
आद्यं नित्यानित्यवस्तुविवेकः साधनं मतम् ।
इहामुत्रार्थफलभोगविरागो द्वितीयकम् ॥ १४ ॥
शमादिषट्कसंपत्तिस्तृतीयं साधनं मतम् ।
तुरीयं तु मुमुक्षुत्वं साधनं शास्त्रसंमतम् ॥ १५ ॥
ब्रह्मैव नित्यमन्यत्तु ह्यनित्यमिति वेदनम् ।
सोऽयं नित्यानित्यवस्तुविवेक इति कथ्यते ॥ १६ ॥
मृदादिकारणं नित्यं त्रिषु कालेषु दर्शनात् ।
घटाद्यनित्यं तत्कार्यं यतस्तन्नाश ईक्ष्यते ॥ १७ ॥
तथैवैतज्जगत्सर्वमनित्यं ब्रह्मकार्यतः ।
तत्कारणं परं ब्रह्म भवेन्नित्यं मृदादिवत् ॥ १८ ॥
सर्गं वक्त्यस्य तस्माद्वा एतस्मादित्यपि श्रुतिः ।
सकाशाद्ब्रह्मणस्तस्मादनित्यत्वे न संशयः ॥ १९ ॥
सर्वस्यानित्यत्वे सावयवत्वेन सर्वतःसिद्धे ।
वैकुंठादिषु नित्यत्वमतिर्भ्रम एव मूढबुद्धीनाम् ॥ २० ॥
अनित्यत्वं च नित्यत्वमेवं यच्छ्रुतियुक्तिभिः ।
विवेचनं नित्यानित्यविवेक इति कथ्यते ॥ २१ ॥
ऐहिकामुष्मिकार्थेषु ह्यनित्यत्वेन निश्चयात् ।
नैःस्पृह्यं तुच्छबुद्ध्या यत्तद्वैराग्यमितीर्यते ॥ २२ ॥
नित्यानित्यपदार्थविवेकात्पुरुषस्य जायते सद्यः ।
स्रक्चंदनवनितादौ सर्वत्रानित्यवस्तुनि विरक्तिः ॥ २३ ॥
काकस्य विष्ठावदसह्यबुद्धिर्भोग्येषु सा तीव्रविरक्तिरिष्यते ।

विरक्तितीव्रत्वनिदानमाहुर्भोग्येषु दोषेक्षणमेव सन्तः ॥ २४ ॥
प्रदृश्यते वस्तुनि यत्र दोषो न तत्र पुंसोऽस्ति पुनः प्रवृत्तिः ।
अन्तर्महारोगवतीं विजानन्को नाम वेश्यामपि रूपिणीं व्रजेत् ॥२५॥
अत्रापि चान्यत्र च विद्यमानपदार्थसंमर्शनमेव कार्यम् ।
यथाप्रकारार्थगुणाभिमर्शनं संदर्शयत्येव तदीयदोषम् ॥ २६ ॥
कुक्षौ स्वमातुर्मलमूत्रमध्ये स्थितिं तदा विट्क्रिमिदंशनं च ।
तदीयकौक्षेयकवह्निदाहं विचार्य को वा विरतिं न याति ॥ २७ ॥
स्वकीयविण्मूत्रविसर्जनं तच्चोत्तानगत्या शयनं तदा यत् ।
बालग्रहाद्याहतिभाक्च शैशवं विचार्य को वा विरतिं न याति ॥२८॥
स्वीयैः परैस्ताडनमज्ञभावमत्यंतचापल्यमसत्क्रियां च ।
कुमारभावे प्रतिषिद्धवृत्तिं विचार्य को वा विरतिं न याति ॥ २९ ॥
मदोद्धतिं मान्यतिरस्कृतिं च कामातुरत्वं समयातिलंघनम् ।
तां तां युवत्योदितदुष्टचेष्टां विचार्य को वा विरतिं न याति ॥३०॥
विरूपतां सर्वजनादवज्ञां सर्वत्र दैन्यं निजबुद्धिहैन्यम् ।
वृद्धत्वसंभावितदुर्दशां तां विचार्य को वा विरतिं न याति ॥ ३१ ॥
पित्तज्वरार्शःक्षयगुल्मशूलश्लेष्मादिरोगोदिततीव्रदुःखम् ।
दुर्गंधमस्वास्थ्यमनूनचिंतां विचार्य को वा विरतिं न याति ॥ ३२ ॥
यमावलोकोदितभीतिकंपमर्मव्यथोच्छ्वासगतीश्च वेदनाम् ।
प्राणप्रयाणे परिदृश्यमानां विचार्य को वा विरतिं न याति ॥ ३३ ॥
अंगारनद्यां तपने च कुंभीपाकेऽपि वीच्यामसिपत्रकानने ।
दूतैर्यमस्य क्रियमाणबाधां विचार्य को वा विरतिं न याति ॥ ३४ ॥
पुण्यक्षये पुण्यकृतो नभःस्थैर्निपात्यमानान्शिथिलीकृतांगान् ।
नक्षत्ररूपेण दिवश्च्युतांस्तान्विचार्य को वा विरतिं न याति ॥३५॥
वाय्वर्कवह्नींद्रमुखान्सुरेंद्रानीशोग्रभीत्या ग्रथितांतरंगान् ।

विपक्षलोकैः परिदृश्यमानान्विचार्य को वा विरतिं न याति ॥ ३६ ॥
श्रुत्या निरुक्तं सुखतारतम्यं ब्रह्मांतमारभ्य महीमहेशम् ।
औपाधिकं तन्न तु वास्तवं चेदालोच्य को वा विरतिं न याति ॥३७॥
सालोक्यसामीप्यसरूपतादिभेदस्तु सत्कर्मविशेषसिद्धः ।
न कर्मसिद्धस्य तु नित्यतेति विचार्य को वा विरतिं न याति ॥ ३८ ॥
यथास्मिँल्लोके गतितारतम्यं उच्चावचत्वान्वितमत्र तत्कृतम् ।
यथेह तद्वत्परत्र दुःखमस्तीत्यालोच्य को वा विरतिं न याति ॥ ३९ ॥
को नाम लोके पुरुषो विवेकी विनश्वरे तुच्छसुखे गृहादौ ।
कुर्याद्रतिं नित्यमवेक्षमाणो वृथैव मोहान्म्रियमाणजंतून् ॥ ४० ॥
सुखं किमस्त्यत्र विचार्यमाणे गृहेऽपि वा योषिति वा पदार्थे ।
मायातमोऽन्धीकृतचक्षुषो ये त एव मुह्यन्ति विवेकशून्याः ॥ ४१ ॥
अविचारितरमणीयं सर्वमुदुंबरफलोपमं भोग्यम् ।
अज्ञानामुपभोग्यं न तु तज्ज्ञानां योषिति वा पदार्थे ॥ ४२ ॥
गतेऽपि तोये सुषिरं कुलीरो हातुं ह्यशक्तो म्रियते विमोहात् ।
यथा तथा गेहसुखानुषक्तो विनाशमायाति नरो भ्रमेण ॥ ४३ ॥
कोशक्रिमिस्तंतुभिरात्मदेहमावेष्ट्य चावेष्ट्य च गुप्तिमिच्छन् ।
स्वयं विनिर्गन्तुमशक्त एव संस्ततस्तदंते म्रियते च लग्नः ॥ ४४ ॥
यथा तथा पुत्रकलत्रमित्रस्नेहानुबंधैर्ग्रथितो गृहस्थः ।
कदापि वा तान्परिमुच्य गेहाद्गन्तुं न शक्तो म्रियते मुधैव ॥ ४५ ॥
कारागृहस्यास्य च को विशेषः प्रदृश्यते साधु विचार्यमाणे ।
मुक्तेः प्रतीपत्वमिहापि पुंसः कांतामुखाभ्युत्थितमोहपाशैः ॥ ४६ ॥
गृहस्पृहा पादनिबद्धशृंखला कांतासुताशा पटुकण्ठपाशः ।
शीर्षे पतद्भूयशनिर्हि साक्षात्प्राणान्तहेतुः प्रबला धनाशा ॥ ४७ ॥
आशापाशशतेन पाशितपदो नोत्थातुमेव क्षमः
कामक्रोधमदादिभिः प्रतिभटैः संरक्ष्यमाणोऽनिशम् ।

संमोहावरणेन गोपनवतः संसारकारागृहा-
न्निर्गन्तुं त्रिविधेषणापरवशः कः शक्नुयाद्रागिषु ॥ ४८ ॥
कामांधकारेण निरुद्धदृष्टिर्मुह्यत्यसत्यप्यबलास्वरूपे ।
न ह्यंधदृष्टेरसतः सतो वा सुखत्वदुःखत्वविचारणास्ति ॥ ४९ ॥
श्लेष्मोद्गारि मुखं स्रवन्मलवती नासाश्रुमल्लोचनं
स्वेदस्रावि मलाभिपूर्णमभितो दुर्गंधदुष्टं वपुः ।
अन्यद्वक्तुमशक्यमेव मनसा मन्तुं क्वचिन्नार्हति
स्त्रीरूपं कथमीदृशं सुमनसां पात्रीभवेन्नेत्रयोः ॥ ५० ॥
दूरादवेक्ष्याग्निशिखां पतंगो रम्यत्वबुद्ध्या विनिपत्य नश्यति ।
यथा तथा नष्टदृगेष सूक्ष्मं कथं निरीक्षेत विमुक्तिमार्गम् ॥ ५१ ॥
कामेन कान्तां परिगृह्य तद्वज्जनोऽप्ययं नश्यति नष्टदृष्टिः ।
मांसास्थिमज्जामलमूत्रपात्रं स्त्रियं स्वयं रम्यतयैव पश्यति ॥ ५२ ॥
काम एव यमः साक्षात्कान्ता वैतरणी नदी ।
विवेकिनां मुमुक्षूणां निलयस्तु यमालयः ॥ ५३ ॥
यमालये वापि गृहेऽपि नो नृणां तापत्रयक्लेशनिवृत्तिरस्ति ।
किंचित्समालोक्य तु तद्विरामं सुखात्मना पश्यति मूढलोकः ॥ ५४ ॥
यमस्य कामस्य च तारतम्यं विचार्यमाणे महदस्ति लोके ।
हितं करोत्यस्य यमोऽप्रियः सन्कामस्त्वनर्थं कुरुते प्रियः सन् ।
यमोऽसतामेव करोत्यनर्थं सतां तु सौख्यं कुरुते हितः सन् ।
कामः सतामेव गतिं निरुंधन्करोत्यनर्थं ह्यसतां नु का कथा ॥ ५६ ॥
विश्वस्य वृद्धिं स्वयमेव कांक्षन्प्रवर्तकं कामिजनं ससर्ज ।
तेनैव लोकः परिमुह्यमानः प्रवर्धते चंद्रमसेव चाब्धिः ॥ ५७ ॥
कामो नाम महान्जगद्भ्रमयिता स्थित्वांतरंगे स्वयं
स्त्रीपुंसावितरेतरांगकगुणैर्हासैश्च भावैः स्फुटम् ।
अन्योन्यं परिमोह्य नैजतमसा प्रेमानुबंधेन तौ

बद्धूवा भ्रामयति प्रपंचरचनां संवर्धयन्ब्रह्महा ॥ ५८ ॥

अतोऽतरंगस्थितकामवेगाद्भोग्ये प्रवृत्तिः स्वत एव सिद्धा ।
सर्वस्य जंतोर्ध्रुवमन्यथा चेदबोधितार्थेषु कथं प्रवृत्तिः ॥ ५९ ॥

तेनैव सर्वजंतूनां कामना बलवत्तरा ।
जीर्यत्यपि च देहेऽस्मिन्कामना नैव जीर्यते ॥ ६० ॥

अवेक्ष्य विषये दोषं बुद्धियुक्तो विचक्षणः ।
कामपाशेन यो मुक्तः स मुक्तेः पथि गोचरः ॥ ६१ ॥

कामस्य विजयोपायं सूक्ष्मं वक्ष्याम्यहं सताम् ।
संकल्पस्य परित्याग उपायः सुलभो मतः ॥ ६२ ॥

श्रुते दृष्टेऽपि वा भोग्ये यस्मिन्कस्मिंश्च वस्तुनि ।
समीचीनत्वधीत्यागात्कामो नोदेति कर्हिचित् ॥ ६३ ॥

कामस्य बीजं संकल्पः संकल्पादेव जायते ।
बीजे नष्टेऽकुर इव तस्मिन्नष्टे विनश्यति ॥ ६४ ॥

न कोऽपि सम्यक्त्वधिया विनैव भोग्यं नरः कामयितुं समर्थः ।
यतस्ततः कामजयेच्छुरेतां सम्यक्त्वबुद्धिं विषये निहन्यात् ॥ ६५ ।

भोग्ये नरः कामजयेच्छुरेतां सुखत्वबुद्धिं विषये निहन्यात् ।
यावत्सुखत्वभ्रमधीः पदार्थे तावन्न जेतुं प्रभवेद्धि कामम् ॥ ६६ ॥

संकल्पानुदये हेतुर्यथाभूतार्थदर्शनम् ।
अनर्थचिंतनं चाभ्यां नावकाशोऽस्य विद्यते ॥ ६७ ॥

रत्ने यदि शिलाबुद्धिर्जायते वा भयं ततः ।
समीचीनत्वधीर्नैति नोपादेयत्वधीरपि ॥ ६८ ॥

यथार्थदर्शनं वस्तुन्यनर्थस्यापि चिंतनम् ।
संकल्पस्यापि कामस्य तद्वधोपाय इष्यते ॥ ६९ ॥

धनं भयनिबंधनं सततदुःखसंवर्धनं
प्रचंडतरकर्दनं स्फुटितबंधुसंवर्धनम् ।

विशिष्टगुणबाधनं कृपणधीसमाराधनं
न मुक्तिगतिसाधनं भवति नापि हृच्छोधनम् ॥ ७० ॥
राज्ञो भयं चोरभयं प्रमादाद्भयं तथा ज्ञातिभयं च वस्तुतः ।
धनं भयग्रस्तमनर्थमूलं यतः सतां नैव सुखाय कल्पते ॥ ७१ ॥
अर्जने रक्षणे दाने व्यये वापि च वस्तुतः ।
दुःखमेव सदा नृणां न धनं सुखसाधनम् ॥ ७२ ॥
सतामपि पदार्थस्य लाभाल्लोभः प्रवर्धते ।
विवेको लुप्यते लोभात्तस्मिँल्लुप्ते विनश्यति ॥ ७३ ॥
दहत्यलाभे निःस्वत्वं लाभे लोभो दहत्यमुम् ।
तस्मात्संतापकं वित्तं कस्य सौख्यं प्रयच्छति ॥ ७४ ॥
भोगेन मत्तता जंतोर्दानेन पुनरुद्भवः ।
वृथैवोभयथा वित्तं नास्त्येव गतिरन्यथा ॥ ७५ ॥
धनेन मदवृद्धिः स्यान्मदेन स्मृतिनाशनम् ।
स्मृतिनाशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥ ७६ ॥
सुखयति धनमेवेत्यंतराशापिशाच्या
दृढतरमुपगूढो मूढलोको जडात्मा ।
निवसति तदुपान्ते संततं प्रेक्षमाणो
व्रजति तदपि पश्चात्प्राणमेतस्य हृत्वा ॥ ७७ ॥
संपन्नोऽधवदेव किंचिदपरं नो वीक्षते चक्षुषा
सद्भिर्वर्जितमार्ग एव चरति प्रोत्सारितो बालिशैः ।
तस्मिन्नेव मुहुः स्खलन्प्रतिपदं गत्वान्धकूपे पत-
त्यस्यांधत्वनिवर्तकौषधमिदं दारिद्र्यमेवांजनम् ॥ ७९ ॥
लोभः क्रोधश्च दंभश्च मदो मत्सर एव च ।
वर्धंते वित्तसंप्राप्त्या कथं तच्चित्तशोधनम् ॥ ७९ ॥
अलाभाद्द्विगुणं दुःखं वित्तस्य व्ययसंभवे ।

ततोऽपि त्रिगुणं दुःखं दुर्व्यये विदुषामपि ॥ ८० ॥
नित्याहितेन वित्तेन भयचिंतानपायिना ।
चित्तस्वास्थ्यं कुतो जंतोर्गृहस्थेनाहिना यथा ॥ ८१ ॥
कांतारे विजने वने जनपदे सेतौ निरीतौ च वा
चोरैर्वापि तथेतरैर्नरवरैर्युक्तो वियुक्तोऽपि वा ।
निःस्वः स्वस्थतया सुखेन वसति ह्याद्रीयमाणो जनैः
क्लिश्नात्येव धनी सदाकुलमतिर्भीतश्च पुत्रादपि ॥ ८२ ॥
तस्मादनर्थस्य निदानमर्थः पुमर्थसिद्धिर्न भवत्यनेन ।
ततो वनान्ते निवसन्ति सन्तः संन्यस्य सर्वं प्रतिकूलमर्थम् ॥ ८३ ॥
श्रद्धाभक्तिमतीं सतीं गुणवतीं पुत्राञ्श्रुतान्संमता-
नक्षय्यं वसुधानुभोगविभवैः श्रीसुंदरं मंदिरम् ।
सर्वं नश्वरमित्यवेत्य कवयः श्रुत्युक्तिभिर्युक्तिभिः
संन्यस्यन्त्यपरे तु तत्सुखमिति भ्राम्यन्ति दुःखार्णवे ॥ ८४ ॥
सुखमिति मलराशौ ये रमन्तेऽत्र गेहे
क्रिमय इव कलत्रक्षेत्रपुत्रानुषक्त्या ।
सुरपद इव तेषां नैव मोक्षप्रसंग-
स्त्वपि तु निरयगर्भावासदुःखप्रवाहः ॥ ८५ ॥
येषामाशा निराशा स्याद्दारापत्यधनादिषु ।
तेषां सिध्यति नान्येषां मोक्षाशाभिमुखी गतिः ॥ ८६ ॥
सत्कर्मक्षयपाप्मनां श्रुतिमतां सिद्धात्मनां धीमतां
नित्यानित्यपदार्थशोधनमिदं युक्त्या मुहुः कुर्वताम् ।
तस्मादुत्थमहाविरक्त्यसिमतां मोक्षैककांक्षावतां
धन्यानां सुलभं स्त्रियादिविषयेष्वाशालताच्छेदनम् ॥ ८७ ॥
संसारमृत्योर्बलिनः प्रवेष्टुं द्वाराणि तु त्रीणि महान्ति लोके ।
कान्ता च जिह्वा कनकं च तानि रुणद्धि यस्तस्य भयं न मृत्योः ॥८८

मुक्तिश्रीनगरस्य दुर्जयतरं द्वारं यदस्यादिमं
तस्य द्वे अररे धनं च युवती ताभ्यां पिनद्धं दृढम् ।
कामाख्यार्गलदारुणा बलवता द्वारं तदेतत्त्रयं
धीरो यस्तु भिनत्ति सोऽर्हति सुखं भोक्तुं विमुक्तिश्रियः॥८
आरूढस्य विवेकाश्वं तीव्रवैराग्यखड्गिनः ।
तितिक्षावर्मयुक्तस्य प्रतियोगी न दृश्यते ॥ ९० ॥
विवेकजां तीव्रविरक्तिमेव, मुक्तेर्निदानं निगदन्ति सन्तः
तस्माद्विवेकी विरतिं मुमुक्षुः संपादयेत्तां प्रथमं प्रयत्नात्॥
पुमानजातनिर्वेदो देहबंधं जिहासितुम् ।
न हि शक्नोति निर्वेदो बंधभेदो महानसौ ॥ ९२ ॥
वैराग्यरहिता एव यमालय इवालये ।
क्लिश्यन्ति त्रिविधैस्तापैर्मोहिता अपि पंडिताः ॥ ९३ ॥
शमो दमस्तितिक्षोपरतिः श्रद्धा ततः परम् ।
समाधानमिति प्रोक्तं षडेवैते शमादयः ॥ ९४ ॥
एकवृत्त्यैव मनसः स्वलक्ष्ये नियतस्थितिः ।
शम इत्युच्यते सद्भिः शमलक्षणवेदिभिः ॥ ९५ ॥
उत्तमो मध्यमश्चैव जघन्य इति च त्रिधा ।
निरूपितो विपश्चिद्भिः तत्तल्लक्षणवेदिभिः ॥ ९६ ॥
स्वविकारं परित्यज्य वस्तुमात्रतया स्थितिः ।
मनसः सोत्तमा शांतिर्ब्रह्मनिर्वाणलक्षणा ॥ ९७ ॥
प्रत्यक्प्रत्ययसंतानप्रवाहकरणं धियः ।
यदेषा मध्यमा शान्तिः शुद्धसत्त्वैकलक्षणा ॥ ९८ ॥
विषयव्यापृतिं त्यक्त्वा श्रवणैकमनःस्थितिः ।
मनसश्चेतरा शान्तिर्मिश्रसत्त्वैकलक्षणा ॥ ९९ ॥
प्राच्योदीच्यांगसद्भावे शमः सिध्यति नान्यथा ।

तीव्रा विरक्तिः प्राच्यांगमुदीच्यांगं दमादयः ॥ १०० ॥
कामः क्रोधश्च लोभश्च मदो मोहश्च मत्सरः ।
न जिताः षडिमे येन तस्य शान्तिर्न सिध्यति ॥ १०१ ॥
शब्दादिविषयेभ्यो यो विषवन्न निवर्तते ।
तीव्रमोक्षेच्छया भिक्षोस्तस्य शान्तिर्न सिध्यति ॥ १०२ ॥
येन नाराधितो देवो यस्य नो गुर्वनुग्रहः ।
न वश्यं हृदयं यस्य तस्य शान्तिर्न सिध्यति ॥ १०३ ॥
मनःप्रसादसिद्ध्यर्थं साधनं श्रूयतां बुधैः ।
मनःप्रसादो यत्सत्त्वे यदभावे न सिध्यति ॥ १०४ ॥
ब्रह्मचर्यमहिंसा च दया भूतेष्ववक्रता ।
विषयेष्वतिवैतृष्ण्यं शौचं दंभविवर्जनम् ॥ १०५ ॥
सत्यं निर्ममता स्थैर्यमभिमानविसर्जनम् ।
ईश्वरध्यानपरता ब्रह्मविद्भिः सहस्थितिः ॥ १०६ ॥
ज्ञानशास्त्रैकपरता समता सुखदुःखयोः ।
मानानासक्तिरेकांतशीलता च मुमुक्षुता ॥ १०७ ॥
यस्यैतद्विद्यते सर्वं तस्य चित्तं प्रसीदति ।
न त्वेतद्धर्मशून्यस्य प्रकारांतरकोटिभिः ॥ १०८ ॥
स्मरणं दर्शनं स्त्रीणां गुणकर्मानुकीर्तनम् ।
समीचीनत्वधीस्तासु प्रीतिः संभाषणं मिथः ॥ १०९ ॥
सहवासश्च संसर्गोऽष्टधा मैथुनं विदुः ।
एतद्विलक्षणं ब्रह्मचर्यं चित्तप्रसादकम् ॥ ११० ॥
अहिंसा वाङ्मनःकायैः प्राणिमात्राप्रपीडनम् ।
स्वात्मवत्सर्वभूतेषु कायेन मनसा गिरा ॥ १११ ॥
अनुकंपा दया सैव प्रोक्ता वेदान्तवेदिभिः ।
करणत्रितयेष्वेकरूपतावक्रता मता ॥ ११२ ॥

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ११३ ॥
बाह्यमाभ्यंतरं चेति द्विविधं शौचमुच्यते ।
मृज्जलाभ्यां कृतं शौचं बाह्यं शारीरकं स्मृतम् ॥ ११४ ॥
अज्ञानदूरीकरणं मानसं शौचमांतरम् ।
अंतःशौचे स्थिते सम्यग्बाह्यं नावश्यकं नृणाम् ॥ ११५ ॥
ध्यानपूजादिकं लोके द्रष्टर्येव करोति यः ।
पारमार्थिकधीहीनः स दंभाचार उच्यते ॥ ११६ ॥
पुंसस्तथानाचरणमदंभित्वं विदुर्बुधाः ।
यत्स्वेन दृष्टं सम्यक्च श्रुतं तस्यैव भाषणम् ॥ ११७ ॥
सत्यमित्युच्यते ब्रह्म सत्यमित्यभिभाषणम् ।
देहादिषु स्वकीयत्वदृढबुद्धिविसर्जनम् ॥ ११८ ॥
निर्ममत्वं स्मृतं येन कैवल्यं लभते बुधः ।
गुरुवेदान्तवचनैर्निश्चितार्थे दृढस्थितिः ॥ ११९ ॥
तदेकवृत्त्या तत्स्थैर्यं नैश्चल्यं न तु वर्ष्मणः ।
विद्यैश्वर्यतपोरूपकुलवर्णाश्रमादिभिः ॥ १२० ॥
संजाताहंकृतित्यागस्त्वभिमानविसर्जनम् ।
त्रिभिश्च करणैः सम्यग्घित्वा वैषयिकीं क्रियाम् ॥ १२१ ॥
स्वात्मैकचिंतनं यत्तदीश्वरध्यानमीरितम् ।
छायेव सर्वदा वासो ब्रह्मविद्भिः सह स्थितिः ॥ १२२ ॥
यद्यदुक्तं ज्ञानशास्त्रे श्रवणादिकमेषु यः ।
निरतः कर्मधीहीनः ज्ञाननिष्ठः स एव हि ॥ १२३ ॥
धनकांताज्वरादीनां प्राप्तकाले सुखादिभिः ।
विकारहीनतैव स्यात्सुखदुःखसमानता ॥ १२४ ॥
श्रेष्ठं पूज्यं विदित्वा मां मानयन्तु जना भुवि ।

इत्यासक्त्या विहीनत्वं मानानासक्तिरुच्यते ॥ १२५ ॥
सच्चिंतनस्य संबाधो विघ्नोऽयं निर्जने ततः ।
स्थेयमित्येक एवास्ति चेत्सैवैकान्तशीलता ॥ १२६ ॥
संसारबंधनिर्मुक्तिः कदा झटिति मे भवेत् ।
इति या सुदृढा बुद्धिरीरिता सा मुमुक्षुता ॥ १२७ ॥
ब्रह्मचर्यादिभिर्धर्मैर्बुद्धेर्दोषनिवृत्तये ।
दंडनं दम इत्याहुर्दमशब्दार्थकोविदाः ॥ १२८ ॥
तत्तद्वृत्तिनिरोधेन बाह्येंद्रियविनिग्रहः ।
योगिनो दम इत्याहुर्मनसः शांतिसाधनम् ॥ १२९ ॥
इंद्रियेष्विंद्रियार्थेषु प्रवृत्तेषु यदृच्छया ।
अनुधावति तान्येव मनो वायुमिवानलः ॥ १३० ॥
इंद्रियेषु निरुद्धेषु त्यक्त्वा वेगं मनः स्वयम् ।
सत्त्वभावमुपादत्ते प्रसादस्तेन जायते ।
प्रसन्ने सति चित्तेऽस्य, मुक्तिः सिध्यति नान्यथा ॥ १३१ ॥
मनःप्रसादस्य निदानमेव निरोधनं यत्सकलेंद्रियाणाम् ।
बाह्येंद्रिये साधु निरुध्यमाने बाह्यार्थभोगो मनसो वियुज्यते ॥१३२॥
तेन स्वदौष्ट्यं परिमुच्य चित्तं शनैः शनैः शान्तिमुपाददाति ।
चित्तस्य बाह्यार्थविमोक्षमेव मोक्षं विदुर्मोक्षणलक्षणज्ञाः ॥ १३३ ॥
दमं विना साधु मनःप्रसादहेतुं न विद्मः सुकरं मुमुक्षोः ।
दमेन चित्तं निजदोषजातं विसृज्य शान्तिं समुपैति शीघ्रम् ॥१३४॥
प्राणायामाद्भवति मनसो निश्चलत्वं प्रसादो
यस्याप्यस्य प्रतिनियतदिग्देशकालाद्यवेक्ष्य ।
सम्यग्दृष्ट्या क्वचिदपि तया नो दमो हन्यते त-
त्कुर्याद्धीमान्दममनलसश्चित्तशान्त्यै प्रयत्नात् ॥ १३५ ॥
सर्वेंद्रियाणां गतिनिग्रहेण भोग्येषु दोषाद्यवमर्शनेन ।

ईशप्रसादाच्च गुरोः प्रसादाच्छान्तिं समायात्यचिरेण चित्तम् ॥१३६॥

आध्यात्मिकादि यद्दुःखं प्राप्तं प्रारब्धवेगतः ।
अचिंतया तत्सहनं तितिक्षेति निगद्यते ॥ १३७ ॥

रक्षा तितिक्षासदृशी मुमुक्षोर्न विद्यतेऽसौ पविना न भिद्यते ।
यामेव धीराः कवचीव विघ्नान्सर्वांस्तृणीकृत्य जयन्ति मायाम् ॥१३८॥

क्षमावतामेव हि योगसिद्धिः स्वाराज्यलक्ष्मीसुखभोगसिद्धिः ।
क्षमाविहीना निपतन्ति विघ्नैर्वातैर्हृताः पर्णचया इव द्रुमात् ॥१३९॥

तितिक्षया तपो दानं यज्ञस्तीर्थं व्रतं श्रुतम् ।
भूतिः स्वर्गोऽपवर्गश्च प्राप्यते तत्तदर्थिभिः ॥ १४० ॥

ब्रह्मचर्यमहिंसा च साधूनामप्यगर्हणम् ।
पराक्षेपादिसहनं तितिक्षोरेव सिध्यति ॥ १४१ ॥

साधनेष्वपि सर्वेषु तितिक्षोत्तमसाधनम् ।
यत्र विघ्नाः पलायन्ते दैविका अपि भौतिकाः ॥ १४२ ॥

तितिक्षोरेव विघ्नेभ्यस्त्वनिवर्तितचेतसः ।
सिध्यन्ति सिद्धयः सर्वा अणिमाद्याः समृद्धयः ॥ १४३ ॥

तस्मान्मुमुक्षोरधिका तितिक्षा संपादनीयेप्सितकार्यसिद्ध्यै ।
तीव्रा मुमुक्षा च महत्युपेक्षा चोभे तितिक्षा सहकारि कारणम् ॥१४४॥

तत्तत्कालसमागतामयततेः शान्त्यै प्रवृत्तो यदि
स्यात्तत्तत्परिहारकौषधरतस्तच्चिंतने तत्परः ।
तद्भिक्षुः श्रवणादिधर्मरहितो भूत्वा मृतश्चेत्ततः
किं सिद्धं फलमाप्नुयादुभयथा भ्रष्टो भवेत्स्वार्थतः ॥ १४५ ॥

योगमभ्यस्यतो भिक्षोर्योगाच्चलितचेतसः ।
प्राप्य पुण्यकृताँल्लोकानित्यादि प्राह केशवः ॥ १४६ ॥

न तु कृत्वैव संन्यासं तूष्णीमेव मृतस्य हि ।
पुण्यलोकगतिं ब्रूते भगवान्न्यासमात्रतः ॥ १४७ ॥

न च संन्यसनादेव सिद्धिं समधिगच्छति ।
इत्यनुष्ठेयसंत्यागात्सिद्ध्यभावमुवाच च ॥ १४८ ॥
तस्मात्तितिक्षया सोढ्वा तत्तद्दुःखमुपागतम् ।
कुर्याच्छक्त्यनुरूपेण श्रवणादि शनैः शनैः ॥ १४९ ॥
प्रयोजनं तितिक्षायाः साधितायाः प्रयत्नतः ।
प्राप्तदुःखासहिष्णुत्वे न किंचिदपि दृश्यते ॥ १५० ॥
साधनत्वेन दृष्टानां सर्वेषामपि कर्मणाम् ।
विधिना यः परित्यागः स संन्यासः सतां मतः ॥ १५१ ॥
उपरमयति कर्माणीत्युपरतिशब्देन कथ्यते न्यासः ।
न्यासेन हि सर्वेषां श्रुत्या प्रोक्तो विकर्मणां त्यागः ॥१५२॥
कर्मणा साध्यमानस्यानित्यत्वं श्रूयते यतः ।
कर्मणानेन किं नित्यफलेप्सोः परमार्थिनः ॥ १५३ ॥
उत्पाद्यमाप्यं संस्कार्यं विकार्यं परिगण्यते ।
चतुर्विधं कर्मसाध्यं फलं नान्यदितः परम् ॥ १५४ ॥
नैतदन्यतरं ब्रह्म कदा भवितुमर्हति ।
स्वतःसिद्धं सर्वदाप्तं शुद्धं निर्मलमक्रियम् ॥ १५५ ॥
न चास्य कश्चिज्जनितेत्यागमेन निषिध्यते ।
कारणं ब्रह्म तत्तस्माद्ब्रह्म नोत्पाद्यमिष्यते ॥ १५६ ॥
आप्त्राप्ययोस्तु भेदश्चेदाप्त्रा चाप्यमवाप्यते ।
आप्तृस्वरूपमेवैतद्ब्रह्म नाप्यं कदाचन ॥ १५७ ॥
मलिनस्यैव संस्कारो दर्पणादेरिहेष्यते ।
व्योमवन्नित्यशुद्धस्य ब्रह्मणो नैव संस्क्रिया ॥ १५८ ॥
केन दुष्टेन युज्येत वस्तु निर्मलमक्रियम् ।
यद्योगादागतं दोषं संस्कारो विनिवर्तयेत् ॥ १५९ ॥
निर्गुणस्य गुणाधानमपि नैवोपपद्यते ।

केवलो निर्गुणश्चेति नैर्गुण्यं श्रूयते यतः ॥ १६० ॥
सावयवस्य क्षीरादेर्वस्तुनः परिणामिनः ।
येन केन विकारित्वं स्यान्नो निष्कर्मवस्तुनः ॥ १६१ ॥
निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनम् ।
इत्येव वस्तुनस्तत्त्वं श्रुतियुक्तिव्यवस्थितम् ॥ १६२ ॥
तस्मान्न कर्मसाध्यत्वं ब्रह्मणोऽस्ति कुतश्चन ।
कर्मसाध्यं त्वनित्यं हि ब्रह्म नित्यं सनातनम् ॥ १६३ ॥
देहादिः क्षीयते लोको यथैवं कर्मणा चितः ।
तथैवामुष्मिको लोको संचितः पुण्यकर्मणा ॥ १६४ ॥
कृतकत्वमनित्यत्वे हेतुर्जागर्ति सर्वदा ।
तस्मादनित्ये स्वर्गादौ पंडितः को नु मुह्यति ॥ १६५ ॥
जगद्धेतोस्तु नित्यत्वं सर्वेषामपि संमतम् ।
जगद्धेतुत्वमस्यैव वावदीति श्रुतिर्मुहुः ॥ १६६ ॥
ऐतदात्म्यमिदं सर्वं तत्सत्यमिति च श्रुतिः ।
अस्यैव नित्यतां ब्रूते जगद्धेतोः सतः स्फुटम् ॥ १६७ ॥
न कर्मणा न प्रजया धनेनेति स्वयं श्रुतिः ।
कर्मणो मोक्षहेतुत्वं साक्षादेव निषेधति ॥ १६८ ॥
प्रत्यग्ब्रह्मविचारपूर्वमुभयोरेकत्वबोधाद्विना
कैवल्यं पुरुषस्य सिध्यति परब्रह्मात्मतालक्षणम् ।
न स्नानैरपि कीर्तनैरपि जपैर्नो कृच्छ्रचांद्रायणै-
र्नो वाप्यध्वरयज्ञदाननिगमैर्नो मंत्रतंत्रैरपि ॥ १६९ ॥
ज्ञानादेव तु कैवल्यमिति श्रुत्या निगद्यते ।
ज्ञानस्य मुक्तिहेतुत्वमन्यव्यावृत्तिपूर्वकम् ॥ १७० ॥
विवेकिनो विरक्तस्य ब्रह्मनित्यत्ववेदिनः ।
तद्भावेच्छोरनित्यार्थे तत्सामग्र्ये कुतोऽरतिः ॥ १७१ ॥

तस्मादनित्ये स्वर्गादौ साधनत्वेन चोदितम् ।
नित्यं नैमित्तिकं चापि सर्वं कर्म ससाधनम् ॥ १७२ ॥
मुमुक्षुणा परित्याज्यं ब्रह्मभावमभीप्सुना ।
मुमुक्षोरपि कर्मास्तु श्रवणं चापि साधनम् ॥ १७३ ॥
हस्तवद्द्वयमेतस्य स्वकार्यं साधयिष्यति ।
यदा विजृंभते दीपो ऋजूकरणकर्मणा ॥ १७४ ॥
तथा श्रवणजो बोधः पुंसो विहितकर्मणा ।
अतः सापेक्षितं ज्ञानमथवापि समुच्चयम् ॥ १७५ ॥
मोक्षस्य साधनमिति वदन्ति ब्रह्मवादिनः ।
मुमुक्षोर्युज्यते त्यागः कथं विहितकर्मणः ॥ १७६ ॥
इति शंका न कर्तव्या मूढवत्पण्डितोत्तमैः ।
कर्मणः फलमन्यत्तु श्रवणस्य फलं पृथक् ॥ १७७ ॥
वैलक्षण्यं च सामग्र्योश्चोभयत्राधिकारिणोः ।
कामी कर्मण्यधिकृतो निष्कामी श्रवणे मतः ॥ १७८ ॥
अर्थी समर्थ इत्यादि लक्षणं कर्मिणो मतम् ।
परीक्ष्य लोकानित्यादि लक्षणं मोक्षकांक्षिणः ॥ १७९ ॥
मोक्षाधिकारी संन्यासी गृहस्थः किल कर्मणि ।
कर्मणः साधनं भार्यास्रुक्स्रुवादिपरिग्रहः ॥ १८० ॥
नैवान्यसाधनापेक्षा शुश्रूषोस्तु गुरुं विना ।
उपर्युपर्यहंकारो वर्धते कर्मणा भृशम् ॥ १८१ ॥
अहंकारस्य विच्छित्तिः श्रवणेन प्रतिक्षणम् ।
प्रवर्तकं कर्मशास्त्रं ज्ञानशास्त्रं निवर्तकम् ॥ १८२ ॥
इत्यादिवैपरीत्यं तत्साधने चाधिकारिणोः ।
द्वयोः परस्परापेक्षा विद्यते न कदाचन ॥ १८३ ॥
सामग्र्योश्चोभयोस्तद्वदुभयत्राधिकारिणोः ।

ऊर्ध्वं नयति विज्ञानमधः प्रापयति क्रिया ॥ १८४ ॥
कथमन्योन्यसापेक्षा कथं वापि समुच्चयः ।
यथाग्नेस्तृणकूटस्य तेजसस्तिमिरस्य च ॥ १८५ ॥
सहयोगो न घटते तथैव ज्ञानकर्मणोः ।
किमूपकुर्याज्ज्ञानस्य कर्मस्वप्रतियोगिनः ॥
यस्य संनिधिमात्रेण स्वयं न स्फूर्तिमृच्छति ॥ १८६ ॥
कोटींधनाद्रिज्वलितोऽपि वह्निरर्कस्य नार्हत्युपकर्तुमीषत् ।
यथा तथा कर्मसहस्रकोटिर्ज्ञानस्य किं नु स्वयमेव लीयते ॥१८७॥
एककर्त्राश्रयौ हस्तौ कर्मण्यधिकृतावुभौ ।
सहयोगस्तयोर्युक्तो न तथा ज्ञानकर्मणोः ॥ १८८ ॥
कर्त्रा कर्तुमकर्तुं वाप्यन्यथा कर्म शक्यते ।
न तथा वस्तुनो ज्ञानं कर्तृतंत्रं कदाचन ॥ १८९ ॥
यथा वस्तु तथा ज्ञानं प्रमाणेन विजायते ।
नापेक्षते च यत्किंचित्कर्म वा युक्तिकौशलम् ॥ १९० ॥
ज्ञानस्य वस्तुतंत्रत्वे संशयाद्युदयः कथम् ।
अतो न वास्तवं ज्ञानमिति नो शंक्यतां बुधैः ॥ १९१ ॥
प्रमाणासौष्ठवकृतं संशयादि न वास्तवम् ।
श्रुतिप्रमाणसुष्ठुत्वे ज्ञानं भवति वास्तवम् ॥ १९२ ॥
वस्तु तावत्परं ब्रह्म नित्यं सत्यं ध्रुवं विभु ।
श्रुतिप्रमाणे तज्ज्ञानं स्यादेव निरपेक्षकम् ॥ १९३ ॥
रूपज्ञानं यथा सम्यग्दृष्टौ सत्यां भवेत्तथा ।
श्रुतिप्रमाणे सत्येव ज्ञानं भवति वास्तवम् ॥ १९४ ॥
न कर्म यत्किंचिदपेक्षते हि रूपोपलब्धौ पुरुषस्य चक्षुः ।
ज्ञानं तथैव श्रवणादिजन्यं वस्तुप्रकाशे निरपेक्षमेव ॥ १९५ ॥
कर्तृतंत्रं भवेत्कर्म कर्मतंत्रं शुभाशुभम् ।

प्रमाणतंत्रं विज्ञानं मायातंत्रमिदं जगत् ॥ १९६ ॥
विद्यां चाविद्यां चेति सहोक्तिरियमुपकृता सद्भिः ।
सत्कर्मोपासनयोर्न त्वात्मज्ञानकर्मणोः क्वापि ॥ १९७ ॥
नित्यानित्यपदार्थबोधरहितो यश्चोभयत्र स्रगा-
द्यर्थानामनुभूतिलग्नहृदयो निर्विण्णबुद्धिर्जनः ।
तस्यैवास्य जडस्य कर्म विहितं श्रुत्या विरज्याभितो
मोक्षेच्छोर्न विधीयते तु परमानंदार्थिनो धीमतः ॥ १९८ ॥
मोक्षेच्छया यदहरेव विरज्यतेऽसौ
न्यासस्तदैव विहितो विदुषो मुमुक्षोः ।
श्रुत्या तयैव परया च ततः सुधीभिः
प्रामाणिकोऽयमिति चेतसि निश्चितव्यः ॥ १९९ ॥
स्वापरोक्षस्य वेदादेः साधनत्वं निषेधति ।
नाहं वेदैर्न तपसेत्यादिना भगवानपि ॥ २०० ॥
प्रवृत्तिश्च निवृत्तिश्च द्वे एते श्रुतिगोचरे ।
प्रवृत्त्या बध्यते जंतुर्निवृत्त्या तु विमुच्यते ॥ २०१ ॥
यन्न स्वबंधोऽभिमतो मूढस्यापि कचित्ततः ।
निवृत्तिः कर्मसंन्यासः कर्तव्यो मोक्षकांक्षिभिः ॥ २०२ ॥
न ज्ञानकर्मणोर्यस्मात्सहयोगस्तु युज्यते ।
तस्मात्त्याज्यं प्रयत्नेन कर्म ज्ञानेच्छुना ध्रुवम् ॥ २०३ ॥
इष्टसाधनताबुद्ध्या गृहीतस्यापि वस्तुनः ।
विज्ञाय फल्गुतां पश्चात्कः पुनस्तत्प्रतीक्षते ॥ २०४ ॥
उपरतिशब्दार्थो ह्युपरमणं पूर्वदृष्टवृत्तिभ्यः ।
सोऽयं मुख्यो गौणश्चेति च वृत्त्या द्विरूपतां धत्ते ॥ २०५ ॥
वृत्तेर्दृश्यपरित्यागो मुख्यार्थ इति कथ्यते ।
गौणार्थः कर्मसंन्यासः श्रुतेरंगतया मतः ॥ २०६ ॥

पुंसः प्रधानसिद्ध्यर्थमंगस्याश्रयणं ध्रुवम् ।
कर्तव्यमंगहीनं चेत्प्रधानं नैव सिध्यति ॥ २०७ ॥
संन्यसेत्सुविरक्तः सन्निहामुत्रार्थतः सुखात् ।
अविरक्तस्य संन्यासो निष्फलोऽयाज्ययागवत् ॥ २०८ ॥
संन्यस्य तु यतिः कुर्यान्न पूर्वविषयस्मृतिम् ।
तां तां तत्स्मरणे तस्य जुगुप्सा जायते यतः ॥ २०९ ॥
गुरुवेदान्तवाक्येषु बुद्धिर्या निश्चयात्मिका ।
सत्यमित्येव सा श्रद्धा निदानं मुक्तिसिद्धये ॥ २१० ॥
श्रद्धावतामेव सतां पुमर्थः समीरितः सिध्यति नेतरेषाम् ।
उक्तं सुसूक्ष्मं परमार्थतत्त्वं श्रद्धत्स्व सोम्येति च वक्ति वेदः ॥२११॥
श्रद्धाविहीनस्य तु न प्रवृत्तिः प्रवृत्तिशून्यस्य न साध्यसिद्धिः ।
अश्रद्धयैवाभिहताश्च सर्वे मज्जन्ति संसारमहासमुद्रे ॥ २१२ ॥
देवे च वेदे च गुरौ च मंत्रे तीर्थे महात्मन्यपि भेषजे च ।
श्रद्धा भवत्यस्य यथा यथान्तस्तथा तथा सिद्धिरुदेति पुंसाम् ॥२१३॥
अस्तीत्येवोपलब्धव्यं वस्तुसद्भावनिश्चयात् ।
सद्भावनिश्चयस्तत्र श्रद्धया शास्त्रसिद्धया ॥ २१४ ॥
तस्माच्छ्रद्धा सुसंपाद्या गुरुवेदान्तवाक्ययोः ।
मुमुक्षोः श्रद्दधानस्य फलं सिध्यति नान्यथा ॥ २१५ ॥
यथार्थवादिता पुंसां श्रद्धाजननकारणम् ।
वेदस्येश्वरवाक्यत्वाद्यथार्थत्वे न संशयः ॥ २१६ ॥
मुक्तस्येश्वररूपत्वाद्गुरोर्वागपि तादृशी ।
तस्मात्तद्वाक्ययोः श्रद्धा सतां सिध्यति धीमताम् ॥ २१७ ॥
श्रुत्युक्तार्थावगाहाय विदुषा ज्ञेयवस्तुनि ।
चित्तस्य सम्यगाधानं समाधानमितीर्यते ॥ २१८ ॥
चित्तस्य साध्यैकपरत्वमेव पुमर्थसिद्धेर्नियमेन कारणम् ।

नैवान्यथा सिध्यति साध्यमीषन्मनःप्रमादे विफलः प्रयत्नः ॥२१९॥
चित्तं च दृष्टिं करणं तथान्यदेकत्र बध्नाति हि लक्ष्यभेत्ता ।
किंचित्प्रमादे सति लक्ष्यभेत्तुर्बाणप्रयोगो विफलो यथा तथा ॥२२०॥
सिद्धेश्चित्तसमाधानमसाधारणकारणम् ।
यतस्ततो मुमुक्षूणां भवितव्यं सदामुना ॥ २२१ ॥
अत्यंततीव्रवैराग्यं फललिप्सा महत्तरा ।
तदेतदुभयं विद्यात्समाधानस्य कारणम् ॥ २२२ ॥
बहिरंगं श्रुतिः प्राह ब्रह्मचर्यादिमुक्तये ।
शमादिषट्कमेवैतदंतरंगं विदुर्बुधाः ॥ २२३ ॥
अंतरंगं हि बलवद्बहिरंगाद्यतस्ततः ।
शमादिषट्कं जिज्ञासोरवश्य भाव्यमांतरम् ॥ २२४ ॥
अंतरंगविहीनस्य कृतश्रवणकोटयः ।
न फलन्ति यथा योद्धुरधीरस्यास्त्रसंपदः ॥ २२५ ॥
ब्रह्मात्मैकत्वविज्ञानाद्यद्विद्वान्मोक्तुमिच्छति ।
संसारपाशबंधं तन्मुमुक्षुत्वं निगद्यते ॥ २२६ ॥
साधनानां तु सर्वेषां मुमुक्षा मूलकारणम् ।
अनिच्छोरप्रवृत्तस्य क्व श्रुतिः क्व नु तत्फलम् ॥ २२७ ॥
तीव्रमध्यममंदातिमंदभेदाश्चतुर्विधाः ।
मुमुक्षा तत्प्रकारोऽपि कीर्त्यते श्रूयतां बुधैः ॥ २२८ ॥
तापैस्त्रिभिर्नित्यमनेकरूपैः, संतप्यमानो क्षुभितांतरात्मा ।
परिग्रहं सर्वमनर्थबुद्ध्या, जहाति सा तीव्रतरा मुमुक्षा ॥ २२९ ॥
तापत्रयं तीव्रमवेक्ष्य वस्तु दृष्ट्वा कलत्रं तनयान्विहातुम् ।
मध्ये द्वयोर्लोडनमात्मनो यत्सैषा मता माध्यमिकी मुमुक्षा ॥ २३०॥
मोक्षस्य कालोऽस्ति किमद्य मे त्वरा भुक्त्वैव भोगान्कृतसर्वकार्यः ।
मुक्त्यै यतिष्येऽहमथेति बुद्धिरेषैव मंदा कथिता मुमुक्षा ॥ २३१ ॥

मार्गे प्रयातुर्मणिलाभवन्मे लभेत मोक्षो यदि तर्हि धन्यः ।
इत्याशया मूढधियां मतिर्या सैषातिमन्दाभिमता मुमुक्षा ॥ २३२ ॥
जन्मानेकसहस्रेषु तपसाऽऽराधितेश्वरः ।
तेन निःशेषनिर्धूतहृदयस्थितकल्मषः ॥ २३३ ॥
शास्त्रविद्गुणदोषज्ञो भोग्यमात्रे विनिःस्पृहः ।
नित्यानित्यपदार्थज्ञो मुक्तिकामो दृढव्रतः ॥ २३४ ॥
निष्टप्तमग्निना पात्रमुद्धास्य त्वरया यथा ।
जहाति गेहं तद्वच्च तीव्रमोक्षेच्छया द्विजः ॥ २३५ ॥
स एव सद्यस्तरति संसृतिं गुर्वनुग्रहात् ।
यस्तु तीव्रमुमुक्षुः स्यात्स जीवन्नेव मुच्यते ॥ २३६ ॥
जन्मान्तरे मध्यमस्तु तदन्यस्तु युगान्तरे ।
चतुर्थः कल्पकोट्यां वा नैव बंधाद्विमुच्यते ॥ २३७ ॥
नृजन्म जंतोरतिदुर्लभं विदुस्ततोऽपि पुंस्त्वं च ततो विवेकः ।
लब्ध्वा तदेतत्त्रितयं महात्मा यतेत मुक्त्यै सहसा विरक्तः ॥२३८॥
पुत्रमित्रकलत्रादिसुखं जन्मनि जन्मनि ।
मर्त्यत्वं पुरुषत्वं च विवेकश्च न लभ्यते ॥ २३९ ॥

लब्ध्वा सुदुर्लभतरं नरजन्म जंतु-
स्तत्रापि पौरुषमतः सदसद्विवेकम् ।
संप्राप्य चैहिकसुखाभिरतो यदि स्या-
द्धिक्तस्य जन्म कुमतेः पुरुषाधमस्य ॥ २४० ॥

खादते मोदते नित्यं शुनकः सूकरः खरः ।
तेषामेषां विशेषः को वृत्तिर्येषां तु तैः समा ॥ २४१ ॥
यावन्नाश्रयते रोगो यावन्नाक्रमते जरा ।
यावन्न धीर्विपर्येति यावन्मृत्युं न पश्यति ॥ २४२ ॥
तावदेव नरः स्वस्थः सारग्रहणतत्परः ।

विवेकी प्रयतेताशु भवबंधविमुक्तये ॥ २४३ ॥
देवर्षिपितृमर्त्यर्णबंधमुक्तास्तु कोटिशः ।
भवबंधविमुक्तस्तु यः कश्चिद्ब्रह्मवित्तमः ॥ २४४ ॥
अंतर्बंधेन बद्धस्य किं बहिर्बंधमोचनैः ।
तदंतर्बंधमुक्त्यर्थं क्रियतां कृतिभिः कृतिः ॥ २४५ ॥
कृतिपर्यवसानैव मता तीव्रमुमुक्षुना ।
अन्या तु रंजनामात्रा यत्र नो दृश्यते कृतिः ॥ २४६ ॥
गेहादिसर्वमपहाय लघुत्वबुद्ध्या
सौख्येच्छया स्वपतिनानलमाविविक्षोः ।
कान्ताजनस्य नियता सुदृढा त्वरा या
सैषा फलान्तगमने करणं मुमुक्षोः ॥ २४७ ॥
नित्यानित्यविवेकश्च देहक्षणिकतामतिः ।
मृत्योर्भीतिश्च तापश्च मुमुक्षावृद्धिकारणम् ॥ २४८ ॥
शिरो विवेकस्त्वत्यंतं वैराग्यं वपुरुच्यते ।
शमादयः षडंगानि मोक्षेच्छा प्राण इष्यते ॥ २४९ ॥
ईदृशांगसमायुक्तो जिज्ञासुर्युक्तिकोविदः ।
शूरो मृत्युं निहन्त्येव सम्यग्ज्ञानासिना ध्रुवम् ॥ २५० ॥
उक्तसाधनसंपन्नो जिज्ञासुर्यतिरात्मनः ।
जिज्ञासायै गुरुं गच्छेत्समित्पाणिर्नयोज्ज्वलः ॥ २५१ ॥
श्रोत्रियो ब्रह्मनिष्ठो यः प्रशान्तः समदर्शनः ।
निर्ममो निरहंकारो निर्द्वंद्वो निष्परिग्रहः ॥ २५२ ॥
अनपेक्षः शुचिर्दक्षः करुणामृतसागरः ।
एवंलक्षणसंपन्नः स गुरुर्ब्रह्मवित्तमः ।
उपासाद्यः प्रयत्नेन जिज्ञासोः स्वार्थसिद्धये ॥ २५३ ॥
जन्मानेकशतैः सदादरयुजा भक्त्या समाराधितो

भक्तैर्वैदिकलक्षणेन विधिना संतुष्ट ईशः स्वयम् ।
साक्षाच्छ्रीगुरुरूपमेत्य कृपया दृग्गोचरः सन्प्रभुः
तत्त्वं साधु विबोध्य तारयति तान्संसारदुःखार्णवात् ॥ २५४ ॥
अविद्याहृदयग्रंथिविमोक्षोऽपि भवेद्यतः ।
तमेव गुरुरित्याहुर्गुरुशब्दार्थवेदिनः ॥ २५५ ॥
शिव एव गुरुः साक्षात् गुरुरेव शिवः स्वयम् ।
उभयोरंतरं किंचिन्न द्रष्टव्यं मुमुक्षुभिः ॥ २५६ ॥
बंधमुक्तं ब्रह्मनिष्ठं कृतकृत्यं भजेद्गुरुम् ।
यस्य प्रसादात्संसारसागरो गोष्पदायते ॥ २५७ ॥
शुश्रूषया सदा भक्त्या प्रणामैर्विनयोक्तिभिः ।
प्रसन्नं गुरुमासाद्य प्रष्टव्यं ज्ञेयमात्मनः ॥ २५८ ॥
भगवन्करुणासिंधो भवसिंधोर्भवांस्तरिः ।
यमाश्रित्याश्रमेणैव परं पारं गता बुधाः ॥ २५९ ॥
जन्मांतरकृतानंतपुण्यकर्मफलोदयः ।
अद्य संनिहितो यस्मात्त्वत्कृपापात्रमस्म्यहम् ॥ २६० ॥
संप्रीतिमक्ष्णोर्वदनप्रसादमानंदमंतःकरणस्य सद्यः ।
विलोकनं ब्रह्मविदस्तनोति छिनत्ति मोहं सुगतिं व्यनक्ति ॥ २६१ ॥
हुताशनानां शशिनामिनानामप्यर्बुदं वापि न यन्निहंतुम् ।
शक्नोति तद्ध्वान्तमनंतमांतरं हन्त्यात्मवेत्ता सकृदीक्षणेन ॥२६२ ॥
दुष्पारे भवसागरे जनिमृतिव्याध्यादिदुःखोत्कटे
घोरे पुत्रकलत्रमित्रबहुलग्राहाकरे भीकरे ।
कर्मोत्तुंगतरंगभंगनिकरैराकृष्यमाणो मुहुः
यातायातगतिभ्रमेण शरणं किंचिन्न पश्याम्यहम् ॥ २६३ ॥
केन वा पुण्यशेषेण तव पादांबुजद्वयम् ।
दृष्टवानस्मि मामार्तं मृत्योस्त्राहि दयादृशा ॥ २६४ ॥

वदन्तमेवं तं शिष्यं दृष्ट्वैव दयया गुरुः ।
दद्यादभयमेतस्मै मा भैष्टेति मुहुर्मुहुः ॥ २६५ ॥

विद्वन्मृत्युभयं जहीहि भवतो नास्त्येव मृत्युः कचि-
न्नित्यस्य द्वयवर्जितस्य परमानंदात्मनो ब्रह्मणः ।
भ्रांत्या किंचिदवेक्ष्य भीतमनसा मिथ्या त्वया कथ्यते
मां त्राहीति हि सुप्तवत्प्रलपनं शून्यात्मकं ते मृषा ॥ २६६ ॥

निद्रागाढतमोवृतः किल जनः स्वप्ने भुजंगादिना
ग्रस्तं स्वं समवेक्ष्य यत्प्रलपति त्रासाद्धतोऽस्मीत्यलम् ।
आप्तेन प्रतिबोधितः करतलेनाताड्य पृष्टः स्वयं
किंचिन्नेति वदत्यमुष्य वचनं स्यात्तत्किमर्थं वद ॥ २६७ ॥

रज्जोस्तु तत्त्वमनवेक्ष्य गृहीतसर्प-
भावः पुमानयमहिर्भसतीति मोहात् ।
आक्रोशति प्रतिबिभेति च कंपते त-
न्मिथ्यैव नात्र भुजगोऽस्ति विचार्यमाणे ॥ २६८ ॥

तद्वत्त्वयाप्यात्मन उक्तमेतज्जन्माप्ययव्याधिजरादिदुःखम् ।
मृषैव सर्वं भ्रमकल्पितं ते सम्यग्विचार्यात्मनि मुंच भीतिम् ॥२६९॥

भवाननात्मनो धर्मानात्मन्यारोप्य शोचति ।
तदज्ञानकृतं सर्वं भयं त्यक्त्वा सुखी भव ॥ २७० ॥

शिष्यः—

श्रीमद्भिरुक्तं सकलं मृषेति दृष्टान्त एव ह्युपपद्यते तत् ।
दार्ष्टांतिके नैव भवादिदुःखं प्रत्यक्षतः सर्वजनप्रसिद्धम् ॥ २७१ ॥

प्रत्यक्षेणानुभूतार्थः कथं मिथ्यात्वमर्हति ।
चक्षुषो विषयं कुंभं कथं मिथ्या करोम्यहम् ॥ २७२ ॥

विद्यमानस्य मिथ्यात्वं कथं नु घटते प्रभो ।
प्रत्यक्षं खलु सर्वेषां प्रमाणं प्रस्फुटार्थकम् ॥ २७३ ॥

मर्त्यस्य मम जन्मादिदुःखभाजोऽल्पजीविनः ।
ब्रह्मत्वमपि नित्यत्वं परमानंदता कथम् ॥ २७४ ॥
क आत्मा कस्त्वनात्मा च किमु लक्षणमेतयोः ।
आत्मन्यनात्मधर्माणामारोपः क्रियते कथम् ॥ २७५ ॥
किमज्ञानं तदुत्पन्नभयत्यागोऽपि वा कथम् ।
किमु ज्ञानं तदुत्पन्नसुखप्राप्तिश्च वा कथम् ॥ २७६ ॥
सर्वमेतद्यथापूर्वं करामलकवत्स्फुटम् ।
प्रतिपादय मे स्वामिन् श्रीगुरो करुणानिधे ॥ २७७ ॥

श्रीगुरुः--

धन्यः कृतार्थस्त्वमहो विवेकः शिवप्रसादस्तव विद्यते महान् ।
विसृज्य तु प्राकृतलोकमार्गं ब्रह्मावगन्तुं यतसे यतस्त्वम् ॥ २७८ ॥
शिवप्रसादेन विना न सिद्धिः शिवप्रसादेन विना न बुद्धिः ।
शिवप्रसादेन विना न युक्तिः शिवप्रसादेन विना न मुक्तिः ॥२७९॥
यस्य प्रसादेन विमुक्तसंगाः शुकादयः संसृतिबंधमुक्ताः ।
तस्य प्रसादो बहुजन्मलभ्यो भक्त्यैकगम्यो भवमुक्तिहेतुः ॥ २८० ॥
विवेको जंतूनां प्रभवति जनिष्वेव बहुषु
प्रसादादेवैशाद्बहुसुकृतपाकोदयवशात् ।
यतस्तस्मादेव त्वमपि परमार्थावगमने
कृतारंभः पुंसामिदमिह विवेकस्य तु फलम् ॥ २८१ ॥
मर्त्यत्वसिद्धेरपि पुंस्त्वसिद्धेर्विप्रत्वसिद्धेश्च विवेकसिद्धेः ।
वदन्ति मुख्यं फलमेव मोक्षं व्यर्थं समस्तं यदि चेन्न मोक्षः ॥२८२॥
प्रश्नः समीचीनतरस्तवायं यदात्मतत्त्वावगमे प्रवृत्तिः ।
ततस्तवैतत्सकलं समूलं निवेदयिष्यामि मुदा शृणुष्व ॥ २८३ ॥
मर्त्यत्वं त्वयि कल्पितं भ्रमवशात्तेनैव जन्मादयः
तत्संभावितमेव दुःखमपि ते नो वस्तुतस्तन्मृषा ।

निद्रामोहवशादुपागतसुखं दुःखं च किं नु त्वया
सत्यत्वेन विलोकितं क्वचिदपि ब्रूहि प्रबोधागमे ॥ २८४ ॥
नाशेषलोकैरनुभूयमानः प्रत्यक्षतोऽयं सकलप्रपंचः ।
कथं मृषा स्यादिति शंकनीयं विचारशून्येन विमुह्यता त्वया ॥२८५॥
दिवांधदृष्टेस्तु दिवांधकारः प्रत्यक्षसिद्धोऽपि स किं यथार्थः ।
तद्वद्भ्रमेणावगतः पदार्थो भ्रान्तस्य सत्यः सुमतेर्मृषैव ॥ २८६ ॥
घटोऽयमित्यत्र घटाभिधानः प्रत्यक्षतः कश्चिदुदेति दृष्टेः ।
विचार्यमाणे स तु नास्ति तत्र मृदस्ति तद्भावविलक्षणा सा ॥२८७॥
प्रादेशमात्रः परिदृश्यतेऽर्कः शास्त्रेण संदर्शितलक्ष्ययोजनः ।
मानांतरेण क्वचिदेति बाधां प्रत्यक्षमप्यत्र हि न व्यवस्था ॥ २८८॥
तस्मात्त्वयीदं भ्रमतः प्रतीतं मृषैव नो सत्यमवेहि साक्षात् ।
ब्रह्म त्वमेवासि सुखस्वरूपं त्वत्तो न भिन्नं विचिनुष्व बुद्धौ ॥२८९॥
लोकान्तरे वात्र गुहान्तरे वा तीर्थान्तरे कर्मपरंपरांतरे ।
शास्त्रान्तरे नास्त्यनुपश्यतामिह स्वयं परं ब्रह्म विचार्यमाणे ॥२९०॥

तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु पश्यति ।
गोपः कक्षगतं छागं यथा कूपेषु दुर्मतिः ॥ २९१ ॥
स्वमात्मानं परं मत्वा परमात्मानमन्यथा ।
विमृग्यते पुनः स्वात्मा बहिः कोशेषु पंडितैः ॥ २९२ ॥
विस्मृत्य वस्तुनस्तत्त्वमध्यारोप्य च वस्तुनि ।
अवस्तुनां च तद्धर्मान्मुधा शोचति नान्यथा ॥ २९३ ॥
आत्मानात्मविवेकं ते वक्ष्यामि शृणु सादरम् ।
यस्य श्रवणमात्रेण मुच्यतेऽनात्मबंधनात् ॥ २९४ ॥
इत्युक्त्वाभिमुखीकृत्य शिष्यं करुणया गुरुः ।
अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंचयन् ॥ २९५ ॥
सम्यक्प्रबोधयत्तत्त्वं शास्त्रदृष्टेन वर्त्मना ।
सर्वेषामुपकाराय तत्प्रकारोऽत्र दर्श्यते ॥ २९६ ॥

वस्तुन्यवस्त्वारोपो यः सोऽध्यारोप इतीर्यते ।
असर्पभूते रज्ज्वादौ सर्पत्वारोपणं यथा ॥ २९७ ॥
वस्तु तावत्परं ब्रह्म सत्यज्ञानादिलक्षणम् ।
इदमारोपितं यत्र भाति खे नीलतादिवत् ॥ २९८ ॥
तत्कारणं यदज्ञानं सकार्यं सद्विलक्षणम् ।
अवस्त्वित्युच्यते सद्भिर्यस्य बाधा प्रदृश्यते ॥ २९९ ॥
अवस्तु तत्प्रमाणैर्यद्बाध्यते शुक्तिरौप्यवत् ।
न बाध्यते यत्तद्वस्तु त्रिषु कालेषु शुक्तिवत् ॥ ३०० ॥
शुक्तेर्बाधा न खल्वस्ति रजतस्य यथा तथा ।
अवस्तुसंज्ञितं यत्तज्जगदध्यासकारणम् ॥ ३०१ ॥
सदसद्भ्यामनिर्वाच्यमज्ञानं त्रिगुणात्मकम् ।
वस्तु तत्त्वावबोधैकबाध्यं तद्भावलक्षणम् ॥ ३०२ ॥
मिथ्यासंबंधतस्तत्र ब्रह्मण्याश्रित्य तिष्ठति ।
मणौ शक्तिर्यथा तद्वन्नैतदाश्रयदूषकम् ॥ ३०३ ॥
सद्भावे लिंगमेतस्य कार्यमेतच्चराचरम् ।
मानं श्रुतिः स्मृतिश्चाज्ञोऽहमित्यनुभवोऽपि च ॥ ३०४ ॥
अज्ञानं प्रकृतिः शक्तिरविद्येति निगद्यते ।
तदेतत्सन्न भवति नासद्वा शुक्तिरौप्यवत् ॥ ३०५ ॥
सतो भिन्नमभिन्नं वा न दीपस्य प्रभा यथा ।
न सावयवमन्यद्वा बीजस्यांकुरवत्क्वचित् ॥ ३०६ ॥
अत एतदनिर्वाच्यमित्येव कवयो विदुः ।
समष्टिव्यष्टिरूपेण द्विधाज्ञानं निगद्यते ॥ ३०७ ॥
नानात्वेन प्रतीतानामज्ञानानामभेदतः ।
एकत्वेन समष्टिः स्याद्भूरुहाणां वनं यथा ॥ ३०८ ॥
इयं सत्त्वांशोत्कर्षतः पुरा ।

मायेति कथ्यते तज्ज्ञैः शुद्धसत्त्वैकलक्षणा ॥ ३०९ ॥
मायोपहितचैतन्यं साभासं सत्त्वबृंहितम् ।
सर्वज्ञत्वादिगुणकं सृष्टिस्थित्यंतकारणम् ॥ ३१० ॥
अव्याकृतं तदव्यक्तमीश इत्यपि गीयते ।
सर्वशक्तिगुणोपेतः सर्वज्ञानावभासकः ॥ ३११ ॥
स्वतंत्रः सत्यसंकल्पः सत्यकामः स ईश्वरः ।
तस्यैतस्य महाविष्णोर्महाशक्तेर्महीयसः ॥ ३१२ ॥
सर्वज्ञत्वेश्वरत्वादिकारणत्वान्मनीषिणः ।
कारणं वपुरित्याहुः समष्टिं सत्त्वबृंहितम् ॥ ३१३ ॥
आनंदप्रचुरत्वेन साधकत्वेन कोशवत् ।
सैषानंदमयः कोश इतीशस्य निगद्यते ॥ ३१४ ॥
सर्वोपरमहेतुत्वात्सुषुप्तिस्थानमिष्यते ।
प्राकृतः प्रलयो यत्र श्राव्यते श्रुतिभिर्मुहुः ॥ ३१५ ॥
अज्ञानं व्यष्ट्यभिप्रायादनेकत्वेन भिद्यते ।
अज्ञानवृत्तयो नाना तत्तद्गुणविलक्षणाः ॥ ३१६ ॥
वनस्य व्यष्ट्यभिप्रायाद्भूरुहा इत्यनेकता ।
यथा तथैवाज्ञानस्य व्यष्टितः स्यादनेकता ॥ ३१७ ॥
व्यष्टिर्मलिनसत्त्वैषा रजसा तमसा युता ।
ततो निकृष्टा भवति योपाधिः प्रत्यगात्मनः ॥ ३१८ ॥
चैतन्यं व्यष्ट्यवच्छिन्नं प्रत्यगात्मेति गीयते ।
साभासं व्यष्ट्युपहितं सत्तादात्म्येन तद्गुणैः ॥ ३१९ ॥
अभिभूतः स एवात्मा जीव इत्यभिधीयते ।
किंचिज्ज्ञत्वानीश्वरत्वसंसारित्वादिधर्मवान् ॥ ३२० ॥
अस्य व्यष्टिरहंकारकारणत्वेन कारणम् ।
वपुस्तत्राभिमान्यात्मा प्राज्ञ इत्युच्यते बुधैः ॥ ३२१ ॥

प्राज्ञत्वमस्यैकाज्ञानभासकत्वेन संमतम् ।
व्यष्टेर्निकृष्टत्वेनास्य नानेकाज्ञानभासकम् ॥ ३२२ ॥
स्वरूपाच्छादकत्वेनाप्यानंदप्रचुरत्वतः ।
कारणं वपुरानंदमयः कोश इतीर्यते ॥ ३२३ ॥
अस्यावस्था सुषुप्तिः स्याद्यत्रानंदः प्रकृष्यते ।
एषोऽहं सुखमस्वाप्सं न तु किंचिदवेदिषम् ॥ ३२४ ॥
इत्यानंदसमुत्कर्षः प्रबुद्धेषु प्रदृश्यते ।
समष्टेरपि च व्यष्टेरुभयोर्वनवृक्षवत् ॥ ३२५ ॥
अभेद एव नो भेदो जात्येकत्वेन वस्तुतः ।
अभेद एव ज्ञातव्यस्तथेशप्राज्ञयोरपि ॥ ३२६ ॥
सत्युपाध्योरभिन्नत्वे क्व भेदस्तद्विशिष्टयोः ।
एकीभावे तरंगाब्ध्योः को भेदः प्रतिबिंबयोः ॥ ३२७ ॥
अज्ञानतदवच्छिन्नाभासयोरुभयोरपि ।
आधारं शुद्धचैतन्यं यत्तत्तुर्यमितीर्यते ॥ ३२८ ॥
एतदेवाविविक्तं सदुपाधिभ्यां च तद्गुणैः ।
महावाक्यस्य वाच्यार्थो विविक्तं लक्ष्य इष्यते ॥ ३२९ ॥
अनंतशक्तिसंपन्नो मायोपाधिक ईश्वरः ।
ईक्षामात्रेण सृजति विश्वमेतच्चराचरम् ॥ ३३० ॥
अद्वितीयस्वमात्रोऽसौ निरुपादान ईश्वरः ।
स्वयमेव कथं सर्वं सृजतीति न शंक्यताम् ॥ ३३१ ॥
निमित्तमप्युपादानं स्वयमेव भवन्प्रभुः ।
चराचरात्मकं विश्वं सृजत्यवति लुंपति ॥ ३३२ ॥
स्वप्राधान्येन जगतो निमित्तमपि कारणम् ।
उपादानं ततोपाधिप्राधान्येन भवत्ययम् ॥ ३३३ ॥
यथा लूता निमित्तं च स्वप्रधानतया भवेत् ।

स्वशरीरप्रधानत्वेनोपादानं तथेश्वरः ॥ ३३४ ॥
तमःप्रधानप्रकृतिविशिष्टात्परमात्मनः ।
अभूत्सकाशादाकाशमाकाशाद्वायुरुच्यते ॥ ३३५ ॥
वायोरग्निस्तथैवाग्नेरापोऽद्भ्यः पृथिवी क्रमात् ।
शक्तेस्तमःप्रधानत्वं तत्कार्ये जाड्यदर्शनात् ॥ ३३६ ॥
आरंभन्ते कार्यगुणान्ये कारणगुणा हि ते ।
एतानि सूक्ष्मभूतानि भूतमात्रा अपि क्रमात् ॥ ३३७ ॥
एतेभ्यः सूक्ष्मभूतेभ्यः सूक्ष्मदेहा भवन्त्यपि ।
स्थूलान्यपि च भूतानि चान्योन्यांशविमेलनात् ॥ ३३८ ॥
अपंचीकृतभूतेभ्यो जातं सप्तदशांगकम् ।
संसारकारणं लिंगमात्मनो भोगसाधनम् ॥ ३३९ ॥
श्रोत्रादिपंचकं चैव वागादीनां च पंचकम् ।
प्राणादिपंचकं बुद्धिमनसी लिंगमुच्यते ॥ ३४० ॥
श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पंच जातानि ।
आकाशादीनां सत्त्वांशेभ्यो धींद्रियाण्यनुक्रमतः ॥ ३४१ ॥
आकाशादिगताः पंच सात्त्विकांशाः परस्परम् ।
मिलित्वैवान्तःकरणमभवत्सर्वकारणम् ॥ ३४२ ॥
प्रकाशकत्वादेतेषां सात्त्विकांशत्वमिष्यते ।
प्रकाशकत्वं सत्त्वस्य स्वच्छत्वेन यतस्ततः ॥ ३४३ ॥
तदंतःकरणं वृत्तिभेदेन स्याच्चतुर्विधम् ।
मनो बुद्धिरहंकारश्चित्तं चेति तदुच्यते ॥ ३४४ ॥
संकल्पान्मन इत्याहुर्बुद्धिरर्थस्य निश्चयात् ।
अभिमानादहंकारश्चित्तमर्थस्य चिंतनात् ॥ ३४५ ॥
मनस्यपि च बुद्धौ च चित्ताहंकारयोः क्रमात् ।
अंतर्भावोऽत्र बोद्धव्यो लिंगलक्षणसिद्धये ॥ ३४६ ॥

चिंतनं च मनोधर्मः संकल्पादिर्यथा तथा ।
अंतर्भावो मनस्यैव सम्यक्चित्तस्य सिध्यति ॥ ३४७ ॥
देहादावहमित्येव भावो दृढतरो धियः ।
दृश्यतेऽहंकृतेस्तस्मादंतर्भावोऽत्र युज्यते ॥ ३४८ ॥
तस्मादेव तु बुद्धेः कर्तृत्वं तदितरस्य करणत्वम् ।
सिध्यत्यात्मन उभयाद्विद्यात्संसारकारणं मोहात् ॥ ३४९ ॥
विज्ञानमयकोशः स्याद्बुद्धिर्ज्ञानेंद्रियैः सह ।
विज्ञानप्रचुरत्वेनाप्याच्छादकतयात्मनः ॥ ३५० ॥
विज्ञानमयकोशोऽयमिति विद्वद्भिरुच्यते ।
अयं महानहंकारवृत्तिमान्कर्तृलक्षणः ।
सर्वसंसारनिर्वोढा विज्ञानमयशब्दभाक् ॥ ३५१ ॥
अहं ममेत्येव सदाभिमानं देहेंद्रियादौ कुरुते गृहादौ ।
जीवाभिमानः पुरुषोऽयमेव कर्ता च भोक्ता च सुखी च दुःखी ॥३५२॥
स्ववासनाप्रेरित एव नित्यं करोति कर्मोभयलक्षणं च ।
भुंक्ते तदुत्पन्नफलं विशिष्टं सुखं च दुःखं च परत्र चात्र ॥३५३॥
नानायोनिसहस्रेषु जायमानो मुहुर्मुहुः ।
म्रियमाणो भ्रमत्येष जीवः संसारमंडले ॥ ३५४ ॥
मनो मनोमयः कोशो भवेज्ज्ञानेंद्रियैः सह ।
प्राचुर्यं मनसो यत्र दृश्यतेऽसौ मनोमयः ॥ ३५५ ॥
चिंताविषादहर्षाद्याः कामाद्या अस्य वृत्तयः ।
मनुते मनसैवैष फलं कामयते बहिः ।
यतते कुरुते भुंक्ते तन्मनः सर्वकारणम् ॥ ३५६ ॥
मनो ह्यमुष्य प्रणवस्य हेतुरंतर्बहिश्चार्थमनेन वेत्ति ।
शृणोति जिघ्रत्यमुनैव चेक्षते वक्ति स्पृशत्यत्ति करोति सर्वम् ॥३५७
बंधश्च मोक्षो मनसैव पुंसामर्थोऽप्यनर्थोऽप्यमुनैव सिध्यति ।

शुद्धेन मोक्षो मलिनेन बंधो विवेकतोऽर्थोऽप्यविवेकतोऽन्यः॥३५८॥
रजस्तमोभ्यां मलिनं त्वशुद्धमज्ञानजं सत्त्वगुणेन रिक्तम्।
मनस्तमोदोषसमन्वितत्वाज्जडत्वमोहालसताप्रमादैः।
तिरस्कृतं सन्न तु वेत्ति वास्तवं पदार्थतत्त्वं ह्युपलभ्यमानम्॥३५९॥
रजोदोषैर्युक्तं यदि भवति विक्षेपकगुणैः
प्रतीपैः कामाद्यैरनिशमभिभूतं व्यथयति।
कथंचित्सूक्ष्मार्थावगतिमदपि भ्राम्यति भृशं
मनोदीपो यद्वत्प्रबलमरुता ध्वस्तमहिमा॥ ३६०॥
ततो मुमुक्षुर्भवबंधमुक्त्यै रजस्तमोभ्यां च तदीयकार्यैः।
वियोज्य चित्तं परिशुद्धसत्त्वं प्रियं प्रयत्नेन सदैव कुर्यात्॥ ३६१॥
गर्भावासजनिप्रणाशनजराव्याध्यादिषु प्राणिनां
यद्दुःखं परिदृश्यते च नरके तच्चिंतयित्वा मुहुः।
दोषानेव विलोक्य सर्वविषयेष्वाशां विमुच्याभित-
श्चित्तग्रंथिविमोचनाय सुमतिः सत्त्वं समालंबताम्॥ ३६२॥
यमेषु निरतो यस्तु नियमेषु च यत्नतः।
विवेकिनस्तस्य चित्तं प्रसादमधिगच्छति॥ ३६३॥
आसुरीं संपदं त्यक्त्वा भजेद्यो दैवसंपदम्।
मोक्षैककांक्षया नित्यं तस्य चित्तं प्रसीदति॥ ३६४॥
परद्रव्यपरद्रोहपरनिंदापरस्त्रियः।
नालंबते मनो यस्य तस्य चित्तं प्रसीदति॥ ३६५॥
आत्मवत्सर्वभूतेषु यः समत्वेन पश्यति।
सुखं दुःखं विवेकेन तस्य चित्तं प्रसीदति॥ ३६६॥
अत्यंतं श्रद्धया भक्त्या गुरुमीश्वरमात्मनि।
यो भजत्यनिशं क्षांतस्तस्य चित्तं प्रसीदति॥ ३६७॥
शिष्टान्नमीशार्चनमार्यसेवां तीर्थाटनं स्वाश्रमधर्मनिष्ठाम्।

यमानुषक्तिं नियमानुवृत्तिं चित्तप्रसादाय वदन्ति तज्ज्ञाः ॥३६८॥

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनाम् ।
पूतिपर्युषितादीनां त्यागः सत्त्वाय कल्पते ॥ ३६९ ॥

श्रुत्या सत्त्वपुराणानां सेवया सत्त्ववस्तुनः ।
अनुवृत्त्या च साधूनां सत्त्ववृत्तिः प्रजायते ॥ ३७० ॥

यस्य चित्तं निर्विषयं हृदयं यस्य शीतलम् ।
तस्य मित्रं जगत्सर्वं तस्य मुक्तिः करस्थिता ॥ ३७१ ॥

हितपरिमितभोजी नित्यमेकान्तसेवी
सकृदुचितहितोक्तिः स्वल्पनिद्राविहारः ।
अनुनियमनशीलो यो भजत्युक्तकाले
स लभत इह शीघ्रं साधु चित्तप्रसादम् ॥ ३७२ ॥

चित्तप्रसादेन विनावगन्तुं बंधं न शक्नोति परात्मतत्त्वम् ।
तत्त्वावगत्या तु विना विमुक्तिर्न सिध्यति ब्रह्मसहस्रकोटिषु ॥३७३॥

मनःप्रसादः पुरुषस्य बंधो मनःप्रसादो भवबंधमुक्तिः ।
मनःप्रसादाधिगमाय तस्मान्मनोनिरासं विदधीत विद्वान् ॥ ३७४ ॥

पंचानामेव भूतानां रजोंशेभ्योऽभवन्क्रमात् ।
वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाण्यनु ॥ ३७५ ॥

समस्तेभ्यो रजोंशेभ्यो व्योमादीनां क्रियात्मकाः ।
प्राणादयः समुत्पन्नाः पंचाप्यांतरवायवः ॥ ३७६ ॥

प्राणः प्राग्गमनेन स्यादपानोऽवाग्गमनेन च ।
व्यानस्तु विष्वग्गमनादुत्क्रान्त्योदान इष्यते ॥ ३७७ ॥

अशितान्नरसादीनां समीकरणधर्मतः ।
समान इत्यभिप्रेतो वायुर्यस्तेषु पंचमः ॥ ३७८ ॥

क्रियैव दृश्यते प्रायः प्राणकर्मेंद्रियेष्वलम् ।
ततस्तेषां रजोंशेभ्यो जनिरंगीकृता बुधैः ॥ ३७९ ॥

राजसीं तु क्रियाशक्तिं तमःशक्तिं जडात्मिकाम् ।
प्रकाशरूपिणीं सत्त्वशक्तिं प्राहुर्महर्षयः ॥ ३८० ॥
एते प्राणादयः पंच पंचकर्मेंद्रियैः सह ।
भवेत्प्राणमयः कोशः स्थूलो येनैव चेष्टते ॥ ३८१ ॥
यद्यन्निष्पाद्यते कर्म पुण्यं वा पापमेव वा ।
वागादिभिश्च वपुषा तत्प्राणमयकर्तृकम् ॥ ३८२ ॥
वायुनोच्चालितो वृक्षो नानारूपेण चेष्टते ।
तस्मिन्विनिश्चले सोऽपि निश्चलः स्याद्यथा तथा ॥ ३८३ ॥
प्राणकर्मेंद्रियैर्देहः प्रेर्यमाणः प्रवर्तते ।
नानाक्रियासु सर्वत्र विहिताविहितादिषु ॥ ३८४ ॥
कोशत्रयं मिलित्वैतद्वपुः स्यात्सूक्ष्ममात्मनः ।
अतिसूक्ष्मतया लीनस्यात्मनो गमकत्वतः ॥ ३८५ ॥
लिंगमित्युच्यते स्थूलापेक्षया सूक्ष्ममिष्यते ।
सर्वं लिंगवपुर्जातमेकधीविषयत्वतः ॥ ३८६ ॥
समष्टिः स्यात्तरुगणः सामान्येन वनं यथा ।
एतत्समष्ट्युपहितं चैतन्यं सफलं जगुः ॥ ३८७ ॥
हिरण्यगर्भः सूत्रात्मा प्राण इत्यपि पंडिताः ।
हिरण्मये बुद्धिगर्भे प्रचकास्ति हिरण्यवत् ॥ ३८८ ॥
हिरण्यगर्भ इत्यस्य व्यपदेशस्ततो मतः ।
समस्तलिंगदेहेषु सूत्रवन्मणिपंक्तिषु ।
व्याप्य स्थितत्वात्सूत्रात्मा प्राणनात्प्राण उच्यते ॥ ३८९ ॥
नैकधीविषयत्वेन लिंगं व्यष्टिर्भवत्यथ ।
यदेतद्व्यष्ट्युपहितं चिदाभाससमन्वितम् ॥ ३९० ॥
चैतन्यं तैजस इति निगदन्ति मनीषिणः ।
तेजोमयान्तःकरणोपाधित्वेनैव तैजसः ॥ ३९१ ॥

स्थूलात्सूक्ष्मतया व्यष्टिरस्य सूक्ष्मवपुर्मतम् ।
अस्य जागरसंस्कारमयत्वाद्वपुरुच्यते ॥ ३९२ ॥
स्वप्ने जागरकालीनवासनापरिकल्पितान् ।
तैजसो विषयान्भुंक्ते सूक्ष्मार्थान्सूक्ष्मवृत्तिभिः ॥ ३९३ ॥
समष्टेरपि च व्यष्टेः सामान्येनैव पूर्ववत् ।
अभेद एव ज्ञातव्यो जात्यैकत्वे कुतो भिदा ॥ ३९४ ॥
द्वयोरुपाध्योरेकत्वे तयोरप्यभिमानिनोः ।
सूत्रात्मनस्तैजसस्याप्यभेदः पूर्ववन्मतः ॥ ३९५ ॥
एवं सूक्ष्मप्रपंचस्य प्रकारः शास्त्रसंमतः ।
अथ स्थूलप्रपंचस्य प्रकारः कथ्यते शृणु ॥ ३९६ ॥
तान्येव सूक्ष्मभूतानि व्योमादीनि परस्परम् ।
पंचीकृतानि स्थूलानि भवन्ति शृणु तत्क्रमम् ॥ ३९७ ॥
खादीनां भूतमेकैकं सममेव द्विधा द्विधा ।
विभज्य भागं तत्राद्यं त्यक्त्वा भागं द्वितीयकम् ॥ ३९८ ॥
चतुर्धा सुविभज्याथ तमेकैकं विनिक्षिपेत् ।
चतुर्णां प्रथमे भागे क्रमेण स्वार्धमंतरा ॥ ३९९ ॥
ततो व्योमादिभूतानां भागाः पंच भवन्ति ते ।
स्वस्वार्धभागेनान्येभ्यः प्राप्तं भागचतुष्टयम् ॥ ४०० ॥
संयोज्य स्थूलतां यान्ति व्योमादीनि यथाक्रमम् ।
अमुष्य पंचीकरणस्याप्रामाण्यं न शंक्यताम् ॥ ४०१ ॥
उपलक्षणमस्यापि तत्त्रिवृत्करणश्रुतिः ।
पंचानामपि भूतानां श्रूयतेऽन्यत्र संभवः ॥ ४०२ ॥
ततः प्रामाणिकं पंचीकरणं मन्यतां बुधैः ।
प्रत्यक्षादिविरोधः स्यादन्यथा क्रियते यदि ॥ ४०३ ॥
आकाशवाय्वोर्धर्मस्तु वह्न्यादावुपलभ्यते ।

यथा तथाकाशवाय्वोर्नाग्न्यादेर्धर्म ईक्ष्यते ॥ ४०४ ॥
अतोऽप्रामाणिकमिति न किंचिदपि चिंत्यताम् ।
खांशव्याप्तिश्च खव्याप्तिर्विद्यते पावकादिषु ॥ ४०५ ॥
तेनोपलभ्यते शब्दः कारणस्यातिरेकतः ।
तथा नभस्वतो धर्मोऽप्यग्न्यादावुपलभ्यते ॥ ४०६ ॥
न तथा विद्यते व्याप्तिर्वह्न्यादेः खनभस्वतोः ।
सूक्ष्मत्वादंशकव्याप्तेस्तद्धर्मो नोपलभ्यते ॥ ४०७ ॥
कारणस्यानुरूपेण कार्यं सर्वत्र दृश्यते ।
तस्मात्प्रामाण्यमेष्टव्यं बुधैः पंचीकृतेरपि ॥ ४०८ ॥
अनेनोद्भूतगुणकं भूतं वक्ष्येऽवधारय ।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणोऽनिलः ॥ ४०९ ॥
तेजः शब्दस्पर्शरूपैर्गुणवत्कारणं क्रमात् ।
आपश्चतुर्गुणः शब्दस्पर्शरूपरसैः क्रमात् ॥ ४१० ॥
एतैश्चतुर्भिर्गंधेन सह पंचगुणा मही ।
आकाशांशतया श्रोत्रं शब्दं गृह्णाति तद्गुणम् ॥ ४११ ॥
त्वङ्मारुतांशकतया स्पर्शं गृह्णाति तद्गुणम् ।
तेजोंशकतया चक्षू रूपं गृह्णाति तद्गुणम् ॥ ४१२ ॥
अबंशकतया जिह्वा रसं गृह्णाति तद्गुणम् ।
भूम्यंशकतया घ्राणं गंधं गृह्णाति तद्गुणम् ॥ ४१३ ॥
करोति खांशकतया वाक्शब्दोच्चारणक्रियाम् ।
वाय्वंशकतया पादौ गमनादिक्रियापरौ ॥ ४१४ ॥
तेजोंशकतया पाणी वह्न्याद्यर्चनतत्परौ ।
जलांशकतयोपस्थो रेतोमूत्रविसर्गकृत् ॥ ४१५ ॥
भूम्यंशकतया पायुः कठिनं मलमुत्सृजेत् ।
श्रोत्रस्य दैवतं दिक्स्यात्त्वचो वायुर्दृशो रविः ॥ ४१६ ॥

जिह्वाया वरुणो दैवं घ्राणस्य त्वश्विनावुभौ ।
वाचोऽग्निर्हस्तयोरिंद्रः पादयोस्तु त्रिविक्रमः ॥ ४१७ ॥
पायोर्मृत्युरुपस्थस्य त्वधिदैवं प्रजापतिः ।
मनसो दैवतं चंद्रो बुद्धेर्दैवं बृहस्पतिः ॥ ४१८ ॥
रुद्रस्त्वहंकृतेर्दैवं क्षेत्रज्ञश्चित्तदैवतम् ।
दिगाद्या देवताः सर्वाः खादिसत्त्वांशसंभवाः ॥ ४१९ ॥
संमिता इंद्रियस्थानेष्विंद्रियाणां समंततः ।
निगृह्णन्त्यनुगृह्णन्ति प्राणिकर्मानुरूपतः ॥ ४२० ॥
शरीरकरणग्रामा प्राणाहमधिदेवताः ।
पंचैते हेतवः प्रोक्ता निष्पत्तौ सर्वकर्मणाम् ॥ ४२१ ॥
कर्मानुरूपेण गुणोदयो भवेद्गुणानुरूपेण मनःप्रवृत्तिः ।
मनोनुवृत्तैरुभयात्मकैंद्रियैर्निवर्त्यते पुण्यमपुण्यमत्र ॥ ४२२ ॥

करोति विज्ञानमयोऽभिमानं
कर्ताहमेवेति तदात्मना स्थितः ।
आत्मा तु साक्षी न करोति किंचि-
न्न कारयत्येव तटस्थवत्सदा ॥ ४२३ ॥

द्रष्टा श्रोता वक्ता कर्ता भोक्ता भवत्यहंकारः ।
स्वयमेतद्विकृतीनां साक्षी निर्लेप एवात्मा ॥ ४२४ ॥
आत्मनः साक्षिमात्रत्वं न कर्तृत्वं न भोक्तृता ।
रविवत्प्राणिभिर्लोके क्रियमाणेषु कर्मसु ॥ ४२५ ॥
न ह्यर्कः कुरुते कर्म न कारयति जंतवः ।
स्वस्वभावानुरोधेन वर्तन्ते स्वस्वकर्मसु ॥ ४२६ ॥
तथैव प्रत्यगात्मापि रविवन्निष्क्रियात्मना ।
उदासीनतयैवास्ते देहादीनां प्रवृत्तिषु ॥ ४२७ ॥
अज्ञात्वैवं परं तत्त्वं मायामोहितचेतसः ।

स्वात्मन्यारोपयन्त्येतत्कर्तृत्वाद्यन्यगोचरम् ॥ ४२८ ॥

आत्मस्वरूपमविचार्य विमूढबुद्धि-
रारोपयत्यखिलमेतदनात्मकार्यम् ।
स्वात्मन्यसंगचितिनिष्क्रिय एव चंद्रे
दूरस्थमेघकृतधावनवद्भ्रमेण ॥ ४२९ ॥

आत्मानात्मविवेकं स्फुटतरमग्रे निवेदयिष्यामः ।
इममाकर्णय विद्वन् जगदुत्पत्तिप्रकारमावृत्त्या ॥ ४३० ॥

पंचीकृतेभ्यः खादिभ्यो भूतेभ्यस्त्वीक्षयेशितुः ।
समुत्पन्नमिदं स्थूलं ब्रह्मांडं सचराचरम् ॥ ४३१ ॥

व्रीह्याद्योषधयः सर्वा वायुतेजोंबुभूमयः ।
सर्वेषामप्यभूदन्नं चतुर्विधशरीरिणाम् ॥ ४३२ ॥

केचिन्मारुतभोजनाः खलु परे चंद्रार्कतेजोशनाः
केचित्तोयकणाशिनोऽपरिमिताः केचित्तु मृद्भक्षकाः ।
केचित्पर्णशिलातृणादनपराः केचित्तु मांसाशिनः
केचिद्व्रीहियवान्नभोजनपरा जीवन्त्यमी जंतवः ॥ ४३३ ॥

जरायुजांडजस्वेदजोद्भिज्जाद्याश्चतुर्विधाः ।
स्वस्वकर्मानुरूपेण जातास्तिष्ठन्ति जंतवः ॥ ४३४ ॥

यत्र जाता जरायुभ्यस्ते नराद्या जरायुजाः ।
अंडजास्ते स्युरंडेभ्यो जाता ये विहगादयः ॥ ४३५ ॥

स्वेदाज्जाताः स्वेदजास्ते यूका लूक्षादयोऽपि च ।
भूमिमुद्भिद्य ये जाता उद्भिज्जास्ते द्रुमादयः ॥ ४३६ ॥

इदं स्थूलवपुर्जातं भौतिकं च चतुर्विधम् ।
सामान्येन समष्टिः स्यादेकधीविषयत्वतः ॥ ४३७ ॥

एतत्समष्टयवच्छिन्नं चैतन्यं फलसंयुतम् ।
प्राहुर्वैश्वानर इति विराडिति च वैदिकाः ॥ ४३८ ॥

वैश्वानरो विश्वनरेष्वात्मत्वेनाभिमानतः ।
विराट् स्याद्विविधत्वेन स्वयमेव विराजनात् ॥ ४३९ ॥
चतुर्विधं भूतजातं तत्तज्जातिविशेषतः ।
नैकधीविषयत्वेन पूर्ववद्व्यष्टिरिष्यते ॥ ४४० ॥
साभासं व्यष्ट्युपहितं तत्तादात्म्यमुपागतम् ।
चैतन्यं विश्व इत्याहुर्वेदान्तनयकोविदाः ॥ ४४१ ॥
विश्वोऽस्मिन्स्थूलदेहेऽत्र स्वाभिमानेन तिष्ठति ।
यतस्ततो विश्व इति नाम्ना सार्थो भवत्ययम् ॥ ४४२ ॥
व्यष्टिरेषास्य विश्वस्य भवति स्थूलविग्रहः ।
उच्यतेऽन्नविकारित्वात्कोशोऽन्नमय इत्ययम् ॥ ४४३ ॥
देहोऽयं पितृभुक्तान्नविकाराच्छुक्लशोणितात् ।
जातः प्रवर्धतेऽन्नेन तदभावे विनश्यति ॥ ४४४ ॥
तस्मादन्नविकारित्वेनायमन्नमयो मतः ।
आच्छादकत्वादेतस्याप्यसेः कोशवदात्मनः ॥ ४४५ ॥
आत्मनः स्थूलभोगानामेतदायतनं विदुः ।
शब्दादिविषयान्भुंक्ते स्थूलान्स्थूलात्मनि स्थितः ॥ ४४६ ॥
बहिरात्मा ततः स्थूलभोगायतनमुच्यते ।
इंद्रियैरुपनीतानां शब्दादीनामयं स्वयम् ।
देहेंद्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः ॥ ४४७ ॥
एकादशद्वारवतीह देहे सौधे महाराज इवाक्षवर्गैः ।
संसेव्यमानो विषयोपभोगानुपाधिसंस्थो बुभुजेऽयमात्मा ॥ ४४८ ॥
ज्ञानेंद्रियाणि निजदैवतचोदितानि
कर्मेंद्रियाण्यपि तथा मनआदिकानि ।
स्वस्वप्रयोजनविधौ नियतानि सन्ति
यत्नेन किंकरजना इव तं भजन्ते ॥ ४४९ ॥

यत्रोपभुंक्ते विषयान्स्थूलानेष महामतिः ।
अहं ममेति सैषास्यावस्था जाग्रदितीर्यते ॥ ४५० ॥
एतत्समष्टिव्यष्ट्योश्चोभयोरप्यभिमानिनोः ।
तद्विश्ववैश्वानरयोरभेदः पूर्ववन्मतः ॥ ४५१ ॥
स्थूलसूक्ष्मकारणाख्याः प्रपंचा ये निरूपिताः ।
ते सर्वेऽपि मिलित्वैकः प्रपंचोऽपि महान्भवेत् ॥ ४५२ ॥
महाप्रपंचावच्छिन्नं विश्वप्राज्ञादिलक्षणम् ।
विराडादीशपर्यंतं चैतन्यं चैकमेव तत् ॥ ४५३ ॥
यदनाद्यंतमव्यक्तं चैतन्यमजमक्षरम् ।
महाप्रपंचेन सहाविविक्तं सदयोऽग्निवत् ॥ ४५४ ॥
तत्सर्वं खल्विदं ब्रह्मेत्यस्य वाक्यस्य पंडितैः ।
वाच्यार्थ इति निर्णीतं विविक्तं लक्ष्य इत्यपि ॥ ४५५ ॥
स्थूलाद्यज्ञानपर्यंतं कार्यकारणलक्षणम् ।
दृश्यं सर्वमनात्मेति विजानीहि विचक्षण ॥ ४५६ ॥
अंतःकरणतद्वृत्तिद्रष्टृ नित्यमविक्रियम् ।
चैतन्यं यत्तदात्मेति बुद्ध्या बुध्यस्व सूक्ष्मया ॥ ४५७ ॥

एष प्रत्यक्स्वप्रकाशो निरंशोऽसंगः शुद्धः सर्वदैकस्वभावः ।
नित्याखंडानंदरूपो निरीहः साक्षी चेता केवलो निर्गुणश्च ॥४५८॥
नैव प्रत्यग्जायते वर्धते नो किंचिन्नापक्षीयते नैव नाशम् ।
आत्मा नित्यः शाश्वतोऽयं पुराणो नासौ हन्यो हन्यमाने शरीरे॥४५९॥

जन्मास्तित्वविवृद्धयः परिणतिश्चापक्षतिर्नाशनं
दृश्यस्यैव भवन्ति षड्विकृतयो नानाविधा व्याधयः ।
स्थूलत्वादि च नीलताद्यपि मितिर्वर्णाश्रमादिप्रथा
दृश्यन्ते वपुषो न चात्मन इमे तद्विक्रियासाक्षिणः ॥ ४६० ॥

अस्मिन्नात्मन्यनात्मत्वमनात्मन्यात्मतां पुनः ।

विपरीततयाध्यस्य संसरन्ति विमोहतः ॥ ४६१ ॥
भ्रान्त्या मनुष्योऽहमहं द्विजोऽहं
तज्ज्ञोऽहमज्ञोऽहमतीव पापी ।
भ्रष्टोऽस्मि शिष्टोऽस्मि सुखी च दुःखी-
त्येवं विमुह्यात्मनि कल्पयन्ति ॥ ४६२ ॥
अनात्मनो जन्मजरामृतिक्षुधा-
तृष्णासुखक्लेशभयादिधर्मान् ।
विपर्ययेण ह्यतथाविधेऽस्मि-
न्नारोपयन्त्यात्मनि बुद्धिदोषात् ॥ ४६३ ॥
भ्रांत्या यत्र यदध्यासस्तत्कृतेन गुणेन वा ।
दोषेणाप्यणुमात्रेण स न संबध्यते क्वचित् ॥ ४६४ ॥
किं मरुन्मृगतृष्णांबुपूरेणार्द्रत्वमृच्छति ।
दृष्टिसंस्थितपीतेन शंखः पीतायते किमु ॥ ४६५ ॥

शिष्यः—

प्रत्यगात्मन्यविषयेऽनात्माध्यासः कथं प्रभो ॥ ४६६ ॥
पुरो दृष्टे हि विषयेऽध्यस्यन्ति विषयान्तरम् ।
तद्दृष्टं शुक्तिरज्ज्वादौ सादृश्याद्यनुबंधतः ॥ ४६७ ॥
परत्र पूर्वदृष्टस्यावभासः स्मृतिलक्षणः ।
अध्यासः स कथं स्वामिन् भवेदात्मन्यगोचरे ॥ ४६८ ॥
नानुभूतः कदाप्यात्माननुभूतस्य वस्तुनः ।
सादृश्यं सिध्यति कथमनात्मनि विलक्षणे ॥ ४६९ ॥
अनात्मन्यात्मताध्यासः कथमेष समागतः ।
निवृत्तिः कथमेतस्य केनोपायेन सिध्यति ॥ ४७० ॥
उपाधियोग उभयोः सम एवेशजीवयोः ।
जीवस्यैव कथं बंधो नेश्वरस्यास्ति तत्कथम् ॥ ४७१ ॥

एतत्सर्वं दयादृष्ट्या करामलकवत्स्फुटम् ।
प्रतिपादय सर्वज्ञ श्रीगुरो करुणानिधे ॥ ४७२ ॥

श्रीगुरुः—

न सावयव एकस्य नात्मा विषय इष्यते ।
अस्यास्मत्प्रत्ययार्थत्वादपरोक्षाच्च सर्वशः ॥ ४७३ ॥
प्रसिद्धिरात्मनोऽस्त्येव न कस्यापि च दृश्यते ।
प्रत्ययो नाहमस्मीति न ह्यस्ति प्रत्यगात्मनि ॥ ४७४ ॥
न कस्यापि स्वसद्भावे प्रमाणमभिकांक्ष्यते ।
प्रमाणानां च प्रामाण्यं यन्मूलं किं तु बोधयेत् ॥ ४७५ ॥
मायाकार्यैस्तिरोभूतो नैष आत्मानुभूयते ।
मेघवृंदैर्यथा भानुस्तथायमहमादिभिः ॥ ४७६ ॥
पुरस्थ एव विषये वस्तुन्यध्यस्यतामिति ।
नियमो न कृतः सद्भिर्भ्रान्तिरेवात्र कारणम् ॥ ४७७ ॥
दृगाद्यविषये व्योम्नि नीलतादि यथाऽबुधाः ।
अध्यस्यन्ति तथैवास्मिन्नात्मन्यपि मतिभ्रमात् ॥ ४७८ ॥
अनात्मन्यात्मताध्यासे न सादृश्यमपेक्षते ।
पीतोऽयं शंख इत्यादौ सादृश्यं किमपेक्षितम् ॥ ४७९ ॥
निरुपाधिभ्रमेष्वस्मिन्नैवापेक्षा प्रदृश्यते ।
सोपाधिष्वेव तद्दृष्टं रज्जुसर्पभ्रमादिषु ॥ ४८० ॥
तथापि किंचिद्वक्ष्यामि सादृश्यं शृणु तत्परः ।
अत्यंतनिर्मलः सूक्ष्म आत्मायमतिभास्वरः ॥ ४८१ ॥
बुद्धिस्तथैव सत्त्वात्मा साभासा भास्वराऽमला ।
सांनिध्यादात्मवद्भाति सूर्यवत्स्फटिको यथा ॥ ४८२ ॥
आत्माभासं ततो बुद्धिर्बुद्ध्याभासं ततो मनः ।
अक्षाणि मनआभासान्यक्षाभासमिदं वपुः ॥ ४८३ ॥

अत एवात्मताबुद्धिर्देहाक्षादावनात्मनि ।
मूढानां प्रतिबिंबादौ बालानामिव दृश्यते ।
सादृश्यं विद्यते बुद्धावात्मनोऽध्यासकारणम् ॥ ४८४ ॥
अनात्मन्यहमित्येव योऽयमध्यास ईरितः ।
स्यादुत्तरोत्तराध्यासे पूर्वपूर्वस्तु कारणम् ॥ ४८५ ॥
सुप्तिमूर्च्छोत्थितेष्वेव दृष्टः संसारलक्षणः ।
अनादिरेषाविद्यातः संस्कारोऽपि च तादृशः ॥ ४८६ ॥
अध्यासबाधागमनस्य कारणं शृणु प्रवक्ष्यामि समाहितात्मा ।
यस्मादिदं प्राप्तमनर्थजातं जन्माप्ययव्याधिजरादिदुःखम् ॥४८७॥
आत्मोपाधेरविद्याया अस्ति शक्तिद्वयं महत् ।
विक्षेप आवृतिश्चेति याभ्यां संसार आत्मनः ॥ ४८८ ॥
आवृतिस्तमसः शक्तिस्तद्ध्यावरणकारणम् ।
मूलाविद्येति सा प्रोक्ता यया संमोहितं जगत् ॥ ४८९ ॥
विवेकवानप्यतियौक्तिकोऽपि श्रुतात्मतत्त्वोऽपि च पंडितोऽपि ।
शक्त्या यया संवृतबोधदृष्टिरात्मानमात्मस्थमिमं न वेद ॥ ४९० ॥
विक्षेपनाम्नी रजसस्तु शक्तिः प्रवृत्तिहेतुः पुरुषस्य नित्यम् ।
स्थूलादिलिंगान्तमशेषमेतद्यया सदात्मन्यसदेव सूयते ॥ ४९१ ॥
निद्रा यथा पुरुषमप्रमत्तं समावृणोतीयमपि प्रतीचम् ।
तथावृणोत्यावृतिशक्तिरंतर्विक्षेपशक्तिं परिजृंभयन्ती ॥ ४९२ ॥
शक्त्या महत्यावरणाभिधानया समावृते सत्यमलस्वरूपे ।
पुमाननात्मन्यहमेष एवेत्यात्मत्वबुद्धिं विदधाति मोहात् ॥ ४९३ ॥
यथा प्रसुप्तिप्रतिभासदेहे स्वात्मत्वधीरेष तथा ह्यनात्मनः ।
जन्माप्ययक्षुद्भयतृट्छ्रमादीनारोपयत्यात्मनि तस्य धर्मान् ॥४९४॥
विक्षेपशक्त्या परिचोद्यमानः करोति कर्माण्युभयात्मकानि ।
भुंजान एतत्फलमप्युपात्तं परिभ्रमत्येव भवांबुराशौ ॥ ४९५ ॥

अध्यासदोषात्समुपागतोऽयं संसारबंधः प्रबलप्रतीचः ।
यद्योगतः क्लिश्यति गर्भवासजन्माप्ययक्लेशभयैरजस्रम् ॥ ४९६ ॥
अध्यासो नाम खल्वेष वस्तुनो योऽन्यथाग्रहः ।
स्वाभाविकभ्रान्तिमूलं संसृतेरादिकारणम् ॥ ४९७ ॥
सर्वानर्थस्य तद्बीजं योऽन्यथाग्रह आत्मनः ।
ततः संसारसंपातः संतनक्लेशलक्षणः ॥ ४९८ ॥
अध्यासादेव संसारो नष्टेऽध्यासे न दृश्यते ।
तदेतदुभयं स्पष्टं पश्य त्वं बद्धमुक्तयोः ॥ ४९९ ॥
बद्धं प्रवृत्तितो विद्धि मुक्तं विद्धि निवृत्तितः ।
प्रवृत्तिरेव संसारो निवृत्तिर्मुक्तिरिष्यते ॥ ५०० ॥
आत्मनः सोऽयमध्यासो मिथ्याज्ञानपुरःसरः ।
असत्कल्पोऽपि संसारं तनुते रज्जुसर्पवत् ॥ ५०१ ॥
उपाधियोगसाम्येऽपि जीववत्परमात्मनः ।
उपाधिभेदान्नो बंधस्तत्कार्यमपि किंचन ॥ ५०२ ॥
अस्योपाधिः शुद्धसत्त्वप्रधाना माया यत्र त्वस्य नास्त्यल्पभावः ।
सत्त्वस्यैवोत्कृष्टता तेन बंधो नो विक्षेपस्तत्कृतो लेशमात्रः ॥ ५०३ ॥
सर्वज्ञोऽप्रतिबद्धबोधविभवस्तेनैव देवः स्वयं
मायां स्वामवलंब्य निश्चलतया स्वच्छंदवृत्तिः प्रभुः ।
सृष्टिस्थित्यदनप्रवेशयमनव्यापारमात्रेच्छया
कुर्वन्क्रीडति तद्रजस्तम उभे संस्तभ्य शक्त्या स्वया ॥ ५०४ ॥
तस्मादावृतिविक्षेपौ किंचित्कर्तुं न शक्नुतः ।
स्वयमेव स्वतंत्रोऽसौ तत्प्रवृत्तिनिरोधयोः ॥ ५०५ ॥
तमेव सा धीकर्मेति श्रुतिर्वक्ति महेशितुः ।
निग्रहानुग्रहे शक्तिरावृतिक्षेपयोर्यतः ॥ ५०६ ॥
रजसस्तमसश्चैव प्राबल्यं सत्त्वहानतः ।

जीवोपाधौ तथा जीवे तत्कार्यं बलवत्तरम् ॥ ५०७ ॥
तेन बंधोऽस्य जीवस्य संसारोऽपि च तत्कृतः ।
संप्राप्तः सर्वदा यत्र दुःखं भूयः स ईक्षते ॥ ५०८ ॥
एतस्य संसृतेर्हेतुरध्यासोऽर्थविपर्ययः ।
अध्यासमूलमज्ञानमाहुरावृतिलक्षणम् ॥ ५०९ ॥
अज्ञानस्य निवृत्तिस्तु ज्ञानेनैव न कर्मणा ।
अविरोधितया कर्म नैवाज्ञानस्य बाधकम् ॥ ५१० ॥
कर्मणा जायते जंतुः कर्मणैव प्रलीयते ।
कर्मणः कार्यमेवैषा जन्ममृत्युपरंपरा ॥ ५११ ॥
नैतस्मात्कर्मणः कार्यमन्यदस्ति विलक्षणम् ।
अज्ञानकार्यं तत्कर्म यतोऽज्ञानेन वर्धते ॥ ५१२ ॥
यद्येन वर्धते तेन नाशस्तस्य न सिध्यति ।
येन यस्य सहावस्था निरोधाय न कल्पते ॥ ५१३ ॥
नाशकत्वं तदुभयोः को नु कल्पयितुं क्षमः ।
सर्वं कर्माविरोध्येव सदाऽज्ञानस्य सर्वदा ॥ ५१४ ॥
ततोऽज्ञानस्य विच्छित्तिः कर्मणा नैव सिध्यति ।
यस्य प्रध्वस्तजनको यत्संयोगोऽस्ति तत्क्षणे ॥ ५१५ ॥
तयोरेव विरोधित्वं युक्तं भिन्नस्वभावयोः ।
तमःप्रकाशयोर्यद्वत्परस्परविरोधिता ॥ ५१६ ॥
अज्ञानज्ञानयोस्तद्वदुभयोरेव दृश्यते ।
न ज्ञानेन विना नाशस्तस्य केनापि सिध्यति ॥ ५१७ ॥
तस्मादज्ञानविच्छित्त्यै ज्ञानं संपादयेत्सुधीः ।
आत्मानात्मविवेकेन ज्ञानं सिध्यति नान्यथा ॥ ५१८ ॥
युक्त्याऽऽत्मानात्मनोस्तस्मात्करणीयं विवेचनम् ।
अनात्मन्यात्मताबुद्धिग्रंथिर्येन विदीर्यते ॥ ५१९ ॥

आत्मानात्मविवेकार्थं विवादोऽयं निरूप्यते ।
येनात्मानात्मनोस्तत्त्वं विविक्तं प्रस्फुटायते ॥ ५२० ॥
मूढा अश्रुतवेदान्ताः स्वयं पंडितमानिनः ।
ईशप्रसादरहिताः सद्गुरोश्च बहिर्मुखाः ॥ ५२१ ॥
विवदन्ति प्रकारं तं शृणु वक्ष्यामि सादरम् ।
अत्यंतपामरः कश्चित्पुत्र आत्मेति मन्यते ॥ ५२२ ॥
आत्मनीव स्वपुत्रेऽपि प्रबलप्रीतिदर्शनात् ।
पुत्रे तु पुष्टे पुष्टोऽहं नष्टे नष्टोऽहमित्यतः ॥ ५२३ ॥
अनुभूतिबलाच्चापि युक्तितोऽपि श्रुतेरपि ।
आत्मा वै पुत्रनामासीत्येवं च वदति श्रुतिः ॥ ५२४ ॥
दीपाद्दीपो यथा तद्वत्पितुः पुत्रः प्रजायते ।
पितुर्गुणानां तनये बीजांकुरवदीक्षणात् ॥ ५२५ ॥
अतोऽयं पुत्र आत्मेति मन्यते भ्रांतिमत्तमः ।
तन्मतं दूषयत्यन्यः पुत्र आत्मा कथं त्विति ॥ ५२६ ॥
प्रीतिमात्रात्कथं पुत्र आत्मा भवितुमर्हति ।
अन्यत्रापीक्ष्यते प्रीतिः क्षेत्रपात्रधनादिषु ॥ ५२७ ॥
पुत्राद्विशिष्टा देहेऽस्मिन्प्राणिनां प्रीतिरिष्यते ।
प्रदीप्ते भवने पुत्रं त्यक्त्वा जंतुः पलायते ॥ ५२८ ॥
तं विक्रीणाति देहार्थं प्रतिकूलं निहन्ति च ।
तस्मादात्मा तु तनयो न भवेच्च कदाचन ॥ ५२९ ॥
गुणरूपादिसादृश्यं दीपवन्न सुते पितुः ।
अव्यंगाज्जायते व्यंगः सगुणादपि दुर्गुणः ॥ ५३० ॥
आभासमात्रास्ताः सर्वा युक्तयोऽप्युक्तयोऽपि च ।
पुत्रस्य पितृवद्गेहे सर्वकार्येषु वस्तुषु ॥ ५३१ ॥
स्वामित्वद्योतनायास्मिन्नात्मत्वमुपचर्यते ।

श्रुत्या तु मुख्यया वृत्त्या पुत्र आत्मेति नोच्यते ॥ ५३२ ॥
औपचारिकमात्मत्वं पुत्रे तस्मान्न मुख्यतः ।
अहंपदप्रत्ययार्थो देह एव न चेतरः ॥ ५३३ ॥
प्रत्यक्षः सर्वजंतूनां देहोऽहमिति निश्चयः ।
एष पुरुषोऽन्नरसमय इत्यपि च श्रुतिः ॥ ५३४ ॥
पुरुषत्वं वदत्यस्य स्वात्मा हि पुरुषस्ततः ।
आत्मायं देह एवेति चार्वाकेण विनिश्चितम् ॥ ५३५ ॥
तन्मतं दूषयत्यन्योऽसहमानः पृथग्जनः ।
देह आत्मा कथं नु स्यात्परतंत्रो ह्यचेतनः ॥ ५३६ ॥
इंद्रियैश्चाल्यमानोऽयं चेष्टते न स्वतः क्वचित् ।
आश्रयश्चक्षुरादीनां गृहवद्गृहमेधिनाम् ॥ ५३७ ॥
बाल्यादिनानावस्थावाञ्शुक्लशोणितसंभवः ।
अतः कदापि देहस्य नात्मत्वमुपपद्यते ॥ ५३८ ॥
बधिरोऽहं च काणोऽहं मूक इत्यनुभूतितः ।
इंद्रियाणि भवन्त्यात्मा येषामस्त्यर्थवेदनम् ॥ ५३९ ॥
इंद्रियाणां चेतनत्वं देहे प्राणाः प्रजापतिम् ।
एतमेत्येत्यूचुरिति श्रुत्यैव प्रतिपाद्यते ॥ ५४० ॥
यतस्तस्मादिंद्रियाणां युक्तमात्मत्वमित्यमुम् ।
निश्चयं दूषयत्यन्योऽसहमानः पृथग्जनः ॥ ५४१ ॥
इंद्रियाणि कथं त्वात्मा करणानि कुठारवत् ।
करणस्य कुठारादेश्चेतनत्वं न हीक्ष्यते ॥ ५४२ ॥
श्रुत्याधिदेवतामेव इंद्रियेषूपचर्यते ।
न तु साक्षादिंद्रियाणां चेतनत्वमुदीर्यते ॥ ५४३ ॥
अचेतनस्य दीपादेरर्थाभासकता यथा ।
तथैव चक्षुरादीनां जडानामपि सिध्यति ॥ ५४४ ॥

इंद्रियाणां चेष्टयिता प्राणोऽयं पंचवृत्तिकः ।
सर्वावस्थास्ववस्थावान्सोऽयमात्मत्वमर्हति ।
अहं क्षुधावांस्तृष्णावानित्याद्यनुभवादपि ॥ ५४५ ॥
श्रुत्यान्योऽन्तर आत्मा प्राणमय इतीर्यते यस्मात् ।
तस्मात्प्राणस्यात्मत्वं युक्तं नो करणसंज्ञानां क्वापि ॥ ५४६ ॥
इति निश्चयमेतस्य दूषयत्यपरो जडः ।
भवत्यात्मा कथं प्राणो वायुरेवैष आंतरः ॥ ५४७ ॥
बहिर्यात्यन्तरायाति भस्त्रिकावायुवन्मुहुः ।
न हितं वाहितं वा स्वमन्यद्वा वेद किंचन ॥ ५४८ ॥
जडस्वभावश्चपलः कर्मयुक्तश्च सर्वदा ।
प्राणस्य भानं मनसि स्थिते सुप्ते न दृश्यते ॥ ५४९ ॥
मनस्तु सर्वं जानाति सर्ववेदनकारणम् ।
यत्तस्मान्मन एवात्मा प्राणस्तु न कदाचन ॥ ५५० ॥
संकल्पवानहं चिंतावानहं च विकल्पवान् ।
इत्याद्यनुभवादन्योऽन्तर आत्मा मनोमयः ॥ ५५१ ॥
इत्यादिश्रुतिसद्भावाद्युक्ता मनस आत्मता ।
इति निश्चयमेतस्य दूषयत्यपरो जडः ॥ ५५२ ॥
कथं मनस आत्मत्वं करणस्य दृगादिवत् ।
कर्तृप्रयोज्यं करणं न स्वयं तु प्रवर्तते ॥ ५५३ ॥
करणप्रयोक्ता यः कर्ता तस्यैवात्मत्वमर्हति ।
आत्मा स्वतंत्रः पुरुषो न प्रयोज्यः कदाचन ॥ ५५४ ॥
अहं कर्तास्म्यहं भोक्ता सुखीत्यनुभवादपि ।
बुद्धिरात्मा भवत्येव बुद्धिधर्मो ह्यहंकृतिः ॥ ५५५ ॥
अन्योऽन्तर आत्मा विज्ञानमय इति वदति निगमः ।
मनसोऽपि च भिन्नं विज्ञानमयं कर्तृरूपमात्मानम् ॥ ५५६ ॥

विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च ।
इत्यस्य कर्तृता श्रुत्या मुखतः प्रतिपाद्यते ।
तस्माद्युक्तात्मता बुद्धेरिति बौद्धेन निश्चितम् ॥ ५५७ ॥
प्राभाकरस्तार्किकश्च तावुभावप्यमर्षया ।
तन्निश्चयं दूषयतो बुद्धिरात्मा कथं न्विति ॥ ५५८ ॥
बुद्धेरज्ञानकार्यत्वाद्विनाशित्वात्प्रतिक्षणम् ।
बुद्ध्यादीनां च सर्वेषामज्ञाने लयदर्शनात् ॥ ५५९ ॥
अज्ञोऽहमित्यनुभवादास्त्रीबालादिगोचरात् ।
भवत्यज्ञानमेवात्मा न तु बुद्धिः कदाचन ॥ ५६० ॥
विज्ञानमयादन्यं त्वानंदमयं परं तथात्मानम् ।
अन्योऽतर आत्माऽऽनंदमय इति वदति वेदोऽपि ॥ ५६१ ॥
दुःखप्रत्ययशून्यत्वादानंदमयता मता ।
अज्ञाने सकलं सुप्तौ बुद्ध्यादि प्रविलीयते ॥ ५६२ ॥
दुःखिनोऽपि सुषुप्तौ त्वानंदमयता ततः ।
सुप्तौ किंचिन्न जानामीत्यनुभूतिश्च दृश्यते ॥ ५६३ ॥
यत एवमतो युक्ता ह्यज्ञानस्यात्मता ध्रुवम् ।
इति तन्निश्चयं भाट्टा दूषयन्ति स्वयुक्तिभिः ॥ ५६४ ॥
कथमज्ञानमेवात्मा ज्ञानं चाप्युपलभ्यते ।
ज्ञानाभावे कथं विद्युरज्ञोऽहमिति चाज्ञताम् ।
अस्वाप्सं सुखमेवाहं न जानाम्यत्र किंचन ॥ ५६५ ॥
इत्यज्ञानमपि ज्ञानं प्रबुद्धेषु प्रदृश्यते ।
प्रज्ञानघन एवानंदमय इत्यपि श्रुतिः ॥ ५६६ ॥
प्रब्रवीत्युभयात्मत्वमात्मनः स्वयमेव सा ।
आत्मातश्चिज्जडतनुः खद्योत इव संमतः ॥ ५६७ ॥
न केवलाज्ञानमयो घटकुड्यादिवज्जडः ।

इति दूषयत्यपरो जडः ॥ ५६८ ॥
ज्ञानाज्ञानमयस्त्वात्मा कथं भवितुमर्हति ।
परस्परविरुद्धत्वात्तेजस्तिमिरवत्तयोः ॥ ५६९ ॥
सामानाधिकरण्यं वा संयोगो वा समाश्रयः ।
तमःप्रकाशवज्ज्ञानाज्ञानयोर्न हि सिध्यति ॥ ५७० ॥
अज्ञानमपि विज्ञानं बुद्धिर्वापि च तद्गुणाः ।
सुषुप्तौ नोपलभ्यन्ते यत्किंचिदपि वापरम् ॥ ५७१ ॥
मात्रादिलक्षणं किं नु शून्यमेवोपलभ्यते ।
सुषुप्तौ नाहमप्यासमित्यनु ॥ ५७२ ॥
सुप्तोत्थितजनैः सर्वैः शून्यमेवानुस्मर्यते ।
यत्ततः शून्यमेवात्मा न ज्ञानाज्ञानलक्षणः ॥ ५७३ ॥
स्फुटम् ।
निरुच्यते मता ॥ ५७४ ॥
असन्नेव घटः पूर्वं प्रदृश्यते ।
न हि कुंभः पुरवांतः स्थित्वोदेति बहिर्मुखः ॥ ५७५ ॥
सर्वं सदिदं समजायत ।
ततः सर्वात्मना समर्हति ॥ ५७६ ॥
इत्येवं परस्परविरोधिभिः ।
॥ ५७७ ॥
पंडितैः ।
श्रुतिभिश्चाप्यनुभवैर्बाधकैः प्रतिवादिनाम् ॥ ५७८ ॥
पुत्रादेः शून्यान्तस्य विशेषतः ।
श्रुतियुक्त्यनुभूतिभिः ॥ ५७९ ॥
न हि प्रमाणांतरबाधितस्य महद्भिः ।
सुजातम् ॥५८० ॥

शिष्यः—

सुषुप्तिकाले सकले विलीने शून्यं विना नान्यदिहोपलभ्यते ।
शून्यं त्वनात्मा न ततः परः कोऽप्यात्माभिधानस्त्वनुभूयतेऽर्थः॥५८१॥
यद्यस्ति चात्मा किमु नोपलभ्यते सुप्तौ यथा तिष्ठति किं प्रमाणम् ।
किंलक्षणोऽसौ स कथं न बाध्यते प्रबाध्यमानेष्वहमादिषु स्वयम्॥५८२॥
एतत्संशयजातं मे हृदयग्रंथिलक्षणम् ।
छिंधि युक्तिमहाखड्गधारया कृपया गुरो ॥ ५८३ ॥

श्रीगुरुः—

अतिसूक्ष्मतरः प्रश्नस्तवायं सदृशो मतः ।
सूक्ष्मार्थदर्शनं सूक्ष्मबुद्धिष्वेव प्रदृश्यते ॥ ५८४ ॥
शृणु वक्ष्यामि सकलं यद्यत्पृष्टं त्वयाधुना ।
रहस्यं परमं सूक्ष्मं ज्ञातव्यं च मुमुक्षुभिः ॥ ५८५ ॥
बुद्ध्यादि सकलं सुप्तावनुलीनं स्वकारणे ।
अव्यक्ते वटवद्बीजे तिष्ठत्यविकृतात्मना ॥ ५८६ ॥
तिष्ठत्येव स्वरूपेण न तु शून्यायते जगत् ।
क्वचिदंकुररूपेण क्वचिद्बीजात्मना वटः ।
कार्यकारणरूपेण यथा तिष्ठत्यदस्तथा ॥ ५८७ ॥
अव्याकृतात्मनावस्थां जगतो वदति श्रुतिः ।
सुषुप्त्यादिषु तद्धेदं तर्ह्यव्याकृतमित्यसौ ॥ ५८८ ॥
इममर्थमविज्ञाय निर्णीतं श्रुतियुक्तिभिः ।
जगतो दर्शनं शून्यमिति प्राहुरतद्विदः ॥ ५८९ ॥
नासतः सत उत्पत्तिः श्रूयते न च दृश्यते ।
उदेति नरशृंगात्किं खपुष्पात्किं भविष्यति ॥ ५९० ॥
प्रभवति न हि कुंभोऽविद्यमानो मृदश्चे-
त्प्रभवतु सिकताया वाथवा वारिणो वा ।

न हि भवति च ताभ्यां सर्वथा क्वापि तस्मा-
द्यत उदयति योऽर्थोऽस्त्यत्र तस्य स्वभावः ॥ ५९१ ॥
अन्यथा विपरीतं स्यात्कार्यकारणलक्षणम् ।
नियतं सर्वशास्त्रेषु सर्वलोकेषु सर्वतः ॥ ५९२ ॥
कथमसतः सज्जायेतेति श्रुत्या निषिध्यते तस्मात् ।
असतः सज्जननं नो घटते मिथ्यैव शून्यशब्दार्थः ॥५९३॥
अव्यक्तशब्दिते प्राज्ञे सत्यात्मन्यत्र जाग्रति ।
कथं सिद्ध्यति शून्यत्वं तस्य भ्रान्तशिरोमणे ॥ ५९४ ॥
सुषुप्तौ शून्यमेवेति केन पुंसा तवेरितम् ।
हेतुनानुमितं केन कथं ज्ञानं त्वयोच्यताम् ॥ ५९५ ॥
इति पृष्टो मूढतमो वदिष्यति किमुत्तरम् ।
नैवानुरूपकं लिंगं वक्ता वा नास्ति कश्चन ।
सुषुप्तिस्थितशून्यस्य बोद्धा को न्वात्मनः परः ॥ ५९६ ॥
स्वेनानुभूतं स्वयमेव वक्ति स्वसुप्तिकाले स्थितशून्यभावम् ।
तत्र स्वसत्तामनवेक्ष्य मूढः स्वस्यापि शून्यत्वमयं ब्रवीति ॥ ५९७ ॥
अवेद्यमानः स्वयमन्यलोकैः सौषुप्तिकं धर्ममवैति साक्षात् ।
बुद्ध्याद्यभावस्य च योऽत्र बोद्धा स एष आत्मा खलु निर्विकारः॥५९८॥
यस्येदं सकलं विभाति महसा तस्य स्वयंज्योतिषः
सूर्यस्येव किमस्ति भासकमिह प्रज्ञादि सर्वं जडम् ।
न ह्यर्कस्य विभासकं क्षितितले दृष्टं तथैवात्मनो
नान्यः कोऽप्यनुभासकोऽनुभविता नातः परः कश्चन ॥५९९॥
येनानुभूयते सर्वं जाग्रत्स्वप्नसुषुप्तिषु ।
विज्ञातारमिमं को नु कथं वेदितुमर्हति ॥ ६०० ॥
सर्वस्य दाहको वह्निर्वह्नेर्नान्योऽस्ति दाहकः ।
यथा तथात्मनो ज्ञातुर्ज्ञाता कोऽपि न दृश्यते ॥ ६०१ ॥

उपलभ्येत केनायं ह्युपलब्धा स्वयं ततः ।
उपलब्ध्यंतराभावान्नायमात्मोपलभ्यते ॥ ६०२ ॥
बुद्ध्यादिवेद्यविलयादयमेक एव
सुप्तौ न पश्यति शृणोति न वेत्ति किंचित् ।
सौषुप्तिकस्य तमसः स्वयमेव साक्षी
भूत्वात्र तिष्ठति सुखेन च निर्विकल्पः ॥ ६०३ ॥
सुषुप्तावात्मसद्भावे प्रमाणं पंडितोत्तमाः ।
विदुः स्वप्रत्यभिज्ञानमाबालवृद्धसंमतम् ॥ ६०४ ॥
प्रत्यभिज्ञायमानत्वाल्लिंगमात्रानुमापकम् ।
स्मर्यमाणस्य सद्भावः सुखमस्वाप्समित्ययम् ॥ ६०५ ॥
पुरानुभूतो नो चेत्तु स्मृतेरनुदयो भवेत् ।
इत्यादितर्कयुक्तिश्च सद्भावे मानमात्मनः ॥ ६०६ ॥
यत्रात्मनोऽकामयितृत्वबुद्धिः स्वप्नानपेक्षापि च तत्सुषुप्तम् ।
इत्यात्मसद्भाव उदीर्यतेऽत्र श्रुत्यापि तस्माच्छ्रुतिरत्र मानम् ॥ ६०७ ॥
अकामयितृना स्वप्नादर्शनं घटते कथम् ।
अविद्यमानस्य तत आत्मास्तित्वं प्रतीयते ॥ ६०८ ॥
एतैः प्रमाणैरस्तीति ज्ञातः साक्षितया बुधैः ।
आत्मायं केवलः शुद्धः सच्चिदानंदलक्षणः ॥ ६०९ ॥
सत्त्वचित्त्वानंदतादि लक्षणं प्रत्यगात्मनः ।
कालत्रयेऽप्यबाध्यत्वं सत्यं नित्यस्वरूपतः ॥ ६१० ॥
शुद्धचैतन्यरूपत्वं चित्त्वं ज्ञानस्वरूपतः ।
अखंडसुखरूपत्वादानंदत्वमितीर्यते ॥ ६११ ॥
अनुस्यूतात्मनः सत्ता जाग्रत्स्वप्नसुषुप्तिषु ।
अहमस्मीत्यतो नित्यो भवत्यात्मायमव्ययः ॥ ६१२ ॥
सर्वदाप्यासमित्येवाभिन्नप्रत्यय ईक्ष्यते ।

कदापि नासमित्यस्मादात्मनो नित्यता मता ॥ ६१३ ॥

आयातासु गतासु शैशवमुखावस्थासु जाग्रन्मुखा-
स्वन्यास्वप्यखिलासु वृत्तिषु धियो दुष्टास्वदुष्टास्वपि ।
गंगाभंगपरंपरासु जलवत्सत्तानुवृत्तात्मन-
स्तिष्ठत्येव सदा स्थिराहमहमित्येकात्मता साक्षिणः ॥ ६१४ ॥

प्रतिपदमहमादयो विभिन्नाः
क्षणपरिणामितया विकारिणस्ते ।
न परिणतिरमुष्य निष्कलत्वा-
दयमविकार्यत एव नित्य आत्मा ॥ ६१५ ॥

यः स्वप्नमद्राक्षमहं सुखं यो-
ऽस्वाप्सं स एवास्म्यथ जागरूकः ।
इत्येवमच्छिन्नतयानुभूयते
सत्तात्मनो नास्ति हि संशयोऽत्र ॥ ६१६ ॥

श्रुत्युक्ताः षोडशकलाश्चिदाभासस्य नात्मनः ।
निष्कलत्वान्नास्य लयस्तस्मान्नित्यत्वमात्मनः ॥ ६१७ ॥

जडप्रकाशकः सूर्यः प्रकाशात्मैव नो जडः ।
बुद्ध्यादिभासकस्तस्माच्चित्स्वरूपस्तथा मतः ॥ ६१८ ॥

कुड्यादेस्तु जडस्य नैव घटते भानं स्वतः सर्वदा
सूर्यादिप्रभया विना क्वचिदपि प्रत्यक्षमेतत्तथा ।
बुद्ध्यादेरपि न स्वतोऽस्त्यणुरपि स्फूर्तिर्विनैवात्मना
सोऽयं केवलचिन्मयश्रुतिमतो भानुर्यथा रुङ्मयः ॥ ६१९ ॥

स्वभासने वान्यपदार्थभासने नार्कः प्रकाशांतरमीषदिच्छति ।
स्वबोधने वाप्यहमादिबोधने तथैव चिद्धातुरयं परात्मा ॥ ६२० ॥

अन्यप्रकाशं न किमप्यपेक्ष्य यतोऽयमाभाति निजात्मनैव ।
ततः स्वयंज्योतिरयं चिदात्मा न ह्यात्मभाने परदीप्त्यपेक्षा ॥ ६२१ ॥

यं न प्रकाशयति किंचिदिनोऽपि चंद्रः
नो विद्युतः किमुत वह्निरयं मिताभः ।
यं भान्तमेतमनुभाति जगत्समस्तं
सोऽयं स्वयं स्फुरति सर्वदशासु चात्मा ॥ ६२२ ॥

आत्मनः सुखरूपत्वादानंदत्वं स्वलक्षणम् ।
परप्रेमास्पदत्वेन सुखरूपत्वमात्मनः ॥ ६२३ ॥

सुखहेतुषु सर्वेषां प्रीतिः सावधिरीक्ष्यते ।
कदापि नावधिः प्रीतेः स्वात्मनि प्राणिनां क्वचित् ॥ ६२४ ॥

क्षीणेंद्रियस्य जीर्णस्य संप्राप्तोत्क्रमणस्य वा ।
अस्ति जीवितुमेवाशा स्वात्मा प्रियतमो यतः ॥ ६२५ ॥

आत्मातः परमप्रेमास्पदः सर्वशरीरिणाम् ।
यस्य शेषतया सर्वमुपादेयत्वमृच्छति ॥ ६२६ ॥

एष एव प्रियतमः पुत्रादपि धनादपि ।
अन्यस्मादपि सर्वस्मादात्मायं परमान्तरः ॥ ६२७ ॥

प्रियत्वेन मतं यत्तु तत्सदा नाप्रियं नृणाम् ।
विपत्तावपि संपत्तौ यथात्मा न तथापरः ॥ ६२८ ॥

आत्मा खलु प्रियतमोऽसुभृतां यदर्था
भार्यात्मजाप्तगृहवित्तमुखाः पदार्थाः ।
वाणिज्यकर्षणगवावनराजसेवा-
भैषज्यकप्रभृतयो विविधाः क्रियाश्च ॥ ६२९ ॥

प्रवृत्तिश्च निवृत्तिश्च यच्च यावच्च चेष्टितम् ।
आत्मार्थमेव नान्यार्थं नातः प्रियतमः परः ॥ ६३० ॥

तस्मादात्मा केवलानंदरूपो यः सर्वस्माद्वस्तुनः प्रेष्ठ उक्तः ।
यो वा अस्मान्मन्यतेऽन्यं प्रियं यं सोऽयं तस्माच्छोकमेवानुभुंक्ते ॥ ६३१ ॥

शिष्यः—

अपरः क्रियते प्रश्नो मयायं क्षम्यतां प्रभो ।
अज्ञवागपराधाय कल्पते न महात्मनाम् ॥ ६३२ ॥
आत्मान्यः सुखमन्यच्च नात्मनः सुखरूपता ।
आत्मनः सुखमाशास्यं यतते सकलो जनः ॥ ६३३ ॥
आत्मनः सुखरूपत्वे प्रयत्नः किमु देहिनाम् ।
एष मे संशयः स्वामिन् कृपयैव निरस्यताम् ॥ ६३४ ॥

श्रीगुरुः—

आनंदरूपमात्मानमज्ञात्वैव पृथग्जनः ।
बहिःसुखाय यतते न तु कश्चिद्विदन्बुधः ॥ ६३५ ॥
अज्ञात्वैव हि निक्षेपं भिक्षामटति दुर्मतिः ।
स्ववेश्मनि निधिं ज्ञात्वा को नु भिक्षामटेत्सुधीः ॥ ६३६ ॥

स्थूलं च सूक्ष्मं च वपुः स्वभावतो
दुःखात्मकं स्वात्मतया गृहीत्वा ।
विस्मृत्य च स्वं सुखरूपमात्मनः
दुःखप्रदेभ्यः सुखमज्ञ इच्छति ॥ ६३७ ॥

न हि दुःखप्रदं वस्तु सुखं दातुं समर्हति ।
किं विषं पिबतो जंतोरमृतत्वं प्रयच्छति ॥ ६३८ ॥
आत्मान्यः सुखमन्यच्चेत्येवं निश्चित्य पामरः ।
बहिःसुखाय यतते सत्यमेव न संशयः ॥ ६३९ ॥
इष्टस्य वस्तुनो ध्यानदर्शनाद्युपभुक्तिषु ।
प्रतीयते य आनंदः सर्वेषामिह देहिनाम् ॥ ६४० ॥
स वस्तुधर्मो नो यस्मान्मनस्येवोपलभ्यते ।
वस्तुधर्मस्य मनसि कथं स्यादुपलंभनम् ॥ ६४१ ॥
अन्यत्र त्वन्यधर्माणामुपलंभो न दृश्यते ।

तस्मान्न वस्तुधर्मोऽयमानंदस्तु कदाचन ॥ ६४२ ॥
नाप्येष धर्मो मनसोऽसत्यर्थे तददर्शनात् ।
असति व्यंजके व्यंग्यं नोदेतीति न मन्यताम् ॥ ६४३ ॥
सत्यर्थेऽपि च नोदेति ह्यानंदस्तूक्तलक्षणः ।
सत्यपि व्यंजके व्यंग्यानुदयो नैव संमतः ॥ ६४४ ॥
दुरदृष्टादिकं नात्र प्रतिबधः प्रकल्प्यताम् ।
प्रियस्य वस्तुनो लाभे दुरदृष्टं न सिध्यति ॥ ६४५ ॥
तस्मान्न मानसो धर्मो निर्गुणत्वान्न चात्मनः ।
किं तु पुण्यस्य सांनिध्यादिष्टस्यापि च वस्तुनः ॥ ६४६ ॥
सत्त्वप्रधाने चित्तेऽस्मिंस्त्वात्मैव प्रतिबिंबति ।
आनंदलक्षणः स्वच्छे पयसीव सुधाकरः ॥ ६४७ ॥
सोऽयमाभास आनंदश्चित्ते यः प्रतिबिंबितः ।
पुण्योत्कर्षापकर्षाभ्यां भवत्युच्चावचः स्वयम् ॥ ६४८ ॥
सार्वभौमादिब्रह्मान्तं श्रुत्या यः प्रतिपादितः ।
स क्षयिष्णुः सातिशयः प्रक्षीणे कारणे लयम् ॥ ६४९ ॥
यात्येष विषयानंदो यस्तु पुण्यैकसाधनः ।
ये तु वैषयिकानंदं भुंजते पुण्यकारिणः ॥ ६५० ॥
दुःखं च भोगकालेऽपि तेषामंते महत्तरम् ।
सुखं विषयसंपृक्तं विषसंपृक्तभक्तवत् ॥ ६५१ ॥
भोगकालेऽपि भोगान्ते दुःखमेव प्रयच्छति ।
सुखमुच्चावचत्वेन क्षयिष्णुत्वभयेन च ॥ ६५२ ॥
भोगकाले भवेन्नृणां ब्रह्मादिपदभाजिनाम् ।
राजस्थानप्रविष्टानां तारतम्यं मतं यथा ॥ ६५३ ॥
तथैव दुःखं जंतूनां ब्रह्मादिपदभाजिनाम् ।
न कांक्षणीयं विदुषा तस्माद्वैषयिकं सुखम् ॥ ६५४ ॥

यो बिंबभूत आनंदः स आत्मानंदलक्षणः।
शाश्वतो निर्द्वयः पूर्णो नित्य एकोऽपि निर्भयः॥ ६५५॥
लक्ष्यते प्रतिबिंबेनाभासानंदेन बिंबवत्।
प्रतिबिंबो बिंबमूलो विना बिंबं न सिध्यति॥ ६५६॥
यत्ततो बिंब आनंदः प्रतिबिंबेन लक्ष्यते।
युक्त्यैव पंडितजनैर्न कदाप्यनुभूयते॥ ६५७॥
अविद्याकार्यकरणसंघातेषु पुरोदितः।
आत्मा जाग्रत्यपि स्वप्ने न भवत्येष गोचरः॥ ६५८॥
स्थूलस्यापि च सूक्ष्मस्य दुःखरूपस्य वर्ष्मणः।
लये सुषुप्तौ स्फुरति ॥ ६५९॥
न ह्यत्र विषयः कश्चिन्नापि बुद्ध्यादि किंचन।
आत्मैव निर्द्वयः॥ ६६०॥
प्रत्यभिज्ञायते सर्वैरेष सुप्तोत्थितैर्जनैः।
सुखमात्रतया नात्र संशयं कर्तुमर्हसि॥ ६६१॥
त्वयापि प्रत्यभिज्ञातं ।
सुषुप्तादुत्थितवता सुखमस्वाप्समित्यनु॥ ६६२॥
दुःखाभावः सुखमिति यदुक्तं पूर्ववादिना।
अनाघ्रातोपनिषदा तदसारं मृषा वचः॥ ६६३॥
लोष्टादौ विद्यते नानुभूयते।
सुखलेशोऽपि सर्वेषां प्रत्यक्षं तदिदं खलु॥ ६६४॥
सदयं ह्येष एवेति प्रस्तुत्य वदति श्रुतिः।
सद्घनोऽयं इत्यपि॥ ६६५॥
स्वरूपं प्रत्यगात्मनः।
रब्रह्मविद्भिः सदुत्तमैः॥ ६६६॥
।

केवलानंदमात्रत्वेनैवमत्र न संशयः ॥ ६६७ ॥
स्वस्वोपाध्यनुरूपेण ब्रह्माद्याः सर्वजंतवः ।
उपजीवन्त्यमुष्यैव मात्रामानंदलक्षणाम् ॥ ६६८ ॥
आस्वाद्यते यो भक्ष्येषु सुखकृन्मधुरो रसः ।
स गुडस्यैव नो तेषां माधुर्यं विद्यते क्वचित् ॥ ६६९ ॥
तद्वद्विषयसांनिध्यादानंदो यः प्रतीयते ।
बिंबानंदांशविस्फूर्तिरेवासौ न जडात्मनाम् ॥ ६७० ॥
यस्य कस्यापि योगेन यत्र कुत्रापि दृश्यते ।
आनंदः स परस्यैव ब्रह्मणः स्फूर्तिलक्षणः ॥ ६७१ ॥
यथा कुवलयोल्लासश्चंद्रस्यैव प्रसादतः ।
तथानंदोदयोऽप्येषां स्फुरणादेव वस्तुनः ॥ ६७२ ॥
सत्त्वं चित्त्वं तथानंदस्वरूपं परमात्मनः ।
निर्गुणस्य गुणायोगाद्गुणास्तु न भवन्ति ते ॥ ६७३ ॥
विशेषणं तु व्यावृत्त्यै भवेद्द्रव्यांतरे सति ।
परमात्माद्वितीयोऽयं प्रपंचस्य मृषात्वतः ॥ ६७४ ॥
वस्त्वंतरस्याभावेन न व्यावृत्त्यः कदाचन ।
केवलो निर्गुणश्चेति निर्गुणत्वं निरुच्यते ॥ ६७५ ॥
श्रुत्यैव न ततस्तेषां गुणत्वमुपपद्यते ।
उष्णत्वं च प्रकाशश्च यथा वह्नेस्तथात्मनः ॥ ६७६ ॥
सत्त्वचित्त्वानंदतादि स्वरूपमिति निश्चितम् ।
अत एव सजातीयविजातीयादिलक्षणः ॥ ६७७ ॥
भेदो न विद्यते वस्तुन्यद्वितीये परात्मनि ।
प्रपंचस्यापवादेन विजातीयकृता भिदा ॥ ६७८ ॥
नेष्यते तत्प्रकारं ते वक्ष्यामि शृणु सादरम् ।
अहेर्गुणविवर्तस्य गुणमात्रस्य वस्तुतः ॥ ६७९ ॥

विवर्तस्यास्य जगतः सन्मात्रत्वेन दर्शनम्।
अपवाद इति प्राहुरद्वैतब्रह्मदर्शिनः॥ ६८०॥
व्युत्क्रमेण तदुत्पत्तेर्द्रष्टव्यं सूक्ष्मबुद्धिभिः।
प्रतीतस्यास्य जगतः सन्मात्रत्वं सुयुक्तिभिः॥ ६८१॥
चतुर्विधं स्थूलशरीरजातं तद्भोज्यमन्नादि तदाश्रयादि।
ब्रह्मांडमेतत्सकलं स्थविष्ठमीक्षेत पंचीकृतभूतमात्रम्॥ ६८२॥
यत्कार्यरूपेण यदीक्ष्यते तत्तन्मात्रमेवात्र विचार्यमाणे।
मृत्कार्यभूतं कलशादि सम्यग्विचारितं सन्न मृदो विभिद्यते॥६८३॥
अंतर्बहिश्चापि मृदेव दृश्यते मृदो न भिन्नं कलशादि किंचन।
ग्रीवादिमद्यत्कलशं तदित्थं न वाच्यमेतच्च मृदेव नान्यत्॥ ६८४॥
स्वरूपतस्तत्कलशादिनाम्ना मृदेव मूढैरभिधीयते ततः।
नाम्नो हि भेदो न तु वस्तुभेदः प्रदृश्यते तत्र विचार्यमाणे॥६८५॥
तस्माद्धि कार्यं न कदापि भिन्नं स्वकारणादस्ति यतस्ततोऽग।
यद्भौतिकं सर्वमिदं तथैव तद्भूतमात्रं न ततोऽपि भिन्नम्॥ ६८६॥
तच्चापि पंचीकृतभूतजातं शब्दादिभिः स्वस्वगुणैश्च सार्धम्।
वपूंषि सूक्ष्माणि च सर्वमेतद्भवत्यपंचीकृतभूतमात्रम्॥ ६८७॥
तदप्यपंचीकृतभूतजातं रजस्तमःसत्त्वगुणैश्च सार्धम्।
अव्यक्तमात्रं भवति स्वरूपतः साभासमव्यक्तमिदं स्वयं च॥६८८॥
आधारभूतं यदखंडमाद्यं शुद्धं परं ब्रह्म सदैकरूपम्।
सन्मात्रमेवास्त्यथ नो विकल्पः सतः परं केवलमेव वस्तु॥ ६८९॥
एकश्चंद्रः सद्वितीयो यथा स्याद्दृष्टेर्दोषादेव पुंसस्तथैकम्।
ब्रह्मास्त्येतद्बुद्धिदोषेण नाना दोषे नष्टे भाति वस्त्वेकमेव॥ ६९०॥
रज्जोः स्वरूपाधिगमे न सर्पधी रज्ज्वां विलीना तु यथा तथैव।
ब्रह्मावगत्या तु जगत्प्रतीतिस्तत्रैव लीना तु सह भ्रमेण॥ ६९१॥
भ्रांत्योदितद्वैतमतिप्रशांत्या सदैकमेवास्ति सदाऽद्वितीयम्।

ततो विजातीयकृतोऽत्र भेदो न विद्यते ब्रह्मणि निर्विकल्पे ॥ ६
यदास्त्युपाधिस्तदभिन्न आत्मा तदा सजातीय इवावभाति ।
स्वप्नार्थतस्तस्य मृषात्मकत्वात्तदप्रतीतौ स्वयमेष आत्मा ।
ब्रह्मैक्यतामेति पृथङ् न भाति ततः सजातीयकृतो न भेदः ॥६

घटाभावे घटाकाशो महाकाशो यथा तथा ।
उपाध्यभावे त्वात्मैष स्वयं ब्रह्मैव केवलम् ॥ ६९४ ॥

पूर्ण एव सदाकाशो घटे सत्यप्यसत्यपि ।
नित्यपूर्णस्य नभसो विच्छेदः केन सिध्यति ॥ ६९५ ॥

अच्छिन्नश्छिन्नवद्भाति पामराणां घटादिना ।
ग्रामक्षेत्राद्यवधिभिर्भिन्नेव वसुधा यथा ॥ ६९६ ॥

तथैव परमं ब्रह्म महतां च महत्तमम् ।
परिच्छिन्नमिवाभाति भ्रांत्या कल्पितवस्तुना ॥ ६९७ ॥

तस्माद्ब्रह्मात्मनोर्भेदः कल्पितो न तु वास्तवः ।
अत एव मुहुः श्रुत्याप्येकत्वं प्रतिपाद्यते ॥ ६९८ ॥

ब्रह्मात्मनोस्तत्त्वमसीत्यद्वयत्वोपपत्तये ।
प्रत्यक्षादिविरोधेन वाच्ययोर्नोपयुज्यते ।
तत्त्वंपदार्थयोरैक्यं लक्ष्ययोरेव सिध्यति ॥ ६९९ ॥

शिष्यः—

स्यात्तत्त्वंपदयोः स्वामिन्नर्थः कतिविधो मतः ।
पदयोः को नु वाच्यार्थो लक्ष्यार्थ उभयोश्च कः ॥ ७०० ॥

वाच्यैकत्वविवक्षायां विरोधः कः प्रतीयते ।
लक्ष्यार्थयोरभिन्नत्वे स कथं विनिवर्तते ॥ ७०१ ॥

एकत्वकथने का वा लक्षणात्रोररीकृता ।
एतत्सर्वं करुणया सम्यक्त्वं प्रतिपादय ॥ ७०२ ॥

श्रीगुरुः--

शृणुष्वाहितो विद्वन् अद्य ते फलितं तपः ।
वाक्यार्थश्रुतिमात्रेण सम्यग्ज्ञानं भविष्यति ॥ ७०३ ॥
यावन्न तत्त्वंपदयोरर्थः सम्यग्विचार्यते ।
तावदेव नृणां बंधो मृत्युसंसारलक्षणः ॥ ७०४ ॥
अवस्था सच्चिदानंदाखंडैकरसरूपिणी ।
मोक्षः सिध्यति वाक्यार्थापरोक्षज्ञानतः सताम् ॥ ७०५ ॥
वाक्यार्थ एव ज्ञातव्यो मुमुक्षोर्भवमुक्तये ।
तस्मादवहितो भूत्वा शृणु वक्ष्ये समासतः ॥ ७०६ ॥
अर्था बहुविधाः प्रोक्ता वाक्यानां पंडितोत्तमैः ।
वाच्यलक्ष्यादिभेदेन प्रस्तुतं श्रूयतां त्वया ॥ ७०७ ॥
वाक्ये तत्त्वमसीत्यत्र विद्यते यत्पदत्रयम् ।
तत्रादौ विद्यमानस्य तत्पदस्य निगद्यते ॥ ७०८ ॥
शास्त्रार्थकोविदैरर्थो वाच्यो लक्ष्य इति द्विधा ।
वाच्यार्थं ते प्रवक्ष्यामि पंडितैर्य उदीरितः ॥ ७०९ ॥
समष्टिरूपमज्ञानं साभासं सत्त्वबृंहितम् ।
वियदादिविराडंतं स्वकार्येण समन्वितम् ॥ ७१० ॥
चैतन्यं तदवच्छिन्नं सत्यज्ञानादिलक्षणम् ।
सर्वज्ञत्वेश्वरत्वांतर्यामित्वादिगुणैर्युतम् ॥ ७११ ॥
जगत्स्रष्टृत्वपातृत्वसंहर्तृत्वादिधर्मकम् ।
सर्वात्मना भासमानं यदमेयं गुणैश्च तत् ॥ ७१२ ॥
अव्यक्तमपरं ब्रह्म वाच्यार्थ इति कथ्यते ।
नीलमुत्पलमित्यत्र यथा वाक्यार्थसंगतिः ॥ ७१३ ॥
तथा तत्त्वमसीत्यत्र नास्ति वाक्यार्थसंगतिः ।
पटाद्व्यावर्तते नील उत्पलेन विशेषितः ॥ ७१४ ॥

शौक्ल्याद्व्यावर्तते नीलेनोत्पलं तु विशेषितम् ।
--------ऽन्यभेदस्य व्यावर्तकतया तयोः ॥ ७१५ ॥
विशेषणविशेष्यत्वसंसर्गस्येतरस्य वा ।
वाक्यार्थत्वे प्रमाणांतरविरोधो न विद्यते ॥ ७१६ ॥
अतः संगच्छते सम्यग्वाक्यार्थो बाधवर्जितः ।
एवं तत्त्वमसीत्यत्र वाक्यार्थो न समंजसः ॥ ७१७ ॥
तदर्थस्य परोक्षत्वादिविशिष्टचितेरपि ।
त्वमर्थस्यापरोक्षत्वादिविशिष्टचितेरपि ॥ ७१८ ॥
तथैवान्योन्यभेदस्य व्यावर्तकतया तयोः ।
विशेषणविशेष्यस्य संसर्गस्येतरस्य वा ॥ ७१९ ॥
वाक्यार्थत्वे विरोधोऽस्ति प्रत्यक्षादिकृतस्ततः ।
संगच्छते न वाक्यार्थस्तद्विरोधं च वच्मि ते ॥ ७२० ॥
सर्वेशत्वस्वतंत्रत्वसर्वज्ञत्वादिभिर्गुणैः ।
सर्वोत्तमः सत्यकामः सत्यसंकल्प ईश्वरः ॥ ७२१ ॥
तत्पदार्थस्त्वमर्थस्तु किंचिज्ज्ञो दुःखजीवनः ।
संसार्ययं तद्गतिको जीवः प्राकृतलक्षणः ॥ ७२२ ॥
कथमेकत्वमनयोर्घटते विपरीतयोः ।
प्रत्यक्षेण विरोधोऽयमुभयोरुपलभ्यते ॥ ७२३ ॥
विरुद्धधर्माक्रांतत्वात्परस्परविलक्षणौ ।
जीवेशौ वह्नितुहिनाविव शब्दार्थतोऽपि च ॥ ७२४ ॥
प्रत्यक्षादिविरोधः स्यादित्यैक्ये तयोः परित्यक्ते ।
श्रुतिवचनविरोधो भवति महान्स्मृतिवचनविरोधश्च ॥७२५॥
श्रुत्याप्येकत्वमनयोस्तात्पर्येण निगद्यते ।
मुहुस्तत्त्वमसीत्यस्मादंगीकार्यं श्रुतेर्वचः ॥ ७२६ ॥
वाक्यार्थत्वे विशिष्टस्य संसर्गस्य च वा पुनः ।

सोऽयं वाक्यार्थो न मतः श्रुतेः ॥ ७२७ ॥
अखंडैकरसत्वेन वाक्यार्थः श्रुतिसंमतः ।
स्थूलसूक्ष्मप्रपंचस्य सन्मात्रत्वं पुनः पुनः ॥ ७२८ ॥
दर्शयित्वा सुषुप्तौ तद्ब्रह्माभिन्नत्वमात्मनः ।
उपपाद्य सदैकत्वं ॥ ७२९ ॥
ऐतदात्म्यमिदं सर्वमित्युक्त्यैव सदात्मनोः ।
ब्रवीति श्रुतिरेकत्वं ब्रह्मणोऽद्वैतसिद्धये ॥ ७३० ॥
सति प्रपंचे जीवे वाद्वैतत्वं ब्रह्मणः कुतः ।
अतस्तयोरखंडत्वमेकत्वं ॥ ७३१ ॥
बाधते ।
अविरुद्धांशग्रहणान्न श्रुत्यापि विरुध्यते ॥ ७३२ ॥
लक्षणा ह्युपगंतव्या ततो वाक्यार्थसिद्धये ।
॥ ७३३ ॥
संबंधानुपपत्त्या च लक्षणेति जगुर्बुधाः ।
गंगायां घोष इत्यादौ या मता ॥ ७३४ ॥
न सा तत्त्वमसीत्यत्र वाक्य एषा प्रवर्तते ।
गंगाया अपि ॥ ७३५ ॥
सर्वो प्रत्यक्षतस्ततः ।
लक्षणा संप्रवर्तते ॥ ७३६ ॥
तथा ।
विवक्षिते तु ॥ ७३७ ॥
विरुध्यते न तु सर्वो विरुध्यते ।
प्रवृत्तिर्नात्र युज्यते ॥ ७३८ ॥
तु सर्वस्य त्यागे न ।
नालिकेरफलस्येव नृणाम् ॥ ७३९ ॥

गंगापदं यथा स्वार्थं त्यक्त्वा लक्षयते तटम् ।
तत्पदं त्वंपदं वापि त्यक्त्वा स्वार्थं यथाखिलम् ॥ ७४० ॥
तदर्थं वा त्वमर्थं वा यदि लक्षयति स्वयम् ।
तदा जहल्लक्षणायाः प्रवृत्तिरुपपद्यते ॥ ७४१ ॥
न शंकनीयमित्यार्यैर्ज्ञातार्थे न हि लक्षणा ।
तत्पदं त्वंपदं वापि श्रूयते च प्रतीयते ॥ ७४२ ॥
तदर्थे च कथं तत्र संप्रवर्तेत लक्षणा ।
अत्र शोणो धावतीति वाक्यवन्न प्रवर्तते ॥ ७४३ ॥
अजहल्लक्षणा वापि सा जहल्लक्षणा यथा ।
गुणस्य गमनं लोके विरुद्धं द्रव्यमंतरा ॥ ७४४ ॥
अतस्तमपरित्यज्य तद्गुणाश्रयलक्षणः ।
लक्ष्यादिर्लक्ष्यते तत्र लक्षणासौ प्रवर्तते ॥ ७४५ ॥
वाक्ये तत्त्वमसीत्यत्र ब्रह्मात्मैकत्वबोधके ।
परोक्षत्वापरोक्षत्वादिविशिष्टचितोर्द्वयोः ॥ ७४६ ॥
एकत्वरूपवाक्यार्थो विरुद्धांशाविवर्जनात् ।
न सिध्यति यतस्तस्मान्नाजहल्लक्षणा मता ॥ ७४७ ॥
तत्पदं त्वंपदं चापि स्वकीयार्थविरोधिनम् ।
अंशं सम्यक्परित्यज्य स्वाविरुद्धांशसंयुतम् ॥ ७४८ ॥
तदर्थं वा त्वमर्थं वा सम्यग्लक्षयतः स्वयम् ।
भागलक्षणया साध्यं किमस्तीति न शंक्यताम् ॥ ७४९ ॥
अविरुद्धं पदार्थान्तरांशं स्वांशं च तत्कथम् ।
एकं पदं लक्षणया संलक्षयितुमर्हति ॥ ७५० ॥
पदांतरेण सिद्धायां पदार्थप्रमितौ स्वतः ।
तदर्थप्रत्ययापेक्षा पुनर्लक्षणया कुतः ॥ ७५१ ॥
तस्मात्त्वमसीत्यत्र लक्षणा भागलक्षणा ।

वाक्यार्थसत्त्वाखंडैकरसतासिद्धये मता ॥ ७५२ ॥
भागं विरुद्धं संत्यज्याविरोधो लक्ष्यते यदा ।
सा भागलक्षणेत्याहुर्लक्षणज्ञा विचक्षणाः ॥ ७५३ ॥
सोऽयं देवदत्त इति वाक्यं वाक्यार्थ एव वा ।
देवदत्तैक्यरूपस्ववाक्यार्थानवबोधकम् ॥ ७५४ ॥
देशकालादिवैशिष्ट्यं विरुद्धांशं निरस्य च ।
अविरुद्धं देवदत्तदेहमात्रं स्वलक्षणम् ॥ ७५५ ॥
भागलक्षणया सम्यग्लक्षयत्यनया यथा ।
तथा तत्त्वमसीत्यत्र वाक्यं वाक्यार्थ एव वा ॥ ७५६ ॥
परोक्षत्वापरोक्षत्वादिविशिष्टचितोर्द्वयोः ।
एकत्वरूपवाक्यार्थविरुद्धांशमुपस्थितम् ॥ ७५७ ॥
परोक्षत्वापरोक्षत्वसर्वज्ञत्वादिलक्षणम् ।
बुद्ध्यादिस्थूलपर्यंतमाविद्यकमनात्मकम् ॥ ७५८ ॥
परित्यज्य विरुद्धांशं शुद्धचैतन्यलक्षणम् ।
वस्तु केवलसन्मात्रं निर्विकल्पं निरंजनम् ॥ ७५९ ॥
लक्षयत्यनया सम्यग्भागलक्षणया ततः ।
सर्वोपाधिविनिर्मुक्तं सच्चिदानंदमद्वयम् ॥ ७६० ॥
निर्विशेषं निराभासमतादृशमनीदृशम् ।
अनिर्देश्यमनाद्यंतमनंतं शांतमच्युतम् ।
अप्रतर्क्यमविज्ञेयं निर्गुणं ब्रह्म शिष्यते ॥ ७६१ ॥
उपाधिवैशिष्ट्यकृतो विरोधो ब्रह्मात्मनोरेकतयाधिगत्या ।
उपाधिवैशिष्ट्य उदस्यमाने न कश्चिदप्यस्ति विरोध एतयोः ॥७६२॥
तयोरुपाधिश्च विशिष्टता च तद्धर्मभाक्त्वं च विलक्षणत्वम् ।
भ्रांत्या कृतं सर्वमिदं मृषैव स्वप्नार्थवज्जाग्रति नैव सत्यम् ॥ ७६३ ॥
निद्रासूतशरीरधर्मसुखदुःखादिप्रपंचोऽपि वा

जीवेशादिभिदापि वा न च ऋतं कर्तुं कचिच्छक्यते ।
मायाकल्पितदेशकालजगदीशादिभ्रमस्तादृशः
को भेदोऽस्त्यनयोर्द्वयोस्तु कतमः सत्योऽन्यतः को भवेत् ॥७६४

न स्वप्नजागरणयोरुभयोर्विशेषः
संदृश्यते कचिदपि भ्रमजैर्विकल्पैः ।
यद्दृष्टदर्शनमुखैरत एव मिथ्या
स्वप्नो यथा ननु तथैव हि जागरोऽपि ॥ ७६५ ॥

अविद्याकार्यतस्तुल्यौ द्वावपि स्वप्नजागरौ ।
दृष्टदर्शनदृश्यादिकल्पनोभयतः समा ॥ ७६६ ॥

अभाव उभयोः सुप्तौ सर्वैरप्यनुभूयते ।
न कश्चिदनयोर्भेदस्तस्मान्मिथ्यात्वमर्हतः ॥ ७६७ ॥

भ्रांत्या ब्रह्मणि भेदोऽयं सजातीयादिलक्षणः ।
कालत्रयेऽपि हे विद्वन् वस्तुतो नैव कश्चन ॥ ७६८ ॥

यत्र नान्यत्पश्यतीति श्रुतिर्द्वैतं निषेधति ।
कल्पितस्य भ्रमाद्भूम्नि मिथ्यात्वावगमाय तत् ॥ ७६९ ॥

यतस्ततो ब्रह्म सदाऽद्वितीयं विकल्पशून्यं निरुपाधि निर्मलम् ।
निरंतरानंदघनं निरीहं निरास्पदं केवलमेकमेव ॥ ७७०

नैवास्ति काचन भिदा न गुणप्रतीति-
र्नो वाक्प्रवृत्तिरपि वा न मनःप्रवृत्तिः ।
यत्केवलं परमशांतमनंतमाद्य-
मानंदमात्रमवभाति सदद्वितीयम् ॥ ७७१ ॥

यदिदं परमं सत्यं तत्त्वं सच्चित्सुखात्मकम् ।
अजरामरणं नित्यं सत्यमेतद्वचो मम ॥ ७७२ ॥

न हि त्वं देहोऽसावसुरपि च वाप्यक्षनिकरो
मनो वा बुद्धिर्वा कचिदपि तथाहंकृतिरपि ।

न चैषां संघातस्त्वमु भवति विद्वन् शृणु परं
यदेतेषां साक्षी स्फुरणममलं तत्त्वमसि हि ॥ ७७३ ॥
यज्जायते वस्तु तदेव वर्धते तदेव मृत्युं समुपैति काले ।
जन्मैव तेनास्ति तथैव मृत्युर्नास्त्येव नित्यस्य विभोरजस्य ॥ ७७४ ॥
य एष देहो जनितः स एव समेधते नश्यति कर्मयोगात् ।
त्वमेतदीयास्वखिलास्ववस्थास्ववस्थितः साक्ष्यसि बोधमात्रः ॥७७५॥

यत्स्वप्रकाशमखिलात्मकमासुषुप्ते-
रेकात्मनाहमहमित्यवभाति नित्यम् ।
बुद्धेः समस्तविकृतेरविकारि बोद्धृ
यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७६ ॥

स्वात्मन्यनस्तमयसंविदि कल्पितस्य
व्योमादिसर्वजगतः प्रददाति सत्ताम् ।
स्फूर्तिं स्वकीयमहसा वितनोति साक्षा-
द्यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७७ ॥

सम्यक्समाधिनिरतैर्विमलांतरंगैः
साक्षादवेक्ष्य निजतत्त्वमपारसौख्यम् ।
संतुष्यते परमहंसकुलैरजस्रं
यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७८ ॥

अंतर्बहिः स्वयमखंडितमेकरूप-
मारोपितार्थवदुदंचति मूढबुद्धेः ।
मृत्स्नादिवद्विगतविक्रियमात्मवेद्यं
यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७७९ ॥

श्रुत्युक्तमव्ययमनंतमनादिमध्य-
मव्यक्तमक्षरमनाश्रयमप्रमेयम् ।
आनंदसद्घनमनामयमद्वितीयं

यद्ब्रह्म तत्त्वमसि केवलबोधमात्रम् ॥ ७८० ॥
शरीरतद्योगतदीयधर्माद्यारोपणं भ्रान्तिवशात्त्वयीदम् ।
न वस्तुतः किंचिदतस्त्वजस्त्वं मृत्योर्भयं क्वास्ति तवासि पूर्णः ॥७८
यद्यद्दृष्टं भ्रान्तिमत्या स्वदृष्ट्या
तत्तत्सम्यग्वस्तुदृष्ट्या त्वमेव ।
त्वत्तो नान्यद्वस्तु किंचित्तु लोके
कस्माद्भीतिस्ते भवेदद्वयस्य ॥ ७८२ ॥
पश्यतस्त्वहमेवेदं सर्वमित्यात्मनाखिलम् ।
भयं स्याद्विदुषः कस्मात्स्वस्मान्न भयमिष्यते ॥ ७८३ ॥
तस्मात्त्वमभयं नित्यं केवलानंदलक्षणम् ।
निष्कलं निष्क्रियं शांतं ब्रह्मैवासि सदाऽद्वयम् ॥ ७८४ ॥
ज्ञातृज्ञानज्ञेयविहीनं ज्ञातुरभिन्नं ज्ञानमखंडम् ।
ज्ञेयाज्ञेयत्वादिविमुक्तं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८५ ॥
अंतःप्रज्ञत्वादिविकल्पैरस्पृष्टं यत्तद्दृशिमात्रम् ।
सत्तामात्रं समरसमेकं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८६
सर्वाकारं सर्वमसर्वं सर्वनिषेधावधिभूतं यत् ।
सत्यं शाश्वतमेकमनंतं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८७ ॥
नित्यानंदाखंडैकरसं निष्कलमक्रियमस्तविकारम् ।
प्रत्यगभिन्नं परमव्यक्तं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८८ ॥
त्वं प्रत्यस्ताशेषविशेषं व्योमेवांतर्बहिरपि पूर्णम् ।
ब्रह्मानंदं परमद्वैतं शुद्धं बुद्धं तत्त्वमसि त्वम् ॥ ७८९ ॥
ब्रह्मैवाहमहं ब्रह्म निर्गुणं निर्विकल्पकम् ।
इत्येवाखंडया वृत्त्या तिष्ठ ब्रह्मणि निष्क्रिये ॥ ७९० ॥
अखंडामेवैतां घटितपरमानंदलहरीं
परिध्वस्तद्वैतप्रमितिममलां वृत्तिमनिशम् ।

अमुंचानः स्वात्मन्यनुपमसुखे ब्रह्मणि परे
रमस्व प्रारब्धं क्षपय सुखवृत्त्या त्वमनया ॥ ७९१ ॥
ब्रह्मानंदरसास्वादतत्परेणैव चेतसा ।
समाधिनिष्ठितो भूत्वा तिष्ठ विद्वन्सदा मुने ॥ ७९२ ॥

शिष्यः—

अखंडाख्या वृत्तिरेषा वाक्यार्थश्रुतिमात्रतः ।
श्रोतुः संजायते किं वा क्रियांतरमपेक्षते ॥ ७९३ ॥
समाधिः कः कतिविधस्तत्सिद्धेः किमु साधनम् ।
समाधेरंतरायाः के सर्वमेतन्निरूप्यताम् ॥ ७९४ ॥

श्रीगुरुः—

मुख्यगौणादिभेदेन विद्यन्तेऽत्राधिकारिणः ।
तेषां प्रज्ञानुसारेणाखंडा वृत्तिरुदेष्यते ॥ ७९५ ॥
श्रद्धाभक्तिपुरःसरेण विहितेनैवेश्वरं कर्मणा
संतोष्यार्जिततत्प्रसादमहिमा जन्मांतरेष्वेव यः ।
नित्यानित्यविवेकतीव्रविरतिन्यासादिभिः साधनै-
र्युक्तः सः श्रवणे सतामभिमतो मुख्याधिकारी द्विजः ॥ ७९६ ॥
अध्यारोपापवादक्रममनुसरता देशिकेनात्र वेत्त्रा
वाक्यार्थे बोध्यमाने सति सपदि सतः शुद्धबुद्धेरमुष्य ।
नित्यानंदाद्वितीयं निरुपममलं यत्परं तत्त्वमेकं
तद्ब्रह्मैवाहमस्मीत्युदयति परमाखंडताकारवृत्तिः ॥ ७९७ ॥
अखंडाकारवृत्तिः सा चिदाभाससमन्विता ।
आत्माभिन्नं परं ब्रह्म विषयीकृत्य केवलम् ॥ ७९८ ॥
बाधते तद्गताज्ञानं यदावरणलक्षणम् ।
अखंडाकारया वृत्त्या त्वज्ञाने बाधिते सति ॥ ७९९ ॥
तत्कार्यं सकलं तेन समं भवति बाधितम् ।

तंतुदाहे तु तत्कार्यपटदाहो यथा तथा ॥ ८०० ॥
तस्य कार्यतया जीववृत्तिर्भवति बाधिता ।
उपप्रभा यथा सूर्यं प्रकाशयितुमक्षमा ॥ ८०१ ॥
तद्वदेव चिदाभासचैतन्यं वृत्तिसंस्थितम् ।
स्वप्रकाशं परं ब्रह्म प्रकाशयितुमक्षमम् ॥ ८०२ ॥
प्रचंडातपमध्यस्थदीपवन्नष्टदीधितिः ।
तत्तेजसाभिभूतं सल्लीनोपाधितया ततः ॥ ८०३ ॥
बिंबभूतपरब्रह्ममात्रं भवति केवलम् ।
यथापनीते त्वादर्शे प्रतिबिंबमुखं स्वयम् ॥ ८०४ ॥
मुखमात्रं भवेत्तद्वदेतच्चोपाधिसंक्षयात् ।
घटाज्ञाने यथा वृत्त्या व्याप्तया बाधिते सति ॥ ८०५ ॥
घटं विस्फुरयत्येष चिदाभासः स्वतेजसा ।
न तथा स्वप्रभे ब्रह्मण्याभास उपयुज्यते ॥ ८०६ ॥
अत एव मतं वृत्तिव्याप्यत्वं वस्तुनः सताम् ।
न फलव्याप्यता तेन न विरोधः परस्परम् ॥ ८०७ ॥
श्रुत्योदितस्ततो ब्रह्म ज्ञेयं बुद्ध्यैव सूक्ष्मया ।
प्रज्ञामांद्यं भवेद्येषां तेषां न श्रुतिमात्रतः ॥ ८०८ ॥
स्यादखंडाकारवृत्तिर्विना तु मननादिना ।
श्रवणान्मननाद्ध्यानात्तात्पर्येण निरंतरम् ॥ ८०९ ॥
बुद्धेः सूक्ष्मत्वमायाति ततो वस्तूपलभ्यते ।
मंदप्रज्ञावतां तस्मात्करणीयं पुनः पुनः ॥ ८१० ॥
श्रवणं मननं ध्यानं सम्यग्वस्तूपलब्धये ।
सर्ववेदान्तवाक्यानां षड्भिर्लिंगैः सदद्वये ॥ ८११ ॥
परे ब्रह्मणि तात्पर्यनिश्चयं श्रवणं विदुः ।
श्रुतस्यैवाद्वितीयस्य वस्तुनः प्रत्यगात्मनः ॥ ८१२ ॥

वेदान्तवाक्यानुगुणयुक्तिभिस्त्वनुचिंतनम् ।
मननं तच्छ्रुतार्थस्य साक्षात्करणकारणम् ॥ ८१३ ॥
विजातीयशरीरादिप्रत्ययत्यागपूर्वकम् ।
सजातीयात्मवृत्तीनां प्रवाहकरणं यथा ।
तद्ध्यानमिष्यते ॥ ८१४ ॥
तावत्कालं प्रयत्नेन कर्तव्यं श्रवणं सदा ।
प्रमाणसंशयो यावत्स्वबुद्धेर्न निवर्तते ॥ ८१५ ॥
प्रमेयसंशयो यावत्तावत्तु श्रुतियुक्तिभिः ।
आत्मयाथार्थ्यनिश्चित्त्यै कर्तव्यं मननं मुहुः ॥ ८१६ ॥
विपरीतात्मधीर्यावन्न विनश्यति चेतसि ।
तावन्निरंतरं ध्यानं कर्तव्यं मोक्षमिच्छता ॥ ८१७ ॥
यावन्न तर्केण निरासितोऽपि ।
विलीयते भिक्षोर्ध्यानादि ॥८१८॥
सविकल्पो निर्विकल्प इति द्वेधा निगद्यते ।
समाधिः सविकल्पस्य लक्षणं वच्मि तच्छृणु ॥ ८१९ ॥
ज्ञेये ब्रह्मणि केवले ।
चित्तवृत्तेरवस्थितिः ॥ ८२० ॥
सद्भिः स एव विज्ञेयः समाधिः सविकल्पकः ।
मृद ॥ ८२१ ॥
त्रिपुटी भाति सन्मयी ।
एवायं इतीर्यते ॥ ८२२ ॥
ज्ञेयमात्रस्थितिर्दृढा ।
मनसो निर्विकल्पः ॥ ८२३ ॥
जले निक्षिप्तलवणं स्थितम् ।
पृथक् न भाति किं त्वंभ ॥ ८२४ ॥

यथा तथैव सा वृत्तिर्ब्रह्ममात्रतया स्थिता ।
पृथङ् न भाति ब्रह्मैवाद्वितीयमवभासते ॥ ८२५ ॥
ज्ञात्रादिकल्पनाभावान्मतोऽयं निर्विकल्पकः ।
वृत्तेः सद्भावबाधाभ्यामुभयोर्भेद इष्यते ॥ ८२६ ॥
समाधिसुप्त्योर्ज्ञानं चाज्ञानं सुप्त्यात्र नेष्यते ।
सविकल्पो निर्विकल्पः समाधिर्द्वाविमौ हृदि ॥ ८२७ ॥
मुमुक्षोर्यत्नतः कार्यौ विपरीतनिवृत्तये ।
कृतेऽस्मिन्विपरीताया भावनाया निवर्तनम् ॥ ८२८ ॥
ज्ञानस्याप्रतिबद्धत्वं सदानंदश्च सिध्यति ।
दृश्यानुविद्धः शब्दानुविद्धश्चेति द्विधा मतः ॥ ८२९ ॥
सविकल्पस्तयोर्यत्तल्लक्षणं वच्मि तच्छृणु ।
कामादिप्रत्ययैर्दृश्यैः संसर्गो यत्र दृश्यते ॥ ८३० ॥
सोऽयं दृश्यानुविद्धः स्यात्समाधिः सविकल्पकः ।
अहंममेदमित्यादिकामक्रोधादिवृत्तयः ॥ ८३१ ॥
दृश्यन्ते येन संदृष्टा दृश्याः स्युरहमादयः ।
कामादिसर्ववृत्तीनां द्रष्टारमविकारिणम् ॥ ८३२ ॥
साक्षिणं स्वं विजानीयाद्यस्ताः पश्यति निष्क्रियः ।
कामादीनामहं साक्षी दृश्यन्ते ते मया ततः ॥ ८३३ ॥
इति साक्षितयात्मानं जानात्यात्मनि साक्षिणम् ।
दृश्यं कामादि सकलं स्वात्मन्येव विलापयेत् ॥ ८३४ ॥

नाहं देहो नाप्यसुर्नाक्षवर्गो
नाहंकारो नो मनो नापि बुद्धिः ।
अंतस्तेषां चापि तद्विक्रियाणां
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३५ ॥
वाचः साक्षी प्राणवृत्तेश्च साक्षी

बुद्धेः साक्षी बुद्धिवृत्तेश्च साक्षी ।
चक्षुःश्रोत्रादींद्रियाणां च साक्षी
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३६ ॥
नाहं स्थूलो नापि सूक्ष्मो न दीर्घो
नाहं बालो नो युवा नापि वृद्धः ।
नाहं काणो नापि मूको न षंढः
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३७ ॥
नास्म्यागंता नापि गंता न हंता
नाहं कर्ता न प्रयोक्ता न वक्ता ।
नाहं भोक्ता नो सुखी नैव दुःखी
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३८ ॥
नाहं योगी नो वियोगी न रागी
नाहं क्रोधी नैव कामी न लोभी ।
नाहं बद्धो नापि युक्तो न मुक्तः
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८३९ ॥
नांतःप्रज्ञो नो बहिःप्रज्ञको वा
नैव प्रज्ञो नापि चाप्रज्ञ एषः ।
नाहं श्रोता नापि मंता न बोद्धा
साक्षी नित्यः प्रत्यगेवाहमस्मि ॥ ८४० ॥
न मेऽस्ति देहेंद्रियबुद्धियोगो
न पुण्यलेशोऽपि न पापलेशः ।
क्षुधापिपासादिषडूर्मिदूरः
सदा विमुक्तोऽस्मि चिदेव केवलः ॥ ८४१ ॥
अपाणिपादोऽहमवागचक्षुषी
अप्राण एवास्म्यमना ह्यबुद्धिः ।

व्योमेव पूर्णोऽस्मि विनिर्मलोऽस्मि
सदैकरूपोऽस्मि चिदेव केवलः ॥ ८४२ ॥
इति स्वमात्मानमवेक्षमाणः
प्रतीतदृश्यं प्रविलापयन्सदा ।
जहाति विद्वान्विपरीतभावं
स्वाभाविकं भ्रांतिवशात्प्रतीतम् ॥ ८४३ ॥
विपरीतात्मतास्फूर्तिरेव मुक्तिरितीर्यते ।
सदा समाहितस्यैव सैषा सिध्यति नान्यथा ॥ ८४४ ॥
न वेषभाषाभिरमुष्य मुक्तिर्या केवलाखंडचिदात्मना स्थितिः ।
तत्सिद्धये स्वात्मनि सर्वदा स्थितो जह्यादहंतां ममतामुपाधौ ॥ ८४५ ॥
स्वात्मतत्त्वं समालंब्य कुर्यात्प्रकृतिनाशनम् ।
तेनैव मुक्तो भवति नान्यथा कर्मकोटिभिः ॥ ८४६ ॥
ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
इत्येवैषा वैदिकी वाग्ब्रवीति
क्लेशक्षत्यां जन्ममृत्युप्रहाणिम् ॥ ८४७ ॥
भूयो जन्माद्यप्रसक्तिर्विमुक्तिः
क्लेशक्षत्यां भाति जन्माद्यभावः ।
क्लेशक्षत्या हेतुरात्मैकनिष्ठा
तस्मात्कार्या ह्यात्मनिष्ठा मुमुक्षोः ॥ ८४८ ॥
क्लेशाः स्युर्वासना एव जंतोर्जन्मादिकारणम् ।
ज्ञाननिष्ठाग्निना दाहे तासां नो जन्महेतुता ॥ ८४९ ॥
बीजान्यग्निप्रदग्धानि न रोहन्ति यथा पुनः ।
ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संपद्यते पुनः ॥ ८५० ॥
तस्मान्मुमुक्षोः कर्तव्या ज्ञाननिष्ठा प्रयत्नतः ।

निःशेषवासनाक्षत्यै विपरीतनिवृत्तये ॥ ८५१ ॥
ज्ञाननिष्ठातत्परस्य नैव कर्मोपयुज्यते ।
कर्मणो ज्ञाननिष्ठाया न सिध्यति सहस्थितिः ॥ ८५२ ॥
परस्परविरुद्धत्वात्तयोर्भिन्नस्वभावयोः ।
कर्तृत्वभावनापूर्वं कर्म ज्ञानं विलक्षणम् ॥ ८५३ ॥
देहात्मबुद्धेर्विच्छित्त्यै ज्ञानं कर्म विवृद्धये ।
अज्ञानमूलकं कर्म ज्ञानं तूभयनाशकम् ॥ ८५४ ॥
ज्ञानेन कर्मणो योगः कथं सिध्यति वैरिणा ।
सहयोगो न घटते यथा तिमिरतेजसोः ॥ ८५५ ॥
निमेषोन्मेषयोर्वापि तथैव ज्ञानकर्मणोः ।
प्रतीचीं पश्यतः पुंसां कुतः प्राचीविलोकनम् ।
प्रत्यक्प्रवणचित्तस्य कुतः कर्मणि योग्यता ॥ ८५६ ॥
ज्ञानैकनिष्ठानिरतस्य भिक्षोर्नैवावकाशोऽस्ति हि कर्मतंत्रे ।
तदेव कर्मास्य तदेव संध्या तदेव सर्वं न ततोऽन्यदस्ति ॥ ८५७ ॥
बुद्धिकल्पितमालिन्यक्षालनं स्नानमात्मनः ।
तेनैव शुद्धिरेतस्य न मृदा न जलेन च ॥ ८५८ ॥
स्वस्वरूपे मनःस्थानमनुष्ठानं तदिष्यते ।
करणत्रयसाध्यं यत्तन्मृषा तदसत्यतः ॥ ८५९ ॥
विनिषिध्याखिलं दृश्यं स्वस्वरूपेण या स्थितिः ।
सा संध्या तदनुष्ठानं तद्दानं तद्धि भोजनम् ॥ ८६० ॥
विज्ञातपरमार्थानां शुद्धसत्त्वात्मनां सताम् ।
यतीनां किमनुष्ठानं स्वानुसंधिं विना परम् ॥ ८६१ ॥
तस्मात्क्रियान्तरं त्यक्त्वा ज्ञाननिष्ठापरो यतिः ।
सदात्मनिष्ठया तिष्ठेन्निश्चलस्तत्परायणः ॥ ८६२ ॥
कर्तव्यं स्वोचितं कर्म योगमारोढुमिच्छता ।

आरोहणं कुर्वतस्तु कर्म नारोहणं मतम् ॥ ८६३ ॥

योगं समारोहति यो मुमुक्षुः
क्रियान्तरं तस्य न युक्तमीषत् ।
क्रियान्तरासक्तमनाः पतत्यसौ
तालद्रुमारोहणकर्तृवद्ध्रुवम् ॥ ८६४ ॥

योगारूढस्य सिद्धस्य कृतकृत्यस्य धीमतः ।
नास्त्येव हि बहिर्दृष्टिः का कथा तत्र कर्मणाम् ।
दृश्यानुविद्धः कथितः समाधिः सविकल्पकः ॥ ८६५ ॥

शुद्धोऽहं बुद्धोऽहं प्रत्यग्रूपेण नित्यसिद्धोऽहम् ।
शांतोऽहमनंतोऽहं सततपरानंदसिंधुरेवाहम् ॥ ८६६ ॥

आद्योऽहमनाद्योऽहं वाङ्मनसा साध्यवस्तुमात्रोऽहम् ।
निगमवचोवेद्योऽहमनवद्याखंडबोधरूपोऽहम् ॥ ८६७ ॥

विदिताविदितान्योऽहं मायातत्कार्यलेशशून्योऽहम् ।
केवलदृगात्मकोऽहं संविन्मात्रः सकृद्विभातोऽहम् ॥ ८६८ ॥

अपरोऽहमनपरोऽहं बहिरंतश्चापि पूर्ण एवाहम् ।
अजरोऽहमक्षरोऽहं नित्यानंदोऽहमद्वितीयोऽहम् ॥ ८६९ ॥

प्रत्यगभिन्नमखंडं सत्यज्ञानादिलक्षणं शुद्धम् ।
श्रुत्यवगम्यं तथ्यं ब्रह्मैवाहं परं ज्योतिः ॥ ८७० ॥

एवं सन्मात्रगाहिन्या वृत्त्या तन्मात्रगाहकैः ।
शब्दैः समर्पितं वस्तु भावयेन्निश्चलो यतिः ॥ ८७१ ॥

कामादिदृश्यप्रविलापपूर्वकं शुद्धोऽहमित्यादिकशब्दमिश्रः ।
दृश्येव निष्ठस्य य एष भावः शब्दानुविद्धः कथितः समाधिः ॥८७२॥

च साक्षित्वारतमुल्लेखनमात्मनि ।
निवर्तकमनोवस्था निर्विकल्प इतीर्यते ॥ ८७३ ॥

सविकल्पसमाधिं यो दीर्घकालं निरंतरम् ।

संस्कारपूर्वकं कुर्यान्निर्विकल्पोऽस्य सिध्यति ॥ ८७४ ॥
निर्विकल्पकसमाधिनिष्ठया तिष्ठतो भवति नित्यता ध्रुवम् ।
उद्भवाद्यपगतिर्निरर्गला नित्यनिश्चलनिरंतनिर्वृतिः ॥ ८७५ ॥
विद्वानहमिदमिति वा किंचिद्बाह्याभ्यंतरवेदनशून्यः ।
स्वानंदामृतसिंधुनिमग्नस्तूष्णीमास्ते कश्चिदनन्यः ॥ ८७६ ॥
निर्विकल्पं परं ब्रह्म यत्तस्मिन्नेव निष्ठिताः ।
एते धन्या एव मुक्ता जीवन्तोऽपि बहिर्दृशाम् ॥ ८७७ ॥
यथा समाधित्रितयं यत्नेन क्रियते हृदि ।
तथैव बाह्यदेशेऽपि कार्यं द्वैतनिवृत्तये ॥ ८७८ ॥
तत्प्रकारं प्रवक्ष्यामि निशामय समासतः ।
अधिष्ठानं परं ब्रह्म सच्चिदानंदलक्षणम् ॥ ८७९ ॥
तत्राध्यस्तमिदं भाति नामरूपात्मकं जगत् ।
सत्त्वं चित्त्वं तथानंदरूपं यद्ब्रह्मणस्त्रयम् ॥ ८८० ॥
अध्यस्तजगतो रूपं नामरूपमिदं द्वयम् ।
एतानि सच्चिदानंदनामरूपाणि पंच च ॥ ८८१ ॥
एकीकृत्योच्यते मूर्खैरिदं विश्वमिति भ्रमात् ।
शैत्यं श्वेतं रसं द्राव्यं तरंग इति नाम च ॥ ८८२ ॥
एकीकृत्य तरंगोऽयमिति निर्दिश्यते यथा ।
आरोपिते नामरूपे उपेक्ष्य ब्रह्मणः सतः ॥ ८८३ ॥
स्वरूपमात्रग्रहणं समाधिर्बाह्य आदिमः ।
सच्चिदानंदरूपस्य सकाशाद्ब्रह्मणो यतिः ॥ ८८४ ॥
नामरूपे पृथक्कृत्वा ब्रह्मण्येव विलापयन् ।
अधिष्ठानं परं ब्रह्म सच्चिदानंदमद्वयम् ।
यत्तदेवाहमित्येव निश्चितात्मा भवेद्ध्रुवम् ॥ ८८५ ॥
इयं भूर्न सन्नापि तोयं न तेजो

न वायुर्न खं नापि तत्कार्यजातम् ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८६ ॥
न शब्दो न रूपं न च स्पर्शको वा
तथा नो रसो नापि गंधो न चान्यः ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८७ ॥
न सद्द्रव्यजातं गुणा न क्रिया वा
न जातिर्विशेषो न चान्यः कदापि ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८८ ॥
न देहो न चाक्षाणि न प्राणवायु-
र्मनो नापि बुद्धिर्न चित्तं ह्यहंधीः ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८८९ ॥
न देशो न कालो न दिग्वापि सत्स्या-
न्न वस्त्वंतरं स्थूलसूक्ष्मादिरूपम् ।
यदेषामधिष्ठानभूतं विशुद्धं
सदेकं परं सत्तदेवाहमस्मि ॥ ८९० ॥
एतद्दृश्यं नामरूपात्मकं यो-
ऽधिष्ठानं तद्ब्रह्म सत्यं सदेति ।
गच्छंस्तिष्ठन्वा शयानोऽपि नित्यं
कुर्याद्विद्वान्बाह्यदृश्यानुविद्धम् ॥ ८९१ ॥
अध्यस्तनामरूपादिप्रविलापेन निर्मलम् ।
अद्वैतं परमानंदं ब्रह्मैवास्मीति भावयेत् ॥ ८९२ ॥

निर्विकारं निराकारं निरंजनमनामयम् ।
आद्यंतरहितं पूर्णं ब्रह्मैवाहं न संशयः ॥ ८९३ ॥
निष्कलंकं निरातंकं त्रिविधच्छेदवर्जितम् ।
आनंदमक्षरं मुक्तं ब्रह्मैवास्मीति भावयेत् ॥ ८९४ ॥
निर्विशेषं निराभासं नित्यमुक्तमविक्रियम् ।
प्रज्ञानैकरसं सत्यं ब्रह्मैवास्मीति भावयेत् ॥ ८९५ ॥
शुद्धं बुद्धं तत्त्वसिद्धं परं प्रत्यगखंडितम् ।
स्वप्रकाशं पराकाशं ब्रह्मैवास्मीति भावयेत् ॥ ८९६ ॥
सुसूक्ष्ममस्तितामात्रं निर्विकल्पं महत्तमम् ।
केवलं परमाद्वैतं ब्रह्मैवास्मीति भावयेत् ॥ ८९७ ॥
इत्येवं निर्विकारादिशब्दमात्रसमर्पितम् ।
ध्यायतः केवलं वस्तु लक्ष्ये चित्तं प्रतिष्ठति ॥ ८९८ ॥
ब्रह्मानंदरसावेशादेकीभूय तदात्मना ।
वृत्तेर्या निश्चलावस्था स समाधिरकल्पकः ॥ ८९९ ॥
उत्थाने वाप्यनुत्थानेऽप्यप्रमत्तो जितेंद्रियः ।
समाधिषट्कं कुर्वीत सर्वदा प्रयतो यतिः ॥ ९०० ॥
विपरीतार्थधीर्यावन्न निःशेषं निवर्तते ।
स्वरूपस्फुरणं यावन्न प्रसिध्यत्यनिर्गलम् ।
तावत्समाधिषट्केन नयेत्कालं निरंतरम् ॥ ९०१ ॥
न प्रमादोऽत्र कर्तव्यो विदुषा मोक्षमिच्छता ।
प्रमादे जृंभते माया सूर्यापाये तमो यथा ॥ ९०२ ॥
स्वानुभूतिं परित्यज्य न तिष्ठन्ति क्षणं बुधाः ।
स्वानुभूतौ प्रमादो यः स मृत्युर्न यमः सताम् ॥ ९०३ ॥
अस्मिन्समाधौ कुरुते प्रयासं
यस्तस्य नैवास्ति पुनर्विकल्पः ।

सर्वात्मभावोऽप्यमुनैव सिध्ये-
त्सर्वात्मभावः खलु केवलत्वम् ॥ ९०४ ॥
सर्वात्मभावो विदुषो ब्रह्मविद्याफलं विदुः ।
जीवन्मुक्तस्य तस्यैव स्वानंदानुभवः फलम् ॥ ९०५ ॥
योऽहंममेत्याद्यसदात्मगाहको
ग्रंथिर्लयं याति स वासनामयः ।
समाधिना नश्यति कर्मबंधो
ब्रह्मात्मबोधोऽप्रतिबंध इष्यते ॥ ९०६ ॥
एष निष्कंटकः पंथा मुक्तेर्ब्रह्मात्मना स्थितेः ।
शुद्धात्मनां मुमुक्षूणां यत्सदेकत्वदर्शनम् ॥ ९०७ ॥
तस्मात्त्वं चाप्यप्रमत्तः समाधी-
न्कृत्वा ग्रंथिं साधु निर्दह्य युक्तः ।
नित्यं ब्रह्मानंदपीयूषसिंधौ
मज्जन्क्रीडन्मोदमानो रमस्व ॥ ९०८ ॥
निर्विकल्पसमाधिर्यो वृत्तिनैश्चल्यलक्षणा ।
तमेव योग इत्याहुर्योगशास्त्रार्थकोविदाः ॥ ९०९ ॥
अष्टावंगानि योगस्य यमो नियम आसनम् ।
प्राणायामस्तथा प्रत्याहारश्चापि च धारणा ॥ ९१० ॥
ध्यानं समाधिरित्येव निगदन्ति मनीषिणः ।
सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः ॥ ९११ ॥
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ।
सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ॥ ९१२ ॥
नियमो हि परानंदो नियमात्क्रियते बुधैः ।
सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनम् ॥ ९१३ ॥
आसनं तद्विजानीयादितरत्सुखनाशनम् ।

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ॥ ९१४ ॥
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ।
निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ॥ ९१५ ॥
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ।
ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः ॥ ९१६ ॥
अयं चापि प्रबुद्धानामज्ञानां प्राणपीडनम् ।
विषयेष्वात्मतां त्यक्त्वा मनसश्चिति मज्जनम् ॥ ९१७ ॥
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ।
यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ॥ ९१८ ॥
मनसो धारणं चैव धारणा सा परा मता ।
ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया स्थितिः ॥ ९१९ ॥
ध्यानशब्देन विख्याता परमानंददायिनी ।
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ॥ ९२० ॥
वृत्तिविस्मरणं सम्यक्समाधिर्ध्यानसंज्ञिकः ।
समाधौ क्रियमाणे तु विघ्ना ह्यायान्ति वै बलात् ॥ ९२१ ॥
अनुसंधानराहित्यमालस्यं भोगलालसम् ।
भयं तमश्च विक्षेपस्तेजःस्पंदश्च शून्यता ॥ ९२२ ॥
एवं यद्विघ्नबाहुल्यं त्याज्यं तद्ब्रह्मविज्जनैः ।
विघ्नानेतान्परित्यक्त्वा प्रमादरहितो वशी ।
समाधिनिष्ठया ब्रह्म साक्षाद्भवितुमर्हसि ॥ ९२३ ॥
इति गुरुवचनाच्छ्रुतिप्रमाणा-
त्परमवगम्य स्वतत्त्वमात्मयुक्त्या ।
प्रशमितकरणः समाहितात्मा
क्वचिदचलाकृतिरात्मनिष्ठितोऽभूत् ॥ ९२४ ॥
बहुकालं समाधाय स्वस्वरूपे तु मानसम् ।

उत्थाय परमानंदाद्गुरुमेत्य पुनर्मुदा ।
प्रमाणपूर्वकं धीमान्सगद्गदमुवाच ह ॥ ९२५ ॥
नमो नमस्ते गुरवे नित्यानंदस्वरूपिणे ।
मुक्तसंगाय शांताय त्यक्ताहंताय ते नमः ॥ ९२६ ॥
दयाधाम्ने नमो भूम्ने महिम्नः पारमस्य ते ।
नैवास्ति यत्कटाक्षेण ब्रह्मैवाभवमद्वयम् ॥ ९२७ ॥
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ।
यन्मया पूरितं विश्वं महाकल्पांबुना यथा ॥ ९२८ ॥
मयि सुखबोधपयोधौ महति ब्रह्मांडबुद्बुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा पुनस्तिरोधत्ते ॥ ९२९ ॥
नित्यानंदस्वरूपोऽहमात्माहं त्वदनुग्रहात् ।
पूर्णोऽहमनवद्योऽहं केवलोऽहं च सद्गुरो ॥ ९३० ॥
अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ।
आनंदघन एवाहमसंगोऽहं सदाशिवः ॥ ९३१ ॥
त्वत्कटाक्षवरचांद्रचंद्रिकापातधूतभवतापजः श्रमः ।
प्राप्तवानहमखंडवैभवानंदमात्मपदमक्षयं क्षणात् ॥ ९३२ ॥
छायया स्पृष्टमुष्णं वा शीतं वा दुष्टु सुष्टु वा ।
न स्पृशत्येव यत्किंचित्पुरुषं तद्विलक्षणम् ॥ ९३३ ॥
न साक्षिणं साक्ष्यधर्मा न स्पृशन्ति विलक्षणम् ।
अविकारमुदासीनं गृहधर्माः प्रदीपवत् ॥ ९३४ ॥
रवेर्यथा कर्मणि साक्षिभावो
वह्नेर्यथा वायसि दाहकत्वम् ।
रज्जोर्यथारोपितवस्तुसंग-
स्तथैव कूटस्थचिदात्मनो मे ॥ ९३५ ॥
इत्युक्त्वा स गुरुं स्तुत्वा प्रश्रयेण कृतानतिः ।

मुमुक्षोरुपकाराय प्रष्टव्यांशमपृच्छत ॥ १३६ ॥
जीवन्मुक्तस्य भगवन्ननुभूतेश्च लक्षणम् ।
च मे कृपया ब्रूहि तत्त्वतः ॥ १३७ ॥

श्रीगुरुः--

वक्ष्ये तुभ्यं लक्षणमादितः ।
ज्ञाने यस्मिंस्त्वया सर्वं ज्ञातं स्यात्पृष्टमत्र यत् ॥ १३८ ॥
शुभेच्छा समुदीरिता ।
विचारणा द्वितीया तु तृतीया तनुमानसी ॥ १३९ ॥
।
पदार्थाभावना षष्ठी सप्तमी तुर्यगा स्मृता ॥ १४० ॥
स्थितः किं मूढ एवास्मि प्रेक्ष्योऽहं शास्त्रसज्जनैः ।
शुभेच्छा प्रोच्यते बुधैः ॥ १४१ ॥
।
प्रोच्यते सा विचारणा ॥ १४२ ॥
।
यत्र सा प्रोच्यते तनुमानसी ॥ १४३ ॥
भूमिकात्रितयाभ्यासाच्चित्तेऽर्थविरतेर्वशात् ।
स्थिते शुद्धे ॥ १४४ ॥
या ।
प्रोक्ताऽसंसक्तिनामिका ॥ १४५ ॥
भृशम् ।
बाह्यानां ॥ १४६ ॥
चिरप्रयत्नेनावबोधनम् ।
नाम षष्ठी भवति भूमिका ॥ १४७ ॥
।

यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः ॥ ९४८ ॥
इदं ममेति सर्वेषु दृश्यभावेष्वभावना ।
जाग्रज्जाग्रदिति प्राहुर्महान्तो ब्रह्मवित्तमाः ॥ ९४९ ॥
विदित्वा सच्चिदानंदे मयि दृश्यपरंपराम् ।
नामरूपपरित्यागो जाग्रत्स्वप्नः समीर्यते ॥ ९५० ॥
परिपूर्णचिदाकाशे मयि बोधात्मतां विना ।
न किंचिदन्यदस्तीति जाग्रत्सुप्तिः समीर्यते ॥ ९५१ ॥
मूलाज्ञानविनाशेन कारणाभासचेष्टितैः ।
बंधो न मेऽतिस्वल्पोऽपि स्वप्नजाग्रदितीर्यते ॥ ९५२ ॥
कारणाज्ञाननाशाद्यद्द्रष्टृदर्शनदृश्यता ।
न कार्यमस्ति तज्ज्ञानं स्वप्नस्वप्नः समीर्यते ॥ ९५३ ॥
अतिसूक्ष्मविमर्शेन स्वधीवृत्तिरचंचला ।
विलीयते यदा बोधे स्वप्नसुप्तिरितीर्यते ॥ ९५४ ॥
चिन्मयाकारमतयो धीवृत्तिप्रसरैर्गतः ।
आनंदानुभवो विद्वन् सुप्तिजाग्रदितीर्यते ॥ ९५५ ॥
वृत्तौ चिरानुभूतांतरानंदानुभवस्थितौ ।
समात्मतां यो यात्येष सुप्तिस्वप्न इतीर्यते ॥ ९५६ ॥
दृश्यधीवृत्तिरेतस्य केवलीभावभावना ।
परं बोधैकतावाप्तिः सुप्तिसुप्तिरितीर्यते ॥ ९५७ ॥
परब्रह्मवदाभाति निर्विकारैकरूपिणी ।
सर्वावस्थासु धारैका तुर्याख्या परिकीर्तिता ॥ ९५८ ॥
इत्यवस्थासमुल्लासं विमृशन्मुच्यते सुखी ।
शुभेच्छादित्रयं भूमिभेदाभेदयुतं स्मृतम् ॥ ९५९ ॥
यथावद्भेदबुद्ध्येदं जगज्जाग्रदितीर्यते ।
अद्वैते स्थैर्यमायाते द्वैते च प्रशमं गते ॥ ९६० ॥

पश्यन्ति स्वप्नवल्लोकं तुर्यभूमिसुयोगतः ।
पंचमीं ——————— ॥ १६१ ॥
।
नित्यं षष्ठीं भूमिमुपाश्रितः ॥ १६२ ॥
परिश्रांततया लक्ष्यते ।
कुर्वन्नभ्यासमेतस्यां भूम्यां सम्यग्विवासनः ॥ १६३ ॥
तुर्यावस्थां सप्तभूमिं योगिराट् ।
विदेहमुक्तिरेवात्र तुर्यातीतदशोच्यते ॥ १६४ ॥
यत्र नासन्न सच्चापि नाहं नाप्यनहंकृतिः ।
केवलं क्षीणमनन आस्तेऽद्वैतेऽतिनिर्भयः ॥ १६५ ॥
बहिःशून्यः शून्यकुंभ इवांबरे ।
अंतःपूर्णो बहिःपूर्णः पूर्णकुंभ इवार्णवे ॥ १६६ ॥
सर्वं च ।
अस्त गतं स्थितं व्योम स उच्यते ॥ १६७ ॥
नोदेति सुखदुःखे मनःप्रभा ।
यथाप्राप्तस्थितिर्यस्य स जीवन्मुक्त उच्यते ॥ १६८ ॥
यो जागर्ति यस्य जाग्रन्न विद्यते ।
यस्य निर्वासनो बोधः स उच्यते ॥ १६९ ॥
चरन्नपि ।
स उच्यते ॥ १७० ॥
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
सापि स जीवन्मुक्त उच्यते ॥ १७१ ॥
यः शीतलः ।
परार्थेष्विव पूर्णात्मा स उच्यते ॥ १७२ ॥
पदे ।

अक्षुब्धचित्तविश्रान्तः स जीवन्मुक्त उच्यते ॥ १७३ ॥
इदं जगदयं सोऽयं दृश्यजातमवास्तवम् ।
यस्य चित्ते न स्फुरति स जीवन्मुक्त उच्यते ॥ १७४ ॥
चिदात्माहं परात्माहं निर्गुणोऽहं परात्परः ।
आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते ॥ १७५ ॥
देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥ १७६ ॥
यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः ।
परमानंदपूर्णो यः स जीवन्मुक्त उच्यते ॥ १७७ ॥
अहं ब्रह्मास्म्यहं ब्रह्मास्म्यहं ब्रह्मेति निश्चयः ।
चिदहं चिदहं चेति स जीवन्मुक्त उच्यते ॥ १७८ ॥
जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते ।
विशत्यदेहमुक्तित्वं पवनोऽस्पंदतामिव ॥ १७९ ॥
ततस्तत्संबभूवासौ यद्गिरामप्यगोचरम् ।
यच्छून्यवादिनां शून्यं ब्रह्म ब्रह्मविदां च यत् ॥ १८० ॥
विज्ञानं विज्ञानविदां मलानां च मलात्मकम् ।
पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनाम् ॥ १८१ ॥
शिवः शैवागमस्थानां कालः कालैकवादिनाम् ।
यत्सर्वशास्त्रसिद्धान्तं यत्सर्वहृदयानुगम् ।
यत्सर्वं सर्वगं वस्तु तत्तत्त्वं तदसौ स्थितः ॥ १८२ ॥
ब्रह्मैवाहं चिदेवाहमेवं वापि न चिंत्यते ।
चिन्मात्रेव यस्तिष्ठेद्विदेहो मुक्त एव सः ॥ १८३ ॥
यस्य प्रपंचभानं न ब्रह्माकारमपीह न ।
अतीतातीतभावो यो विदेहो मुक्त एव सः ॥ १८४ ॥
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यावभासकः ।

चित्तवृत्तिविलीनो यो विदेहो मुक्त एव सः ॥ १८५ ॥
जीवात्मेति परात्मेति ।
विदेहो मुक्त एव सः ॥ १८६ ॥
सर्ववाच्यविवर्जितः ।
विदेहो मुक्त एव सः ॥ १८७ ॥

अहिनिर्ल्वयनी सर्पनिर्मोको जीववर्जितः ।
वल्मीके सर्पो नाभिमन्यते ॥ १८८ ॥
एवं स्थूलं च सूक्ष्मं च शरीरं नाभिमन्यते ।
मिथ्याज्ञाने सहेतुके ॥ १८९ ॥
नेति ।
विश्वश्च प्राज्ञश्चेति च ते त्रयम् ॥ १९० ॥
विराड् च ते त्रयम् ।
ब्रह्मांडं चैव पिंडांडं लोका भूरादयः क्रमात् ॥ १९१ ॥
लीयन्ते ।
तूष्णीं सत्यं न किंचन ॥ १९२ ॥
कालभेदं वस्तुभेदं देशभेदं ।
न तस्यास्ति किंचिद्वापि न विद्यते ॥ १९३ ॥
जीवेश्वरेति वाक्ये च स्थिति ।
इदं ॥ १९४ ॥
इति यो विदेहो मुक्त एव सः ।
ब्रह्मैव विद्यते च ॥ १९५ ॥
ब्रह्म ।
शान्तं च तदतीतं च परं ब्रह्म तदुच्यते ॥ १९६ ॥
सर्वापह्नव एव हि ।
नो माया शांतं ब्रह्मैव तद्विना ॥ १९७ ॥

प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम् ॥ ९९८ ॥

यावद्यावच्च सद्बुद्धे स्वयं संत्यज्यतेऽखिलम् ।
तावत्तावत्परानंदः परमात्मैव शिष्यते ॥ ९९९ ॥

यत्र यत्र मृतो ज्ञानी परमाक्षरवित्सदा ।
परे ब्रह्मणि लीयेत न तस्योत्क्रांतिरिष्यते ॥ १००० ॥

यद्यत्स्वाभिमतं वस्तु तत्त्यजन्मोक्षमश्नुते ।
असंकल्पेन शस्त्रेण छिन्नं चित्तमिदं यदा ॥ १००१ ॥

सर्वं सर्वगतं शांतं ब्रह्म संपद्यते तदा ।
इति श्रुत्वा गुरोर्वाक्यं शिष्यस्तु छिन्नसंशयः ॥ १००२ ॥

ज्ञानज्ञेयः संप्रणम्य सद्गुरोश्चरणांबुजम् ।
स तेन समनुज्ञातो ययौ निर्मुक्तबंधनः ॥ १००३ ॥

गुरुरेष सदानंदसिंधौ निर्मग्नमानसः ।
पावयन्वसुधां सर्वां विचचार निरुत्तरः ॥ १००४ ॥

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥ १००५ ॥

सर्ववेदांतसिद्धांतसारसंग्रहनामकः ।
ग्रंथोऽयं हृदयग्रंथिविच्छित्त्यै रचितः सताम् ॥ १००६ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ सर्ववेदान्तसिद्धान्तसारसंग्रहः संपूर्णः ॥

॥ विवेकचूडामणिः ॥

सर्ववेदांतसिद्धांतगोचरं तमगोचरम् ।
गोविंदं परमानंदं सद्गुरुं प्रणतोऽस्म्यहम् ॥ १ ॥
जंतूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
विद्वत्त्वमस्मात्परम् ।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थिति-
र्मुक्तिर्नो पुण्यैर्विना लभ्यते ॥ २ ॥
दुर्लभं ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥ ३ ॥
लब्ध्वा कथंचिन्नरजन्म दुर्लभं
तत्रापि पुंस्त्वं श्रुतिपारदर्शनम् ।
यस्त्वात्ममुक्त्यै न यतेत मूढधीः
स ह्यात्महा स्वं विनिहन्त्यसद्ग्रहात् ॥ ४ ॥
इतः को न्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।
दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम् ॥ ५ ॥
वदन्तु शास्त्राणि यजन्तु कर्माणि भजन्तु देवताः ।
आत्मैक्यबोधेन विना विमुक्तिर्न सिध्यति ॥ ६ ॥
अमृतत्वस्य नाशास्ति वित्तेनेत्येव हि श्रुतिः ।
ब्रवीति कर्मणो स्फुटं यतः ॥ ७ ॥
अतो विमुक्त्यै प्रयतेत विद्वान्संन्यस्तबाह्यार्थसुखस्पृहः सन् ।
संतं महांतं समुपेत्य देशिकं तेनोपदिष्टार्थसमाहितात्मा ॥ ८ ॥
मग्नं ।
योगारूढत्वमासाद्य ॥ ९ ॥
संन्यस्य ।
यत्यतां पंडितैर्धीरैरात्माभ्यास उपस्थितैः ॥ १० ॥

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किंचित्कर्मकोटिभिः ॥ ११ ॥
सम्यग्विचारतः सिद्धा रज्जुतत्त्वावधारणा ।
भ्रांन्त्योदितमहासर्प-भयदुःखविनाशिनी ॥ १२ ॥
अर्थस्य निश्चयो दृष्टो विचारेण हितोक्तितः ।
न स्नानेन न दानेन प्राणायामशतेन वा ॥ १३ ॥
अधिकारिणमाशास्ते फलसिद्धिर्विशेषतः ।
उपाया देशकालाद्याः संत्यस्मिन्सहकारिणः ॥ १४ ॥
अतो विचारः कर्तव्यो जिज्ञासोरात्मवस्तुनः ।
समासाद्य दयासिंधुं गुरुं ब्रह्मविदुत्तमम् ॥ १५ ॥
मेधावी पुरुषो विद्वानूहापोहविचक्षणः ।
अधिकार्यात्मविद्यायामुक्तलक्षणलक्षितः ॥ १६ ॥
विवेकिनो विरक्तस्य शमादिगुणशालिनः ।
मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥ १७ ॥
साधनान्यत्र चत्वारि कथितानि मनीषिभिः ।
येषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति ॥ १८ ॥
आदौ नित्यानित्यवस्तुविवेकः परिगण्यते ।
इहामुत्रफलभोगविरागस्तदनंतरम् ॥ १९ ॥
शमादिषट्कसंपत्तिर्मुमुक्षुत्वमिति स्फुटम् ।
ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः ॥ २० ॥
सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः ।
तद्वैराग्यं जिहासा या दर्शनश्रवणादिभिः ॥ २१ ॥
देहादिब्रह्मपर्यंते ह्यनित्ये भोगवस्तुनि ।
विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः ॥ २२ ॥
स्वलक्ष्ये नियतावस्था मनसः शम उच्यते ।

विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ॥ २३ ॥
उभयेषामिंद्रियाणां स दमः परिकीर्तितः ।
बाह्यानालंबनं वृत्तेरेषोपरतिरुत्तमा ॥ २४ ॥
सहनं सर्वदुःखानामप्रतीकारपूर्वकम् ।
चिंताविलापरहितं सा तितिक्षा निगद्यते ॥ २५ ॥
शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यावधारणा ।
सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते ॥ २६ ॥
सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वदा ।
तत्समाधानमित्युक्तं न तु चित्तस्य लालनम् ॥ २७ ॥
अहंकारादिदेहांतान्बंधानज्ञानकल्पितान् ।
स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता ॥ २८ ॥
मंदमध्यमरूपापि वैराग्येण शमादिना ।
प्रसादेन गुरोः सेयं प्रवृद्धा सूयते फलम् ॥ २९ ॥
वैराग्यं च मुमुक्षुत्वं तीव्रं यस्य तु विद्यते ।
तस्मिन्नेवार्थवन्तः स्युः फलवंतः शमादयः ॥ ३० ॥
एतयोर्मंदता यत्र विरक्तत्वमुमुक्षयोः ।
मरौ सलिलवत्तत्र शमादेर्भासमात्रता ॥ ३१ ॥
मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते ॥ ३२ ॥
स्वात्मतत्त्वानुसंधानं भक्तिरित्यपरे जगुः ।
उक्तसाधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः ॥ ३३ ॥
उपसीदेद्गुरुं प्राज्ञं यस्माद्बंधविमोक्षणम् ।
श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः ॥ ३४ ॥
ब्रह्मण्युपरतः शांतो निरिंधन इवानलः ।
अहेतुकदयासिंधुर्बंधुरानमतां सताम् ॥ ३५ ॥

तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः ।
प्रसन्नं तमनुप्राप्य पृच्छेज्ज्ञातव्यमात्मनः ॥ ३६ ॥

स्वामिन्नमस्ते नतलोकबंधो कारुण्यसिंधो पतितं भवाब्धौ ।
मामुद्धरात्मीयकटाक्षदृष्ट्या ऋज्व्यातिकारुण्यसुधाभिवृष्ट्या ॥३७॥

दुर्वारसंसारदवाग्नितप्तं दोधूयमानं दुरदृष्टवातैः ।
भीतं प्रपन्नं परिपाहि मृत्योः शरण्यमन्यं यदहं न जाने ॥ ३८ ॥

शांता महांतो निवसंति संतो वसंतवल्लोकहितं चरंतः ।
तीर्णाः स्वयं भीमभवार्णवं जनानहेतुनान्यानपि तारयन्तः ॥३९॥

अयं स्वभावः स्वत एव यत्परश्रमापनोदप्रवणं महात्मनाम् ।
सुधांशुरेष स्वयमर्ककर्कशप्रभाभितप्तामवति क्षितिं किल ॥४०॥

ब्रह्मानंदरसानुभूतिकलितैः पूतैः सुशीतैः सितै-
र्युष्मद्वाक्कलशोज्झितैः श्रुतिसुखैर्वाक्यामृतैः सेचय ।
संतप्तं भवतापदावदहनज्वालाभिरेनं प्रभो
धन्यास्ते भवदीक्षणक्षणगतेः पात्रीकृताः स्वीकृताः ॥ ४१ ॥

कथं तरेयं भवसिंधुमेतं का वा गतिर्मे कतमोऽस्त्युपायः ।
जाने न किंचित्कृपयाव मां प्रभो संसारदुःखक्षतिमातनुष्व ॥४२॥

तथा वदंतं शरणागतं स्वं संसारदावानलतापतप्तम् ।
निरीक्ष्य कारुण्यरसार्द्रदृष्ट्या दद्यादभीतिं सहसा महात्मा ॥ ४३ ॥

विद्वान्स तस्मा [illegible] मुमुक्षवे साधु यथोक्तकारिणे ।
प्रशांतचित्ताय शमान्विताय तत्त्वोपदेशं कृपयैव कुर्यात् ॥ ४ ॥

श्रीगुरुरुवाच

मा भैष्ट विद्वंस्तव नास्त्यपायः संसारसिंधोस्तरणेऽस्त्युपायः ।
येनैव याता यतयोऽस्य पारं तमेव मार्गं तव निर्दिशामि ॥ ४५ ॥

अस्त्युपायो महान्कश्चित्संसारभयनाशनः ।
तेन तीर्त्वा भवांभोधिं परमानंदमाप्स्यसि ॥ ४६ ॥

वेदांतार्थविचारेण जायते ज्ञानमुत्तमम् ।
तेनात्यंतिकसंसारदुःखनाशो भवत्यनु ॥ ४७ ॥

श्रद्धाभक्तिध्यानयोगान्मुमुक्षोर्मुक्तेर्हेतून्वक्ति साक्षाच्छ्रुतेर्गीः ।
यो वा एतेष्वेव तिष्ठत्यमुष्य मोक्षोऽविद्याकल्पिताद्देहबंधात् ॥ ४८ ॥

अज्ञानयोगात्परमात्मनस्तव ह्यनात्मबंधस्तत एव संसृतिः ।
तयोर्विवेकोदितबोधवह्निरज्ञानकार्यं प्रदहेत्समूलम् ॥ ४९ ॥

शिष्य उवाच—

कृपया श्रूयतां स्वामिन् प्रश्नोऽयं क्रियते मया ।
तदुत्तरमहं श्रुत्वा कृतार्थः स्यां भवन्मुखात् ॥ ५० ॥

को नाम बंधः कथमेष आगतः कथं प्रतिष्ठास्य कथं विमोक्षः ।
कोऽसावनात्मा परमः स्व आत्मा तयोर्विवेकः कथमेतदुच्यताम् ॥५१॥

गुरुरुवाच--

धन्योऽसि कृतकृत्योऽसि पावितं ते कुलं त्वया ।
यदविद्याबंधमुक्त्या ब्रह्मीभवितुमिच्छसि ॥ ५२ ॥

ऋणमोचनकर्तारः पितुः संति सुतादयः ।
बंधमोचनकर्ता तु स्वस्मादन्यो न कश्चन ॥ ५३ ॥

मस्तकन्यस्तभारादेर्दुःखमन्यैर्निवार्यते ।
क्षुधादिकृतदुःखं तु विना स्वेन न केनचित् ॥ ५४ ॥

पथ्यमौषधसेवा च क्रियते येन रोगिणा ।
आरोग्यसिद्धिर्दृष्टास्य नान्यानुष्ठितकर्मणा ॥ ५५ ॥

वस्तुस्वरूपं स्फुटबोधचक्षुषा स्वेनैव वेद्यं न तु पंडितेन ।
चंद्रस्वरूपं निजचक्षुषैव ज्ञातव्यमन्यैरवगम्यते किम् ॥ ५६ ॥

अविद्याकामकर्मादिपाशबंधं विमोचितुम् ।
कः शक्नुयाद्विनात्मानं कल्पकोटिशतैरपि ॥ ५७ ॥

न योगेन न सांख्येन कर्मणा नो न विद्यया ।

ब्रह्मात्मैकत्वबोधेन मोक्षः सिध्यति नान्यथा ॥ ५८ ॥
वीणाया रूपसौंदर्यं तंत्रीवादनसौष्ठवम् ।
प्रजारंजनमात्रं तन्न साम्राज्याय कल्पते ॥ ५९ ॥
वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम् ।
वैदुष्यं विदुषां तद्वद्भुक्तये न तु मुक्तये ॥ ६० ॥
अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।
विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥ ६१ ॥
शब्दजालं महारण्यं चित्तभ्रमणकारणम् ।
अतः प्रयत्नाज्ज्ञातव्यं तत्त्वज्ञात्तत्त्वमात्मनः ॥ ६२ ॥
अज्ञानसर्पदष्टस्य ब्रह्मज्ञानौषधं विना ।
किमु वेदैश्च शास्त्रैश्च किमु मंत्रैः किमौषधैः ॥ ६३ ॥
न गच्छति विना पानं व्याधिरौषधशब्दतः ।
विनापरोक्षानुभवं ब्रह्मशब्दैर्न मुच्यते ॥ ६४ ॥
अकृत्वा दृश्यविलयमज्ञात्वा तत्त्वमात्मनः ।
बाह्यशब्दैः कुतो मुक्तिरुक्तिमात्रफलैर्नृणाम् ॥ ६५ ॥
अकृत्वा शत्रुसंहारमगत्वाखिलभूश्रियम् ।
राजाहमिति शब्दान्नो राजा भवितुमर्हति ॥ ६६ ॥
आप्तोक्तिं खननं तथोपरिशिलाद्युत्कर्षणं स्वीकृतिं
निक्षेपः समपेक्षते नहि बहिः शब्दैस्तु निर्गच्छति ।
तद्वत् ब्रह्मविदोपदेशमननध्यानादिभिर्लभ्यते
मायाकार्यतिरोहितं स्वममलं तत्त्वं न दुर्युक्तिभिः ॥६७
तस्मात्सर्वप्रयत्नेन भवबंधविमुक्तये ।
स्वैरेव यत्नः कर्तव्यो रोगादाविव पंडितैः ॥ ६८ ॥
यस्त्वयाद्य कृतः प्रश्नो वरीयाञ्छास्त्रविन्मतः ।
सूत्रप्रायो निगूढार्थो ज्ञातव्यश्च मुमुक्षुभिः ॥ ६९ ॥

श्रृणुष्वावहितो विद्वन् यन्मया समुदीर्यते ।
तदेतच्छ्रवणात्सत्यं भवबंधाद्विमोक्ष्यसे ॥ ७० ॥
मोक्षस्य हेतुः प्रथमो निगद्यते वैराग्यमत्यंतमनित्यवस्तुषु ।
ततः शमश्चापि दमस्तितिक्षा न्यासः प्रसक्ताखिलकर्मणां भृशम् ॥७१॥
ततः श्रुतिस्तन्मननं सतत्त्वध्यानं चिरं नित्यनिरंतरं मुनेः ।
ततोऽविकल्पं परमेत्य विद्वानिहैव निर्वाणसुखं समृच्छति ॥ ७२ ॥
यद्बोद्धव्यं तवेदानीमात्मानात्मविवेचनम् ।
तदुच्यते मया सम्यक् श्रुत्वात्मन्यवधारय ॥ ७३ ॥
मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम् ।
पादोरुवक्षोभुजपृष्ठमस्तकैरंगैरुपांगैरुपयुक्तमेतत् ॥ ७४ ॥
अहंममेति प्रथितं शरीरं मोहास्पदं स्थूलमितीर्यते बुधैः ।
नभोनभस्वद्दहनांबुभूमयः सूक्ष्माणि भूतानि भवंति तानि ॥ ७५ ॥
परस्परांशैर्मिलितानि भूत्वा स्थूलानि च स्थूलशरीरहेतवः ।
मात्रास्तदीया विषया भवन्ति शब्दादयः पंच सुखाय भोक्तुः ॥ ७६ ॥
य एषु मूढा विषयेषु बद्धा रागोरुपाशेन सुदुर्दमेन ।
आयांति निर्यांत्यध ऊर्ध्वमुच्चैः स्वकर्मदूतेन जवेन नीताः ॥ ७७ ॥
शब्दादिभिः पंचभिरेव पंच पंचत्वमापुः स्वगुणेन बद्धाः
कुरंगमातंगपतंगमीनभृंगा नरः पंचभिरंचितः किम् ॥ ७८ ॥
दोषेण तीव्रो विषयः कृष्णसर्पविषादपि ।
विषं निहंति भोक्तारं द्रष्टारं चक्षुषाप्ययम् ॥ ७९ ॥
विषयाशामहापाशाद्यो विमुक्तः सुदुस्त्यजात् ।
स एव कल्पते मुक्त्यै नान्यः षट्शास्त्रवेद्यपि ॥ ८० ॥
आपातवैराग्यवतो मुमुक्षून् भवाब्धिपारं प्रतियातुमुद्यतान् ।
आशाग्रहो मज्जयतेऽन्तराले निगृह्य कंठे विनिवर्त्य वेगात् ॥ ८१ ॥
विषयाशाग्रहो येन सुविरक्त्यसिना हतः ।

स गच्छति भवांभोधेः पारं प्रत्यूहवर्जितः ॥ ८२ ॥

विषमविषयमार्गैर्गच्छतोऽनच्छबुद्धेः
प्रतिपदमभियातो मृत्युरप्येष विद्धि ।
हितसुजनगुरूक्त्या गच्छतः स्वस्य युक्त्या
प्रभवति फलसिद्धिः सत्यमित्येव विद्धि ॥ ८३ ॥

मोक्षस्य कांक्षा यदि वै तवास्ति त्यजातिदूराद्विषयान्विषं यथा ।
पीयूषवत्तोषदयाक्षमार्जवप्रशांतिदान्तीर्भज नित्यमादरात् ॥ ८४ ॥

अनुक्षणं यत्परिहृत्य कृत्यमनाद्यविद्याकृतबंधमोक्षणम् ।
देहः परार्थोऽयममुष्य पोषणे यः सज्जते स स्वमनेन हंति ॥ ८५ ॥

शरीरपोषणार्थी सन् य आत्मानं दिदृक्षति ।
ग्राहं दारुधिया धृत्वा नदीं तर्तुं स इच्छति ॥ ८६ ॥

मोह एव महामृत्युर्मुमुक्षोर्वपुरादिषु ।
मोहो विनिर्जितो येन स मुक्तिपदमर्हति ॥ ८७ ॥

मोहं जहि महामृत्युं देहदारसुतादिषु ।
यं जित्वा मुनयो यांति तद्विष्णोः परमं पदम् ॥ ८८ ॥

त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंकुलम् ।
पूर्णं मूत्रपुरीषाभ्यां स्थूलं निंद्यमिदं वपुः ॥ ८९ ॥

पंचीकृतेभ्यो भूतेभ्यः स्थूलेभ्यः पूर्वकर्मणा ।
समुत्पन्नमिदं स्थूलं भोगायतनमात्मनः ।
अवस्था जागरस्तस्य स्थूलार्थानुभवो यतः ॥ ९० ॥

बाह्येंद्रियैः स्थूलपदार्थसेवां स्रक्चंदनस्त्र्यादिविचित्ररूपाम् ।
करोति जीवः स्वयमेतदात्मना तस्मात्प्रशस्तिर्वपुषोऽस्य जागरे ॥९१॥

सर्वोऽपि बाह्यसंसारः पुरुषस्य यदाश्रयः ।
विद्धि देहमिदं स्थूलं गृहवद्गृहमेधिनः ॥ ९२ ॥

स्थूलस्य संभवजरामरणानि धर्माः

स्थौल्यादयो बहुविधाः शिशुताद्यवस्थाः ।
वर्णाश्रमादिनियमा बहुधामयाः स्युः
पूजावमानबहुमानमुखा विशेषाः ॥ ९३ ॥
बुद्धींद्रियाणि श्रवणं त्वगक्षि घ्राणं च जिह्वा विषयावबोधनात् ।
वाक्पाणिपादं गुदमप्युपस्थः कर्मेंद्रियाणि प्रवणानि कर्मसु ॥ ९४ ॥
निगद्यतेऽन्तःकरणं मनो धीरहंकृतिश्चित्तमिति स्ववृत्तिभिः ।
मनस्तु संकल्पविकल्पनादिभिर्बुद्धिः पदार्थाध्यवसायधर्मतः ॥९५॥
अत्राभिमानादहमित्यहंकृतिः स्वार्थानुसंधानगुणेन चित्तम् ॥ ९६ ॥
प्राणापानव्यानोदानसमाना भवत्यसौ प्राणः ।
स्वयमेव वृत्तिभेदाद्विकृतेर्भेदात्सुवर्णसलिलवत् ॥ ९७ ॥
वागादिपंच श्रवणादिपंच प्राणादिपंचाभ्रमुखाणि पंच ।
बुद्ध्याद्यविद्यापि च कामकर्मणी पुर्यष्टकं सूक्ष्मशरीरमाहुः ॥ ९८ ॥
इदं शरीरं शृणु सूक्ष्मसंज्ञितं लिंगं त्वपंचीकृतभूतसंभवम् ।
सवासनं कर्मफलानुभावकं स्वाज्ञानतोऽनादिरुपाधिरात्मनः ॥ ९९ ॥
स्वप्नो भवत्यस्य विभक्त्यवस्था स्वमात्रशेषेण विभाति यत्र ।
स्वप्ने तु बुद्धिः स्वयमेव जाग्रत्कालीननानाविधवासनाभिः ॥ १००॥
कर्त्रादिभावं प्रतिपद्य राजते यत्र स्वयंज्योतिरयं परात्मा ।
धीमात्रकोपाधिरशेषसाक्षी न लिप्यते तत्कृतकर्मलेपैः ।
यस्मादसंगस्तत एव कर्मभिर्न लिप्यते किंचिदुपाधिना कृतैः ॥१०१॥
सर्वव्यापृतिकरणं लिंगमिदं स्याच्चिदात्मनः पुंसः ।
वास्यादिकमिव तक्ष्णस्तेनैवात्मा भवत्यसंगोऽयम् ॥ १०२ ॥
अंधत्वमंदत्वपटुत्वधर्माः सौगुण्यवैगुण्यवशाद्धि चक्षुषः ।
बाधिर्यमूकत्वमुखास्तथैव श्रोत्रादिधर्मा न तु वेत्तुरात्मनः ॥ १०३ ॥
उच्छ्वासनिःश्वासविजृंभणक्षुत्प्रस्यन्दनाद्युत्क्रमणादिकाः क्रियाः ।
प्राणादिकर्माणि वदन्ति तज्ज्ञाः प्राणस्य धर्मावशनापिपासे ॥ १०४ ॥
अंतःकरणमेतेषु चक्षुरादिषु वर्ष्मणि ।

अहमित्यभिमानेन तिष्ठत्याभासतेजसा ॥ १०५ ॥
अहंकारः स विज्ञेयः कर्ता भोक्ताभिमान्ययम् ।
सत्त्वादिगुणयोगेन चावस्थात्रयमश्नुते ॥ १०६ ॥
विषयाणामानुकूल्ये सुखी दुःखी विपर्यये ।
सुखं दुःखं च तद्धर्मः सदानंदस्य नात्मनः ॥ १०७ ॥
आत्मार्थत्वेन हि प्रेयान्विषयो न स्वतः प्रियः ।
स्वत एव हि सर्वेषामात्मा प्रियतमो यतः ॥ १०८ ॥
तत आत्मा सदानंदो नास्य दुःखं कदाचन ।
यत्सुषुप्तौ निर्विषय आत्मानंदोऽनुभूयते ।
श्रुतिः प्रत्यक्षमैतिह्यमनुमानं च जाग्रति ॥ १०९ ॥
अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा ।
कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥ ११० ॥
सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो ।
सांगाप्यनंगाप्युभयात्मिका नो महाद्भुताऽनिर्वचनीयरूपा ॥१११॥
शुद्धाद्वयब्रह्मविबोधनाश्या सर्पभ्रमो रज्जुविवेकतो यथा ।
रजस्तमः सत्त्वमिति प्रसिद्धा गुणास्तदीयाः प्रथितैः स्वकार्यैः ॥११२॥
विक्षेपशक्ती रजसः क्रियात्मिका यतः प्रवृत्तिः प्रसृता पुराणी ।
रागादयोऽस्याः प्रभवन्ति नित्यं दुःखादयो ये मनसो विकाराः ॥११३॥
कामः क्रोधो लोभदंभाभ्यसूयाहंकारेर्ष्यामत्सराद्यास्तु घोराः ।
धर्मा एते राजसाः पुंप्रवृत्तिर्यस्मादेतत्तद्रजो बंधहेतुः ॥ ११४ ॥
एषावृतिर्नाम तमोगुणस्य शक्तिर्यया वस्त्ववभासतेऽन्यथा ।
सैषा निदानं पुरुषस्य संसृतेर्विक्षेपशक्तेः प्रसरस्य हेतुः ॥ ११५ ॥
प्रज्ञावानपि पंडितोऽपि चतुरोऽप्यत्यंतसूक्ष्मार्थदृग्
व्यालीढस्तमसा न वेत्ति बहुधा संबोधितोऽपि स्फुटम् ।
भ्रान्त्यारोपितमेव साधु कलयत्यालंबते तद्गुणान् ।

हंतासौ प्रबला दुरंततमसः शक्तिर्महत्यावृतिः ॥ ११६ ॥
अभावना वा विपरीतभावना संभावना विप्रतिपत्तिरस्याः ।
संसर्गयुक्तं न विमुंचति ध्रुवं विक्षेपशक्तिः क्षपयत्यजस्रम् ॥ ११७ ॥
अज्ञानमालस्यजडत्वनिद्राप्रमादमूढत्वमुखास्तमोगुणाः ।
एतैः प्रयुक्तो नहि वेत्ति किंचिन्निद्रालुवत्स्तंभवदेव तिष्ठति ॥ ११८ ॥
सत्त्वं विशुद्धं जलवत्तथापि ताभ्यां मिलित्वा सरणाय कल्पते ।
यत्रात्मबिंबः प्रतिबिंबितः सन्प्रकाशयत्यर्क इवाखिलं जडम् ॥११९॥
मिश्रस्य सत्त्वस्य भवंति धर्मास्त्वमानिताद्या नियमा यमाद्याः ।
श्रद्धा च भक्तिश्च मुमुक्षुता च दैवी च संपत्तिरसन्निवृत्तिः ॥ १२०॥
विशुद्धसत्त्वस्य गुणाः प्रसादः स्वात्मानुभूतिः परमा प्रशांतिः ।
तृप्तिः प्रहर्षः परमात्मनिष्ठा यया सदानंदरसं समृच्छति ॥ १२१ ॥
अव्यक्तमेतत्त्रिगुणैर्निरुक्तं तत्कारणं नाम शरीरमात्मनः ।
सुषुप्तिरेतस्य विभक्त्यवस्था प्रलीनसर्वेंद्रियबुद्धिवृत्तिः ॥ १२२ ॥
सर्वप्रकारप्रमितिप्रशान्तिर्बीजात्मनावस्थितिरेव बुद्धेः ।
सुषुप्तिरेतस्य किल प्रतीतिः किंचिन्न वेद्मीति जगत्प्रसिद्धेः ॥ १२३ ॥
देहेंद्रियप्राणमनोऽहमादयः सर्वे विकारा विषयाः सुखादयः ।
व्योमादिभूतान्यखिलं च विश्वमव्यक्तपर्यंतमिदं ह्यनात्मा ॥ १२४ ॥

माया मायाकार्यं सर्वं महदादि देहपर्यंतम् ।
असदिदमनात्मकं त्वं विद्धि मरुमरीचिकाकल्पम् ॥ १२५ ॥
अथ ते संप्रवक्ष्यामि स्वरूपं परमात्मनः ।
यद्विज्ञाय नरो बंधान्मुक्तः कैवल्यमश्नुते ॥ १२६ ॥
अस्ति कश्चित्स्वयं नित्यमहंप्रत्ययलंबनः ।
अवस्थात्रयसाक्षी स पंचकोशविलक्षणः ॥ १२७ ॥
यो विजानाति सकलं जाग्रत्स्वप्नसुषुप्तिषु ।
बुद्धितद्वृत्तिसद्भावमभावमहमित्ययम् ॥ १२८ ॥

य: पश्यति स्वयं सर्वं यं न पश्यति कश्चन ।
यश्चेतयति बुद्ध्यादि न तद्यं चेतयत्ययम् ॥ १२९ ॥
येन विश्वमिदं व्याप्तं यन्न व्याप्नोति किंचन ।
अभारूपमिदं सर्वं यं भांतमनुभात्ययम् ॥ १३० ॥
यस्य संनिधिमात्रेण देहेंद्रियमनोधियः ।
विषयेषु स्वकीयेषु वर्तंते प्रेरिता इव ॥ १३१ ॥
अहंकारादिदेहांता विषयाश्च सुखादयः ।
वेद्यंते घटवद्येन नित्यबोधस्वरूपिणा ॥ १३२ ॥

एषोंऽतरात्मा पुरुषः पुराणो निरंतराखंडसुखानुभूतिः ।
सदैकरूपः प्रतिबोधमात्रो येनेषिता वागसवश्चरंति ॥ १३३ ॥
अत्रैव सत्त्वात्मनि धीगुहायामव्याकृताकाश उरुप्रकाशः ।
आकाश उच्चै रविवत्प्रकाशते स्वतेजसा विश्वमिदं प्रकाशयन् ॥१३'
ज्ञाता मनोऽहंकृतिविक्रियाणां देहेंद्रियप्राणकृतक्रियाणाम् ।
अयोऽग्निवत्तानुवर्तमानो न चेष्टते नो विकरोति किंचन ॥ १३५
न जायते नो म्रियते न वर्धते न क्षीयते नो विकरोति नित्यः ।
विलीयमानेऽपि वपुष्यमुष्मिन्न लीयते कुंभ इवांबरं स्वयम् ॥ १३६

प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः
सदसदिदमशेषं भासयन्निर्विशेषः ।
विलसति परमात्मा जाग्रदादिष्ववस्था-
स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः ॥ १३७ ॥
नियमितमनसामुं त्वं स्वमात्मानमात्म-
न्ययमहमिति साक्षाद्विद्धि बुद्धिप्रसादात् ।
जनिमरणतरंगापारसंसारसिंधुं
प्रतर भव कृतार्थो ब्रह्मरूपेण संस्थः ॥ १३८ ॥

अत्रानात्मन्यहमिति मतिर्बंध एषोऽस्य पुंसः

प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः।
येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या
पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृद्वत् ॥ १३९ ॥

अतस्मिंस्तद्बुद्धिः प्रभवति विमूढस्य तमसा
विवेकाभावाद्वै स्फुरति भुजगे रज्जुधिषणा।
ततोऽनर्थव्रातो निपतति समादातुरधिक-
स्ततो योऽसद्ग्राहः स हि भवति बंधः शृणु सखे ॥ १४० ॥

अखंडनित्याद्वयबोधशक्त्या स्फुरंतमात्मानमनंतवैभवम्।
समावृणोत्यावृतिशक्तिरेषा तमोमयी राहुरिवार्कबिंबम् ॥ १४१ ॥

तिरोभूते स्वात्मन्यमलतरतेजोवति पुमा-
ननात्मानं मोहादहमिति शरीरं कलयति।
ततः कामक्रोधप्रभृतिभिरमुं बंधकगुणैः।
परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति ॥ १४२ ॥

महामोहग्राहग्रसनगलितात्मावगमनो
धियो नानावस्थाः स्वयमभिनयंस्तद्गुणतया।
अपारे संसारे विषयविषपूरे जलनिधौ
निमज्योन्मज्यायं भ्रमति कुमतिः कुत्सितगतिः ॥ १४३ ॥

भानुप्रभासंजनिताभ्रपंक्तिर्भानुं तिरोधाय विजृंभते यथा।
आत्मोदिताहंकृतिरात्मतत्त्वं तथा तिरोधाय विजृंभते स्वयम् ॥१४४॥

कवलितदिननाथे दुर्दिने सांद्रमेघै-
र्व्यथयति हिमझंझावायुरुग्रो यथैतान्।
अविरततमसात्मन्यावृते मूढबुद्धिं
क्षपयति बहुदुःखैस्तीव्रविक्षेपशक्तिः ॥ १४५ ॥

एताभ्यामेव शक्तिभ्यां बंधः पुंसः समागतः।
याभ्यां विमोहितो देहं मत्वात्मानं भ्रमत्ययम् ॥ १४६ ॥

वीजं संसृतिभूमिजस्य तु तमो देहात्मधीरंकुरो
रागः पल्लवमंबु कर्म तु वपुः स्कंधोऽसवः शाखिकाः ।
अग्राणींद्रियसंहतिश्च विषयाः पुष्पाणि दुःखं फलं
नानाकर्मसमुद्भवं बहुविधं भोक्तात्र जीवः खगः ॥ १४७ ॥
अज्ञानमूलोऽयमनात्मबंधो नैसर्गिकोऽनादिरनंत ईरितः ।
जन्माप्ययव्याधिजरादिदुःखप्रवाहतापं जनयत्यमुष्य ॥ १४८ ॥
नास्त्रैर्न शस्त्रैरनिलेन वह्निना छेत्तुं न शक्यो न च कर्मकोटिभिः ।
विवेकविज्ञानमहासिना विना धातुः प्रसादेन शितेन मंजुना ॥ १४९ ॥
श्रुतिप्रमाणैकमतेः स्वधर्मनिष्ठा तयैवात्मविशुद्धिरस्य ।
विशुद्धबुद्धेः परमात्मवेदनं तेनैव संसारसमूलनाशः ॥ १५० ॥
कोशैरन्नमयाद्यैः पंचभिरात्मा न संवृतो भाति ।
निजशक्तिसमुत्पन्नैः शैवलपटलैरिवांबु वापिस्थम् ॥ १५१ ॥
तच्छैवालापनये सम्यक् सलिलं प्रतीयते शुद्धम् ।
तृष्णासंतापहरं सद्यः सौख्यप्रदं परं पुंसः ॥ १५२ ॥
पंचानामपि कोशानामपवादे विभात्ययं शुद्धः ।
नित्यानंदैकरसः प्रत्यग्रूपः परः स्वयंज्योतिः ॥ १५३ ॥
आत्मानात्मविवेकः कर्तव्यो बंधमुक्तये विदुषा ।
तेनैवानंदी भवति स्वं विज्ञाय सच्चिदानंदम् ॥ १५४ ॥
मुंजादिषीकामिव दृश्यवर्गात्प्रत्यंचमात्मानमसंगमक्रियम् ।
विविच्य तत्र प्रविलाप्य सर्वं तदात्मना तिष्ठति यः स मुक्तः ॥ १५५ ॥
देहोऽयमन्नभवनोऽन्नमयस्तु कोश-
श्चान्नेन जीवति विनश्यति तद्विहीनः ।
त्वक्चर्ममांसरुधिरास्थिपुरीषराशि-
र्नायं स्वयं भवितुमर्हति नित्यशुद्धः ॥ १५६ ॥
पूर्वं जनेरपि मृतेरथि नायमस्ति

जातः क्षणं क्षणगुणोऽनियतस्वभावः ।
नैको जडश्च घटवत्परिदृश्यमानः
स्वात्मा कथं भवति भावविकारवेत्ता ॥ १५७ ॥
पाणिपादादिमान्देहो नात्मा व्यंगेऽपि जीवनात् ।
तत्तच्छक्तेरनाशाच्च न नियम्यो नियामकः ॥ १५८ ॥
देहतद्धर्मतत्कर्मतदवस्थादिसाक्षिणः ।
सत एव स्वतः सिद्धं तद्वैलक्षण्यमात्मनः ॥ १५९ ॥
कुल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः ।
कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः ॥ १६० ॥
त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति ।
विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम् ॥ १६१ ॥
देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवे विदुषस्त्वहंधीः ।
विवेकविज्ञानवतो महात्मनो ब्रह्माहमित्येव मतिः सदात्मनि ॥ १६२ ॥
अत्रात्मबुद्धिं त्यज मूढबुद्धे त्वङ्मांसमेदोऽस्थिपुरीषराशौ ।
सर्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शांतिं परमां भजस्व ॥ १६३ ॥
देहेंद्रियादावसति भ्रमोदितां विद्वानहंतां न जहाति यावत् ।
तावन्न तस्यास्ति विमुक्तिवार्ताप्यस्त्वेष वेदांतनयांतदर्शी ॥ १६४ ॥
छायाशरीरे प्रतिबिंबगात्रे यत्स्वप्नदेहे हृदि कल्पितांगे ।
यथात्मबुद्धिस्तव नास्ति काचिज्जीवच्छरीरे च तथैव मास्तु ॥ १६५ ॥
देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य बीजम् ।
यतस्ततस्त्वं जहि तां प्रयत्नात्त्यक्ते तु चित्ते न पुनर्भवाशा ॥ १६६ ॥
कर्मेंद्रियैः पंचभिरंचितोऽयं प्राणो भवेत्प्राणमयस्तु कोशः ।
येनात्मवानन्नमयोऽनुपूर्णः प्रवर्ततेऽसौ सकलक्रियासु ॥ १६७ ॥
नैवात्मापि प्राणमयो वायुविकारो
गंतागंता वायुवदंतर्बहिरेषः ।
यस्मात्किंचित्क्वापि न वेत्तीष्टमनिष्टं

स्वं वान्यं वा किंचन नित्यं परतंत्रः ॥ १६८ ॥

ज्ञानेंद्रियाणि च मनश्च मनोमयः स्या-
त्कोशो ममाहमिति वस्तुविकल्पहेतुः ।
संज्ञादिभेदकलनाकलितो बलीयां-
स्तत्पूर्वकोशमनुपूर्य विजृंभते यः ॥ १६९ ॥

पंचेंद्रियैः पंचभिरेव होतृभिः प्रचीयमानो विषयाज्यधारया ।
जाज्वल्यमानो बहुवासनेंधनैर्मनोमयोऽग्निर्दहति प्रपंचम् ॥ १७० ।

न ह्यस्त्यविद्या मनसोऽतिरिक्ता मनो ह्यविद्या भवबंधहेतुः ।
तस्मिन्विनष्टे सकलं विनष्टं विजृंभितेऽस्मिन्सकलं विजृंभते ॥१७

स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या भोक्त्रादि विश्वं मन एव सर्वम् ।
तथैव जाग्रत्यपि नो विशेषस्तत्सर्वमेतन्मनसो विजृंभणम् ॥ १७२

मनसि प्रलीने नैवास्ति किंचित्सकलप्रसिद्धेः ।
अतो एव पुंसः संसार एतस्य न वस्तुतोऽस्ति ॥ १७३

वायुना नीयते मेघः पुनस्तेनैव नीयते ।
मनसा कल्प्यते बंधो मोक्षस्तेनैव कल्प्यते ॥ १७४ ॥

देहादिसर्वविषये परिकल्प्य रागं
बध्नाति तेन पुरुषं पशुवद्गुणेन ।
वैरस्यमत्र विषवत्सु विधाय पश्चा-
देनं विमोचयति तन्मन एव बंधात् ॥ १७४ ॥

तस्मान्मनः कारणमस्य जंतो-
र्बंधस्य मोक्षस्य च वा विधाने ।
बंधस्य हेतुर्मलिनं रजोगुणै-
र्मोक्षस्य शुद्धं विरजस्तमस्कम् ॥ १७६ ॥

विवेकवैराग्यगुणातिरेकाच्छुद्धत्वमासाद्य मनो विमुक्त्यै ।
भवत्यतो बुद्धिमतो मुमुक्षोस्ताभ्यां दृढाभ्यां भवितव्यमग्रे ॥ १७७

मनो नाम महाव्याघ्रो विषयारण्यभूमिषु ।
चरत्यत्र न गच्छंतु साधवो ये मुमुक्षवः ॥ १७८ ॥

मनः प्रसूते च भोक्तुः ।
ने नित्यम् ॥ १७९ ॥

असंगचिद्रूपममुं विमोह्य देहेंद्रियप्राणगुणैर्निबध्य ।
अहंममेति मनः स्वकृत्येषु फलोपभुक्तिषु ॥ १८० ॥

संसृतिरध्यासबंधस्त्वमुनैव कल्पितः ।
वेकिनो निदानमेतत् ॥१८१॥

अतः प्राहुर्मनोऽविद्यां पंडितास्तत्त्वदर्शिनः ।
येनैव भ्राम्यते विश्वं ॥ १८२ ॥

कार्यं प्रयत्नेन मुमुक्षुणा ।
विशुद्धे मनि करफलायते ॥ १८३ ॥

मोक्षैकसक्त्या विषयेषु रागं निर्मूल्य संन्यस्य च सर्वकर्म ।
सच्छ्रद्धया यः श्रवणादिनिष्ठो रजःस्वभावं स धुनोति बुद्धेः ॥१८४॥

मनोमयो नापि भवेत्परात्मा ह्याद्यंतवत्त्वात्परिणामिभावात् ।
हि दृश्यात्मतया न दृष्टः ॥ १८५ ॥

बुद्धिर्बुद्धींद्रियैः सार्धं सवृत्तिः ।
स्यात्पुंसः ॥ १८६ ॥

।
दे भृशम् ॥१८७॥

जीवः ।
करोति पुण्यान्यपुण्यानि च तत्फलानि ॥१८८॥

भुंक्ते विचित्रास्वपि योनिषु व्रजन्नायाति ऊर्ध्वमेधः ।
अस्यैव ॥ १८९ ॥

सततं ममेति ।

विज्ञानकोशोऽयमतिप्रकाशः प्रकृष्टसांनिध्यवशात्परात्मनः ।
अतो भवत्येष उपाधिरस्य यदात्मधीः संसरति भ्रमेण ॥ १९० ॥
योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्स्वयंज्योतिः ।
कूटस्थः सन्नात्मा कर्ता भोक्ता भवत्युपाधिस्थः ॥ १९१ ॥
स्वयं परिच्छेदमुपेत्य बुद्धेस्तादात्म्यदोषेण परं मृषात्मनः ।
सर्वात्मकः सन्नपि वीक्षते स्वयं स्वतः पृथक्त्वेन मृदो घटानिव ॥१९२॥
उपाधिसंबंधवशात्परात्माऽप्युपाधिधर्माननुभाति तद्गुणः ।
अयोविकारानविकारिवह्निवत्सदैकरूपोऽपि परः स्वभावात् ॥ १९३ ॥
शिष्य उवाच--
भ्रमेणाप्यन्यथा वास्तु जीवभावः परात्मनः ।
तदुपाधेरनादित्वान्नानादेर्नाश इष्यते ॥ १९४ ॥
अतोऽस्य जीवभावोऽपि नित्यो भवति संसृतिः ।
न निवर्तेत तन्मोक्षः कथं मे श्रीगुरो वद ॥ १९५ ॥

श्रीगुरुरुवाच--
सम्यक्पृष्टं त्वया विद्वन्सावधानेन तच्छृणु ।
प्रामाणिकी न भवति भ्रांत्या मोहितकल्पना ॥ १९६ ॥
भ्रांतिं विना त्वसंगस्य निष्क्रियस्य निराकृतेः ।
न घटेतार्थसंबंधो नभसो नीलतादिवत् ॥ १९७ ॥
स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य
प्रत्यग्बोधानंदरूपस्य बुद्धेः ।
भ्रांत्या प्राप्तो जीवभावो न सत्यो
मोहापाये नास्त्यवस्तु स्वभावात् ॥ १९८ ॥
यावद् भ्रांतिस्तावदेवास्य सत्ता
मिथ्याज्ञानोज्जृंभितस्य प्रमादात् ।
रज्ज्वां सर्पो भ्रांतिकालीन एव

भ्रांतेर्नाशे नैव सर्पोऽपि तद्वत् ॥ १९९ ॥
अनादित्वमविद्यायाः कार्यस्यापि तथेष्यते ।
उत्पन्नायां तु विद्यायामाविद्यकमनाद्यपि ॥ २०० ॥
प्रबोधे स्वप्नवत्सर्वं सहमूलं विनश्यति ।
अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम् ॥ २०१ ॥
अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः ।
यद्बुद्ध्युपाधिसंबंधात्परिकल्पितमात्मनि ॥ २०२ ॥
जीवत्वं न ततोऽन्यत्तु स्वरूपेण विलक्षणम् ।
संबंधः स्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः ॥ २०३ ॥
विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा ।
ब्रह्मात्मैकत्वविज्ञानं सम्यग्ज्ञानं श्रुतेर्मतम् ॥ २०४ ॥
तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति ।
ततो विवेकः कर्तव्यः प्रत्यगात्मासदात्मनोः ॥ २०५ ॥
जलं पंकवदस्पष्टं पंकापाये जलं स्फुटम् ।
यथा भाति तथात्मापि दोषाभावे स्फुटप्रभः ॥ २०६ ॥
असन्निवृत्तौ तु सदात्मनः स्फुटप्रतीतिरेतस्य भवेत्प्रतीचः ।
ततो निरासः करणीय एवासदात्मनः साध्वहमादिवस्तुनः ॥ २०७ ॥
अतो नायं परात्मा स्याद्विज्ञानमयशब्दभाक् ।
विकारित्वाज्जडत्वाच्च परिच्छिन्नत्वहेतुतः ।
दृश्यत्वाद्व्यभिचारित्वान्नानित्यो नित्य इष्यते ॥ २०८ ॥
आनंदप्रतिबिंबचुंबिततनुर्वृत्तिस्तमोजृंभिता
स्यादानंदमयः प्रियादिगुणकः स्वेष्टार्थलाभोदयः ।
पुण्यस्यानुभवे विभाति कृतिनामानंदरूपः स्वयं
भूत्वा नंदति यत्र साधु तनुभृन्मात्रः प्रयत्नं विना ॥ २०९ ॥
आनंदमयकोशस्य सुषुप्तौ स्फूर्तिरुत्कटा ।

स्वप्नजागरयोरीषदिष्टसंदर्शनादिना ॥ २१० ॥
नैवायमानंदमयः परात्मा सोपाधिकत्वात्प्रकृतेर्विकारात् ।
कार्यत्वहेतोः सुकृतक्रियाया विकारसंघातसमाहितत्वात् ॥ २११ ।
पंचानामपि कोशानां निषेधे युक्तितः कृते ।
तन्निषेधावधिः साक्षी बोधरूपोऽवशिष्यते ॥ २१२ ॥
योऽयमात्मा स्वयंज्योतिः पंचकोशविलक्षणः ।
अवस्थात्रयसाक्षी सन्निर्विकारो निरंजनः ।
सदानंदः स विज्ञेयः स्वात्मत्वेन विपश्चिता ॥ २१३ ॥

शिष्य उवाच--

मिथ्यात्वेन निषिद्धेषु कोशेष्वेतेषु पंचसु ।
सर्वाभावं विना किंचिन्न पश्याम्यत्र हे गुरो ।
विज्ञेयं किमु वस्त्वस्ति स्वात्मनात्र विपश्चिता ॥ २१४ ॥

श्रीगुरुरुवाच--

सत्यमुक्तं त्वया विद्वन्निपुणोऽसि विचारणे ।
अहमादिविकारास्ते तदभावोऽयमप्यथ ॥ २१५ ॥
सर्वे येनानुभूयंते यः स्वयं नानुभूयते ।
तमात्मानं वेदितारं विद्धि बुद्ध्या सुसूक्ष्मया ॥ २१६ ॥
तत्साक्षिकं भवेत्तत्तद्यद्येनानुभूयते ।
कस्याप्यननुभूतार्थे साक्षित्वं नोपयुज्यते ॥ २१७ ॥
असौ स्वसाक्षिको भावो यतः स्वेनानुभूयते ।
अतः परं स्वयं साक्षात्प्रत्यगात्मा न चेतरः ॥ २१८ ॥
जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरं योऽसौ समुज्जृंभते
प्रत्यग्रूपतया सदाहमहमित्यंतः स्फुरन्नेकधा ।
नानाकारविकारभाजिन इमान्पश्यन्नहंधीमुखान्
नित्यानंदचिदात्मना स्फुरति तं विद्धि स्वमेतं हृदि ॥ २१९

घटोदके बिंबितमर्कबिंबमालोक्य मूढो रविमेव मन्यते ।
तथा चिदाभासमुपाधिसंस्थं भ्रांत्याहमित्येव जडोऽभिमन्यते ॥२२०॥
घटं जलं तद्गतमर्कबिंबं विहाय सर्वं दिवि वीक्ष्यतेऽर्कः ।
तटस्थ एतत्त्रितयावभासकः स्वयंप्रकाशो विदुषा यथा यथा ॥२२१॥
देहं धियं चित्प्रतिबिंबमेतं विसृज्य बुद्धौ निहितं गुहायाम् ।
द्रष्टारमात्मानमखंडबोधं सर्वप्रकाशं सदसद्विलक्षणम् ॥ २२२ ॥
नित्यं विभुं सर्वगतं सुसूक्ष्ममंतर्बहिः शून्यमनन्यमात्मनः ।
विज्ञाय सम्यङ्निजरूपमेतत्पुमान्विपाप्मा विरजा विमृत्युः ॥२२३॥
विशोक आनंदघनो विपश्चित्स्वयं कुतश्चिन्न बिभेति कश्चित् ।
नान्योऽस्ति पंथा भवबंधमुक्तेर्विना स्वतत्त्वावगमं मुमुक्षोः ॥ २२४ ॥

ब्रह्माभिन्नत्वविज्ञानं भवमोक्षस्य कारणम् ।
येनाद्वितीयमानंदं ब्रह्म संपद्यते बुधैः ॥ २२५ ॥

ब्रह्मभूतस्तु संसृत्यै विद्वान्नावर्तते पुनः ।
विज्ञातव्यमतः सम्यग्ब्रह्माभिन्नत्वमात्मनः ॥ २२६ ॥

सत्यं ज्ञानमनंतं ब्रह्म विशुद्धं परं स्वतः सिद्धम् ।
नित्यानंदैकरसं प्रत्यगभिन्नं निरंतरं जयति ॥ २२७ ॥

सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोऽभावात् ।
नह्यन्यदस्ति किंचित्सम्यक्परमार्थतत्त्वबोधे हि ॥ २२८ ॥

यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात् ।
तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषम् ॥ २२९ ॥

मृत्कार्यभूतोऽपि मृदो न भिन्नः कुंभोऽस्ति सर्वत्र तु मृत्स्वरूपात् ।
न कुंभरूपं पृथगस्ति कुंभः कुतो मृषाकल्पितनाममात्रः ॥ २३० ॥
केनापि मृद्भिन्नतया स्वरूपं घटस्य संदर्शयितुं न शक्यते ।
अतो घटः कल्पित एव मोहान्मृदेव सत्यं परमार्थभूतम् ॥ २३१ ॥
सद्ब्रह्मकार्यं सकलं सदैव तन्मात्रमेतन्न ततोऽन्यदस्ति ।

अस्तीति यो वक्ति न तस्य मोहो विनिर्गतो निद्रितवत्प्रजल्पः ॥२३२
ब्रह्मैवेदं विश्वमित्येव वाणी श्रौती ब्रूतेऽथर्वनिष्ठा वरिष्ठा ।
तस्मादेतद् ब्रह्ममात्रं हि विश्वं नाधिष्ठानाभिन्नतारोपितस्य ॥ २३३ ॥
सत्यं यदि स्याज्जगदेतदात्मनोऽनंतत्वहानिर्निगमाप्रमाणता ।
असत्यवादित्वमपीशितुः स्यान्नैतत्त्रयं साधु हितं महात्मनाम् ॥२३४

ईश्वरो वस्तुतत्त्वज्ञो न चाहं तेष्ववस्थितः ।
नच मत्स्थानि भूतानीत्येवमेव व्यचिक्लृपत् ॥ २३५ ॥
यदि सत्यं भवेद्विश्वं सुषुप्तावुपलभ्यताम् ।
किंचिदतोऽसत्स्वप्नवन्मृषा ॥ २३६ ॥

अतः पृथङ्नास्ति जगत्परात्मनः पृथक्प्रतीतिस्तु मृषा गुणादिवत् ।
आरोपितस्यास्ति किमर्थवत्ताधिष्ठानमाभाति तथा भ्रमेण ॥ २३७ ॥
भ्रांतस्य यद्यद्भ्रमतः प्रतीतं ब्रह्मैव तत्तद्रजतं हि शुक्तिः ।
इदंतया ब्रह्म सदैव रूप्यते त्वारोपितं ब्रह्मणि नाममात्रम् ॥ २३८ ॥
अतः परं ब्रह्म सदद्वितीयं विशुद्धविज्ञानघनं निरंजनम् ।
प्रशांतमाद्यंतविहीनमक्रियं निरंतरानंदरसस्वरूपम् ॥ २३९ ॥
निरस्तमायाकृतसर्वभेदं नित्यं सुखं निष्कलमप्रमेयम् ।
अरूपमव्यक्तमनाख्यमव्ययं ज्योतिः स्वयं किंचिदिदं चकास्ति ॥२४०

ज्ञातृज्ञेयज्ञानशून्यमनंतं निर्विकल्पकम् ।
केवलाखंडचिन्मात्रं परं तत्त्वं विदुर्बुधाः ॥ २४१ ॥
अहेयमनुपादेयं मनोवाचामगोचरम् ।
अप्रमेयमनाद्यंतं ब्रह्म पूर्णं महन्महः ॥ २४२ ॥

तत्त्वंपदाभ्यामभिधीयमानयोर्ब्रह्मात्मनोः शोधितयोर्यदीत्थम् ।
श्रुत्या तयोस्तत्त्वमसीति सम्यगेकत्वमेव प्रतिपाद्यते मुहुः ॥ २४३ ॥

ऐक्यं तयोर्लक्षितयोर्न वाच्ययो-
र्निगद्यतेऽन्योन्यविरुद्धधर्मिणोः ।

खद्योतभान्वोरिव राजभृत्ययोः
॥ २४४ ॥

तयोर्विरोधोऽयमुपाधिकल्पितो न वास्तवः कश्चिदुपाधिरेषः ।
ईशस्य माया महदादि कारणं जीवस्य कार्यं शृणु पंचकोशम् ॥२४५॥
एतावुपाधी परजीवयोस्तयोः सम्यङ् निरासे न परो न जीवः ।
राज्यं नरेंद्रस्य भटस्य खेटकस्तयोरपोहे न भटो न राजा ॥ २४६ ॥
अथात आदेश इति श्रुतिः स्वयं निषेधति ब्रह्मणि कल्पितं द्वयम् ।
करणीय एवम् ॥ २४७ ॥
नेदं नेदं कल्पितत्वान्न सत्यं रज्जौ ।
इत्थं दृश्यं व्यपोह्य ज्ञेयः पश्चादेकभावस्तयोर्यः ॥२४८॥
ततस्तु तौ लक्षणया सुलक्ष्यौ तयोरखंडैकरसत्वसिद्धये ।
नालं जहत्या न तथाऽजहत्या किंतूभयार्थात्मिकयैव भाव्यम् ॥२४९॥
स देवदत्तोऽयमितीह चैकता कथ्यते ।
यथा तथा वाक्ये हित्वा ॥ २५० ॥
संलक्ष्य बुधैः ।
एवं कथ्यते ॥ २५१ ॥
सिद्धं स्वतो व्योमवदप्रतर्क्यम ।
अतो प्रतीतं जहीहि गृहीतम् ।
ब्रह्माहमित्येव विद्धि ॥ २५२ ॥
मृत्कार्यं सकलं घटादि सततं
।
सतः परं किमपि तत्सत्यं स आत्मा स्वयं
प्रशांतममलं ब्रह्माद्वयं यत्परम् ॥ २५३ ॥
सर्वं यथा
मिथ्या जाग्रति ।

यस्मादेवमिदं शरीरकरणप्राणाहमाद्यप्यसत्
तस्मात्तत्त्वमसि प्रशांतममलं ब्रह्माद्वयं यत्परम् ॥ २५४

जातिनीतिकुलगोत्रदूरगं नामरूपगुणदोषवर्जितम् ।
देशकालविषयातिवर्ति यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५५ ॥
यत्परं सकलवागगोचरं गोचरं विमलबोधचक्षुषः ।
शुद्धचिद्घनमनादिवस्तु यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५६ ॥
षड्भिरूर्मिभिरयोगि योगिहृद्भावितं न करणैर्विभावितम् ।
बुद्ध्यवेद्यमनवद्यभूति यद्ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५७ ॥
भ्रांतिकल्पितजगत्कलाश्रयं स्वाश्रयं च सदसद्विलक्षणम् ।
निष्कलं निरुपमानमृद्धिमद् ब्रह्म तत्त्वमसि भावयात्मनि ॥२५८॥
जन्मवृद्धिपरिणत्यपक्षयव्याधिनाशनविहीनमव्ययम् ।
विश्वसृष्ट्यवनघातकारणं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २५९ ॥
अस्तभेदमनपास्तलक्षणं निस्तरंगजलराशिनिश्चलम् ।
नित्यमुक्तमविभक्तमूर्ति यद् ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६० ॥
एकमेव सदनेककारणं कारणांतरनिरासकारणम् ।
कार्यकारणविलक्षणं स्वयं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६१ ॥
निर्विकल्पकमनल्पमक्षरं यत्क्षराक्षरविलक्षणं परम् ।
नित्यमव्ययसुखं निरंजनं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६२ ॥
यद्विभाति सदनेकधा भ्रमान्नामरूपगुणविक्रियात्मना ।
हेमवत्स्वयमविक्रियं सदा ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६३ ॥
यच्चकास्त्यनपरं परात्परं प्रत्यगेकरसमात्मलक्षणम् ।
सत्यचित्सुखमनंतमव्ययं ब्रह्म तत्त्वमसि भावयात्मनि ॥ २६४ ॥
उक्तमर्थमिममात्मनि स्वयं भावय प्रथितयुक्तिभिर्धिया ।
संशयादिरहितं करांबुवत्तेन तत्त्वनिगमो भविष्यति ॥ २६५ ॥
स्वं बोधमात्रं परिशुद्धतत्त्वं विज्ञाय संघे नृपवच्च सैन्ये ।

ञात्मनैवात्मनि सर्वदा स्थितो विलापय ब्रह्मणि ॥२६६ ॥
द्धौ गुहायां सदसद्विलक्षणं ब्रह्मास्ति सत्यं परमद्वितीयम् ।
ञात्मना योऽत्र वसेद्गुहायां पुनर्न तस्यांगगुहाप्रवेशः ॥ २६७ ॥
ज्ञाते वस्तुन्यपि बलवती वासनाऽनादिरेषा
कर्ता दृढा यास्य संसारहेतुः ।
प्रत्यग्दृष्ट्यात्मनि निवसता सापनेया प्रयत्ना
न्मुक्तिं प्राहुस्तदिह मुनयो यत् ॥ २६८ ॥
अहं ममेति यो भावो ।
अध्यासोऽयं निरस्तव्यो विदुषा ॥ २६९ ॥
ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।
सोऽहमित्येव जहि ॥ २७० ॥
त्यक्त्वा त्यक्त्वा देहानुवर्तनम् ।
शास्त्रानुवर्तनं त्यक्त्वा कुरु ॥ २७१ ॥
लोकवासनया जंतोः च ।
देहवासनया ज्ञानं जायते ॥ २७२ ॥
सारकारागृहमोक्षमिच्छोरयोमयं पादनिबद्धशृंखलम् ।
ति तज्ज्ञाः समुपैति मुक्तिम् ॥ २७३ ॥
।
र्षणेनैव विभाति सति बाह्यगंधे ॥ २७४ ॥
ः श्रितानंतदुरंतवासनाधूलीविलिप्ता ।
ातिसंघर्षणतो विशुद्धा प्रतीयते ॥ २७५ ॥
।
तेषां नाशे भाति स्वयं स्फुटा ॥ २७६ ॥
ा यथा प्रत्यगवस्थितं मनस्तथा तथा मुंचति ।
शेषमोक्षे सति प्रतिबंधशून्या ॥ २७७ ॥

स्वात्मन्येव सदा स्थित्या मनो नश्यति योगिनः ।
वासनानां क्षयश्चातः स्वाध्यासापनयं कुरु ॥ २७८ ॥
तमो द्वाभ्यां रजः सत्त्वात्सत्त्वं शुद्धेन नश्यति ।
तस्मात्सत्त्वमवष्टभ्य स्वाध्यासापनयं कुरु ॥ २७९ ॥
प्रारब्धं पुष्यति वपुरिति निश्चित्य निश्चलः ।
धैर्यमालंब्य यत्नेन स्वाध्यासापनयं कुरु ॥ २८० ॥
नाहं जीवः परं ब्रह्मेत्यतद्व्यावृत्तिपूर्वकम् ।
वासनावेगतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८१ ॥
श्रुत्या युक्त्या स्वानुभूत्या ज्ञात्वा सार्वात्म्यमात्मनः ।
क्वचिदाभासतः प्राप्तस्वाध्यासापनयं कुरु ॥ २८२ ॥
अनादानविसर्गाभ्यामीषन्नास्ति क्रिया मुनेः ।
तदेकनिष्ठया नित्यं स्वाध्यासापनयं कुरु ॥ २८३ ॥
तत्त्वमस्यादिवाक्योत्थब्रह्मात्मैकत्वबोधतः ।
स्वाध्यासापनयं कुरु ॥ २८४ ॥
अहंभावस्य देहेऽस्मिन्निःशेषविलयावधि ।
सावधानेन युक्तात्मा स्वाध्यासापनयं कुरु ॥ २८५ ॥
प्रतीतिर्जीवजगतोः स्वप्नवद्भाति यावता ।
तावन्निरंतरं विद्वन्स्वाध्यासापनयं कुरु ॥ २८६ ॥
निद्राया लोकवार्तायाः शब्दादेरपि विस्मृतेः ।
क्वचिन्नावसरं दत्वा चिंतयात्मानमात्मनि ॥ २८७ ॥
मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ।
त्यक्त्वा चांडालवद्दूरं ब्रह्मीभूय कृती भव ॥ २८८ ॥
घटाकाशं महाकाश इवात्मानं परात्मनि ।
विलाप्याखंडभावेन तूष्णीं भव सदा मुने ॥ २८९ ॥
स्वप्रकाशमधिष्ठानं स्वयंभूय सदात्मना ।

ब्रह्मांडमपि पिंडांडं त्यज्यतां मलभांडवत् ॥ २९० ॥
चिदात्मनि सदानंदे देहारूढामहंधियम् ।
निवेश्य लिंगमुत्सृज्य केवलो भव सर्वदा ॥ २९१ ॥
यत्रैष जगदाभासो दर्पणांतः पुरं यथा ।
तद्ब्रह्माहमिति ज्ञात्वा कृतकृत्यो भविष्यसि ॥ २९२ ॥
यत्सत्यभूतं निजरूपमाद्यं चिदद्वयानंदमरूपमक्रियम् ।
तदेत्य मिथ्यावपुरुत्सृजैतच्छैलूषवद्वेषमुपात्तमात्मनः ॥ २९३ ॥
सर्वात्मना दृश्यमिदं मृषैव नैवाहमर्थः क्षणिकत्वदर्शनात् ।
जानाम्यहं सर्वमिति प्रतीतिः कुतोऽहमादेः क्षणिकस्य सिध्येत् ॥ २९४
अहंपदार्थस्त्वहमादिसाक्षी नित्यं सुषुप्तावपि भावदर्शनात् ।
ब्रूते ह्यजो नित्य इति श्रुतिः स्वयं तत्प्रत्यगात्मा सदसद्विलक्षणः ॥२९५
विकारिणां सर्वविकारवेत्ता नित्योऽविकारो भवितुं समर्हति ।
मनोरथस्वप्नसुषुप्तिषु स्फुटं पुनः पुनर्दृष्टमसत्त्वमेतयोः ॥ २९६ ॥
अतोऽभिमानं त्यज मांसपिंडे पिंडाभिमानिन्यपि बुद्धिकल्पिते ।
कालत्रयाबाध्यमखंडबोधं ज्ञात्वा स्वमात्मानमुपैहि शांतिम् ॥ २९७ ॥
त्यजाभिमानं कुलगोत्रनामरूपाश्रमेष्वार्द्रशवाश्रितेषु ।
लिंगस्य धर्मानपि कर्तृतादींस्त्यक्त्वा ॥ २९८ ॥
संत्यन्ये प्रतिबंधाः पुंसः संसारहेतवो दृष्टाः ।
तेषामेकं मूलं प्रथमविकारो भवत्यहंकारः ॥ २९९ ॥
यावत्स्यात्स्वस्य संबधोऽहंकारेण दुरात्मना ।
तावन्न लेशमात्रापि मुक्तिवार्ता विलक्षणा ॥ ३०० ॥
अहंकारग्रहान्मुक्तः स्वरूपमुपपद्यते ।
चंद्रवद्विमलः पूर्णः सदानंदः स्वयंप्रभः ॥ ३०१ ॥
यो वा पुरे सोऽहमिति प्रतीतो बुद्ध्या विक्लृप्तस्तमसातिमूढया ।
तस्यैव निःशेषतया विनाशे ब्रह्मात्मभावः प्रतिबंधशून्यः ॥ ३०२ ॥

ब्रह्मानंदनिधिर्महाबलवताहंकारघोराहिना
संवेष्ट्यात्मनि रक्ष्यते गुणमयैश्चंडैस्त्रिभिर्मस्तकैः ।
विज्ञानाख्यमहासिना द्युतिमता विच्छिद्य शीर्षत्रयं
निर्मूल्याहिमिमं निधिं सुखकरं धीरोऽनुभोक्तुं क्षमः ॥ ३०३॥

यावद्वा यत्किंचिद्विषदोषस्फूर्तिरस्ति चेद्देहे ।
कथमारोग्याय भवेत्तद्वदहंतापि योगिनो मुक्त्यै ॥ ३०४ ॥

अहमोऽत्यंतनिवृत्त्या तत्कृतनानाविकल्पसंहृत्या ।
प्रत्यक्तत्त्वविवेकादयमहमस्मीति विंदते तत्त्वम् ॥ ३०५ ॥

अहंकर्तर्यस्मिन्नहमिति मतिं मुंच सहसा
विकारात्मन्यात्मप्रतिफलजुषि स्वस्थितिमुषि ।
यदध्यासात्प्राप्ता जनिमृतिजरा दुःखबहुलाः
प्रतीचश्चिन्मूर्तेस्तव सुखतनोः संसृतिरियम् ॥ ३०६ ॥

सदैकरूपस्य चिदात्मनो विभोरानंदमूर्तेरनवद्यकीर्तेः ।
नैवान्यथा क्वाप्यविकारिणस्ते विनाहमध्यासममुष्य संसृतिः ॥३०७॥

तस्मादहंकारमिमं स्वशत्रुं भोक्तुर्गले कंटकवत्प्रतीतम् ।
विच्छिद्य विज्ञानमहासिना स्फुटं भुंक्ष्वात्मसाम्राज्यसुखं यथेष्टम् ॥ ३०८ ।

ततोऽहमादेर्विनिवर्त्य वृत्तिं संत्यक्तरागः परमार्थलाभात् ।
तूष्णीं समास्स्वात्मसुखानुभूत्या पूर्णात्मना ब्रह्मणि निर्विकल्पः ॥ ३०९ ।

समूलकृत्तोऽपि महानहं पुनर्व्युल्लेखितः स्याद्यदि चेतसा क्षणम् ।
संजीव्य विक्षेपशतं करोति नभस्वता प्रावृषि वारिदो यथा ॥ ३१० ॥

निगृह्य शत्रोरहमोऽवकाशः क्वचिन्न देयो विषयानुचिंतया ।
स एव संजीवनहेतुरस्य प्रक्षीणजंबीरतरोरिवांबु ॥ ३११ ॥

देहात्मना संस्थित एव कामी विलक्षणः कामयिता कथं स्यात् ।
अतोऽर्थसंधानपरत्वमेव भेदप्रसक्त्या भवबंधहेतुः ॥ ३१२ ॥

कार्यप्रवर्धनाद्बीजप्रवृद्धिः परिदृश्यते ।

निरोधयेत् ॥ ३१३ ॥

कार्यं कार्यवृद्ध्या च वासना।

वर्धते सर्वथा पुंसः संसारो न निवर्तते ॥ ३१४ ॥

तद्द्वयं प्रदहेद्यतिः।

वासनावृद्धिरेताभ्यां चिंतया क्रियया बहिः ॥ ३१५ ॥

ताभ्यां प्रवर्धमाना सा सूते संसृतिमात्मनः।

त्रयाणां च क्षयोपायः सर्वावस्थासु सर्वदा ॥ ३१६ ॥

सर्वत्र सर्वतः सर्वं ।

लयमश्नुते ॥ ३१७ ॥

क्रियानाशे भवेच्चिंतानाशोऽस्माद्वासनाक्षयः।

मोक्षः सा ॥ ३१८ ॥

सद्वासनास्फूर्तिविजृंभणे सति ह्यसौ विलीना त्वहमादिवासना।

अतिप्रकृष्टाप्यरुणप्रभायां विलीयते साधु यथा तमिस्रा ॥ ३१९ ॥

तमस्तमःकार्यमनर्थजालं न दृश्यते सत्युदिते दिनेशे।

नैवास्ति बंधो न च दुःखगंधः ॥ ३२० ॥

दृश्यं प्रतीतं प्रविलापयन्स्वयं विभावयन्।

समाहितः सन्बहिरंतरं वा कालं नयेथाः सति कर्मबंधे ॥ ३२१ ॥

प्रमादो न कर्तव्यः कदाचन।

प्रमादो मृत्युरित्याह सुतः ॥ ३२२ ॥

न ज्ञानिनः ।

ततो मोहस्ततोऽहंधीस्ततो बंधस्ततो व्यथा ॥ ३२३ ॥

दृष्ट्वा विस्मृतिः।

विक्षेपयति धीदोषैर्योषा जारमिव प्रियम् ॥ ३२४ ॥

यथा प्रकृष्टं शैवालं क्षणमात्रं न तिष्ठति।

आवृणोति तथा माया प्राज्ञं वापि ॥ ३२५ ॥

लक्ष्यच्युतं चेद्यदि चित्तमीषद्बहिर्मुखं संनिपतेत्ततस्ततः ।
प्रमादतः प्रच्युतकेलिकंदुकः सोपानपंक्तौ पतितो यथा तथा ॥ ३२६ ॥

विषयेष्वाविशच्चेतः संकल्पयति तद्गुणान् ।
सम्यक्संकल्पनात्कामः कामात्पुंसः प्रवर्तनम् ॥३२७ ॥

ततः स्वरूपविभ्रंशो विभ्रष्टस्तु पतत्यधः ।
पतितस्य विना नाशं पुनर्नारोह ईक्ष्यते ।
संकल्पं वर्जयेत्तस्मात्सर्वानर्थस्य कारणम् ॥ ३२८ ॥

अतः प्रमादान्न परोऽस्ति मृत्युर्विवेकिनो ब्रह्मविदः समाधौ ।
समाहितः सिद्धिमुपैति सम्यक्समाहितात्मा भव सावधानः ॥ ३२९ ॥

जीवतो यस्य कैवल्यं विदेहे च स केवलः ।
यत्किंचित्पश्यतो भेदं भयं ब्रूते यजुःश्रुतिः ॥ ३३० ॥

यदा कदा वापि विपश्चिदेष ब्रह्मण्यनंतेऽप्यणुमात्रभेदम् ।
पश्यत्यथामुष्य भयं तदैव यद्वीक्षितं भिन्नतया प्रमादात् ॥ ३३१ ॥

श्रुतिस्मृतिन्यायशतैर्निषिद्धे दृश्येऽत्र यः स्वात्ममतिं करोति ।
उपैति दुःखोपरि दुःखजातं निषिद्धकर्ता स मलिम्लुचो यथा ॥ ३३२ ॥

सत्याभिसंधानरतो विमुक्तो महत्त्वमात्मीयमुपैति नित्यम् ।
मिथ्याभिसंधानरतस्तु नश्येद् दृष्टं तदेतद्यदचोरचोरयोः ॥ ३३३ ॥

यतिरसदनुसंधिं बंधहेतुं विहाय
स्वयमयमहमस्मीत्यात्मदृष्ट्यैव तिष्ठेत् ।
सुखयति ननु निष्ठा ब्रह्मणि स्वानुभूत्या
हरति परमविद्याकार्यदुःखं प्रतीतम् ॥ ३३४ ॥

बाह्यानुसंधिः परिवर्धयेत्फलं दुर्वासनामेव ततस्ततोऽधिकाम् ।
ज्ञात्वा विवेकैः परिहृत्य बाह्यं स्वात्मानुसंधिं विदधीत नित्यम् ॥ ३३५ ॥

बाह्ये निरुद्धे मनसः प्रसन्नता मनःप्रसादे परमात्मदर्शनम् ।
तस्मिन्सुदृष्टे भवबंधनाशो बहिर्निरोधः पदवी विमुक्तेः ॥ ३३६ ॥

कः पंडितः सन्सदसद्विवेकी श्रुतिप्रमाणः परमार्थदर्शी ।
जानन्हि कुर्यादसतोऽवलंबं स्वपातहेतोः शिशुवन्मुमुक्षुः ॥ ३३७ ॥
देहादिसंसक्तिमतो न मुक्तिर्मुक्तस्य देहाद्यभिमत्यभावः ।
सुप्तस्य नो जागरणं न जाग्रतः स्वप्नस्तयोर्भिन्नगुणाश्रयत्वात् ॥३३८॥
अंतर्बहिः स्वं स्थिरजंगमेषु विलोक्य ।
त्यक्ताखिलोपाधिरखंडरूपः पूर्णात्मना यः स्थित एष मुक्तः ॥३३९॥
सर्वात्मना बंधविमुक्तिहेतुः परोऽस्ति कश्चित् ।
दृश्याग्रहे सत्युपपद्यतेऽसौ सर्वात्मभावोऽस्य ॥३४०॥
दृश्यस्याग्रहणं कथं नु घटते निष्ठतो
कुर्वतः ।

स्तत्त्वज्ञैः करणीयमात्मनि सदानंदेच्छुभिर्यत्नतः ॥ ३४१ ॥
सार्वात्म्यसिद्धये भिक्षोः ।
समाधिं विदधात्येषा शांतो दांत इति श्रुतिः ॥ ३४२ ॥
विनाशः
कर्तुं न शक्यः सहसापि पंडितैः ॥
ये
हि वासनाः ॥ ३४३ ॥
मोहिन्या योजयित्वावृतेर्बलात् ।
विक्षेपशक्तिः पुरुषं विक्षेपयति तद्गुणैः ॥ ३४४ ॥
विक्षेपशक्तिविजयो विषमो विधातुं
।

च ।
निःसंशयेन भवति

निक्षेपणं नहि तदा यदि चेन्मृषार्थे ॥ ३४५ ॥
सम्यग्विवेकः स्फुटबोधजन्यो विभज्य दृग्दृश्यपदार्थतत्त्वम् ।
छिनत्ति मायाकृतमोहबंधं यस्माद्विमुक्तस्य पुनर्न संसृतिः ॥ ३४६ ॥
परावरैकत्वविवेकवह्निर्दहत्यविद्यागहनं ह्यशेषम् ।
किं स्यात्पुनः संसरणस्य बीजमद्वैतभावं समपेयुषोऽस्य ॥ ३४७ ॥
आवरणस्य निवृत्तिर्भवति च सम्यक्पदार्थदर्शनतः ।
मिथ्याज्ञानविनाशस्तद्वद्विक्षेपजनितदुःखनिवृत्तिः ॥ ३४८ ॥
एतत्त्रितयं दृष्टं सम्यग्रज्जुस्वरूपविज्ञानात् ।
तस्माद्वस्तुसतत्त्वं ज्ञातव्यं बंधमुक्तये विदुषा ॥ ३४९ ॥
अयोऽग्नियोगादिव सत्समन्वयान्मात्रादिरूपेण विजृंभते धीः ।
तत्कार्यमेतत्त्रितयं यतो मृषा दृष्टं भ्रमस्वप्नमनोरथेषु ॥ ३५० ॥
ततो विकाराः प्रकृतेरहंमुखा देहावसाना विषयाश्च सर्वे ।
क्षणेऽन्यथाभावितया ह्यमीषामसत्त्वमात्मा तु कदापि नान्यथा ॥ ३५१ ॥
नित्याद्वयाखंडचिदेकरूपो बुद्ध्यादिसाक्षी सदसद्विलक्षणः ।
अहंपदप्रत्ययलक्षितार्थः प्रत्यक्सदानंदघनः परात्मा ॥ ३५२ ॥
इत्थं विपश्चित्सदसद्विभज्य निश्चित्य तत्त्वं निजबोधदृष्ट्या ।
ज्ञात्वा स्वमात्मानमखंडबोधं तेभ्यो विमुक्तः स्वयमेव शाम्यति ॥ ३५३ ॥
अज्ञानहृदयग्रंथेर्निःशेषविलयस्तदा ।
समाधिनाऽविकल्पेन यदाद्वैतात्मदर्शनम् ॥ ३५४ ॥
त्वमहमिदमितीयं कल्पना बुद्धिदोषात्
प्रभवति परमात्मन्यद्वये निर्विशेषे ।
प्रविलसति समाधावस्य सर्वो विकल्पो
विलयनमुपगच्छेद्वस्तुतत्त्वावधृत्या ॥ ३५५ ॥
शांतो दांतः परमुपरतः क्षांतियुक्तः समाधिं
कुर्वन्नित्यं कलयति यतिः स्वस्य सर्वात्मभावम् ।

तेनाविद्यातिमिरजनितान्साधु दग्ध्वा विकल्पान्
ब्रह्माकृत्या निवसति सुखं निष्क्रियो निर्विकल्पः ॥ ३५६ ॥
समाहिता ये प्रविलाप्य बाह्यं श्रोत्रादि चेतः स्वमहं चिदात्मनि ।
त एव मुक्ता भवपाशबंधैर्नान्ये तु पारोक्ष्यकथाभिधायिनः ॥ ३५७
उपाधिभेदात्स्वयमेव भिद्यते चोपाध्यपोहे स्वयमेव केवलः ।
तस्मादुपाधेर्विलयाय विद्वान्वसेत्सदाकल्पसमाधिनिष्ठया ॥ ३५८ ।
सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया ।
कीटको भ्रमरं ध्यायन्भ्रमरत्वाय कल्पते ॥ ३५९ ॥
क्रियांतरासक्तिमपास्य कीटको ध्यायन्यथालिं ह्यलिभावमृच्छति ।
तथैव योगी परमात्मतत्त्वं ध्यात्वा समायाति तदेकनिष्ठया ॥ ३६० ।
अतीव सूक्ष्मं परमात्मतत्वं न स्थूलदृष्ट्या प्रतिपत्तुमर्हति ।
समाधिनात्यंतसुसूक्ष्मवृत्त्या ज्ञातव्यमार्यैरतिशुद्धबुद्धिभिः ॥ ३६१ ।
यथा सुवर्णं पुटपाकशोधितं त्यक्त्वा मलं स्वात्मगुणं समृच्छति ।
तथा मनः सत्त्वरजस्तमोमलं ध्यानेन संत्यज्य समेति तत्त्वम् ॥ ३६२
निरंतराभ्यासवशात्तदित्थं पक्वं मनो ब्रह्मणि लीयते यदा ।
तदा समाधिः स विकल्पवर्जितः स्वतोऽद्वयानंदरसानुभावकः ॥ ३६३
समाधिनाऽनेन समस्तवासनाग्रंथेर्विनाशोऽखिलकर्मनाशः ।
अंतर्बहिः सर्वत एव सर्वदा स्वरूपविस्फूर्तिरयत्नतः स्यात् ॥ ३६४
श्रुतेः शतगुणं विद्यान्मननं मननादपि ।
निदिध्यासं लक्षगुणमनंतं निर्विकल्पकम् ॥ ३६५ ॥
निर्विकल्पकसमाधिना स्फुटं ब्रह्मतत्त्वमवगम्यते ध्रुवम् ।
नान्यथा चलतया मनोगतेः प्रत्ययांतरविमिश्रितं भवेत् ॥ ३६६ ॥
अतः समाधत्स्व यतेंद्रियः सदा निरंतरं शांतमनाः प्रतीचि ।
विध्वंसय ध्वांतमनाद्यविद्यया कृतं सदेकत्वविलोकनेन ॥ ३६७ ॥
योगस्य प्रथमं द्वारं वाङ्निरोधोऽपरिग्रहः ।

देहादावसति त्यजात्मधिषणां प्रज्ञां कुरुष्वात्मनि
त्वं द्रष्टास्यमलोऽसि निर्द्वयपरं ब्रह्मासि यद्वस्तुतः ॥ ३७८ ॥
लक्ष्ये ब्रह्मणि मानसं दृढतरं संस्थाप्य बाह्येंद्रियं
स्वस्थाने विनिवेश्य निश्चलतनुश्चोपेक्ष्य देहस्थितिम् ।
ब्रह्मात्मैक्यमुपेत्य तन्मयतया चाखंडवृत्त्यानिशं
ब्रह्मानंदरसं पिबात्मनि मुदा शून्यैः किमन्यैर्भ्रमैः ॥ ३७९ ॥
अनात्मचिंतनं त्यक्त्वा कश्मलं दुःखकारणम् ।
चिंतयात्मानमानंदरूपं यन्मुक्तिकारणम् ॥ ३८० ॥
एष स्वयंज्योतिरशेषसाक्षी विज्ञानकोशे विलसत्यजस्रम् ।
लक्ष्यं विधायैनमसद्विलक्षणमखंडवृत्त्यात्मतयानुभावय ॥ ३८१ ॥
एतमच्छिन्नया वृत्त्या प्रत्ययांतरशून्यया ।
उल्लेखयन्विजानीयात्स्वस्वरूपतया स्फुटम् ॥ ३८२ ॥
अत्रात्मत्वं दृढीकुर्वन्नहमादिषु संत्यजन् ।
उदासीनतया तेषु तिष्ठेद्घटपटादिवत् ॥ ३८३ ॥
विशुद्धमंतःकरणं स्वरूपे निवेश्य साक्षिण्यवबोधमात्रे ।
शनैः शनैर्निश्चलतामुपानयन्पूर्णं स्वमेवानुविलोकयेत्ततः ॥ ३८४ ॥
देहेंद्रियप्राणमनोऽहमादिभिः स्वाज्ञानक्लृप्तैरखिलैरुपाधिभिः ।
विमुक्तमात्मानमखंडरूपं पूर्णं महाकाशमिवावलोकयेत् ॥ ३८५ ॥
घटकलशकुसूलसूचिमुख्यैर्गगनमुपाधिशतैर्विमुक्तमेकम् ।
भवति न विविधं तथैव शुद्धं परमहमादिविमुक्तमेकमेव ॥ ३८६ ॥
ब्रह्मादिस्तंबपर्यंता मृषामात्रा उपाधयः ।
ततः पूर्णं स्वमात्मानं पश्येदेकात्मना स्थितम् ॥ ३८७ ॥
यत्र भ्रांत्या कल्पितं यद्विवेके तत्तन्मात्रं नैव तस्माद्विभिन्नम् ।
भ्रांतेर्नाशे भ्रांतिदृष्टाहितत्त्वं रज्जुस्तद्वद्विश्वमात्मस्वरूपम् ॥३८८॥
स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिंद्रः स्वयं शिवः ।

स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किंचन ॥ ३८९ ॥

अंतः स्वयं चापि बहिः स्वयं च स्वयं पुरस्तात्स्वयमेव पश्चात् ।
स्वयं ह्यवाच्यां स्वयमप्युदीच्यां तथोपरिष्टात्स्वयमप्यधस्तात् ॥ ३९
तरंगफेनभ्रमबुद्बुदादि सर्वं स्वरूपेण जलं यथा तथा ।
चिदेव देहाद्यहमंतमेतत्सर्वं चिदेवैकरसं विशुद्धम् ॥ ३९१ ॥

सदेवेदं सर्वं जगदवगतं वाङ्मनसयोः
सतोऽन्यन्नास्त्येव प्रकृतिपरसीम्नि स्थितवतः ।
पृथक् किं मृत्स्नायाः कलशघटकुंभाद्यवगतं
वदत्येष भ्रांतस्त्वमहमिति मायामदिरया ॥ ३९२ ॥

क्रियासमभिहारेण यत्र नान्यदिति श्रुतिः ।
ब्रवीति द्वैतराहित्यं मिथ्याध्यासनिवृत्तये ॥ ३९३ ॥

आकाशवन्निर्मलनिर्विकल्पनिःसीमनिष्पंदननिर्विकारम् ।
अंतर्बहिःशून्यमनन्यमद्वयं स्वयं परं ब्रह्म किमस्ति बोध्यम् ॥ ३९३

वक्तव्यं किमु विद्यतेऽत्र बहुधा ब्रह्मैव जीवः स्वयं
ब्रह्मैतज्जगदाततं नु सकलं ब्रह्माद्वितीयं श्रुतेः ।
ब्रह्मैवाहमिति प्रबुद्धमतयः संत्यक्तबाह्याः स्फुटं
ब्रह्मीभूय वसंति संततचिदानंदात्मनैव ध्रुवम् ॥ ३९५ ॥

जहि मलमयकोशेऽहधियोत्थापिताशां
प्रसभमनिलकल्पे लिंगदेहेऽपि पश्चात् ।
निगमगदितकीर्तिं नित्यमानंदमूर्तिं
स्वयमिति परिचीय ब्रह्मरूपेण तिष्ठ ॥ ३९६ ॥

शवाकारं यावद्भजति मनुजस्तावदशुचिः
परेभ्यः स्यात्क्लेशो जननमरणव्याधिनिरयाः ।
यदात्मानं शुद्धं कलयति शिवाकारमचलं
तदा तेभ्यो मुक्तो भवति हि तदाह श्रुतिरपि ॥ ३९७ ॥

स्वात्मन्यारोपिताशेषाभासवस्तुनिरासतः।
स्वयमेव परं ब्रह्म पूर्णमद्वयमक्रियम् ॥ ३९८ ॥

समाहितायां सति चित्तवृत्तौ परात्मनि ब्रह्मणि निर्विकल्पे।
न दृश्यते कश्चिदयं विकल्पः प्रजल्पमात्रः परिशिष्यते ततः ॥३९९॥

असत्कल्पो विकल्पोऽयं विश्वमित्येकवस्तुनि।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०० ॥

द्रष्टृदर्शनदृश्यादिभावशून्यैकवस्तुनि।
निर्विकारे निराकारे निर्विशेषे भिदा कुतः ॥ ४०१ ॥

कल्पार्णव इवात्यंतपरिपूर्णैकवस्तुनि।
[illegible] निराकारे निर्विशेषे भिदा कुतः ॥ ४०२ ॥

तेजसीव तमो यत्र प्रलीनं भ्रांतिकारणम्।
अद्वितीये परे तत्त्वे निर्विशेषे भिदा कुतः ॥ ४०३ ॥

एकात्मके परे तत्त्वे भेदवार्ता कथं वसेत्।
सुषुप्तौ सुखमात्रायां भेदः केनावलोकितः ॥ ४०४ ॥

नह्यस्ति विश्वं परतत्त्वबोधात्सदात्मनि ब्रह्मणि निर्विकल्पे।
कालत्रये नाप्यहिरीक्षितो गुणे नह्यंबुबिंदुर्मृगतृष्णिकायाम् ॥ ४०५ ॥

मायामात्रमिदं द्वैतमद्वैतं परमार्थतः।
इति ब्रूते श्रुतिः साक्षात्सुषुप्तावनुभूयते ॥ ४०६ ॥

[illegible] निरीक्षितम्।
पंडितै रज्जुसर्पादौ विकल्पो भ्रांतिजीवनः ॥ ४०७ ॥

चित्तमूलो विकल्पोऽयं [illegible] न कश्चन।
[illegible] समाधेहि प्रत्यग्रूपे परात्मनि ॥ ४०८ ॥

किमपि सततबोधं केवलानंदरूपं
निरुपममतिवेलं नित्यमुक्तं निरीहम्।
निरवधि गगनाभं निष्कलं निर्विकल्पं

हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४०९ ॥
प्रकृतिविकृतिशून्यं भावनातीतभावं
समरसमसमानं मानसंबंधदूरम् ।
निगमवचनसिद्धं नित्यमस्मत्प्रसिद्धं
हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४१० ॥
अजरममरमस्ताभासवस्तुस्वरूपं
स्तिमितसलिलराशिप्रख्यमाख्याविहीनम् ।
शमितगुणविकारं शाश्वतं शांतमेकं
हृदि कलयति विद्वान्ब्रह्म पूर्णं समाधौ ॥ ४११ ॥
समाहितांतःकरणः स्वरूपे विलोकयात्मानमखंडवैभवम् ।
विच्छिंधि बंधं भवगंधगंधितं यत्नेन पुंस्त्वं सफलीकुरुष्व ॥४१२॥
सर्वोपाधिविनिर्मुक्तं सच्चिदानंदमद्वयम् ।
भावयात्मानमात्मस्थं न भूयः कल्पसेऽध्वने ॥ ४१३ ॥
छायेव पुंसः परिदृश्यमानमाभासरूपेण फलानुभूत्या ।
शरीरमाराच्छववन्निरस्तं पुनर्न संधत्त इदं महात्मा ॥ ४१४ ॥
सततविमलबोधानंदरूपं समेत्य
त्यज जडमलरूपोपाधिमेतं सुदूरे ।
अथ पुनरपि नैष स्मर्यतां वांतवस्तु
स्मरणविषयभूतं कल्पते कुत्सनाय ॥ ४१५ ॥
समूलमेतत्परिदह्य वह्नौ सदात्मनि ब्रह्मणि निर्विकल्पे ।
ततः स्वयं नित्यविशुद्धबोधानंदात्मना तिष्ठति विद्वरिष्ठः ॥ ४१६ ॥
प्रारब्धसूत्रग्रथितं शरीरं प्रयातु वा तिष्ठतु गोरिव स्रक् ।
न तत्पुनः पश्यति तत्त्ववेत्ताऽऽनंदात्मनि ब्रह्मणि लीनवृत्तिः ॥४१७॥
अखंडानंदमात्मानं विज्ञाय स्वस्वरूपतः ।
किमिच्छन्कस्य वा हेतोर्देहं पुष्णाति तत्त्ववित् ॥ ४१८ ॥

संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः ।
बहिरंतः सदानंदरसास्—नि ॥ ४१९ ॥
वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।
स्वानंदानुभवाच्छांतिरेषैवोपरतेः फलम् ॥ ४२० ॥
पूर्वपूर्वं तु निष्फलम् ।
निवृत्तिः परमा तृप्तिरानंदोऽनुपमः स्वतः ॥ ४२१ ॥
दुष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलम् ।
यत्कृतं भ्रांतिवेलायां नानाकर्म जुगुप्सितम् ।
पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति ॥ ४२२ ॥
विद्याफलं स्यादसतो निवृत्तिः प्रवृत्तिरज्ञानफलं तदीक्षितम् ।
नो चेद्विदो दृष्टफलं किमस्मात् ॥४२३॥
अज्ञानहृदयग्रंथेर्विनाशो यद्यशेषतः ।
अनिच्छोर्विषयः किं नु प्रवृत्तेः कारणं स्वतः ॥ ४२४ ॥
वासनानुदयो भोग्ये वैराग्यस्य परोऽवधिः ।
अहंभावोदयाभावो बोधस्य परमोऽवधिः ।
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥ ४२५ ॥
ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधी-
रन्यावेदितभोग्यभोगकलनो निद्रालुवद्बालवत् ।
पश्यन्कचिल्लब्धधी-
रास्ते कश्चिदनंतपुण्यफलभुग्धन्यः स मान्यो भुवि ॥ ४२६ ॥
स्थितप्रज्ञो यतिरयं यः सदानंदमश्नुते ।
ब्रह्मण्येव विलीनात्मा निर्विकारो विनिष्क्रियः ॥ ४२७ ॥
ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ।
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।
सा सर्वदा भवेद्यस्य स्थितप्रज्ञः स उच्यते ॥ ४२८ ॥

यस्य स्थिता भवेत्प्रज्ञा यस्यानंदो निरंतरः ।
प्रपंचो विस्मृतप्रायः स जीवन्मुक्त इष्यते ॥ ४२९ ॥
लीनधीरपि जागर्ति यो जाग्रद्धर्मवर्जितः ।
बोधो निर्वासनो यस्य स जीवन्मुक्त इष्यते ॥ ४३० ॥
शांतसंसारकलनः कलावानपि निष्कलः ।
यस्य चित्तं विनिश्चिंतं स जीवन्मुक्त इष्यते ॥ ४३१ ।
वर्तमानेऽपि देहेऽस्मिञ्छायावदनुवर्तिनि ।
अहंताममताभावो जीवन्मुक्तस्य लक्षणम् ॥ ४३२ ॥
अतीताननुसंधानं भविष्यदविचारणम् ।
औदासीन्यमपि प्राप्ते जीवन्मुक्तस्य लक्षणम् ॥ ४३३
गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे ।
सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३४ ॥
इष्टानिष्टार्थसंप्राप्तौ समदर्शितयाऽऽत्मनि ।
उभयत्राविकारित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३५ ॥
ब्रह्मानंदरसास्वादासक्तचित्ततया यतेः ।
अंतर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥ ४३६ ॥
देहेंद्रियादौ कर्तव्ये ममाहंभाववर्जितः ।
औदासीन्येन यस्तिष्ठेत्स जीवन्मुक्तलक्षणः ॥ ४३७ ॥
विज्ञात आत्मनो यस्य ब्रह्मभावः श्रुतेर्बलात् ।
भवबंधविनिर्मुक्तः स जीवन्मुक्तलक्षणः ॥ ४३८ ॥
देहेंद्रियेष्वहंभाव इदंभावस्तदन्यके ।
यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते ॥ ४३९ ॥
न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः ।
प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः ॥ ४४० ॥
साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेऽपि दुर्जनैः ।

संसिद्धस्य फलं त्वेतज्जीवन्मुक्तस्य योगिनः ।
बहिरंतः सदानंदरसास्वादनमात्मनि ॥ ४१९ ॥
वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।
स्वानंदानुभवाच्छांतिरेषैवोपरतेः फलम् ॥ ४२० ॥
यद्युत्तरोत्तराभावः पूर्वपूर्वं तु निष्फलम् ।
निवृत्तिः परमा तृप्तिरानंदोऽनुपमः स्वतः ॥ ४२१ ॥
दुष्टदुःखेष्वनुद्वेगो विद्यायाः प्रस्तुतं फलम् ।
यत्कृतं भ्रांतिवेलायां नानाकर्म जुगुप्सितम् ।
पश्चान्नरो विवेकेन तत्कथं कर्तुमर्हति ॥ ४२२ ॥
विद्याफलं स्यादसतो निवृत्तिः प्रवृत्तिरज्ञानफलं तदीक्षितम् ।
तज्ज्ञाज्ञयोर्यन्मृगतृष्णिकादौ नो चेद्विदो दृष्टफलं किमस्मात् ॥४२३॥
अज्ञानहृदयग्रंथेर्विनाशो यद्यशेषतः ।
अनिच्छोर्विषयः किं नु प्रवृत्तेः कारणं स्वतः ॥ ४२४ ॥
वासनानुदयो भोग्ये वैराग्यस्य परोऽवधिः ।
अहंभावोदयाभावो बोधस्य परमोऽवधिः ।
लीनवृत्तेरनुत्पत्तिर्मर्यादोपरतेस्तु सा ॥ ४२५ ॥
ब्रह्माकारतया सदा स्थिततया निर्मुक्तबाह्यार्थधी-
रन्यावेदितभोग्यभोगकलनो निद्रालुवद्बालवत् ।
स्वप्नालोकितलोकवज्जगदिदं पश्यन्क्वचिल्लब्धधी-
रास्ते कश्चिदनंतपुण्यफलभुग्धन्यः स मान्यो भुवि ॥ ४२६ ॥
स्थितप्रज्ञो यतिरयं यः सदानंदमश्नुते ।
ब्रह्मण्येव विलीनात्मा [illegible] विनिष्क्रियः ॥ ४२७ ॥
ब्रह्मात्मनोः शोधितयोरेकभावावगाहिनी ।
निर्विकल्पा च चिन्मात्रा वृत्तिः प्रज्ञेति कथ्यते ।
सा सर्वदा भवेद्यस्य स्थितप्रज्ञः स उच्यते ॥ ४२८ ॥

यस्य स्थिता भवेत्प्रज्ञा यस्यानंदो निरंतरः ।
प्रपंचो विस्मृतप्रायः स जीवन्मुक्त इष्यते ॥ ४२९ ॥
लीनधीरपि जागर्ति यो जाग्रद्धर्मवर्जितः ।
बोधो निर्वासनो यस्य स जीवन्मुक्त इष्यते ॥ ४३० ॥
शांतसंसारकलनः कलावानपि निष्कलः ।
यस्य चित्तं विनिश्चिंतं स जीवन्मुक्त इष्यते ॥ ४३१ ॥
वर्तमानेऽपि देहेऽस्मिञ्छायावदनुवर्तिनि ।
अहंताममताभावो जीवन्मुक्तस्य लक्षणम् ॥ ४३२ ॥
अतीताननुसंधानं भविष्यदविचारणम् ।
औदासीन्यमपि प्राप्ते जीवन्मुक्तस्य लक्षणम् ॥ ४३३ ॥
गुणदोषविशिष्टेऽस्मिन्स्वभावेन विलक्षणे ।
सर्वत्र समदर्शित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३४ ॥
इष्टानिष्टार्थसंप्राप्तौ समदर्शितयाऽऽत्मनि ।
उभयत्राविकारित्वं जीवन्मुक्तस्य लक्षणम् ॥ ४३५ ॥
ब्रह्मानंदरसास्वादासक्तचित्ततया यतेः ।
अंतर्बहिरविज्ञानं जीवन्मुक्तस्य लक्षणम् ॥ ४३६ ॥
देहेंद्रियादौ कर्तव्ये ममाहंभाववर्जितः ।
औदासीन्येन यस्तिष्ठेत्स जीवन्मुक्तलक्षणः ॥ ४३७ ॥
विज्ञात आत्मनो यस्य ब्रह्मभावः श्रुतेर्बलात् ।
भवबंधविनिर्मुक्तः स जीवन्मुक्तलक्षणः ॥ ४३८ ॥
देहेंद्रियेष्वहंभाव इदंभावस्तदन्यके ।
यस्य नो भवतः क्वापि स जीवन्मुक्त इष्यते ॥ ४३९ ॥
न प्रत्यग्ब्रह्मणोर्भेदं कदापि ब्रह्मसर्गयोः ।
प्रज्ञया यो विजानाति स जीवन्मुक्तलक्षणः ॥ ४४० ॥
साधुभिः पूज्यमानेऽस्मिन्पीड्यमानेऽपि दुर्जनैः ।

समभावो भवेद्यस्य स जीवन्मुक्तलक्षणः ॥ ४४१ ॥
यत्र प्रविष्टा विषयाः परेरिता नदीप्रवाहा इव वारिराशौ ।
लिनंति सन्मात्रतया न विक्रियामुत्पादयंत्येष यतिर्विमुक्तः ॥४४२॥
विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः ।
अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः ॥ ४४३ ॥
प्राचीनवासनावेगादसौ संसरतीति चेत् ।
न सदेकत्वविज्ञानान्मंदीभवति वासना ॥ ४४४ ॥
अत्यंतकामुकस्यापि वृत्तिः कुंठति मातरि ।
तथैव ब्रह्मणि ज्ञाते पूर्णानंदे मनीषिणः ॥ ४४५ ॥
निदिध्यासनशीलस्य बाह्यप्रत्यय ईक्ष्यते ।
ब्रवीति श्रुतिरेतस्य प्रारब्धं फलदर्शनात् ॥ ४४६ ॥
सुखाद्यनुभवो यावत्तावत्प्रारब्धमिष्यते ।
फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित् ॥ ४४७ ॥
अहं ब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् ।
संचितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥ ४४८ ॥
यत्कृतं स्वप्नवेलायां पुण्यं वा पापमुल्बणम् ।
सुप्तोत्थितस्य किं तत्स्यात्स्वर्गाय नरकाय वा ॥ ४४९ ॥
स्वमसंगमुदासीनं परिज्ञाय नभो यथा ।
न श्लिष्यते यतिः किंचित्कदाचिद्भाविकर्मभिः ॥ ४५० ॥
न नभो घटयोगेन सुरागंधेन लिप्यते ।
तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥ ४५१ ॥
ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति ।
अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥ ४५२ ॥
व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ ।
न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम् ॥ ४५३ ॥

प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः
सम्यग्ज्ञानहुताशनेन विलयः प्राक्संचितागामिनाम् ।
ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थिता-
स्तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम् ॥ ४५४ ॥

उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः ।
प्रारब्धसद्भावकथा न युक्ता स्वप्नार्थसंबंधकथेव जाग्रतः ॥ ४५५ ॥

नहि प्रबुद्धः प्रतिभासदेहे देहोपयोगिन्यपि च प्रपंचे ।
करोत्यहंतां ममतामिदंतां किंतु स्वयं तिष्ठति जागरेण ॥ ४५६ ॥

न तस्य मिथ्यार्थसमर्थनेच्छा न संग्रहस्तज्जगतोऽपि दृष्टः ।
तत्रानुवृत्तिर्यदि चेन्मृषार्थे न निद्रया मुक्त इतीष्यते ध्रुवम् ॥४५७॥

तद्वत्परे ब्रह्मणि वर्तमानः सदात्मना तिष्ठति नान्यदीक्षते ।
स्मृतिर्यथा स्वप्नविलोकितार्थे तथा विदः प्राशनमोचनादौ ॥ ४५८ ॥

कर्मणा निर्मितो देहः प्रारब्धं तस्य कल्प्यताम् ।
नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः ॥ ४५९ ॥

अजो नित्यः शाश्वत इति ब्रूते श्रुतिरमोघवाक् ।
तदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना ॥ ४६० ॥

प्रारब्धं सिध्यति सदा यदा देहात्मना स्थितिः ।
देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः ।
शरीरस्यापि प्रारब्धकल्पना भ्रांतिरेव हि ॥ ४६१ ॥

अध्यस्तस्य कुतः सत्त्वमसत्त्वस्य कुतो जनिः ।
अजातस्य कुतो नाशः प्रारब्धमसतः कुतः ॥ ४६२ ॥

ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि ।
तिष्ठत्ययं कथं देह इति शंकावतो जडान् ।
समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः ॥ ४६३ ॥

न तु देहादिसत्यत्वबोधनाय विपश्चिताम् ।

यतः श्रुतेरभिप्रायः परमार्थैकगोचरः ॥ ४६४ ॥
परिपूर्णमनाद्यंतमप्रमेयमविक्रियम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६५ ॥
सद्घनं चिद्घनं नित्यमानंदघनमक्रियम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६६ ॥
प्रत्यगेकरसं पूर्णमनंतं सर्वतोमुखम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६७ ॥
अहेयमनुपादेयमनाधेयमनाश्रयम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६८ ॥
निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरंजनम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४६९ ॥
अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४७० ॥
सत्समृद्धं स्वतःसिद्धं शुद्धं बुद्धमनीदृशम् ।
एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥ ४७१ ॥

निरस्तरागा विनिरस्तभोगाः शांताः सुदांता यतयो महांतः ।
विज्ञाय तत्त्वं परमे तदंते प्राप्ताः परां निर्वृतिमात्मयोगात् ॥ ४७२ ॥
भवानपीदं परतत्त्वमात्मनः स्वरूपमानंदघनं विचार्य ।
विधूय मोहं स्वमनःप्रकल्पितं मुक्तः कृतार्थो भवतु प्रबुद्धः ॥ ४७३ ॥
समाधिना साधु विनिश्चलात्मना पश्यात्मतत्त्वं स्फुटबोधचक्षुषा ।
निःसंशयं सम्यगवेक्षितश्चेच्छ्रुतः पदार्थो न पुनर्विकल्पते ॥ ४७४ ॥
स्वस्याविद्याबंधसंबंधमोक्षात्सत्यज्ञानानंदरूपात्मलब्धौ ।
शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं चांतःसिद्धा स्वानुभूतिः प्रमाणम् ॥४७५॥

बंधो मोक्षश्च तृप्तिश्च चिंतारोग्यक्षुधादयः ।
स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम् ॥ ४७६ ॥

तटस्थिता बोधयंति गुरवः श्रुतयो यथा ।
प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया ॥ ४७७ ॥

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखंडितम् ।
संसिद्धः सुसुखं तिष्ठेन्निर्विकल्पात्मनात्मनि ॥ ४७८ ॥

वेदांतसिद्धांतनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च ।
अखंडरूपस्थितिरेव मोक्षो ब्रह्माद्वितीयं श्रुतयः प्रमाणम् ॥ ४७९ ॥

इति गुरुवचनाच्छ्रुतिप्रमाणात्परमवगम्य सतत्त्वमात्मयुक्त्या ।
प्रशमितकरणः समाहितात्मा क्वचिदचलाकृतिरात्मनिष्ठितोऽभूत् ॥४८०॥

कंचित्कालं समाधाय परे ब्रह्मणि मानसम् ।
व्युत्थाय परमानंदादिदं वचनमब्रवीत् ॥ ४८१ ॥

बुद्धिर्विनष्टा गलिता प्रवृत्तिर्ब्रह्मात्मनोरेकतयाधिगत्या ।
इदं न जानेऽप्यनिदं न जाने किं वा कियद्वा सुखमस्त्यपारम् ॥ ४८२॥

वाचा वक्तुमशक्यमेव मनसा मंतुं न वा शक्यते
स्वानंदामृतपूरपूरितपरब्रह्मांबुधेर्वैभवम् ।
अंभोराशिविशीर्णवार्षिकशिलाभावं भजन्मे मनो
यस्यांशांशलवे विलीनमधुनानंदात्मना निर्वृतम् ॥ ४८३ ॥

क्व गतं केन वा नीतं कुत्र लीनमिदं जगत् ॥
अधुनैव मया दृष्टं नास्ति किं महदद्भुतम् ॥ ४८४ ॥

किं हेयं किमुपादेयं किमन्यत्किं विलक्षणम् ।
अखंडानंदपीयूषपूर्णे ब्रह्ममहार्णवे ॥ ४८५ ॥

न किंचिदत्र पश्यामि न शृणोमि न वेद्म्यहम् ।
स्वात्मनैव सदानंदरूपेणास्मि विलक्षणः ॥ ४८६ ॥

नमो नमस्ते गुरवे महात्मने विमुक्तसंगाय सदुत्तमाय ।
नित्याद्वयानंदरसस्वरूपिणे भूम्ने सदापारदयांबुधाम्ने ॥ ४८७ ॥

यत्कटाक्षशशिसांद्रचंद्रिकापातधूतभवतापजश्रमः ।

प्राप्तवानहमखंडवैभवानंदमात्मपदमक्षयं क्षणात् ॥ ४८८ ॥

धन्योऽहं कृतकृत्योऽहं विमुक्तोऽहं भवग्रहात् ।
नित्यानंदस्वरूपोऽहं पूर्णोऽहं तदनुग्रहात् ॥ ४८९ ॥

असंगोऽहमनंगोऽहमलिंगोऽहमभंगुरः ।
प्रशांतोऽहमनंतोऽहममलोऽहं चिरंतनः ॥ ४९० ॥

अकर्ताहमभोक्ताहमविकारोऽहमक्रियः ।
शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः ॥ ४९१ ॥

द्रष्टुः श्रोतुर्वक्तुः कर्तुर्भोक्तुर्विभिन्न एवाहम् ।
नित्यनिरंतरनिष्क्रियनिःसीमासंगपूर्णबोधात्मा ॥ ४९२ ॥

नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम् ।
बाह्याभ्यंतरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम् ॥ ४९३ ॥

निरुपममनादितत्त्वं त्वमहमिदमद इति कल्पनादूरम् ।
नित्यानंदैकरसं सत्यं ब्रह्माद्वितीयमेवाहम् ॥ ४९४ ॥

नारायणोऽहं नरकांतकोऽहं पुरांतकोऽहं पुरुषोऽहमीशः ।
अखंडबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहं च निर्ममः ॥४९५॥

सर्वेषु भूतेष्वहमेव संस्थितो ज्ञानात्मनांतर्बहिराश्रयः सन् ।
भोक्ता च भोग्यं स्वयमेव सर्वं यद्यत्पृथग्दृष्टमिदंतया पुरा ॥४९६ ॥

मय्यखंडसुखांभोधौ बहुधा विश्ववीचयः ।
उत्पद्यंते विलीयंते मायामारुतविभ्रमात् ॥ ४९७ ॥

स्थूलादिभावा मयि कल्पिता भ्रमादारोपिता नु स्फुरणेन लोकैः ।
काले यथा कल्पकवत्सरायनर्त्वादयो निष्कलनिर्विकल्पे ॥ ४९८ ॥

आरोपितं नाश्रयदूषकं भवेत्कदापि मूढैर्मतिदोषदूषितैः ।
नार्द्रीकरोत्यूषरभूमिभागं मरीचिकावारिमहाप्रवाहः ॥ ४९९ ॥

आकाशवल्लेपविदूरगोऽहमादित्यवद्भास्यविलक्षणोऽहम् ।
अहार्यवन्नित्यविनिश्चलोऽहमंभोधिवत्पारविवर्जितोऽहम् ॥ ५०० ॥

न मे देहेन संबंधो मेघेनेव विहायसः ।
अतः कुतो मे तद्धर्मा जाग्रत्स्वप्नसुषुप्तयः ॥ ५०१ ॥
उपाधिरायाति स एव गच्छति स एव कर्माणि करोति भुंक्ते ।
स एव जीर्यन्म्रियते सदाहं ———————— एव संस्थितः ॥ ५०२ ॥
न मे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य ।
एकात्मको यो निबिडो निरंतरो व्योमेव पूर्णः स कथं नु चेष्टते ५०३॥
पुण्यानि पापानि निरिंद्रियस्य निश्चेतसो निर्विकृतेर्निराकृतेः ।
कुतो ममाखंडसुखानुभूतेर्ब्रूते ह्यनन्वागतमित्यपि श्रुतिः ॥ ५०४ ॥
छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुष्ठु वा ।
न स्पृशत्येव यत्किंचित्पुरुषं तद्विलक्षणम् ॥ ५०५ ॥
न साक्षिणं साक्ष्यधर्माः संस्पृशंति विलक्षणम् ।
अविकारमुदासीनं गृहधर्माः प्रदीपवत् ।
देहेंद्रियमनोधर्मा नैवात्मानं स्पृशन्त्यहो ॥ ५०६ ॥
रवेर्यथा कर्मणि साक्षिभावो वह्नेर्यथा दाहनियामकत्वम् ।
रज्जोर्यथारोपितवस्तुसंगस्तथैव कूटस्थचिदात्मनो मे ॥ ५०७ ॥
कर्तापि वा कारयितापि नाहं भोक्तापि वा भोजयितापि नाहम् ।
द्रष्टापि वा दर्शयितापि नाहं सोऽहं स्वयंज्योतिरनीदृगात्मा ॥ ५०८ ॥
चलत्युपाधौ प्रतिबिंबलौल्यमौपाधिकं मूढधियो नयंति ।
स्वबिंबभूतं रविवद्विनिष्क्रियं कर्तास्मि भोक्तास्मि हतोऽस्मि हेति ५०९
जले वापि स्थले वापि लुठत्वेष जडात्मकः ।
नाहं विलिप्ये तद्धर्मैर्घटधर्मैर्नभो यथा ॥ ५१० ॥
कर्तृत्वभोक्तृत्वखलत्वमत्तताजडत्वबद्धत्वविमुक्ततादयः ।
बुद्धेर्विकल्पा न तु संति वस्तुतः स्वस्मिन्परे ब्रह्मणि केवलेऽद्वये ॥५११
संतु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि ।
तैः किं मेऽसङ्गचितेर्न स्पृशति ॥ ५१२ ॥

अव्यक्तादि स्थूलपर्यंतमेतद्विश्वं यत्राभासमात्रं प्रतीतम् ।
व्योमप्रख्यं सूक्ष्ममाद्यंतहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१३ ॥
सर्वाधारं सर्ववस्तुप्रकाशं सर्वाकारं सर्वगं सर्वशून्यम् ।
नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१४ ॥
यत्प्रत्यस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम् ।
सत्यज्ञानानंतमानंदरूपं ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥ ५१५ ॥
निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः ।
निर्विकल्पोऽस्मि नित्योऽस्मि निरालंबोऽस्मि निर्द्वयः ॥ ५१६ ॥

सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः ।
केवलाखंडबोधोऽहमानंदोऽहं निरंतरः ॥ ५१७ ॥

स्वाराज्यसाम्राज्यविभूतिरेषा भवत्कृपाश्रीमहिमप्रसादात् ।
प्राप्ता मया श्रीगुरवे महात्मने नमो नमस्तेऽस्तु पुनर्नमोऽस्तु ॥५१८॥

महास्वप्ने मायाकृतजनिजरामृत्युगहने
भ्रमंतं क्लिश्यंतं बहुलतरतापैरनुदिनम् ।
अहंकारव्याघ्रव्यथितमिममत्यंतकृपया
प्रबोध्य प्रस्वापात्परमवितवान्मामसि गुरो ॥ ५१९ ॥

नमस्तस्मै सदेकस्मै कस्मैचिन्महसे नमः ।
यदेतद्विश्वरूपेण राजते गुरुराज ते ॥ ५२० ॥

इति नतमवलोक्य शिष्यवर्यं समधिगतात्मसुखं प्रबुद्धतत्त्वम् ।
प्रमुदितहृदयः स देशिकेंद्रः पुनरिदमाह वचः परं महात्मा ॥५२१॥

ब्रह्मप्रत्ययसंततिर्जगदतो ब्रह्मैव सत्सर्वतः
पश्याध्यात्मदृशा प्रशांतमनसा सर्वास्ववस्थास्वपि ।
रूपादन्यदवेक्षितुं किमभितश्चक्षुष्मतां दृश्यते
तद्वद्ब्रह्मविदः सतः किमपरं बुद्धेर्विहारास्पदम् ॥५२२॥

कस्तां परानंदरसानुभूतिमुत्सृज्य शून्येषु रमेत विद्वान् ।

चंद्रे महाह्लादिनि दीप्यमाने चित्रेंदुमालोकयितुं क इच्छेत् ॥५२३॥
असत्पदार्थानुभवे न किंचिन्न ह्यस्ति तृप्तिर्न च दुःखहानिः ।
तदद्वयानंदरसानुभूत्या तृप्तः सुखं तिष्ठ सदात्मनिष्ठया ॥ ५२४ ॥

स्वमेव सर्वथा पश्यन्मन्यमानः स्वमद्वयम् ।
स्वानंदमनुभुंजानः कालं नय महामते ॥ ५२५ ॥

अखंडबोधात्मनि निर्विकल्पे विकल्पनं व्योम्नि पुरः प्रकल्पनम् ।
तदद्वयानंदमयात्मना सदा शांतिं परामेत्य भजस्व मौनम् ॥ ५२६ ॥
तूष्णीमवस्था परमोपशांतिर्बुद्धेरसत्कल्पविकल्पहेतोः ।
ब्रह्मात्मना ब्रह्मविदो महात्मनो यत्राद्वयानंदसुखं निरंतरम् ॥५२७॥

नास्ति निर्वासनान्मौनात्परं सुखकृदुत्तमम् ।
विज्ञातात्मस्वरूपस्य स्वानंदरसपायिनः ॥ ५२८ ॥
गच्छंस्तिष्ठन्नुपविशञ्छयानो वान्यथापि वा ।
यथेच्छं च वसेद्विद्वानात्मारामः सदा मुनिः ॥ ५२९ ॥

न देशकालासनदिग्यमादिलक्ष्याद्यपेक्षा प्रतिबद्धवृत्तेः ।
संसिद्धतत्त्वस्य महात्मनोऽस्ति स्ववेदने का नियमाद्यपेक्षा ॥५३०॥

घटोऽयमिति विज्ञातुं नियमः कोऽन्वपेक्ष्यते ।
विना प्रमाणसुष्ठुत्वं यस्मिन्सति पदार्थधीः ॥ ५३१ ॥
अयमात्मा नित्यसिद्धः प्रमाणे सति भासते ।
न देशं नापि वा कालं न शुद्धिं वाप्यपेक्षते ॥ ५३२ ॥
देवदत्तोऽहमित्येतद्विज्ञानं निरपेक्षकम् ।
तद्वद्ब्रह्मविदोऽप्यस्य ब्रह्माहमिति वेदनम् ॥ ५३३ ॥
भानुनेव जगत्सर्वं भासते यस्य तेजसा ।
अनात्मकमसत्तुच्छं किं नु तस्यावभासकम् ॥ ५३४ ॥
वेदशास्त्रपुराणानि भूतानि सकलान्यपि ।
येनार्थवंति तं किं नु विज्ञातारं प्रकाशयेत् ॥ ५३५ ॥

एष स्वयंज्योतिरनंतशक्तिरात्माऽप्रमेयः सकलानुभूतिः ।
यमेव विज्ञाय विमुक्तबंधो जयत्ययं ब्रह्मविदुत्तमोत्तमः ॥ ५३६
न खिद्यते नो विषयैः प्रमोदते न सज्जते नापि विरज्यते च ।
स्वस्मिन्सदा क्रीडति नंदति स्वयं निरंतरानंदरसेन तृप्तः ॥ ५३

क्षुधां देहव्यथां त्यक्त्वा बालः क्रीडति वस्तुनि ।
तथैव विद्वान् रमते निर्ममो निरहं सुखी ॥ ५३८ ॥

चिंताशून्यमदैन्यभैक्षमशनं पानं सरिद्वारिषु
स्वातंत्र्येण निरंकुशा स्थितिरभीर्निद्रा श्मशाने वने ।
वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही
संचारो निगमांतवीथिषु विदां क्रिडा परे ब्रह्मणि ॥ ५३

विमानमालंब्य शरीरमेतद्भुनक्त्यशेषान्विषयानुपस्थितान् ।
परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिंगोऽननुषक्तबाह्यः ॥ ५४
दिगंबरो वापि च सांबरो वा त्वगंबरो वापि चिदंबरस्थः ।
उन्मत्तवद्वापि च बालवद्वा पिशाचवद्वापि चरत्यवन्याम् ॥ ५४१

कामान्नी कामरूपी संश्चरत्येकचरो मुनिः ।
स्वात्मनैव सदा तुष्टः स्वयं सर्वात्मना स्थितः ॥ ५४२ ॥

क्वचिन्मुढो विद्वान्क्वचिदपि महाराजविभवः ।
क्वचिद्भ्रांतः सौम्यः क्वचिदजगराचारकलितः ।
क्वचित्पात्रीभूतः क्वचिदवमतः क्वाप्यविदित-
श्चरत्येवं प्राज्ञः सततपरमानंदसुखितः ॥ ५४३ ॥

निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः ।
नित्यतृप्तोऽप्यभुंजानोऽप्यसमः समदर्शनः ॥ ५४४ ॥

अपि कुर्वन्नकुर्वाणश्चाभोक्ता फलभोग्यपि ।
शरीर्यप्यशरीर्येष परिच्छिन्नोऽपि सर्वगः ॥ ५४५ ॥

अशरीरं सदा संतमिमं ब्रह्मविदं क्वचित् ।

प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे ॥ ५४६ ॥
स्थूलादिसंबंधवतोऽभिमानिनः सुखं च दुःखं च शुभाशुभे च ।
विध्वस्तबंधस्य सदात्मनो मुनेः कुतः शुभं वाप्यशुभं फलं वा ॥५४७॥
तमसा ग्रस्तवद्भानादग्रस्तोऽपि रविर्जनैः ।
ग्रस्त इत्युच्यते भ्रांत्या ह्यज्ञात्वा वस्तुलक्षणम् ॥ ५४८ ॥
तद्वद्देहादिबंधेभ्यो विमुक्तं ब्रह्मवित्तमम् ।
पश्यंति देहिवन्मूढाः शरीराभासदर्शनात् ॥ ५४९ ॥
अहिनिर्ल्वयनीवाऽयं मुक्तदेहस्तु तिष्ठति ।
इतस्ततश्चाल्यमानो यत्किंचित्प्राणवायुना ॥ ५५० ॥
स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम् ।
दैवेन नीयते देहो यथाकालोपभुक्तिषु ॥ ५५१ ॥
प्रारब्धकर्मपरिकल्पितवासनाभिः
संसारिवच्चरति भुक्तिषु मुक्तदेहः ।
सिद्धः स्वयं वसति साक्षिवदत्र तूष्णीं
चक्रस्य मूलमिव कल्पविकल्पशून्यः ॥ ५५२ ॥
नैवेंद्रियाणि विषयेषु नियुंक्त एष
नैवापयुंक्त उपदर्शनलक्षणस्थः ।
नैव क्रियाफलमपीषदपेक्षते स
स्वानंदसांद्ररसपानसुमत्तचित्तः ॥ ५५३ ॥
लक्ष्यालक्ष्यगतिं त्यक्त्वा यस्तिष्ठेत्केवलात्मना ।
शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः ॥ ५५४ ॥
जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः ।
उपाधिनाशाद्ब्रह्मैव सद्ब्रह्माप्येति निर्द्वयम् ॥ ५५५ ॥
शैलूषो वेषसद्भावाभावयोश्च यथा पुमान् ।
तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः ॥ ५५६ ॥

यत्र क्वापि विशीर्णं सत्पर्णमिव तरोर्वपुः पतनात् ।
ब्रह्मीभूतस्य यतेः प्रागेव हि तच्चिदग्निना दग्धम् ॥ ५५७ ॥

सदात्मनि ब्रह्मणि तिष्ठतो मुनेः पूर्णाद्वयानंदमयात्मना सदा ।
न देशकालाद्युचितप्रतीक्षा त्वङ्मांसविट्पिंडविसर्जनाय ॥ ५५८ ॥

देहस्य मोक्षो नो मोक्षो न दंडस्य कमंडलोः ।
अविद्याहृदयग्रंथिमोक्षो मोक्षो यतस्ततः ॥ ५५९ ॥

कुल्यायामथ नद्यां वा शिवक्षेत्रेऽपि चत्वरे ।
पर्णं पतति चेत्तेन तरोः किं नु शुभाशुभम् ॥ ५६० ॥

पत्रस्य पुष्पस्य फलस्य नाशवद्देहेंद्रियप्राणधियां विनाशः ।
नैवात्मनः स्वस्य सदात्मकस्यानंदाकृतेर्वृक्षवदास्त एषः ॥ ५६१ ॥

प्रज्ञानघन इत्यात्मलक्षणं सत्यसूचकम् ।
अनूद्यौपाधिकस्यैव कथयंति विनाशनम् ॥ ५६२ ॥

अविनाशी वा अरेऽयमात्मेति श्रुतिरात्मनः ।
प्रब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु ॥ ५६३ ॥

पाषाणवृक्षतृणधान्यकटांबराद्या
दग्धा भवंति हि मृदेव यथा तथैव ।
देहेंद्रियासुमनआदि समस्तदृश्यं
ज्ञानाग्निदग्धमुपयाति परात्मभावम् ॥ ५६४ ॥

विलक्षणं यथा ध्वांतं लीयते भानुतेजसि ।
तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते ॥ ५६५ ॥

घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम् ।
तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित्स्वयम् ॥ ५६६ ॥

क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले ।
संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः ॥ ५६७ ॥

एवं विदेहकैवल्यं सन्मात्रत्वमखंडितम् ।

ब्रह्मभावं प्रपद्यैष यतिर्नावर्तते पुनः ॥ ५६८ ॥
सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः ।
अमुष्य ब्रह्मभूतत्वाद्ब्रह्मणः कुत उद्भवः ॥ ५६९ ॥
मायाक्लृप्तौ बंधमोक्षौ न स्तः स्वात्मनि वस्तुतः ।
यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ ॥ ५७० ॥
नावृतेः सदसत्त्वाभ्यां वक्तव्ये बंधमोक्षणे ।
नावृतिर्ब्रह्मणः काचिदन्याभावादनावृतम् ।
यद्यस्त्यद्वैतहानिः स्याद्द्वैतं नो सहते श्रुतिः ॥ ५७१ ॥
बंधं च मोक्षं च मृषैव मूढा बुद्धेर्गुणं वस्तुनि कल्पयंति ।
दृगावृतिं मेघकृतां यथा रवौ यतोऽद्वयासंगचिदेकमक्षरम् ॥ ५७२ ॥
अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि ।
बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः ॥ ५७३ ॥
अतस्तौ मायया क्लृप्तौ बंधमोक्षौ न चात्मनि ।
निष्कले निष्क्रिये शांते निरवद्ये निरंजने ॥
अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः ॥ ५७४ ॥
न निरोधो न चोत्पत्तिर्न बंधो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ५७५ ॥
सकलनिगमचूडास्वांतसिद्धांतरूपं
परमिदमतिगुह्यं दर्शितं ते मयाद्य ।
अपगतकलिदोषं कामनिर्मुक्तबुद्धिं
स्वसुतवदसकृत्त्वा भावयित्वा मुमुक्षुम् ॥ ५७६ ॥
इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृतानतिः ।
स तेन समनुज्ञातो ययौ निर्मुक्तबंधनः ॥ ५७७ ॥
गुरुरेवं सदानंदसिंधौ निर्मग्नमानसः ।
पावयन्वसुधां सर्वां विचचार निरंतरम् ॥ ५७८ ॥

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥ ५७९ ॥

हितमिममुपदेशमाद्रियंतां विहितनिरस्तसमस्तचित्तदोषाः ।
भवसुखविरताः प्रशांतचित्ताः श्रुतिरसिका यतयो मुमुक्षवो ये ॥५८०॥

संसाराध्वनि तापभानकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकांक्षया मरुभुवि श्रांत्या परिभ्राम्यताम् ।
अत्यासन्नसुधांबुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्त्येषा शंकरभारती विजयते निर्वाणसंदायिनी ॥ ५८१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ विवेकचूडामणिः समाप्तः ॥

श्रीमच्छंकराचार्यप्रणीता

उपदेशसाहस्री ।

(गद्यप्रबंधः प्रथमो भागः ।)

शिष्यप्रतिबोधविधिप्रकरणम् ॥ १ ॥

अथ मोक्षसाधनोपदेशविधिं व्याख्यास्यामो मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय ॥ १ ॥

तदिदं मोक्षसाधनं ज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रवित्तलोकैषणाय प्रतिपन्नपरमहंसपारिव्राज्याय शमदमदयादियुक्ताय शास्त्रप्रसिद्धशिष्यगुणसंपन्नाय शुचये ब्राह्मणाय विधिवदुपसन्नाय शिष्याय जातिकर्मवृत्तविद्याभिजनैः परीक्षिताय ब्रूयात् पुनःपुनः यावद्ग्रहणं दृढीभवति ॥ २ ॥

श्रुतिश्च — ' परीक्ष्य लोकान्...तत्त्वतो ब्रह्मविद्याम्— ' इति । दृढगृहीता हि विद्या आत्मनः श्रेयसे संतत्यै च भवति । विद्यासंततिश्च प्राण्यनुग्रहाय भवति, नौरिव नदीं तितीर्षोः । शास्त्रं च—'यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यात् एतदेव ततो भूयः ' इति । अन्यथा च ज्ञानप्राप्त्यभावात्—' आचार्यवान् पुरुषो वेद', ' आचार्याद्धैव विद्या विदिता ', ' आचार्यः प्लावयिता तस्य सम्यग्ज्ञानं प्लव इहोच्यते ' इत्यादिश्रुतिभ्यः, 'उपदेक्ष्यंति ते ज्ञानं ' इत्यादिस्मृतेश्च ॥ ३ ॥

शिष्यस्य ज्ञानाग्रहणं च लिंगैर्बुद्ध्वा अग्रहणे हेतून् अधर्मलौकिकप्रमादनित्यानित्यविवेकविषयासंजातदृढपूर्वश्रुतत्वलोकचिंतावेक्षणजात्याद्यभिमानादीन्

तत्प्रतिपक्षैः श्रुतिस्मृतिविहितैः अपनयेत् अक्रोधादिभिरहिंसादिभिश्च यमैः, ज्ञानाविरुद्धैश्च नियमैः ॥ ४ ॥

अमानित्वादिगुणं च ज्ञानोपायं सम्यक् ग्राहयेत् ॥ ५ ॥

आचार्यस्तु ऊहापोहग्रहणधारणशमदमदयानुग्रहादिसंपन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तः त्यक्तसर्वकर्मसाधनो ब्रह्मवित् ब्रह्मणि स्थितोऽभिन्नवृत्तो दंभदर्पकुहकशाठ्यमायामात्सर्यानृताहंकारममत्वादिदोषवर्जितः । केवलपरानुग्रहप्रयोजनो विद्योपयोगार्थी । पूर्वमुपदिशेत्—'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं,' 'यत्र नान्यत्पश्यति,' 'आत्मैवेदं सर्वम्', 'आत्मा वा इदमेक एवाग्र आसीत्', 'सर्वं खल्विदं ब्रह्म' इत्याद्याः आत्मैक्यप्रतिपादनपराः श्रुतीः ॥६॥

उपदिश्य च ग्राहयेत् ब्रह्मणो लक्षणम्—'य आत्माऽपहतपाप्मा,' 'यत्साक्षादपरोक्षाद्ब्रह्म,' 'योऽशनायापिपासे,' 'नेति नेति,' 'अस्थूलमनणु,' 'स एष नेति,' 'अदृष्टं द्रष्टृ,' 'विज्ञानमानंदम्,' 'सत्यं ज्ञानमनंतम्,' 'अदृश्येऽनात्म्ये,' 'स वा एष महाजन आत्मा,' 'अप्राणो ह्यमनाः,' 'सबाह्याभ्यन्तरो ह्यजः,' 'विज्ञानघन एव,' 'अनन्तरमबाह्यम्,' 'अन्यदेव तद्विदितादथो अविदितात्,' 'आकाशो वै नाम' इत्यादिश्रुतिभिः ॥ ७ ॥

स्मृतिभिश्च—'न जायते म्रियते वा,' 'नादत्ते कस्यचित्पापम्,' 'यथाऽऽकाशस्थितो नित्यम्,' 'क्षेत्रज्ञं चापि मां विद्धि,' 'न सत्तन्नासदुच्यते' 'अनादित्वान्निर्गुणत्वात्' 'समं सर्वेषु भूतेषु' 'उत्तमः पुरुषस्त्वन्यः' इत्यादिभिः श्रुत्युक्तलक्षणाविरुद्धाभिः परमात्मासंसारित्वप्रतिपादनपराभिः तस्य सर्वेणानन्यत्वप्रतिपादनपराभिश्च ॥ ८ ॥

एवं श्रुतिस्मृतिभिः गृहीतपरमात्मलक्षणं शिष्यं संसारसागरादुत्तितीर्षुं पृच्छेत् कस्त्वमसि सोम्येति ॥ ९ ॥

स यदि ब्रूयात्—ब्राह्मणपुत्रः अदोन्वयः ब्रह्मचार्यासम्—गृहस्थो वा,

इदानीमस्मि परमहंसपरिव्राट् संसारसागरात् जन्ममृत्युमहाग्राहात् उत्तितीर्षु-रिति ॥ १० ॥

आचार्यो ब्रूयात्--इहैव तव सोम्य मृतस्य शरीरं वयोभिरद्यते मृद्भावं वापद्यते, तत्र कथं संसारसागरादुत्तर्तुमिच्छसीति । नहि नद्याः अवरे कूले भस्मीभूतो नद्याः पारं तरिष्यसीति ॥ ११ ॥

स यदि ब्रूयात्--अन्योऽहं शरीरात् । शरीरं तु जायते, म्रियते, वयोभिरद्यते, शस्त्राग्न्यादिभिश्च विनाश्यते, व्याध्यादिभिश्च प्रयुज्यते । तस्मिन् अहं स्वकृतधर्माधर्मवशात् पक्षी नीडमिव प्रविष्टः पुनःपुनः शरीरविनाशे धर्माधर्मवशात् शरीरांतरं यास्यामि, पूर्वनीडविनाशे पक्षीव नीडांतरम् । एवमेवाहमनादौ संसारे देवमनुष्यतिर्यङ्निरयस्थानेषु पूर्वकर्मवशादुपात्तमुपात्तं शरीरं त्यजन् नवं नवं च अन्यदुपाददानो, जन्ममरणप्रबंधचक्रे घटीयंत्रवत् स्वकर्मणा भ्राम्यमाणः, क्रमेणेदं शरीरमासाद्य, संसारचक्रभ्रमणात् अस्मान्निर्विण्णो, भगवंतमुपसन्नोऽस्मि संसारचक्रभ्रमणप्रशमनाय। तस्मान्नित्य एवाहं शरीरादन्यः, शरीराणि आगच्छंत्यपगच्छंति च वासांसीव पुरुषस्येति ॥ १२ ॥

आचार्यो ब्रूयात्--साध्ववादीः सम्यक्पश्यसि । कथं मृषाऽवादीः ब्राह्मणपुत्रोऽदोन्वयो ब्रह्मचार्यासम् , गृहस्थो वा, इदानीमस्मि परमहंसपरिव्राडिति ॥ १३ ॥

स यदि ब्रूयात्--भगवन् , कथमहं मृषाऽवादिषमिति ॥ १४ ॥

तं प्रति ब्रूयादाचार्यः--यतस्त्वं भिन्नजात्यन्वयसंस्कारं शरीरं जात्यन्वयसंस्कारवर्जितस्यात्मनः प्रत्यभ्यज्ञासीः ब्राह्मणपुत्रोऽदोन्वय इत्यादिना वाक्येनेति ॥ १५ ॥

स यदि पृच्छेत्--कथं भिन्नजात्यन्वयसंस्कारं शरीरं, कथं वा अहं जात्यन्वयसंस्कारवर्जित इति ॥ १६ ॥

आचार्यो ब्रूयात्--शृणु सोम्य, यथदं शरीरं त्वत्तो भिन्नं भिन्नजात्यन्वय-

संस्कारं, त्वं च जात्यन्वयसंस्कारवर्जितः इत्युक्त्वा तं स्मारयेत् स्मर्तुमर्हसि सोम्य, परमात्मानं सर्वात्मानं यथोक्तलक्षणं श्रावितोऽसि 'सदेव सोम्येदम्' इत्यादिभिः श्रुतिभिः स्मृतिभिश्च । लक्षणं च तस्य श्रुतिभिः स्मृतिभिश्च ॥ १७ ॥

लब्धपरमात्मलक्षणस्मृतये ब्रूयात्—योऽसावाकाशनामा नामरूपाभ्यामर्थान्तरभूतः, अशरीरः, अस्थूलादिलक्षणः, अपहतपाप्मत्वादिलक्षणश्च, सर्वैः संसारधर्मैः अनागंधितः 'यत्साक्षादपरोक्षाद्ब्रह्म,' 'य आत्मा सर्वांतरः' 'अदृष्टे द्रष्टा अश्रुतः श्रोता अमतो मंता अविज्ञातो विज्ञाता' नित्यविज्ञानस्वरूपः अनंतरः, अबाह्यः, विज्ञानघन एव, परिपूर्णः आकाशवत्, अनंतशक्तिः आत्मा सर्वस्य, अशनायादिवर्जितः, आविर्भावतिरोभाववर्जितश्च, स्वात्मविलक्षणयोः नामरूपयोः जगद्बीजभूतयोः स्वात्मस्थयोः तत्त्वान्यत्वाभ्यामनिर्वचनीययोः स्वसंवेद्ययोः सद्भावमात्रेणाचिंत्यशक्तित्वाद्व्याकर्ता अव्याकृतयोः ॥ १८ ॥

ते नामरूपे अव्याकृते सती व्याक्रियमाणे तस्मादेतस्मादात्मन आकाशनामाकृती संवृत्ते । तच्चाकाशाख्यं भूतमनेन प्रकारेण परमात्मनः संभूतं प्रसन्नादिव सलिलान्मलमिव फेनम् । न सलिलं न च सलिलादत्यंतभिन्नं फेनम् सलिलव्यतिरेकेणादर्शनात् । सलिलं तु स्वच्छं अन्यत्फेनान्मलरूपात् । एवं परमात्मा नामरूपाभ्यामन्यः फेनस्थानीयाभ्यां, शुद्धः प्रसन्नः तद्विलक्षणः । ते नामरूपे अव्याकृते सती व्याक्रियमाणे फेनस्थानीये आकाशनामाकृते संवृत्ते ॥ १९ ॥

ततोऽपि स्थूलभावमापद्यमाने नामरूपे व्याक्रियमाणे वायुभावमापद्येते ततोऽप्यग्निभावं, अग्नेरब्भावं, ततः पृथ्वीभावं, इत्येवक्रमेण पूर्वपूर्वभवस्योत्तरोत्तरानुप्रवेशेन पंच महाभूतानि पृथिव्यंतान्युत्पन्नानि । ततः पंचगुणविशिष्टा पृथ्वी । पृथ्व्याश्च पंचात्मक्यो व्रीहियवाद्या ओषधयो जायन्ते । ताभ्यो भक्षिताभ्यो लोहितं च शुक्रं च स्त्रीपुंसशरीरसंबंधि जायते । तदुभयमृतुकाले

अविद्याप्रयुक्तकामखजनिर्मथनोद्धृतं मंत्रसंस्कृतं गर्भाशये निषिच्यते । तत्स्वयोनिरसानुप्रवेशेन विवर्धमानं गर्भीभूतं नवमे दशमे वा मासि संजायते ॥ २० ॥

तज्जातं लब्धनामाकृतिकं जातकर्मादिभिः मंत्रसंस्कृतं पुनः उपनयनसंस्कारयोगेण ब्रह्मचारिसंज्ञं भवति । तदेव शरीरं पत्नीसंयोगसंस्कारयोगेण गृहस्थसंज्ञं भवति । तदेव वनस्थसंस्कारेण तापससंज्ञं भवति । तदेव क्रियाविनिवृत्तिनिमित्तसंस्कारेण परिव्राट्संज्ञं भवति । इत्येवं त्वत्तो भिन्नं भिन्नजात्यन्वयसंस्कारं शरीरम् ॥ २१ ॥

मनश्चेंद्रियाणि च नामरूपात्मकान्येव 'अन्नमयं हि सोम्य मनः' इत्यादिश्रुतिभ्यः ॥ २२ ॥

कथं चाहं भिन्नजात्यन्वयसंस्कारवर्जित इत्येतच्छृणु—योऽसौ नामरूपयोर्व्याकर्ता नामरूपधर्मविलक्षणः स एव नामरूपे व्याकुर्वन् सृष्ट्वेदं शरीरं स्वयं संस्कारधर्मवर्जितो नामरूपे इह प्रविष्टः अन्यैरदृष्टः स्वयं पश्यन् तथाऽश्रुतः शृण्वन्— अमतो मन्वानः — अविज्ञातो विजानन् 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते' इति । अस्मिन्नर्थे श्रुतयः सहस्रशः 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'अंतः प्रविष्टः शास्ता जनानाम्', 'स एष इह प्रविष्टः', 'एष त आत्मा', 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत', 'एष सर्वेषु भूतेषु गूढोऽऽत्मा', 'सेयं देवतैक्षत हंताहमिमास्तिस्रो देवताः' इत्याद्याः ॥ २३ ॥

स्मृतयोऽपि 'आत्मैव देवताः सर्वाः', 'नवद्वारे पुरे देही', 'क्षेत्रज्ञं चापि मां विद्धि', 'समं सर्वेषु भूतेषु', 'उपद्रष्टानुमंता च', 'उत्तमः पुरुषस्त्वन्यः', 'अशरीरं शरीरेषु', इत्याद्याः । तस्मात् जात्यन्वयसंस्कारवर्जितस्त्वमिति सिद्धम् ॥ २४ ॥

स यदि ब्रूयात्— अन्य एवाहमज्ञः सुखी दुःखी बद्धः संसारी — अन्योऽसौ मद्विलक्षणः असंसारी देवः, तमहं बल्युपहारनमस्कारादिभिः वर्णाश्रमकर्म-

भिश्चाराध्य संसारसागरादुत्तितीर्षुरस्मि, कथमहं स एवेति ॥ २५ ॥

आचार्यो ब्रूयात्---'नैवं सोम्य प्रतिपत्तुमर्हसि, प्रतिषिद्धत्वाद्भेदप्रतिपत्तेः'। कथं प्रतिषिद्धा भेदप्रतिपत्तिरित्यत आह--- 'अन्योऽसावन्योऽहमस्मीति न स वेद', 'ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इत्येवमाद्याः ॥ २६ ॥

एता एव श्रुतयो भेदप्रतिपत्तेः संसारगमनं दर्शयन्ति ॥ २७ ॥

अभेदप्रतिपत्तेश्च मोक्षं दर्शयंति सहस्रशः। 'स आत्मा तत्त्वमसि' इति परमात्मभावं विधाय 'आचार्यवान्पुरुषो वेद' इत्युक्त्वा 'तस्य तावदेव चिरम्' इति मोक्षं दर्शयंत्यभेदविज्ञानादेव। सत्याभिसंधस्यातस्करस्येव दाहाद्यभावदृष्टांतेन---संसाराभावं दर्शयंति। भेददर्शनादसत्याभिसंधस्य संसारगमनं दर्शयंति तस्करस्येव दाहादिदृष्टांतेन ॥ २८ ॥

'त इह व्याघ्रो वा' इत्यादिना च अभेददर्शनात् 'स स्वराट् भवति' इत्युक्त्वा तद्विपरीतेन भेददर्शनेन संसारगमनं दर्शयंति---'अथ येऽन्यथाऽतो विदुरन्यराजानस्ते क्षय्यलोका भवंति' इति प्रतिशाखम्। तस्मात् मृषैवैवमवादीः ब्राह्मणपुत्रोऽदोन्वयः संसारी परमात्मविलक्षण इति ॥ २९ ॥

तस्मात् प्रतिषिद्धत्वाद्भेददर्शनस्य, भेदविषयत्वाच्च कर्मोपादानस्य, कर्मसाधनत्वाच्च यज्ञोपवीतादेः कर्मसाधनोपादानस्य परमात्माऽभेदप्रतिपत्त्या प्रतिषेधः कृतो वेदितव्यः। कर्मणां तत्साधनानां च यज्ञोपवीतादीनां परमात्माऽभेदप्रतिपत्तिविरुद्धत्वात्। संसारिणो हि कर्माणि विधीयंते तत्साधनानि च यज्ञोपवीतादीनि। न परमात्मनोऽभेददर्शिनः। भेददर्शनमात्रेण च ततोऽन्यत्वम् ॥ ३० ॥

यदि कर्माणि कर्तव्यानि न निवर्तयिषितानि कर्मसाधनासंबंधिनः कर्मनिमित्तजात्याश्रमाद्यसंबंधिनश्च, परमात्मनश्च आत्मनैवाभेदप्रतिपत्तिं नावक्ष्यत्

'स आत्मा तत्त्वमसि' इत्येवमादिभिर्निश्चितरूपैर्वाक्यैः, भेदप्रतिपत्तिनिंदां च नाभ्यधास्यत् 'एष नित्यो महिमा ब्राह्मणस्य', 'अनन्वागतं पुण्येनानन्वागतं पापेन', 'अत्र स्तेनोऽस्तेनः' इत्यादिना ॥ ३१ ॥

कर्मासंबंधिस्वरूपत्वं कर्मनिमित्तवर्णाद्यसंबंधरूपतां च नाभ्यधास्यत् कर्माणि च कर्मसाधनानि च यज्ञोपवीतादीनि यद्यपरितित्याजयिषितानि । तस्मात् ससाधनं कर्म परित्यक्तव्यं मुमुक्षुणा परमात्माऽभेददर्शनविरोधात् । आत्मा च पर एवेति प्रतिपत्तव्यो यथाश्रुत्युक्तलक्षणः ॥ ३२ ॥

स यदि ब्रूयात्—भगवन्, दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदना, अशनायादिनिमित्तं च प्रत्यक्षं दुःखं मम । परश्चायमात्मा, 'अयमात्माऽपहतपाप्मा विरजो विमृत्युर्विशोको विजिघत्सोऽपिपासः' सर्वगंधरसवर्जितः श्रूयते सर्वश्रुतिषु स्मृतिषु च । कथं तद्विलक्षणः अनेकसंसारधर्मसंयुक्तः परमात्मानमात्मत्वेन च मां संसारिणं परमात्मत्वेन अग्निमिव शीतत्वेन प्रतिपद्येय? संसारी च सन् सर्वाभ्युदयनिःश्रेयससाधने अधिकृतः, अभ्युदयनिःश्रेयससाधनानि कर्माणि तत्साधनानि च यज्ञोपवीतादीनि कथं परित्यजेयमिति ॥ ३३ ॥

तं प्रति ब्रूयात्—यदवोचो दह्यमाने छिद्यमाने वा देहे प्रत्यक्षा वेदनोपलभ्यते ममेति, तदसत् । कस्मात्? दह्यमाने छिद्यमान इव वृक्षे उपलब्धुरुपलभ्यमाने कर्मणि शरीरे दाहच्छेदवेदनाया उपलभ्यमानत्वात् दाहादिसमानाश्रयैव वेदना । यत्र हि दाहः छेदो वा क्रियते तत्रैव व्यपदिशति दाहादिवेदनां लोकः, न वेदनां दाहाद्युपलब्धरीति । कथं? क्व ते वेदनेति पृष्टः शिरसि मे वेदना उरसि उदरे इति वा यत्र दाहादिस्तत्रैव व्यपदिशति, न तूपलब्धरीति । यद्युपलब्धरि वेदना स्यात् वेदनानिमित्तं वा दाहच्छेदादि वेदनाश्रयत्वेनोपदिशेद्दाहाद्याश्रयवत् ॥ ३४ ॥

स्वयं च नोपलभ्येत चक्षुर्गतरूपवत् । तस्मात् दाहच्छेदादिसमानाश्रयत्वेन कर्मभूतैव वेदना । भावरूपत्वाच्च साश्रया

तंडुलपाकवत् । वेदनासमानाश्रय एव तत्संस्कारः । स्मृतिसमानकाल एवोपलभ्यमानत्वात् । वेदनाविषयः तन्निमित्तविषयश्च द्वेषोऽपि संस्कारसमानाश्रय एव । तथा चोक्तम् 'रूपसंस्कारतुल्याऽऽधी रागद्वेषौ भयं च यत् । गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धोऽभयः सदा' ॥ ३५ ॥

किमाश्रयाः पुनः रूपादिसंस्कारादय इति । उच्यते—यत्र कामादयः । क्व पुनस्ते कामादयः ? 'कामः संकल्पो विचिकित्सा' इत्यादिश्रुतेः बुद्धावेव । तत्रैव रूपादिसंस्कारादयोऽपि 'कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदये' इति श्रुतेः । 'कामा येऽस्य हृदि श्रिताः', 'तीर्णो हि यदा सर्वान् शोकान् हृदयस्य', 'असंगो ह्ययम्', 'तद्वा अस्यैतदतिच्छंदाः' इत्यादिश्रुतिभ्यः, 'अविकार्योऽयमुच्यते', 'अनादित्वान्निर्गुणत्वात्' इत्यादिभ्यः, इच्छाद्वेषादि च क्षेत्रस्यैव विषयस्य धर्मो नात्मन इति स्मृतिभ्यश्च, कर्मस्थैवाशुद्धिः नात्मस्था इति ॥ ३६ ॥

अतो रूपादिसंस्काराद्यशुद्धिसंबंधाभावात् न परस्मादात्मनो विलक्षणत्वमिति प्रत्यक्षादिविरोधाभावात् युक्तं पर एवात्माऽहमिति प्रतिपत्तुम्—'तदात्मानमेवावेदहं ब्रह्माऽस्मि', 'एकधैवानुद्रष्टव्यम्', 'अहमेवाऽधस्तात्', 'आत्मैवाऽधस्तात्', 'सर्वमात्मानं पश्येत्', 'यत्र त्वस्य सर्वमात्मैव', 'इदं सर्वं यदयमात्मा', 'स एषोऽकलः', 'अनंतरमबाह्यम्', 'सबाह्याभ्यंतरो ह्यजः', 'ब्रह्मैवेदम्', 'एतया द्वारा प्रापद्यत', 'प्रज्ञानस्य नामधेयानि', 'सत्यं ज्ञानमनंतं ब्रह्म', 'तस्माद्वा एतस्मात्', 'तत्सृष्ट्वा तदेवानुप्राविशत्', 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी', 'अशरीरं शरीरेषु', 'न जायते म्रियते', स्वप्नांतं जागरितांतम्', 'स म आत्मेति विद्यात्', 'यस्तु सर्वाणि भूतानि', 'तदेजति तन्नैजति', 'वेनस्तत्पश्यन्', 'तदेवाग्निः', 'अहं मनुरभवं सूर्यश्च', 'अंतः प्रविष्टः शास्ता जनानाम्,' 'सदेव सोम्य', 'तत्सत्यं स आत्मा तत्त्वमसि' इत्यादिश्रुतिभ्यः ॥३७॥

स्मृतिभ्यश्च 'पूः प्राणिनः सर्व एव गुहाशयस्य', 'आत्मैव देवताः',

'नवद्वारे पुरे', 'समं सर्वेषु भूतेषु,' 'विद्याविनयसंपन्ने,' 'अविभक्तं विभक्तेषु,' 'वासुदेवः सर्वम्' इत्यादिभ्यः एक एवात्मा परं ब्रह्म सर्वसंसारधर्मविनिर्मुक्तस्त्वमिति सिद्धम् ॥ ३८ ॥

स यदि ब्रूयात्--यदि भगवन्, 'अनंतरोऽबाह्यः' 'सबाह्याभ्यंतरो ह्यजः' 'कृत्स्नः प्रज्ञानघन एव' सैंधवघनवदात्मा सर्वमूर्तिभेदवर्जितः आकाशवदेकरसः, तर्हि किमिदं दृश्यते वा साध्यं साधनं वा साधकश्चेति श्रुतिस्मृतिलोकप्रसिद्धं वादिशतविप्रतिपत्तिविषय इति ॥ ३९ ॥

आचार्यो ब्रूयात्--अविद्याकृतमेतद्यदिदं दृश्यते श्रूयते वा, साध्यं साधनं साधकश्चेति परमार्थतस्त्वेक एवात्मा, अविद्यादृष्टेः अनेकवत् आभासते, तिमिरदृष्ट्या अनेकचंद्रवत् । 'यत्र वा अन्यदिव स्यात्,' 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति', 'मृत्योः स मृत्युमाप्नोति', 'अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पं अथ यदल्पं तन्मर्त्यमिति', 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्', 'अन्योऽसावन्योऽहम्' इति भेददर्शननिन्दोपपत्तेरविद्याकृतं द्वैतम् 'एकमेवाऽद्वितीयम्', 'यत्र त्वस्य', 'को मोहः कः शोकः' इत्याद्येकत्वविधिश्रुतिभ्यश्चेति ॥ ४० ॥

यद्येवं भगवन्, किमर्थं श्रुत्या साध्यसाधनादिभेद उच्यते उत्पत्तिः प्रलयश्चेति ? ॥ ४१ ॥

अत्रोच्यते--अविद्यावतः उपात्तशरीरादिभेदस्य इष्टानिष्टयोगिनमात्मानं मन्यमानस्य साधनैरेवेष्टानिष्टप्राप्तिपरिहारोपायविवेकमजानतः इष्टप्राप्तिं चानिष्टपरिहारं चेच्छतः शनैस्तद्विषयमज्ञानं निवर्तयितुं शास्त्रं, न साध्यसाधनादिभेदं विधत्ते, अनिष्टरूपः संसारो हि स इति । तद्भेददृष्टिमेवाविद्यां संसारमूलमुन्मूलयति उत्पत्तिप्रलयाद्येकत्वोपपत्तिप्रदर्शनेन ॥ ४२ ॥

अविद्यायामुन्मूलितायां श्रुतिस्मृतिन्यायेभ्यः 'अनंतरमबाह्यम्', 'सबाह्याभ्यंतरो ह्यजः', 'सैंधवघनवत्', 'प्रज्ञानघन एवैकरस आत्मा', 'आकाशव

स्परिपूर्णः ' इत्यत्रैव एका प्रज्ञा प्रतिष्ठा परमार्थदर्शिनो भवति । न साध्य-साधनोत्पत्तिप्रलयादिभेदेन अशुद्धिगंधोऽप्युपपद्यते ॥ ४३ ॥

तच्चैतत् परमार्थदर्शनं प्रतिपत्तुमिच्छता वर्णाश्रमाद्यभिमानकृतपांक्तरूप-पुत्रवित्तलोकैषणादिभ्यो व्युत्थानं कर्तव्यम् । सम्यक्प्रत्ययविरोधात्तदभिमानस्य । भेददर्शनप्रतिषेधार्थोपपत्तिश्चोपपद्यते । नह्येकस्मिन्नात्मन्यसंसारित्वबुद्धौ शास्त्र-न्यायोत्पादितायां तद्विपरीता बुद्धिर्भवति । नह्यग्नौ शीतत्वबुद्धिः, शरीरे वा अजरामरणबुद्धिः । तस्मादविद्याकार्यत्वात् सर्वकर्मणां तत्साधनानां च यज्ञोपवीता-दीनां परमार्थदर्शननिष्ठेन त्यागः कर्तव्यः ॥ ४४ ॥

कूटस्थाद्वयात्मबोधप्रकरणम् ॥ २ ॥

सुखमासीनं ब्राह्मणं ब्रह्मनिष्ठं कश्चिद्ब्रह्मचारी जन्ममरणलक्षणात् संसारात् निर्विण्णो मुमुक्षुः विधिवदुपसन्नः पप्रच्छ---भगवन्, कथमहं संसारान्मोक्षिष्ये शरीरेंद्रियविषयवेदनावान् ? जागरिते दुःखमनुभवामि तथा स्वप्नेऽनुभवामि च पुनः पुनः सुषुप्तिप्रतिपत्त्या विश्रम्य विश्रम्य । किमयमेव मम स्वभावः, किंवा अन्यस्वभावस्य सतो नैमित्तिकः इति । यदि अयमेव स्वभावः, न मे मोक्षाशा, स्वभावस्यावर्जनीयत्वात् । अथ नैमित्तिकः, निमित्तपरिहारे स्यान्मोक्षोपपत्तिः ॥ ४५ ॥

तं गुरुरुवाच ---शृणु वत्स, न तवायं स्वभावः । किंतु नैमित्तिकः ॥ ४६ ॥

इति उक्तः शिष्य उवाच---किं निमित्तं, किं वा तस्य निवर्तकम्, को वा मम स्वभावः यस्मिन्निमित्ते निवर्तिते नैमित्तिकाभावः रोगनिमित्तनिवृत्ताविव रोगी स्वभावं प्रतिपद्येयेति ॥ ४७ ॥

गुरुरुवाच---अविद्या निमित्तं, विद्या तस्या निवर्तिका । अविद्यायां निवृ-त्तायां तन्निमित्ताभावात् मोक्ष्यसे जन्ममरणलक्षणात् संसारात् । स्वप्नजाग्रद्दुःखं च नानुभविष्यसीति ॥ ४८ ॥

शिष्य उवाच—का सा अविद्या, किंविषया वा, विद्या च का अविद्यानिवर्तिका यया स्वभावं प्रतिपद्येयेति ॥ ४९ ॥

गुरुरुवाच—त्वं परमात्मानं संतं असंसारिणं संसार्यहमस्मीति विपरीतं प्रतिपद्यसे, अकर्तारं संतं कर्तेति, अभोक्तारं संतं भोक्तेति, विद्यमानं च अविद्यमानमिति । इयमविद्या ॥ ५० ॥

शिष्य उवाच— यद्यप्यहं विद्यमानः तथापि न परमात्मा । कर्तृत्वभोक्तृत्वलक्षणः संसारो मम स्वभावः, प्रत्यक्षादिभिः प्रमाणैः अनुभूयमानत्वात् न अविद्यानिमित्तः अविद्यायाः आत्मविषयत्वानुपपत्तेः । अविद्या नाम अन्यस्मिन् अन्यधर्माध्यारोपणा, यथा प्रसिद्धं रजतं प्रसिद्धायां शुक्तिकायां, यथा प्रसिद्धं पुरु स्थाणावध्यारोपयति, प्रसिद्धं वा स्थाणुं पुरुषे । नाप्रसिद्धं प्रसिद्धे प्रसिद्धं व अप्रसिद्धे । न चात्मन्यनात्मानमध्यारोपयति आत्मनः अप्रसिद्धत्वात् । तथ आत्मानं अनात्मनि आत्मनोऽप्रसिद्धत्वादेव ॥ ५१ ॥

तं गुरुरुवाच—न, व्यभिचारात् । नहि वत्स, प्रसिद्धं प्रसिद्ध एवाध्यरोपयतीति नियंतु शक्यम् । आत्मन्यध्यारोपणदर्शनात् । गौरोऽहं कृष्णोऽहमि देहधर्मस्य अहंप्रत्ययविषये आत्मनि, अहंप्रत्ययविषयस्य च आत्मनः देहे अ महमस्मीति ॥ ५२ ॥

शिष्य आह—प्रसिद्ध एव तर्ह्यात्मा अहंप्रत्ययविषयतया देहश्च अयमिति तत्रैवं सति प्रसिद्धयोरेव देहात्मनोरितरेतराध्यारोपणा स्थाणुपुरुषयोः शुक्तिव रजतयोरिव । तत्र कं विशेषमाश्रित्य भगवतोक्तं प्रसिद्धयोरितरेतराध्यारोपणे नियंतुं न शक्यते इति ॥ ५३ ॥

गुरुराह—शृणु । सत्यं प्रसिद्धौ देहात्मानौ । नतु स्थाणुपुरुषाविव विवि प्रत्ययविषयतया सर्वलोकप्रसिद्धौ । कथं तर्हि ? नित्यमेव निरंतराविविक्तप्रत्य विषयतया । नहि अयं देहः, अयमात्मा, इति विविक्ताभ्यां प्रत्ययाभ्यां देहात्म गृह्णाति यः कश्चित् । अत एव हि मोमुह्यते लोकः आत्मानात्मविषये, ।

मात्मा नैवात्मा इति । इत्थं विशेषमात्रमप्यवोच नैव निरूपयितुं शक्यमिति ॥ ५४ ॥

ननु [illegible] यत्र यत् तदस्मिन् तत्र दृष्टं, यथा रजतं शुक्तिकायां, स्थाणौ पुरुषः, रज्ज्वां सर्पः, आकाशे तलमलिनत्वमित्यादि । तथा [illegible] नित्यमेव निरंतराविच्छिन्नप्रत्ययतया इतरेतराध्यारोपणा कृता स्यात् । [illegible] नित्यमेव असत्त्वं स्यात् । यथा शुक्तिकादिषु अविद्याध्यारोपितानां रजतादीनां नित्यमेव [illegible] तद्विपरीतानां च विपरीतेषु, तद्वत् [illegible] इतरेतराध्यारोपणा कृता स्यात् । एवं च सति देहात्मनोरसत्त्वं प्रसज्येत । तच्चानिष्टं [illegible] । अथ तद्विपर्ययेण देहः आत्मन्यविद्ययाऽध्यारोपितः देहस्यात्मनि सति असत्त्वं प्रसज्येत । तच्चानिष्टं [illegible] । तस्माद्देहात्मानौ नाविद्यया इतरेतरस्मिन् अध्यारोपितौ । कथं तर्हि, [illegible] ॥ ५५ ॥

न । अनित्यत्वपरार्थत्वप्रसंगात् । संहतत्वात् परार्थत्वं अनित्यत्वं च वंशा- [illegible] । किंच यस्तु परैर्देहेन संहतः कल्पित आत्मा स संहतत्वात् परार्थः । तेन असंहतः परोऽन्यो नित्यः [illegible] ॥ ५६ ॥

तस्यासंहतस्य देहे [illegible] अध्यारोपितत्वेन असत्त्वानित्यत्वादिदोषप्रसंगो भवति । तत्र निरात्मको देह इति वैनाशिकपक्षप्राप्तिदोषः स्यात् ॥ ५७ ॥

न । स्वत एवात्मनः आकाशस्येव असंहतत्वाभ्युपगमात् । [illegible] स च आत्मेति न निरात्मको देहादिः सर्वः स्यात् । यथा च आकाशं सर्वेणासंहतमिति सर्वं न निराकाशं भवति एवम् । तस्मान्न [illegible] स्यात् ॥ ५८ ॥

यत्पुनरुक्तं [illegible] प्रत्यक्षादिविरोधः स्यादिति । तन्न । प्रत्यक्षादिभिः आत्मनि देहस्य [illegible] । नह्यात्मनि कुंडे बदरं क्षीरे सर्पिः

तिले तैलं भित्तौ चित्रमिव च प्रत्यक्षादिभिः देह उपलभ्यते । तस्मान्न प्रत्यक्षादि-विरोधः ॥ ५९ ॥

कथं तर्हि प्रत्यक्षाद्यप्रसिद्धात्मनि देहाध्यारोपणा, देहे च आत्मा-रोपणा ? ॥ ६० ॥

नायं दोषः । स्वभावप्रसिद्धत्वादात्मनः । नहि कादाचित्कसिद्धावेव अध्या-रोपणा न नित्यसिद्धौ इति नियंतुं शक्यं, आकाशे तलमलाद्यध्यारोपणदर्श-नात् ॥ ६१ ॥

किं भगवन्, देहात्मनोः इतरेतराध्यारोपणा देहादिसंघातकृता अथवा आत्मकृतेति ॥ ६२ ॥

गुरुरुवाच — यदि देहादिसंघातकृता यदि वा आत्मकृता किं तत्र स्यात् ? ॥ ६३ ॥

इत्युक्तः शिष्य आह— यद्यहं देहादिसंघातमात्रः ततो ममाचेतनत्वात् परार्थत्वमिति न मत्कृता देहात्मनोः इतरेतराध्यारोपणा । अथाहमात्मा परोऽन्यः संघातात् चितिमत्त्वात् स्वार्थ इति मयैव चितिमता आत्मनि अध्यारोपणा क्रियते सर्वानर्थबीजभूता ॥ ६४ ॥

इत्युक्तो गुरुरुवाच—अनर्थबीजभूतां चेत् मिथ्याध्यारोपणां जानीषे, मा कार्षीस्तर्हि ॥ ६५ ॥

नैव भगवन्, शक्नोमि न कर्तुम् । अन्येन केनचित् प्रयुक्तोऽहं न स्वतंत्र इति ॥ ६६ ॥

न तर्हि अचितिमत्त्वात् स्वार्थः त्वम् । येन प्रयुक्तः अस्वतंत्रः प्रवर्तसे स चितिमान् स्वार्थः । संघात एव त्वम् ॥ ६७ ॥

यद्यचेतनोऽहं कथं सुखदुःखवेदना भवदुक्तं च जानामि ॥ ६८ ॥

गुरुरुवाच— किं सुखदुःखवेदनाया मदुक्ताच्चान्यस्त्वं, किं वा अनन्य एवेति ॥ ६९ ॥

शिष्य उवाच— नाहं तावदनन्यः । कस्मात् ? यस्मात्तदुभयं कर्मभूतं

घटादिकमिव जानामि । यद्यनन्योऽहं तेन तदुभयं न जानीयां, किंतु जानामि, तस्मादन्यः । सुखदुःखवेदनाविक्रिया च स्वार्थैव प्राप्नोति, त्वदुक्तं च स्यात् अनन्यत्वे । न च तयोः स्वार्थता युक्ता । नहि चंदनकंटककृते सुखदुःखे चंदनकंटकार्थे, घटोपयोगो वा घटार्थः । तस्मात् तद्विज्ञातुर्मम चंदनादिकृतः अर्थः । अहं हि ततोऽन्यः समस्तमर्थं जानामि बुद्ध्यारूढम् ॥ ७० ॥

तं गुरुरुवाच—— एवं तर्हि स्वार्थस्त्वं चितिमत्त्वान्न परेण प्रयुज्यसे । नहि चितिमान् परतंत्रः परेण प्रयुज्यते——चितिमतश्चितिमदर्थत्वानुपपत्तेः समत्वात्प्रदीपप्रकाशयोरिव । नापि अचितिमदर्थत्वं चितिमतो भवति, अचितिमतोऽचितिमत्त्वादेव स्वार्थसंबंधानुपपत्तेः । नापि अचितिमतोः अन्योन्यार्थत्वं दृष्टम् । नहि काष्ठकुडये अन्योन्यार्थं कुर्वाते ॥ ७१ ॥

ननु चितिमत्त्वे समेऽपि भृत्यस्वामिनोः अन्योन्यार्थत्वं दृष्टम् ॥ ७२ ॥

नैवं —अग्नेरुष्णप्रकाशवत् तव चितिमत्त्वस्य विवक्षितत्वात् । प्रदर्शितश्च दृष्टांतः प्रदीपप्रकाशयोरिवेति । तत्रैवं सति स्वबुद्ध्यारूढमेव सर्वमुपलभसे अग्न्युष्णप्रकाशतुल्येन कूटस्थनित्यचैतन्यस्वरूपेण । यदि चैवमात्मनः सर्वदा निर्विशेषत्वमुपगच्छसि, किमित्यूचिवान् सुषुप्ते विश्रम्य विश्रम्य जाग्रत्स्वप्नयोः दुःखमनुभवामि इति । किं अयमेव मम स्वभावः किंवा नैमित्तिकः इति च । किमसौ व्यामोहोऽपगतः किंवा नेति ॥ ७३ ॥

इत्युक्तः शिष्य आह—भगवन्, अपगतः त्वत्प्रसादात् व्यामोहः, किंतु मम कूटस्थतायां संशयः । कथम्——शब्दादीनां स्वतः सिद्धिर्नास्ति, अचेतनत्वात् । शब्दाद्याकारप्रत्ययोत्पत्तेस्तु तेषाम् । प्रत्ययानामितरेतरव्यावृत्तविशेषणानां नीलपीताद्याकारवतां स्वतःसिद्ध्यसंभवात् । तस्माद्बाह्याकारनिमित्तत्वं गम्यते इति बाह्याकारवत् शब्दाद्याकारत्वसिद्धिः । तथा प्रत्ययानामपि अहंप्रत्ययालंबनवस्तुभेदानां संहतत्वात् अचैतन्योपपत्तेः । स्वार्थत्वासंभवात् स्वरूपव्यतिरिक्तग्राहकग्राह्यत्वेन सिद्धिः शब्दादिवदेव । असंहतत्वे सति चैतन्यात्मकत्वात्

स्वार्थोऽपि अहंप्रत्ययानां नीलपीताद्याकाराणामुपलब्धेति विक्रियावानेव, क
कूटस्थ इति संशयः ॥ ७४ ॥

तं गुरुरुवाच—न युक्तस्तव संशयः । यतस्तेषां प्रत्ययानां नियमेन अशे
षतः उपलब्धेरेव अपरिणामित्वात् कूटस्थत्वसिद्धौ निश्चयहेतुमेव अशेषचित्त
प्रचारोपलब्धिं संशयहेतुमात्थ । यदि हि तव परिणामित्वं स्यात् अशे
स्वविषयचित्तप्रचारोपलब्धिर्न स्यात् चित्तस्येव स्वविषये । यथा चेंद्रिया
स्वविषयेषु । नच तथा आत्मनस्तव स्वविषयैकदेशोपलब्धिः । अतः कूटस्थतै
तवेति ॥ ७५ ॥

तत्राह—उपलब्धिर्नाम धात्वर्थो विक्रियैव, उपलब्धुः कूटस्थात्मता चे
विरुद्धम् ॥ ७६ ॥

न, धात्वर्थविक्रियायां उपलब्ध्युपचारात् । यो हि बौद्धः प्रत्ययः
धात्वर्थो विक्रियात्मकः आत्मनः उपलब्ध्याभासफलावसान इति उपलब्धिशब्दे
उपचर्यते। यथा छिदिक्रिया द्वैधीभावफलावसानेति धात्वर्थत्वेन उपच
तद्वत् ॥ ७७ ॥

इत्युक्तः शिष्य आह—ननु भगवन्, मम कूटस्थत्वप्रतिपादनं प्रति अ
मर्थो दृष्टांतः । कथम्, छिदिः छेद्यविक्रियावसाना उपचर्यते—यथा धात्व
त्वेन तथा उपलब्धिशब्दोपचरितोऽपि धात्वर्थो बौद्धः प्रत्ययः आत्म
उपलब्धिविक्रियावसानश्चेत् नात्मनः कूटस्थतां प्रतिपादयितुं समर्थः ॥ ७८ ॥

गुरुरुवाच— सत्यमेवं स्यात् यदि उपलब्ध्युपलब्ध्रोः विशेषः । नित्यं
लब्धिमात्र एव हि उपलब्धा । नतु तार्किकसमय इव अन्या उपलब्धिः अ
उपलब्धा च ॥ ७९ ॥

ननु उपलब्धिफलावसानो धात्वर्थः कथमिति ॥ ८० ॥

उच्यते— शृणु उपलब्ध्याभासफलावसान इत्युक्तं, किं न श्रुतं तत् त्व
नतु आत्मा विक्रियोत्पादनावसान इति मयोक्तम् ॥ ८१ ॥

शिष्य उवाच— कथं तर्हि कूटस्थे मयि अशेषस्वविषयचित्तप्रचारोलब्धृत्वमित्यात्थ ॥ ८२ ॥

तं गुरुरुवाच— सत्यमवोचं, तेनैव कूटस्थतामब्रवं तव ॥ ८३ ॥

यद्येवं भगवन्, कूटस्थनित्योपलब्धिस्वरूपे मयि शब्दाद्याकारबौद्धप्रत्ययेषु च मत्स्वरूपोपलब्ध्याभासफलावसानवत्सु उत्पद्यमानेषु कस्त्वपराधो मम ॥८४॥

सत्यं नास्त्यपराधः किंतु अविद्यामात्रस्तु अपराध इति प्रागेवावोचम् ॥८५

यदि भगवन्, सुषुप्त इव मम विक्रिया नास्ति, कथं स्वप्नजागरिते ॥ ८६

तं गुरुरुवाच—किंत्वनुभूयेते त्वया संततम् ॥ ८७ ॥

शिष्य उवाच—बाढम् अनुभवामि, किंतु विच्छिद्यविच्छिद्य, नतु संततम् ॥ ८८ ॥

तं गुरुरुवाच—तर्हि आगंतुके त्वेते, न तवात्मभूते । यदि तवात्मभूते, चैतन्यस्वरूपवत् स्वतःसिद्धे संतते एव स्याताम् । किंच स्वप्नजागरिते न तव आत्मभूते व्यभिचारित्वात् वस्त्रादिवत् । नहि यस्य यत्स्वरूपं तत् तद्व्यभिचारि दृष्टम् । स्वप्नजागरिते तु चैतन्यमात्रत्वाद्व्यभिचरतः । सुषुप्ते चेत् स्वरूपं व्यभिचरेत् तन्नष्टं नास्तीति वा बाध्यमेव स्यात् आगंतुकानां अतद्धर्माणां उभयात्मकत्वदर्शनात् । यथा धनवस्त्रादीनां नाशो दृष्टः स्वप्नभ्रांतिलब्धानां तु अभावो दृष्टः ॥ ८९ ॥

नन्वेवं भगवन्, चैतन्यस्वरूपमपि आगंतुकं प्राप्तम् । स्वप्नजागरितयोरिव सुषुप्ते अनुपलब्धेः । अचैतन्यस्वरूपो वा स्यामहम् ॥ ९० ॥

न । पश्य । तदनुपपत्तेः । चैतन्यस्वरूपं चेत् आगंतुकं पश्यसि, पश्य नैतद्वर्षशतेनापि उपपत्त्या कलयितुं शक्नुमो वयम्, अन्यो वाऽचैतन्योऽपि । तस्य संहतत्वात् पारार्थ्यं अनेकत्वं नाशित्वं च न केनचित् उपपत्त्या वारयितुं शक्यम् अस्वार्थस्य स्वतःसिद्ध्यभावादित्यवोचाम । चैतन्यस्वरूपस्य तु आत्मन

स्वतःसिद्धेः अन्यानपेक्षत्वं न केनचित् वारयितुं शक्यम्, अव्यभिचारात् ॥९१॥

ननु व्यभिचारो दर्शितो मया सुषुप्ते न पश्यामीति ॥ ९२ ॥

न । व्याहतत्वात् । कथं व्याघातः ? पश्यतस्तव न पश्यामि इति व्याहतं वचनम् । न हि कदाचित् भगवन्, सुषुप्ते मया चैतन्यं अन्यद्वा किंचित् दृष्टम् । पश्यन् तर्हि सुषुप्ते त्वम्, यस्मात् दृष्टमेव प्रतिषेधसि, न दृष्टिम् । या तव दृष्टिः तत् चैतन्यमिति मयोक्तम् । यथा त्वं विद्यमानया न किंचित् दृष्टमिति प्रतिषेधसि सा दृष्टिः त्वच्चैतन्यम् । तर्हि सर्वत्र अव्यभिचारात् कूटस्थनित्यत्वं सिद्धं स्वतः एव, न प्रमाणापेक्षम् । स्वतःसिद्धस्य हि प्रमातुः अन्यस्य प्रमेयस्य परिच्छित्तिं प्रति प्रमाणापेक्षा । या तु अन्या नित्या परिच्छित्तिः अपेक्ष्यते अन्यस्य अपरिच्छित्तिरूपस्य परिच्छेदाय, सा हि नित्यैव कूटस्था स्वयंज्योतिः-स्वभावा, आत्मनि प्रमाणत्वे प्रमातृत्वे वा न तां प्रति प्रमाणापेक्षा, तत्स्वभावत्वात् । यथा प्रकाशनं उष्णत्वं वा लोहोदकादिषु परतः अपेक्ष्यते अग्न्यादित्यादिभ्यः, अतत्स्वभावत्वात् । न अग्न्यादित्यादीनां तदपेक्षा सर्वदा तत्स्वभावत्वात् ॥ ९३ ॥

अनित्यत्वे एव प्रमा स्यात्, न नित्यत्वे इति चेत् ॥ ९४ ॥

न । अवगतेः नित्यत्वानित्यत्वयोः विशेषानुपपत्तेः । नहि अवगतेः प्रमात्वे अनित्या अवगतिः प्रमा न नित्या इति विशेषः अवगम्यते ॥ ९५ ॥

नित्यायां प्रमातुः अपेक्षाऽभावः । अनित्यायां तु यत्नांतरितत्वात् अवगतिः अपेक्ष्यत इति विशेषः स्यात् इति चेत् ॥ ९६ ॥

सिद्धा तर्हि आत्मनः प्रमातुः स्वतःसिद्धिः प्रमाणनिरपेक्षतयैवेति ॥ ९७ ॥

अभावेऽपि अपेक्षाऽभावः, नित्यत्वात् इति चेत् ॥ ९८ ॥

न । अवगतेरेव आत्मनि सद्भावादिति परिहृतमेतत् । प्रमातुश्चेत् प्रमाणापेक्षा

सिद्धिः कस्य प्रमित्सा स्यात् । यस्य प्रमित्सा स एव प्रमाता अभ्युपगम्यते । तदीया च प्रमित्सा प्रमेयविषयैव न प्रमातृविषया । प्रमातृविषयत्वे अनवस्थाप्रसंगात् । प्रमातुः तदिच्छायाश्च, तस्याप्यन्यः प्रमाता तस्याप्यन्य इति । एवमेव इच्छायाः प्रमातृविषयत्वे । प्रमातुरात्मनः अव्यवहितत्वाच्च प्रमेयत्वानुपपत्तिः । लोके हि प्रमेयं नाम प्रमातुः इच्छा-स्मृति-प्रयत्न-प्रमाणजन्म-व्यवहितं सिध्यति । नान्यथा अवगतिः प्रमेयविषया दृष्टा । नच प्रमातुः प्रमाता स्वस्य स्वयमेव केनचित् व्यवहितः कल्पयितुं शक्यः इच्छादीनामन्यतमेनापि । स्मृतिश्च स्मर्तव्यविषया, न स्मर्तृविषया । तथा इच्छायाः इष्टविषयत्वमेव, न इच्छावद्विषयत्वम् । स्मर्त्रिच्छावद्विषयत्वेऽपि हि उभयोः अनवस्था पूर्ववदपरिहार्या स्यात् ॥ ९९ ॥

ननु प्रमातृविषयावगत्यनुत्पत्तौ अनवगत एव प्रमाता स्यादिति चेत् ॥ १०० ॥

न, अवगंतुः अवगतेः अवगंतव्यविषयत्वात् । अवगंतृविषयत्वे च अनवस्था पूर्ववत् स्यात् । अवगतिश्च आत्मनि कूटस्थनित्यात्मज्योतिः अन्यतः अनपेक्षैव सिद्धा, अग्न्यादित्याद्युष्णप्रकाशवदिति पूर्वमेव प्रसाधितम् । अवगतः चैतन्यात्मज्योतिषः स्वात्मनि अनित्यत्वे, आत्मनः स्वार्थतानुपपत्तिः । कार्यकरणसंघातवत् संहतत्वात् पारार्थ्यं दोषवत्त्वं च अवोचाम । कथम् ? चैतन्यात्मज्योतिषः स्वात्मनि अनित्यत्वे स्मृत्यादिव्यवधानात् सांतरत्वम् । ततश्च तस्य चैतन्यज्योतिषः प्रागुत्पत्तेः प्रध्वंसाच्चोर्ध्वं आत्मन्येव अभावात् चक्षुरादीनामिव संहतत्वात् पारार्थ्यं स्यात् । यदा च तत् उत्पन्नं आत्मनि विद्यते न तदा आत्मनः स्वार्थत्वम् । तद्भावाभावापेक्षा हि आत्मानात्मनोः स्वार्थत्वपरार्थत्वसिद्धिः । तस्मात् आत्मनः अन्यनिरपेक्षमेव नित्यचैतन्यज्योतिष्ट्वं सिद्धम् ॥ १०१ ॥

ननु एवं सति, असति प्रमाश्रयत्वे कथं प्रमातुः प्रमातृत्वम् ॥ १०२ ॥

उच्यते–प्रमायाः नित्यत्वे अनित्यत्वे च रूपविशेषाभावात् । अवगतिर्हि

प्रमा । तस्याः स्मृतीच्छादिपूर्विकायाः अनित्यायाः कूटस्थनित्याया वा न स्वरूपविशेषो विद्यते । यथा धात्वर्थस्य तिष्ठत्यादेः फलस्य गत्यादिपूर्वकस्य अनित्यस्य अगतिपूर्वस्य नित्यस्य वा रूपविशेषो नास्तीति तुल्यो व्यपदेशो दृष्टः 'तिष्ठंति मनुष्याः' 'तिष्ठंति पर्वताः' इत्यादि । तथा नित्यावगतिस्वरूपेऽपि प्रमातरि प्रमातृत्वव्यपदेशो न विरुध्यते फलसामान्यादिति ॥ १०३ ॥

अत्राह शिष्यः—नित्यावगतिस्वरूपस्य आत्मनः अविक्रियत्वात् कार्यकरणैः असंहत्य तक्षादीनामिव वास्यादिभिः कर्तृत्वं नोपपद्यते । असंहतस्वभावस्य च कार्यकरणोपादाने अनवस्था प्रसज्येत । तक्षादीनां तु कार्यकरणैः नित्यमेव संहतत्वामिति वास्याद्युपादाने नानवस्था स्यादिति ॥ १०४ ॥

इह तु असंहतस्वभावस्य करणानुपादाने कर्तृत्वं नोपपद्यत इति करणं उपादेयम्—तदुपादानमपि विक्रियैवेति तत्कर्तृत्वे करणांतरमुपादेयम्, तदुपादानेऽपि अन्यदिति प्रमातुः स्वातंत्र्ये अनवस्था अपरिहार्या स्यात् इति । नच क्रियैव आत्मानं कारयति अनिर्वर्तिताया: स्वरूपाभावात् । अथ अन्यत् आत्मानं उपेत्य क्रियां कारयतीति चेत् । न । अन्यस्य स्वतःसिद्धत्वाविषयत्वाद्यनुपपत्तेः । नहि आत्मनः अन्यत् अचेतनं वस्तु स्वप्रमाणकं दृष्टम् । शब्दादि सर्वमेव अवगतिफलावसानप्रत्ययप्रमितं सिद्धं स्यात् । अवगतिश्चेदात्मनोऽन्यस्य स्यात् सोऽपि आत्मैवासंहतः स्वार्थः स्यात्, न परार्थः । नच देहेंद्रियविषयाणां स्वार्थतां अवगंतुं शक्नुमः । अवगत्यवसानप्रत्ययापेक्षसिद्धिदर्शनात् ॥ १०५ ॥

ननु देहस्यावगतौ न कश्चित् प्रत्यक्षादिप्रत्ययांतरं अपेक्षते ॥ १०६ ॥

बाढम् । जाग्रति एवं स्यात् । मृतिसुषुप्त्योस्तु देहस्यापि प्रत्यक्षादिप्रमाणापेक्षैव सिद्धिः, तथैव इंद्रियाणाम् । बाह्या एव हि शब्दादयो देहेंद्रियाकारपरिणता इति प्रत्यक्षादिप्रमाणापेक्षैव हि सिद्धिः । सिद्धिरिति च प्रमाणफलं

अवगतिं अवोचाम । सा च अवगतिः कूटस्था स्वयंसिद्धा आत्मज्योतिः-स्वरूपेति च ॥ १०७ ॥

अत्राह चोदकः—अवगतिः प्रमाणानां फलं कूटस्थनित्यात्मज्योतिःस्वरूपेति च विप्रतिषिद्धम् । इत्युक्तवंतमाह—न विप्रतिषिद्धम् । कथं तर्हि अवगतेः फलत्वम् ? तत्त्वोपचारात् । कूटस्था नित्यापि सती प्रत्यक्षादिप्रत्ययांते लक्ष्यते तादर्थ्यात् । प्रत्यक्षादिप्रत्ययस्य अनित्यत्वे अनित्येव भवति । तेन प्रमाणानां फलं इति उपचर्यते ॥ १०८ ॥

यद्येवं भगवन्! कूटस्थनित्यावगतिः आत्मज्योतिःस्वरूपैव स्वयंसिद्धा, आत्मनि प्रमाणनिरपेक्षत्वात्, ततोऽन्यत् अचेतनं संहत्यकारित्वात् परार्थम् । येन च सुखदुःखमोहहेतुप्रत्ययावगतिरूपेण पारार्थ्यं तेनैव स्वरूपेण अनात्मनः अस्तित्वं नान्येन रूपांतरेण, अतो नास्तित्वमेव परमार्थतः । यथा हि लोके रज्जुसर्पमरीच्युदकादीनां तदवगतिव्यतिरेकेण अभावो दृष्टः, एवं जाग्रत्स्वप्नद्वैत भावस्यापि तदवगतिव्यतिरेकेण अभावो युक्तः । एवमेव परमार्थतः भगवन्, अवगतेः आत्मज्योतिषः नैरंतर्यभावात् कूटस्थनित्यता अद्वैतभावश्च, सर्वप्रत्यय-भेदेषु अव्यभिचारात् । प्रत्ययभेदाश्च अवगतिं व्यभिचरंति । यथा स्वप्ने नील-पीताद्याकारभेदरूपाः प्रत्ययाः तदवगतिं व्यभिचरंतः परमार्थतो न संतीत्युच्यंते, एवं जाग्रत्यपि नीलपीतादिप्रत्ययभेदाः तामेवावगतिं व्यभिचरंतः असत्यरूपाः भवितुमर्हंति । तस्याश्च अवगतेः अन्यः अवगंता नास्तीति न स्वेन स्वरूपेण स्वयं उपादातुं हातुं वा शक्यते, अन्यस्य च अभावात् ॥ १०९ ॥

तथैवेति । एषा अविद्या यन्निमित्तः संसारो । तस्याः अविद्यायाः विद्या निवर्तिका । इत्येवं त्वं अभयं प्राप्तोऽसि । नातःपरं जाग्र-त्स्वप्नदुःखमनुभविष्यसि । संसारदुःखान्मुक्तोऽसीति ॥ ११० ॥

ओमिति ॥ १११ ॥

इति कूटस्थाद्वयात्मबोधनामकं अवगतिप्रकरणं द्वितीयं विवृत्तम् ॥ २ ॥

॥ अथ परिसंख्यानप्रकरणं तृतीयम् ॥

मुमुक्षूणां उपात्तपुण्यापुण्यक्षपणपराणां अपूर्वानुपचयार्थिनां परिसंख्यानमिदमुच्यते, अविद्याहेतवो दोषाः वाङ्मनःकायप्रवृत्तिहेतवः, प्रवृत्तेश्च इष्टानिष्टमिश्रफलानि कर्माणि उपचीयंते, इति तन्मोक्षार्थम् ॥ ११२ ॥

तत्र शब्दस्पर्शरूपरसगंधानां विषयाणां श्रोत्रादिग्राह्यत्वात् स्वात्मनि परेषु वा विज्ञानाभावः, तेषामेव परिणतानां यथा लोष्टादीनाम् । श्रोत्रादिद्वारैश्च ज्ञायंते, येन च ज्ञायन्ते सः ज्ञातृत्वात् अतज्जातीयः, ते हि शब्दादयः अन्योन्यसंसर्गित्वात् जन्मवृद्धिविपरिणामापक्षयनाशसंयोगाविर्भावतिरोभावविकारविकारिक्षेत्रबीजाद्यनेकधर्माणः सामान्येन च सुखदुःखाद्यनेककर्माणः । तद्विज्ञातृत्वादेव तद्विज्ञाता सर्वशब्दादिधर्मविलक्षणः ॥ ११३ ॥

तत्र शब्दादिभिः उपलभ्यमानैः पीड्यमानो विद्वान् एवं परिसंचक्षीत ॥ ११४ ॥

शब्दस्तु ध्वनिसामान्यमात्रेण विशेषधर्मैर्वा षड्जादिभिः, प्रियैः स्तुत्यादिभिः इष्टैः अनिष्टैश्च असत्यबीभत्सपरिभवाक्रोशादिभिर्वचनैः वा मां दृक्स्वभावं असंसर्गिणं अविक्रिय अचलं अनिधनं अभयं अत्यंतसूक्ष्मं अविषयं गोचरीकृत्य स्प्रष्टुं नैवार्हति असंसर्गित्वादेव मम । अत एव न शब्दनिमित्ता हानिः वृद्धिर्वा । अतो मां किं करिष्यति स्तुतिनिंदादिप्रियाप्रियत्वादिलक्षणः शब्दः । अविवेकिनं हि शब्दं आत्मत्वेन गतं प्रियः शब्दो वर्धयेत् अप्रियश्च क्षपयेत् अविवेकित्वात्, नतु मम विवेकिनो बालाग्रमात्रमपि कर्तुमुत्सहते इति । एवमेव स्पर्शसामान्येन तद्विशेषैश्च शीतोष्णमृदुकर्कशादिज्वरोदरशूलादिलक्षणैश्च अप्रियैः प्रियैश्च कैश्चित् शरीरसमवायिभिः बाह्यागंतुकनिमित्तैश्च न मम काचित् विक्रिया वृद्धिहानिलक्षणा अस्पर्शत्वात् क्रियते, व्योम्न इव मुष्टिघातादिभिः । तथा रूपसामान्येन तद्विशेषैश्च प्रियाप्रियैः स्त्रीव्यंजनादिलक्षणैः अरूपत्वात् न मम

काचित् हानिः वृद्धिर्वा क्रियते । तथा रससामान्येन तद्विशेषैश्च प्रियाप्रियैः [illegible] मूढबुद्धिभिः परिगृहीतैः अरसात्मकस्य मम न काचित् हानिः वृद्धिर्वा क्रियते । तथा गंधसामान्येन तद्विशेषैश्च प्रियाप्रियैः [illegible] अगंधात्मकस्य न मम काचित् हानिः वृद्धिर्वा क्रियते— 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत्' इति श्रुतेः ॥११५॥

किंच य एव बाह्याः शब्दादयः ते शरीराकारेण संस्थिताः तद्ग्राहकैश्च श्रोत्राद्याकारैः [illegible] च अन्योन्यसंसर्गित्वात् संहतत्वाच्च सर्वक्रियासु । तत्रैवं सति विदुषो मम न कश्चित् शत्रुः मित्रं उदासीनो वा अस्ति । तत्र यदि कश्चित् मिथ्याज्ञानाभिमानेन प्रियं अप्रियं वा प्रयुयुक्षेत क्रियाफललक्षणं तन्मृषैव प्रयुयुक्षते सः, तस्य अविषयत्वान्मम— 'अव्यक्तोऽय- [illegible] इति स्मृतेः । तथा सर्वेषां पंचनामपि भूतानां अविकार्यः अविषयत्वात् [illegible] इति स्मृतेः । यापि शरीरेंद्रियसंस्थानमात्रमुपलक्ष्य मद्भक्तानां विपरीतानां च प्रियाऽप्रियादिप्रयुयुक्षा, तज्जा च धर्माधर्मादिप्राप्तिः, सा तेषामेव, न तु मयि अजरे अमृते अभये 'नैनं कृताकृते तपतः', 'न कर्मणा वर्धते नो कनीयान्' 'सबाह्याभ्यंतरो ह्यजः', 'न लिप्यते लोकदुःखेन बाह्यः' इत्यादिश्रुतिस्मृतिभ्यः । अनात्मवस्तुनश्च असत्त्वात् इति परमो हेतुः । आत्मनश्च अद्वयत्वविषयाणि द्वयस्यासत्त्वात् यानि सर्वाणि उपनिषद्वाक्यानि विस्तरशः समीक्षितव्यानि समीक्षितव्यानीति ॥ ११६ ॥

इति [illegible] उपदेशसाहस्र्यां गद्यप्रबंधः समाप्तः ॥ॐ॥

॥ ॐ [illegible] ॥

॥ उपदेशसाहस्री ॥

पद्यप्रबंधः द्वितीयो भागः ।

१ उपोद्घातप्रकरणम् ।

चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥ १ ॥
समापय्य क्रियाः सर्वा दाराग्न्याधानपूर्विकाः ।
ब्रह्मविद्यामथेदानीं वक्तुं वेदः प्रचक्रमे ॥ २ ॥
कर्माणि देहयोगार्थं देहयोगे प्रियाप्रिये ।
ध्रुवे स्यातां ततो रागो द्वेषश्चैव ततः क्रियाः ॥ ३ ॥
धर्माधर्मौ ततोऽज्ञस्य देहयोगस्तथा पुनः ।
एवं नित्यप्रवृत्तोऽयं संसारश्चक्रवद्भृशम् ॥ ४ ॥
अज्ञानं तस्य मूलं स्यादिति तद्धानमिष्यते ।
ब्रह्मविद्याऽत आरब्धा यतो निःश्रेयसं भवेत् ॥ ५ ॥
विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः ।
नाज्ञानस्याप्रहाणे हि रागद्वेषक्षयो भवेत् ॥ ६ ॥
रागद्वेषक्षयाभावे कर्म दोषोद्भवं ध्रुवम् ॥
तस्मान्निःश्रेयसार्थाय विद्यैवात्र विधीयते ॥ ७ ॥
ननु कर्म तथा नित्यं कर्तव्यं जीवने सति ।
विद्यायाः सहकारित्वं मोक्षं प्रति हि तद्व्रजेत् ॥ ८ ॥
यथा विद्या तथा कर्म चोदितत्वाविशेषतः ।
प्रत्यवायस्मृतेश्चैव कार्यं कर्म मुमुक्षुभिः ॥ ९ ॥
ननु ध्रुवफला विद्या नान्यत्किंचिदपेक्षते ।
नाग्निष्टोमो यथैवान्यद्ध्रुवकार्योऽप्यपेक्षते ॥ १० ॥

तथा ध्रुवफला विद्या कर्म नित्यमपेक्षते ।
इत्येवं केचिदिच्छंति न कर्म प्रतिकूलतः ॥ ११ ॥
विद्यायाः प्रतिकूलं हि कर्म स्यात्साभिमानतः ।
निर्विकारात्मबुद्धिश्च विद्येतीह प्रकीर्तिता ॥ १२ ॥
अहं कर्ता ममेदं स्यादिति कर्म प्रवर्तते ।
वस्त्वधीना भवेद्विद्या कर्त्रधीनो भवेद्विधिः ॥ १३ ॥
कारकाण्युपमृद्नाति विद्या बुद्धिमिवोषरे ।
इति तत्सत्यमादाय कर्म कर्तुं व्यवस्यति ॥ १४ ॥
विरुद्धत्वादतः शक्यं कर्म कर्तुं न विद्यया ।
सहैव विदुषा तस्मात्कर्म हेयं मुमुक्षुणा ॥ १५ ॥
देहाद्यैरविशेषेण देहिनो ग्रहणं निजम् ।
प्राणिनां तदविद्योत्थं तावत्कर्मविधिर्भवेत् ॥ १६ ॥
नेति नेतीति देहादीनपोह्यात्माऽवशेषितः ।
अविशेषात्मबोधार्थं तेनाविद्या निवर्तिता ॥ १७ ॥
निवृत्ता सा कथं भूयः प्रसूयेत प्रमाणतः ।
असत्येवाविशेषेऽपि प्रत्यगात्मनि केवले ॥ १८ ॥
न चेद्भूयः प्रसूयेत कर्ता भोक्तेति धीः कथम् ।
सदस्मीति च विज्ञाने तस्माद्विद्याऽसहायिका ॥ १९ ॥
अत्यरेचयदित्युक्तो न्यासः श्रुत्यात एव हि ।
कर्मभ्यो मानसांतेभ्य एतावदिति वाजिनाम् ॥ २० ॥
अमृतत्वं श्रुतं यस्मात्त्याज्यं कर्म मुमुक्षुभिः ।
अग्निष्टोमवदित्युक्तं तत्रेदमभिधीयते ॥ २१ ॥
नैककारकसाध्यत्वात्फलान्यत्वाच्च कर्मणः ।
विद्या तद्विपरीतातो दृष्टांतो विषमो भवेत् ॥ २२ ॥
कृष्यादिवत्फलार्थत्वादन्यकर्मोपबृंहणम् ।

अग्निष्टोमस्त्वपेक्षेत विद्यान्यत्किमपेक्षते ॥ २३ ॥
प्रत्यवायस्तु तस्यैव यस्याहंकार इष्यते ।
अहंकारफलार्थित्वे विद्येते नात्मवेदिनः ॥ २४ ॥
तस्मादज्ञानहानाय संसारविनिवृत्तये ।
ब्रह्मविद्याविधानाय प्रारब्धोपनिषत्त्वियम् ॥ २५ ॥
सदेरुपनिपूर्वस्य क्विपि चोपनिषद्भवेत् ।
मंदीकरणभावाच्च गर्भादेः शातनात्तथा ॥ २६ ॥

२ प्रतिषेधप्रकरणम् ।

प्रतिषेद्धुमशक्यत्वान्नेतिनेतीति शेषितम् ।
इदं नाहमिदं नाहमित्यद्धा प्रतिपद्यते ॥ १ ॥
अहंधीरिदमात्मोत्था वाचारंभणगोचरा ।
निषिद्धात्मोद्भवत्वात्सा न पुनर्मानतां व्रजेत् ॥ २ ॥
पूर्वबुद्धिमबाधित्वा नोत्तरा जायते मतिः ।
दृशिरेकः स्वयं सिद्धः फलत्वात्स न बाध्यते ॥ ३ ॥
इदं वनमतिक्रम्य शोकमोहादिदूषितम् ।
वनाद्गांधारको यद्वत्स्वात्मानं प्रतिपद्यते ॥ ४ ॥

३ ईश्वरात्मप्रकरणम् ।

ईश्वरश्चेदनात्मा स्यान्नासावस्मीति धारयेत् ।
आत्मा चेदीश्वरोऽस्मीति विद्या सान्यनिवर्तिका ॥ १ ॥
आत्मनोऽन्यस्य चेद्धर्मा अस्थूलत्वादयो मताः ।
अज्ञेयत्वेऽस्य किं तैः स्यादात्मत्वे ह्यन्यधीह्नुतिः ॥ २ ॥
मिथ्याध्यासनिषेधार्थं ततोऽस्थूलादि गृह्यताम् ।
परत्र चेन्निषेधार्थं शून्यतावर्णनं हि तत् ॥ ३ ॥

बुभुत्सोर्यदि चान्यत्र प्रत्यगात्मन इष्यते ।
अप्राणो ह्यमनाः शुभ्र इति चानर्थकं वचः ॥ ४ ॥

---

४ तत्त्वज्ञानस्वभावप्रकरणम् ।

अहंप्रत्ययबीजं यदहंप्रत्ययवत्स्थितम् ।
नाहंप्रत्ययवद्दग्धुष्टं कथं कर्म प्ररोहति ॥ १ ॥
दृष्टवच्चेत्प्ररोहः स्यान्नान्यकर्मा स इष्यते ।
तन्निरोधे कथं तत्स्यात्पृच्छामो वस्तदुच्यताम् ॥ २ ॥
देहाद्यारंभसामर्थ्याज्ज्ञानं सद्विषयं त्वयि ।
अभिभूय फलं कुर्यात्कर्मांते ज्ञानमुद्भवेत् ॥ ३ ॥
आरब्धस्य फले ह्येते भोगो ज्ञानं च कर्मणः ।
अविरोधस्तयोर्युक्तो वैधर्म्यं चेतरस्य तु ॥ ४ ॥
देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ।
ततः सर्वमिदं सिद्धं प्रयोगोऽस्माभिरीरितः ॥ ५ ॥

---

५ बुद्ध्यपराधप्रकरणम् ।

मूत्राशंको यथोदंको नाग्रहीदमृतं यथा ।
कर्मनाशभयाज्जंतोरात्मज्ञानाग्रहस्तथा ॥ १ ॥
बुद्धिस्थश्चलतीवात्मा ध्यायतीव च दृश्यते ।
नौगतस्य यथा वृक्षास्तद्वत्संसारविभ्रमः ॥ २ ॥
नौस्थस्य प्रातिलोम्येन नगानां गमनं यथा ।
आत्मनः संसृतिस्तद्वद्ध्यायतीवेति हि श्रुतिः ॥ ३ ॥
चैतन्यप्रतिबिंबेन व्याप्तो बोधो हि जायते ।
बुद्धेः शब्दादिनिर्भासस्तेन मोमुह्यते जगत् ॥ ४ ॥

चैतन्यभास्यताहमस्तादर्थ्यं च तदस्य यत्।
इदमंशप्रहाणे न परः सोऽनुभवो भवेत्॥ ५॥

---

६ विशेषापोहप्रकरणम्।

छित्त्वा त्यक्तेन हस्तेन स्वयं नात्मा विशेष्यते।
यथा शिष्टेन सर्वेण येन येन विशेष्यते॥ १॥
तस्मात्त्यक्तेन हस्तेन तुल्यं सर्वं विशेषणम्।
अनात्मत्वेन तस्माज्ज्ञो मुक्तः सर्वैर्विशेषणैः॥ २॥
विशेषणमिदं सर्वं साध्वलंकरणं यथा।
अविद्याध्यस्तमतः सर्वं ज्ञात आत्मन्यसद्भवेत्॥ ३॥
ज्ञातैवात्मा सदा ग्राह्यो ज्ञेयमुत्सृज्य केवलः।
अहमित्यपि यद्ग्राह्यं व्यपेतांगसमं हि तत्॥ ४॥
यावान्स्यादिदमंशो यः स स्वतोऽन्यो विशेषणम्।
विशेषप्रक्षयो यत्र सिद्धो ज्ञश्चित्रगुर्यथा॥ ५॥
इदमंशोऽहमित्यत्र त्याज्यो नात्मेति पंडितैः।
अहं ब्रह्मेति शिष्टांशो भूतपूर्वगतेर्भवेत्॥ ६॥

---

७ बुद्ध्यारूढप्रकरणम्।

बुद्ध्यारूढं सदा सर्वं दृश्यते यत्र तत्र वा।
मया तस्मात्परं ब्रह्म सर्वज्ञश्चास्मि सर्वगः॥ १॥
यथात्मबुद्धिचाराणां साक्षी तद्वत्परेष्वपि।
नैवापोढुं न वाऽऽदातुं शक्यस्तस्मात्परो ह्यहम्॥ २॥
विकारित्वमशुद्धत्वं भौतिकत्वं न चात्मनः।
अशेषबुद्धिसाक्षित्वाद्बुद्धिवन्नाल्पवेदना॥ ३॥
मणौ प्रकाश्यते यद्वद्रक्ताद्याकारताऽऽतपे।

मयि संदृश्यते सर्वमातपेनेव तन्मया ॥ ४ ॥
बुद्धौ दृश्यं भवेद्बुद्धौ सत्यां नास्ति विपर्यये ।
द्रष्टा यस्मात्सदा द्रष्टा तस्मात् द्वैतं न विद्यते ॥ ५ ॥
अविवेकात्पराभावं यथा बुद्धिरवैत्तथा ।
विवेकात्तु परादन्यः स्वयं चापि न विद्यते ॥ ६ ॥

---

८ मतिविलापनप्रकरणम् ।

चितिः स्वरूपं स्वत एव मे मतं रसादियोगस्तव मोहकारितः ।
अतो न किंचित्तव चेष्टितेन मे फलं भवेत्सर्वविशेषहानतः ॥ १ ॥
विमुच्य मायामयकार्यतामिह प्रशांतिमायाह्यसदीहितात्सदा ।
अहं परं ब्रह्म सदा विमुक्तवत्तथाजमेकं द्वयवर्जितं यतः ॥ २ ॥
सदा च भूतेषु समोऽस्मि केवलो यथा च खं सर्वगमक्षरं शिवम् ।
निरंतरं निष्कलमक्रियं परं ततो न मेऽस्तीह फलं तवेहितैः ॥ ३ ॥
अहं ममैको न मदन्यदिष्यते तथा न कस्याप्यहमस्म्यसंगतः ।
असंगरूपोऽहमतो न मे त्वया कृतेन कार्यं तव ॥ ४ ॥
फले च हेतौ च जनो विषक्तवानिति प्रचिंत्याहमतो विमोक्षणे ।
जनस्य संवादमिमं प्रक्लृप्तवान्स्वरूपतत्त्वार्थविबोधकारणम् ॥ ५ ॥
संवादमेतं यदि चिंतयेन्नरो विमुच्यतेऽज्ञानमहाभयागमात् ।
विमुक्तकामश्च तथा जनः सदा चरत्यशोकः सम आत्मवित्सुखी ॥ ६ ॥

---

९ सूक्ष्मताव्यापिताप्रकरणम् ।

सूक्ष्मताव्यापिते ज्ञेये गंधादेरुत्तरोत्तरम् ।
प्रत्यगात्मावसानेषु पूर्वपूर्वप्रहाणतः ॥ १ ॥
शारीरा पृथिवी तावद्यावद्बाह्या प्रमाणतः ।
अंब्वादीनि च तत्त्वानि तावज्ज्ञेयानि कृत्स्नशः ॥ २ ॥

वाय्वादीनां यथोत्पत्तेः पूर्वं खं सर्वगं तथा ।
अहमेकः सदा सर्वश्चिन्मात्रः सर्वगोऽद्वयः ॥ ३ ॥
ब्रह्माद्याः स्थावरांता ये प्राणिनो मम पूः स्मृताः ।
कामक्रोधादयो दोषा जायेरन्मे कुतोऽन्यतः ॥ ४ ॥
भूतदोषैः सदाऽस्पृष्टं सर्वभूतस्थमीश्वरम् ।
नीलं व्योम यथा बालो दुष्टं मां वीक्षते जनः ॥ ५ ॥
मच्चैतन्यावभास्यत्वात्सर्वप्राणिधियां सदा ।
पूर्मम प्राणिनः सर्वे सर्वज्ञस्य विपाप्मनः ॥ ६ ॥
जनिमज्ज्ञानविज्ञेयं स्वप्नज्ञानवदिष्यते ।
नित्यं निर्विषयं ज्ञानं तस्मात् द्वैतं न विद्यते ॥ ७ ॥
ज्ञातुर्ज्ञातिर्हि नित्योक्ता सुषुप्ते त्वन्यशून्यतः ।
जाग्रज्ज्ञातिस्त्वविद्यातस्तद्ग्राह्यं चासदिष्यताम् ॥ ८ ॥
रूपवत्त्वाद्यसत्त्वान्न दृष्ट्यादेः कर्मता यथा ।
एवं विज्ञानकर्मत्वं भूम्नो नास्तीति गम्यते ॥ ९ ॥

१० दृशिस्वरूपपरमार्थदर्शनप्रकरणम् ॥

दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् ।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ॐ ॥ १ ॥
दृशिस्तु शुद्धोऽहमविक्रियात्मको न मेऽस्ति कश्चिद्विषयः स्वभावतः
पुरस्तिरश्चोर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वज आत्मनि स्थितः ॥२॥
अजोऽमरश्चैव तथाजरोऽमृतः स्वयंप्रभः सर्वगतोऽहमद्वयः ।
न कारणं कार्यमतीव निर्मलः सदैव तृप्तश्च ततो विमुक्त ॐ ॥ ३ ॥
सुषुप्तजाग्रत्स्वपतश्च दर्शनं न मेऽस्ति किंचित्तु मतेर्हि मोहनम् ।
स्वतश्च तेषां परतोऽप्यसत्त्वतस्तुरीय एवास्मि सदा दृगद्वयः ॥ ४ ॥
शरीरबुद्धींद्रियदुःखसंततिर्न मे न चाहं मम निर्विकारतः ।

असत्त्वहेतोश्च तथैव संततेरसत्त्वमस्याः स्वपतो हि दृश्यवत् ॥ ५ ॥
इदं तु सत्यं मम नास्ति विक्रिया विकारहेतुर्न हि मेऽद्वयत्वतः ।
न पुण्यपापे न च मोक्षबंधने न चास्ति वर्णाश्रमताऽशरीरतः ॥६॥
अनादितो निर्गुणतो न कर्म मे फलं च तस्मात्परमोऽहमद्वयः ।
यथा नभः सर्वगतं न लिप्यते तथा ह्यहं देहगतोऽपि सूक्ष्मतः ॥७॥
सदा च भूतेषु समोऽहमीश्वरः क्षराक्षराभ्यां परमो ह्यथोत्तमः ।
परात्मत्त्वं च तथाद्वयोऽपि सन्विपर्ययेणाभिमतस्त्वविद्यया ॥ ८ ॥
अविद्यया भावनया च कर्मभिर्विविक्त आत्माऽव्यवधिः सुनिर्मलः ।
दृगादिशक्तिप्रचितोऽहमद्वयः स्थितः स्वरूपे गगनं यथाचलम् ॥ ९ ॥
अहं परं ब्रह्म विनिश्चयात्मदृङ् न जायते भूय इति श्रुतेर्वचः ।
न चैव बीजे त्वसति प्रजायते फलं न जन्मास्ति ततो ह्यमोहता ॥ १० ॥
ममेदमित्थं च तथेदमीदृशं तथाहमेवं न परो न वान्यथा ।
विमूढतैवं न जनस्य कल्पना सदा समे ब्रह्मणि चाद्वये शिवे ॥ ११ ॥
यदद्वयं ज्ञानमतीव निर्मलं महात्मनां तत्र न शोकमोहता ।
तयोरभावे न हि जन्म कर्म वा भवेदयं वेदविदां विनिश्चयः ॥१२॥
सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु पश्यन्नपि चाद्वयत्वतः ।
तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः ॥ १३॥
इतीदमुक्तं परमार्थदर्शनं मया हि वेदांतविनिश्चितं परम् ।
विमुच्यतेऽस्मिन्यदि निश्चितो भवेन्न लिप्यते व्योमवदेव कर्मभिः ॥१४॥

---

११ ईक्षितृत्वप्रकरणम् ।

ईक्षितृत्वं स्वतःसिद्धं जंतूनां च ततोऽन्यता ।
अज्ञानादित्यतोऽन्यत्वं सदसीति निवर्त्यते ॥ १ ॥
एतावद्ध्यमृतत्वं न किंचिदन्यत्सहायकम् ।
ज्ञानस्येति ब्रुवच्छास्त्रं सलिंगं कर्म बाधते ॥ २ ॥

सर्वेषां मनसो वृत्तमविशेषेण पश्यतः ।
तस्य मे निर्विकारस्य विशेषः स्यात्कथंचन ॥ ३ ॥
मनोवृत्तं मनश्चैव स्वप्नवज्जाग्रतीक्षितुः ।
संप्रसादे द्वयासत्त्वाच्चिन्मात्रः सर्वगोऽव्ययः ॥ ४ ॥
स्वप्नः सत्यो यथाऽऽबोधाद्देहात्मत्वं तथैव च ।
प्रत्यक्षादेः प्रमाणत्वं जाग्रत्स्यादात्मवेदनात् ॥ ५ ॥
व्योमवत्सर्वभूतस्थो भूतदोषैर्विवर्जितः ।
साक्षी चेताऽगुणः शुद्धो ब्रह्मैवास्मीति केवलः ॥ ६ ॥
नामरूपक्रियाभ्योऽन्यो नित्यमुक्तस्वरूपवान् ।
अहमात्मा परं ब्रह्म चिन्मात्रोऽहं सदाऽद्वयः ॥ ७ ॥
अहं ब्रह्मास्मि कर्ता च भोक्ता चास्मीति ये विदुः ।
ते नष्टा ज्ञानकर्मभ्यां नास्तिकाः स्युर्न संशयः ॥ ८ ॥
धर्माधर्मफलैर्योग इष्टोऽदृष्टो यथाऽऽत्मनः ।
शास्त्राद्ब्रह्मत्वमप्यस्य मोक्षो ज्ञानात्तथेष्यताम् ॥ ९ ॥
या माहारजनाद्यास्ता वासनाः स्वप्नदर्शिभिः ।
अनुभूयंत एवेह ततोऽन्यः केवलो दृशिः ॥ १० ॥
कोशादिव विनिष्कृष्टः कार्यकारणवर्जितः ।
यथाऽसिर्दृश्यते स्वप्ने तद्वद्बोद्धा स्वयंप्रभः ॥ ११ ॥
आपेषात्प्रतिबुद्धस्य ज्ञस्य स्वाभाविकं पदम् ।
उक्तं नेत्यादिवाक्येन कल्पितस्यापनेतृणा ॥ १२ ॥
महाराजादयो लोका मयि यद्वत्प्रकल्पिताः ।
स्वप्ने तद्वत् द्वयं विद्याद्रूपं वासनया सह ॥ १३ ॥
देहलिंगात्मना कार्या वासनारूपिणा क्रियाः ।
नेति नेत्यात्मरूपत्वान्न मे कार्या क्रिया क्वचित् ॥ १४ ॥
न ततोऽमृतताशास्ति कर्मणोऽज्ञानहेतुतः ।

मोक्षस्य ज्ञानहेतुत्वान्न तदन्यदपेक्षते ॥ १५ ॥
अमृतं चाभयं नार्तं नैतीत्यात्मा प्रियो मम ।
विपरीतमतोऽन्यद्यस्त्यजेत्तत्सक्रियं ततः ॥ १६ ॥

---

१२ प्रकाशप्रकरणम् ॥

प्रकाशस्थं यथा देहं सालोकमभिमन्यते ।
द्रष्ट्राभासं तथा चित्तं द्रष्टाहमिति मन्यते ॥ १ ॥
यदेव दृश्यते लोके तेनाभिन्नत्वमात्मनः ।
प्रपद्यते ततो मूढस्तेनात्मानं न विंदति ॥ २ ॥
दशमस्य नवात्मत्वप्रतिपत्तिवदात्मनः ।
दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा ॥ ३ ॥
त्वं कुरु त्वं तदेवेति प्रत्ययावैककालिकौ ।
एकनीडौ कथं स्यातां विरुद्धौ न्यायतो वद ॥ ४ ॥
देहाभिमानिनो दुःखं नादेहस्य स्वभावतः ।
स्वापवत्तत्प्रहाणाय तत्त्वमित्युच्यते दृशेः ॥ ५ ॥
दृशेश्छाया यदाऽऽरूढा मुखच्छायेव दर्शने ।
पश्यंस्तं प्रत्ययं योगी दृष्ट आत्मेति मन्यते ॥ ६ ॥
तं च मूढं च यद्यन्यं प्रत्ययं वेत्ति नो दृशेः ।
स एव योगिनां श्रेष्ठो नेतरः स्यान्न संशयः ॥ ७ ॥
विज्ञातेर्यस्तु विज्ञाता स त्वमित्युच्यते यतः ।
स स्यादनुभवस्तस्य ततोऽन्योऽनुभवो मृषा ॥ ८ ॥
दृशिरूपे सदा नित्ये दर्शनादर्शने मयि ।
कथं स्यातां ततो नान्य इष्यतेऽनुभवस्ततः ॥ ९ ॥
यत्स्थस्तापो रवेर्देहे दृशेः स विषयो यथा ।
सत्त्वस्थस्तद्वदेवेह दृशेः स विषयस्तथा ॥ १० ॥

प्रतिषिद्धेदमंशो ज्ञः खमिवैकरसोऽद्वयः ।
नित्यमुक्तस्तथा शुद्धः सोऽहं ब्रह्मास्मि केवलः ॥ ११ ॥
विज्ञातुर्नैव विज्ञाता परोऽन्यः संभवत्यतः ।
विज्ञाताहं परो मुक्तः सर्वभूतेषु सर्वदा ॥ १२ ॥
यो वेदालुप्तदृष्टित्वमात्मनोऽकर्तृतां तथा ।
ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः ॥ १३ ॥
ज्ञातैवाहमविज्ञेयः शुद्धो मुक्तः सदेत्यपि ।
विवेकी प्रत्ययो बुद्धेर्दृश्यत्वान्नाशवान्यतः ॥ १४ ॥
अलुप्ता त्वात्मनो दृष्टिर्नोत्पाद्या कारकैर्यतः ।
दृश्यया चान्यया दृष्ट्या जन्यताऽस्याः प्रकल्पिता ॥ १५ ॥
देहात्मबुद्धयपेक्षत्वादात्मनः कर्तृता मृषा ।
नैव किंचित्करोमीति सत्या बुद्धिः प्रमाणजा ॥ १६ ॥
कर्तृत्वं कारकापेक्षमकर्तृत्वं स्वभावतः ।
कर्ता भोक्तेति विज्ञानं मृषैवेति सुनिश्चितम् ॥ १७ ॥
एवं शास्त्रानुमानाभ्यां स्वरूपेऽवगते सति ।
नियोज्योऽहमिति ह्येषा सत्या बुद्धिः कथं भवेत् ॥ १८ ॥
यथा सर्वांतरं व्योम व्योम्नोऽप्याभ्यंतरो ह्यहम् ।
निर्विकारोऽचलः शुद्धोऽजरो मुक्तः सदाऽद्वयः ॥ १९ ॥

---

१३ अचक्षुष्ट्वप्रकरणम् ।

अचक्षुष्ट्वान्न दृष्टिर्मे तथाऽश्रोत्रस्य का श्रुतिः ।
अवाक्त्वान्न तु वक्तिः स्यादमनस्त्वान्मतिः कुतः ॥ १ ॥
अप्राणस्य न कर्मास्ति बुद्धयभावे न वेदिता ।
विद्याविद्ये ततो न स्तश्चिन्मात्रज्योतिषो मम ॥ २ ॥
नित्यमुक्तस्य शुद्धस्य कूटस्थस्याविचालिनः ।

अमृतस्याक्षरस्यैवमशरीरस्य सर्वदा ॥ ३ ॥
जिघत्सा वा पिपासा वा शोकमोहौ जरामृती ।
न विद्यंतेऽशरीरत्वाद्व्योमवद्व्यापिनो मम ॥ ४ ॥
अस्पर्शत्वान्न मे स्पृष्टिर्नाजिह्वत्वाद्रसज्ञता ।
नित्यविज्ञानरूपस्य ज्ञानाज्ञाने न मे सदा ॥ ५ ॥
या तु स्यान्मानसी वृत्तिश्चाक्षुष्का रूपरंजना ।
नित्यमेवात्मनो दृष्ट्या नित्यया दृश्यते हि सा ॥ ६ ॥
तथान्येंद्रिययुक्ता या वृत्तयो विषयांजनाः ।
स्मृती रागादिरूपा च केवलांतर्मनस्यपि ॥ ७ ॥
मानस्यस्तद्वदन्यस्य दृश्यंते स्वप्नवृत्तयः ।
द्रष्टुर्दृष्टिस्ततो नित्या शुद्धाऽनंता च केवला ॥ ८ ॥
अनित्या साऽविशुद्धेति गृह्यतेऽत्राविवेकतः ।
सुखी दुःखी तथा चाहं दृश्ययोपाधिभूतया ॥ ९ ॥
मूढया मूढ इत्येवं शुद्धया शुद्ध इत्यपि ।
मन्यते सर्वलोकोऽयं येन संसारमृच्छति ॥ १० ॥
अचक्षुष्कादिशास्त्रोक्तं सबाह्याभ्यंतरं त्वजम् ।
नित्यमुक्तमिहात्मानं मुमुक्षुश्चेत्तदा स्मरेत् ॥ ११ ॥
अचक्षुष्कादिशास्त्राच्च नेंद्रियाणि सदा मम ।
अप्राणो ह्यमनाः शुभ्र इति चाथर्वणं वचः ॥ १२ ॥
शब्दादीनामभावश्च श्रूयते मम काठके ।
अप्राणो ह्यमना यस्मादविकारी सदा ह्यहम् ॥ १३ ॥
विक्षेपो नास्ति तस्मान्मे न समाधिस्ततो मम ।
विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥ १४ ॥
अमनस्कस्य शुद्धस्य कथं तत्स्याद्द्वयं मम ।
अमनस्त्वाविकारित्वे विदेहव्यापिनो मम ॥ १५ ॥

इत्येतद्यावदज्ञानं तावत्कार्यं ममाभवत् ।
नित्यमुक्तस्य शुद्धस्य बुद्धस्य च सदा मम ॥ १६ ॥
समाधिर्वाऽसमाधिर्वा कार्यं चान्यत्कुतो भवेत् ।
मां हि ध्यात्वा च बुद्ध्वा च मन्यंते कृतकृत्यताम् ॥ १७ ॥
अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बुद्धोऽस्म्यतः सदा ।
अजः सर्वत एवाहमजरश्चाक्षयोऽमृतः ॥ १८ ॥
मदन्यः सर्वभूतेषु बोद्धा कश्चिन्न विद्यते ।
कर्माध्यक्षश्च साक्षी च चेता नित्योऽगुणोऽद्वयः ॥ १९ ॥
न सच्चाहं न चासच्च नोभयं केवलः शिवः ।
न मे संध्या न रात्रिर्वा नाहर्वा सर्वदा दृशेः ॥ २० ॥
सर्वमूर्तिविमुक्तं यद्यथा खं सूक्ष्ममद्वयम् ।
तेनाप्यस्मि विनाभूतं ब्रह्मैवाहं तथाऽद्वयम् ॥ २१ ॥
ममात्माऽस्य त आत्मेति भेदो व्योम्नो यथा भवेत् ।
एकस्य सुषिभेदेन तथा मम विकल्पितः ॥ २२ ॥
भेदोऽभेदस्तथा चैको नाना चेति विकल्पितः ।
ज्ञेयं ज्ञाता गतिर्गंता मय्येकस्मिन्कुतो भवेत् ॥ २३ ॥
न मे हेयं न चादेयमविकारी यतो ह्यहम् ।
सदा मुक्तस्तथा शुद्धः सदा बुद्धोऽगुणोऽद्वयः ॥ २४ ॥
इत्येवं सर्वदाऽऽत्मानं विद्यात्सर्वं समाहितः ।
विदित्वा मां स्वदेहस्थमृषिर्मुक्तो ध्रुवो भवेत् ॥ २५ ॥
कृतकृत्यश्च सिद्धश्च योगी ब्राह्मण एव च ।
य एवं वेद तत्त्वार्थमन्यथा ह्यात्महा भवेत् ॥ २६ ॥
वेदार्थो निश्चितो ह्येष समासेन मयोदितः ।
संन्यासिभ्यः प्रवक्तव्यः शांतेभ्यः शिष्टबुद्धिना ॥ २७ ॥

१४ स्वप्नस्मृतिप्रकरणम् ।

स्वप्नस्मृत्योर्घटादेर्हि रूपाभासः प्रदृश्यते ।
पुरा नूनं तदाकारा धीर्दृष्टेत्यनुमीयते ॥ १ ॥
भिक्षामटन्यथा स्वप्ने दृष्टो देहो न स स्वयम् ।
जाग्रद्दृश्यात्तथा देहाद्द्रष्टृत्वादन्य एव सः ॥ २ ॥
मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा ।
रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम् ॥ ३ ॥
व्यंजको वा यथाऽऽलोको व्यंग्यस्याकारतामियात् ।
सर्वार्थव्यंजकत्वाद्धीरर्थाकारा प्रदृश्यते ॥ ४ ॥
धीरेवार्थस्वरूपा हि पुंसां दृष्टा पुराऽपि च ।
न चेत्स्वप्ने कथं पश्येत्स्मरतो वाऽऽकृतिः कुतः ॥ ५ ॥
व्यंजकत्वं तदेवास्या रूपाद्याकारदृश्यता ।
द्रष्टृत्वं च दृशेस्तद्वद्व्याप्तिः स्याद्धिय उद्भवे ॥ ६ ॥
चिन्मात्रज्योतिषा सर्वाः सर्वदेहेषु बुद्धयः ।
मया यस्मात्प्रकाश्यंते सर्वस्यात्मा ततो ह्यहम् ॥ ७ ॥
करणं कर्म कर्ता च क्रिया स्वप्ने फलं च धीः ।
जाग्रत्येवं यतो दृष्टा द्रष्टा तस्मादतोऽन्यथा ॥ ८ ॥
बुद्ध्यादीनामनात्मत्वं हेयोपादेयरूपतः ।
हानोपादानकर्तात्मा न त्याज्यो न च गृह्यते ॥ ९ ॥
सबाह्याभ्यंतरे शुद्धे प्रज्ञानैकरसे घने ।
बाह्यमाभ्यंतरं चान्यत्कथं हेयं प्रकल्प्यते ॥ १० ॥
य आत्मा नेति नेतीति परापोहेन शेषितः ।
स चेद्ब्रह्मविदात्मेष्टो यतेतातः परं कथम् ॥ ११ ॥
अशनायाद्यतिक्रान्तं ब्रह्मैवास्मि निरंतरम् ।

कार्यवान्स्यां कथं चाहं विमृशेदेवमंजसा ॥ १२ ॥
पारगस्तु यथा नद्यास्तत्स्थः पारं यियासति ।
आमज्ञश्चेत्तथा कार्यं कर्तुमन्यदिहेच्छति ॥ १३ ॥
आत्मज्ञस्यापि यस्य स्याद्धानोपादानता यदि ।
न मोक्षार्हः स विज्ञेयो वांतोऽसौ ब्रह्मणा ध्रुवम् ॥ १४ ॥
सादित्यं हि जगत्प्राणस्तस्मान्नाहर्निशैव वा ।
प्राणज्ञस्यापि न स्यातां कुतो ब्रह्मविदोऽद्वये ॥ १५ ॥
न स्मरत्यात्मतो ह्यात्मा विस्मरेद्वाऽप्यलुप्तचित् ।
मनोऽपि स्मरतीत्येतज्ज्ञानमज्ञानहेतुजम् ॥ १६ ॥
ज्ञातुर्ज्ञेयः परो ह्यात्मा सोऽविद्याकल्पितः स्मृतः ।
अपोढे विद्यया तस्मिन्रज्ज्वां सर्प इवाद्वयः ॥ १७ ॥
कर्तृकर्मफलाभावात्सबाह्याभ्यंतरं ह्यजम् ।
ममाहं वेति यो भावस्तस्मिन्कस्य कुतो भवेत् ॥ १८ ॥
आत्मा ह्यात्मीय इत्येष भावोऽविद्याप्रकल्पितः ।
आत्मैकत्वे ह्यसौ नास्ति बीजाभावे कुतः फलम् ॥ १९ ॥
द्रष्टृ श्रोतृ तथा मंतृ विज्ञात्रेव तदक्षरम् ।
द्रष्ट्राद्यन्यन्न तद्यस्मात्तस्मात् द्रष्टाऽहमक्षरम् ॥ २० ॥
स्थावरं जंगमं चैव द्रष्टृत्वादिक्रियायुतम् ।
सर्वमक्षरमेवातः सर्वस्याऽऽत्माऽक्षरं त्वहम् ॥ २१ ॥
[illegible] ।
निर्ममं निरंहकारं यः पश्यति स पश्यति ॥ २२ ॥
ममाहंकारयत्नेच्छाः शून्या एव स्वभावतः ।
आत्मनीति यदि ज्ञातमाध्वं स्वस्थाः किमीहितैः ॥ २३ ॥
योऽहंकर्तारमात्मानं तथा वेत्तारमेव च ।
वेत्त्यनात्मज्ञ एवासौ योऽन्यथाज्ञः स आत्मवित् ॥ २४ ॥

यथाऽन्यत्वेऽपि तादात्म्यं देहादिष्वात्मनो मतम् ।
तथाऽकर्तुरविज्ञानात्फलकर्मात्मतात्मनः ॥ २५ ॥
दृष्टिः श्रुतिर्मतिर्ज्ञातिः स्वप्ने दृष्टा जनैः सदा ।
तासामात्मस्वरूपत्वादतः प्रत्यक्षताऽऽत्मनः ॥ २६ ॥
परलोकभयं यस्य नास्ति मृत्युभयं तथा ।
तस्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेंद्रा अपीश्वराः ॥ २७ ॥
ईश्वरत्वेन किं तस्य ब्रह्मेंद्रत्वेन वा पुनः ।
तृष्णा चेत्सर्वतश्छिन्ना सर्वदैन्योद्भवाऽशुभा ॥ २८ ॥
अहमित्यात्मधीर्या च ममेत्यात्मीयधीरपि ।
अर्थशून्ये यदा यस्य स आत्मज्ञो भवेत्तदा ॥ २९ ॥
बुद्ध्यादौ सत्युपाधौ च तथाऽसत्यविशेषता ।
यस्य चेदात्मनो ज्ञाता तस्य कार्यं कथं भवेत् ॥ ३० ॥
प्रसन्ने विमले व्योम्नि प्रज्ञानैकरसेऽद्वये ।
उत्पन्नात्मधियो ब्रूत किमन्यत्कार्यमिष्यते ॥ ३१ ॥
आत्मानं सर्वभूतस्थममित्रं चात्मनोऽपि यः ।
पश्यन्निच्छत्यसौ नूनं शीतीकर्तुं विभावसुम् ॥ ३२ ॥
प्रज्ञाप्राणानुकार्यात्मा छायेवाक्षादिगोचरः ।
ध्यायतीवेति चोक्तो हि शुद्धो मुक्तः स्वतो हि सः ॥ ३३ ॥
अप्राणस्यामनस्कस्य तथाऽसंसर्गिणो दृशेः ।
व्योमवद्व्यापिनो ह्यस्य कथं कार्यं भवेन्मम ॥ ३४ ॥
असमाधिं न पश्यामि निर्विकारस्य सर्वदा ।
ब्रह्मणो मे विशुद्धस्य शोध्यं नान्यद्विपाप्मनः ॥ ३५ ॥
गंतव्यं च तथा नैव सर्वगस्याचलस्य च ।
नोर्ध्वं नाधस्तिरो वापि निष्कलस्यागुणत्वतः ॥ ३६ ॥
चिन्मात्रज्योतिषो नित्यं तमस्तस्मिन्न विद्यते ।

कथं कार्यं ममैवाद्य नित्यमुक्तस्य शिष्यते ॥ ३७ ॥
अमनस्कस्य का चिंता क्रिया वाऽनिंद्रियस्य का।
अप्राणो ह्यमनाः शुभ्र इति सत्यं श्रुतेर्वचः ॥ ३८ ॥
अकालत्वाददेशत्वाददिक्त्वादनिमित्ततः।
आत्मनो नैव कालादेरपेक्षा ध्यायतः सदा ॥ ३९ ॥
यस्मिन्देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम्।
व्रजेत्तन्मानसं तीर्थं यस्मिन्स्नात्वाऽमृतो भवेत् ॥ ४० ॥
न चास्ति शब्दादिरनन्यवेदनः परस्परेणापि न चैव दृश्यते।
परेण दृश्यास्तु यथा रसादयस्तथैव दृश्यत्वत एव दैहिकाः ॥ ४१॥
अहंममेत्येषणयत्नविक्रियासुखादयस्तद्वदिह प्रदृश्यतः।
दृश्यत्वयोगाच्च परस्परेण ते न दृश्यतां यांति ततः परो भवान् ॥४२॥
अहंक्रियाद्या हि समस्तविक्रिया सकर्तृका कर्मफलेन संहता।
चितिस्वरूपेण समंततोऽर्कवत्प्रकाश्यमानाऽसितताऽऽत्मनो ह्यतः ॥४३॥
दृशिस्वरूपेण हि सर्वदेहिनां वियद्यथा व्याप्य मनांस्यवस्थितः।
अतो न तस्मादपरोऽस्ति वेदिता परोऽपि तस्मादत एक ईश्वरः ॥४४॥
शरीरबुद्ध्योर्यदि चान्यदृश्यता निरात्मवादाः सुनिराकृता मया।
परश्च शुद्धो ह्यविशुद्धिकर्मतः सुनिर्मलः सर्वगतोऽसितोऽद्वयः ॥४५॥
घटादिरूपं यदि ते न गृह्यते मनः प्रवृत्तं बहुधा स्ववृत्तिभिः।
अशुद्ध्यचिद्रूपविकारदोषता मतेर्यथा वारयितुं न पार्यते ॥ ४६ ॥
यथा विशुद्धं गगनं निरंतरं न सज्जते नापि च लिप्यते तथा।
समस्तभूतेषु सदैव तेष्वयं समः सदात्मा ह्यजरोऽमरोऽभयः ॥४७॥
अमूर्तमूर्तानि च कर्मवासना दृशिस्वरूपस्य बहिः प्रकल्पिताः।
अविद्यया ह्यात्मनि मूढदृष्टिभिरपोह्य नेतीत्यवशेषितो दृशिः ॥४८॥
प्रबोधरूपं मनसोऽर्थयोगजं स्मृतौ च सुप्तस्य च दृश्यतेऽर्थवत्।
तथैव देहप्रतिमानतः पृथग्दृशेः शरीरं च मनश्च दृश्यतः ॥ ४९ ॥

स्वभावशुद्धे गगने घनादिके मलेऽपयाते सति चाविशेषता ।
यथा च तद्वच्छ्रुतिवारितद्वये सदाऽविशेषो गगनोपमे दृशौ ॥ ५०॥

१५ नान्यदन्यत्प्रकरणम् ।

नान्यदन्यद्भवेद्यस्मान्नान्यत्किंचिद्विचिंतयेत् ।
अन्यस्यान्यत्वभावे हि नाशस्तस्य ध्रुवो भवेत् ॥ १ ॥
स्मरतो दृश्यते दृष्टं पटे चित्रमिवार्पितम् ।
यत्र येन च तौ ज्ञेयौ सत्त्वक्षेत्रज्ञसंज्ञकौ ॥ २ ॥
फलांतं चानुभूतं यद्युतं कर्त्रादिकारकैः ।
स्मर्यमाणं हि कर्मस्थं पूर्वं कर्मैव तच्चितः ॥ ३ ॥
द्रष्टुश्चान्यद्भवेत् दृश्यं दृश्यत्वाद्घटवत्सदा ।
दृश्यात् द्रष्टाऽसजातीयो न धीवत्साक्षिताऽन्यथा ॥ ४ ॥
स्वात्मबुद्धिमपेक्ष्यासौ विधीनां स्यात्प्रयोजकः ।
जात्यादिः शववत्तेन तद्वन्नानात्मताऽन्यथा ॥ ५ ॥
न प्रियाप्रिय इत्युक्तेर्नादेहत्वं क्रियाफलम् ।
देहयोगः क्रियाहेतुस्तस्माद्विद्वान्क्रियास्त्यजेत् ॥ ६ ॥
कर्मस्वात्मा स्वतंत्रश्चेन्निवृत्तौ च तथेष्यताम् ।
अदेहत्वे फलेऽकार्ये ज्ञाते कुर्यात्कथं क्रियाः ॥ ७ ॥
जात्यादीन्संपरित्यज्य निमित्तं कर्मणां बुधः ।
कर्महेतुविरुद्धं यत्स्वरूपं शास्त्रतः स्मरेत् ॥ ८ ॥
आत्मैकः सर्वभूतेषु तानि तस्मिंश्च खे यथा ।
पर्यगाद्व्योमवत्सर्वं शुक्रं दीप्तिमदिष्यते ॥ ९ ॥
व्रणस्नाय्वोरभावेन स्थूलं देहं निवारयेत् ।
शुद्धापापतयाऽलेपं लिंगं चाकायमित्युत ॥ १० ॥
वासुदेवो यथाऽश्वत्थे स्वदेहे चाब्रवीत्समम् ।

तद्वद्वेत्ति य आत्मानं समं स ब्रह्मवित्तमः ॥ ११ ॥
यथा ह्यन्यशरीरेषु ममाहंता न चेष्यते ।
अस्मिंश्चापि तथा देहे धीसाक्षित्वाविशेषतः ॥ १२ ॥
रूपसंस्कारतुल्याधी रागद्वेषौ भयं च यत् ।
गृह्यते धीश्रयं तस्माज्ज्ञाता शुद्धोऽभयः सदा ॥ १३ ॥
यन्मनास्तन्मयोऽन्यत्वे नात्मत्वाप्तौ क्रियात्मनि ।
आत्मत्वे चानपेक्षत्वात्सापेक्षं हि न तत्स्वयम् ॥ १४ ॥
खमिवैकरसा ज्ञप्तिराविभक्ताऽजराऽमला ।
चक्षुराद्युपधानात्मा विपरीता विभाव्यते ॥ १५ ॥
दृश्यत्वादहमित्येष नात्मधर्मो घटादिवत् ।
तथाऽन्ये प्रत्यया ज्ञेया दोषाश्चात्माऽमलो ह्यतः ॥ १६ ॥
सर्वप्रत्ययसाक्षित्वादविकारी च सर्वगः ।
विक्रियेत यदि द्रष्टा बुद्ध्यादीवाल्पविद्भवेत् ॥ १७ ॥
न दृष्टिर्लुप्यते द्रष्टुश्चक्षुरादेर्यथैव तत् ।
नहि द्रष्टुरिति ह्युक्तं तस्मात् द्रष्टा सदैकदृक् ॥ १८ ॥
संघातो वाऽस्मि भूतानां करणानां तथैव च ।
व्यस्तं वाऽन्यतमो वाऽस्मि को वाऽस्मीति विचारयेत् ॥१९॥
व्यस्तं नाहं समस्तं वा भूतमिंद्रियमेव वा ।
ज्ञेयत्वात्करणत्वाच्च ज्ञाताऽन्योऽस्मात् घटादिवत् ॥ २० ॥
आत्माग्नेरिंधना बुद्धिरविद्याकामकर्मभिः ।
दीपिता प्रज्वलत्येषा द्वारैः श्रोत्रादिभिः सदा ॥ २१ ॥
दक्षिणाक्षिप्रधानेषु यदा बुद्धिर्विचेष्टते ।
विषयैर्हविषा दीप्ता ह्यात्माग्निः स्थूलभुक्तदा ॥ २२ ॥
हूयंते तु हवींषीति रूपादिग्रहणे स्मरन् ।
अरागद्वेष आत्माग्नौ जाग्रद्दोषैर्न लिप्यते ॥ २३ ॥

मानसे तु गृहे व्यक्ता अविद्याकर्मवासनाः ।
पश्यंस्तैजस आत्मोक्तः स्वयंज्योतिःप्रकाशिताः ॥ २४ ॥
विषया वासना वापि चोद्यंते नैव कर्मभिः ।
यदा बुद्धौ तदा ज्ञेयः प्राज्ञ आत्मा ह्यनन्यदृक् ॥ २५ ॥
मनोबुद्धींद्रियाणां या अवस्थाः कर्मचोदिताः ।
चैतन्येनैव भास्यंते रविणेव घटादयः ॥ २६ ॥
तत्रैवं सति बुद्धीज्ञ आत्मभासाऽवभासयन् ।
कर्ता तासां यदर्थास्ता मूढैरेवाभिधीयते ॥ २७ ॥
सर्वज्ञोऽप्यत एव स्यात्स्वेन भासाऽवभासयन् ।
सर्वं सर्वक्रियाहेतोः सर्वकृत्त्वं तथाऽऽत्मनः ॥ २८ ॥
सोपाधिश्चैवमात्मोक्तो निरुपाख्योऽनुपाधिकः ।
निष्कलो निर्गुणः शुद्धस्तं मनो वाक्च नाप्नुतः ॥ २९ ॥
चेतनोऽचेतनो वाऽपि कर्ताऽकर्ता गतोऽगतः ।
बद्धो मुक्तस्तथा चैकोऽनेकः शुद्धोऽन्यथेति वा ॥ ३० ॥
अप्राप्यैव निवर्तंते वाचो धीभिः सहैव तु ।
निर्गुणत्वात्क्रियाभावाद्विशेषाणामभावतः ॥ ३१ ॥
व्यापकं सर्वतो व्योम मूर्तैः सर्वैर्वियोजितम्
यथा तद्वदिहात्मानं विद्याच्छुद्धं परं पदम् ॥ ३२ ॥
दृष्टं हित्वा स्मृतिं तस्मिन्सर्वग्रश्च तमस्त्यजेत् ।
सर्वदृग्ज्योतिषा युक्तो दिनकृच्छार्वरं यथा ॥ ३३ ॥
रूपस्मृत्यंधकारार्थाः प्रत्यया यस्य गोचराः ।
स एवात्मा समो द्रष्टा सर्वभूतेषु सर्वगः ॥ ३४ ॥
आत्मबुद्धिमनश्चक्षुर्विषयालोकसंगमात् ।
विचित्रो जायते बुद्धेः प्रत्ययोऽज्ञानलक्षणः ॥ ३५ ॥
विविच्यास्मात्स्वमात्मान विद्याच्छुद्धं परं पदम् ।

द्रष्टारं सर्वभूतस्थं समं सर्वभयातिगम् ॥ ३६ ॥
समस्तं सर्वगं शांतं विमलं व्योमवत्स्थितम् ।
निष्कलं निष्क्रियं सर्वं नित्यं द्वंद्वैर्विवर्जितम् ॥ ३७ ॥
सर्वप्रत्ययसाक्षी ज्ञः कथं ज्ञेयो मयेत्युत ।
विमृश्यैवं विजानीयाज्ज्ञातं ब्रह्म न वेति वा ॥ ३८ ॥
अदृष्टं द्रष्टृविज्ञातं दभ्रमित्यादि शासनात् ।
नैव ज्ञेयं मयाऽन्यैर्वा परं ब्रह्म कथंचन ॥ ३९ ॥
स्वरूपाव्यवधानाभ्यां ज्ञानालोकस्वभावतः ।
अन्यज्ञानानपेक्षत्वाज्ज्ञातं ब्रह्म सदा मया ॥ ४० ॥
नान्येन ज्योतिषा कार्यं रवेरात्मप्रकाशने ।
स्वबोधान्नान्यबोधेच्छा बोधस्यात्मप्रकाशने ॥ ४१ ॥
न तस्यैवान्यतोपेक्षा स्वरूपं यस्य यद्भवेत् ।
प्रकाशान्तरदृश्यो न प्रकाशो ह्यस्ति कश्चन ॥ ४२ ॥
व्यक्तिः स्यादप्रकाशस्य प्रकाशात्मसमागमात् ।
प्रकाशस्त्वर्ककार्यः स्यादिति मिथ्या वचो ह्यतः ॥ ४३ ॥
यतोऽभूत्वा भवेद्यच्च तस्य तत्कार्यमिष्यते ।
स्वरूपत्वादभूत्वा न प्रकाशो जायते रवेः ॥ ४४ ॥
सत्तामात्रे प्रकाशस्य कर्ताऽऽदित्यादिरिष्यते ।
घटादिव्यक्तितो यद्वत्तद्वद्बोधात्मनीष्यताम् ॥ ४५ ॥
बिलात्सर्पस्य निर्याणे सूर्यो यद्वत्प्रकाशकः ।
प्रयत्नेन विना तद्वज्ज्ञाताऽऽत्मा बोधरूपतः ॥ ४६ ॥
दग्धैवमुष्णः सत्तायां तद्वद्बोधात्मनीष्यताम् ।
सत्येव यदुपाधौ तु ज्ञाते सर्पे इवोत्थिते ॥ ४७ ॥
ज्ञाताऽयत्नोऽपि तद्वज्ज्ञः कर्ता भ्रामकवद्भवेत् ।
स्वरूपेण स्वयं नात्मा ज्ञेयोऽज्ञेयोऽथवा ततः ॥ ४८ ॥

विदिताविदिताभ्यां तदन्यदेवेति शासनात् ।
बंधमोक्षादयो भावास्तद्वदात्मनि कल्पिताः ॥ ४९ ॥
नाहोरात्रे यथा सूर्ये प्रभारूपाविशेषतः ।
बोधरूपाविशेषान्न बोधाबोधौ तथाऽऽत्मनि ॥ ५० ॥
यथोक्तं ब्रह्म यो वेद हानोपादानवर्जितम् ।
यथोक्तेन विधानेन स सत्यं नैव जायते ॥ ५१ ॥
जन्ममृत्युप्रवाहेषु पतितो नैव शक्नुयात् ।
इत उद्धर्तुमात्मानं ज्ञानादन्येन केनचित् ॥ ५२ ॥
" भिद्यते हृदयग्रंथिच्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्ट " इति श्रुतेः ॥ ५३ ॥
ममाहमित्येतदपोह्य सर्वतो विमुक्तदेहं पदमंबरोपमम् ।
सुदृष्टशास्त्रानुमितिभ्य ईरितं विमुच्यतेऽस्मिन्यदि निश्चितो नरः ॥५४॥

---

१६ प्रार्थिवप्रकरणम् ।

पार्थिवः कठिनो धातुर्द्रवो देहे स्मृतोऽम्मयः ।
पक्तिचेष्टावकाशाः स्युर्वह्निवाय्वंबरोद्भवाः ॥ १ ॥
घ्राणादीनि तदर्थाश्च पृथिव्यादिगुणाः क्रमात् ।
रूपालोकवदिष्टं हि सजातीयार्थमिंद्रियम् ॥ २ ॥
बुद्ध्यर्थान्याहुरेतानि वाक्पाण्यादीनि कर्मणे ।
तद्विकल्पार्थमंतःस्थं मन एकादशं भवेत् ॥ ३ ॥
निश्चयार्था भवेद्बुद्धिस्तां सर्वार्थानुभाविनीम् ।
ज्ञाताऽऽत्मोक्तः स्वरूपेण ज्योतिषा व्यंजयन्सदा ॥ ४ ॥
व्यंजकस्तु यथाऽऽलोको व्यंग्यस्याकारतां गतः ।
व्यतिकीर्णोऽप्यसंकीर्णस्तद्वज्ज्ञः प्रत्ययैः सदा ॥ ५ ॥
स्थितो दीपो यथाऽयत्नः प्राप्तं सर्वं प्रकाशयेत् ।

शब्दाद्याकारबुद्धीर्ज्ञः प्राप्तास्तद्वत्प्रपश्यति ॥ ६ ॥
शरीरेंद्रियसंघात आत्मत्वेन गतां धियम् ।
नित्यात्मज्योतिषा दीप्तां विशिंषन्ति सुखादयः ॥ ७ ॥
शिरोदुःखादिनाऽऽत्मानं दुःख्यस्मीति हि पश्यति ।
द्रष्टाऽन्यो दुःखिनो दृश्यात् द्रष्टृत्वाच्च न दुःख्यसौ ॥ ८ ॥
दुःखी स्याद्दुःख्यहंमानाद्दुःखिनो दर्शनान्न वा ।
संहतेंऽगादिभिर्द्रष्टा दुःखी दुःखस्य नैव सः ॥ ९ ॥
चक्षुर्वत्कर्मकर्तृत्वं स्याच्चेन्नानेकमेव तत् ।
संहतं च ततो नात्मा द्रष्टृत्वात्कर्मतां व्रजेत् ॥ १० ॥
ज्ञानयत्नाद्यनेकत्वमात्मनोऽपि मतं यदि ।
नैकज्ञानगुणत्वात्तु ज्योतिर्वत्तस्य कर्मता ॥ ११ ॥
ज्योतिषो द्योतकत्वेऽपि यद्वन्नात्मप्रकाशनम् ।
भेदेऽप्येवं समत्वाज्ज्ञ आत्मानं नैव पश्यति ॥ १२ ॥
यद्धर्मा यः पदार्थो न तस्यैवेयात्स कर्मताम् ।
न ह्यात्मानं दहत्यग्निस्तथा नैव प्रकाशयेत् ॥ १३ ॥
एतेनैवात्मनाऽऽत्मानो ग्रहो बुद्धेर्निराकृतः ।
अंशोऽप्येवं समत्वाद्धि निर्भेदत्वान्न युज्यते ॥ १४ ॥
शून्यतापि न युक्तैवं बुद्धेरन्येन दृश्यता ।
युक्ताऽतो घटवत्तस्याः प्राक्सिद्धेश्च विकल्पतः ॥ १५ ॥
अविकल्पं तदस्त्येव यत्पूर्वं स्याद्विकल्पतः ।
विकल्पोत्पत्तिहेतुत्वाद्यद्यस्यैव तु कारणम् ॥ १६ ॥
अज्ञानं कल्पनामूलं संसारस्य नियामकम् ।
हित्वाऽऽत्मानं परं ब्रह्म विद्यान्मुक्तं सदाऽभयम् ॥ १७ ॥
जाग्रत्स्वप्नौ तयोर्बीजं सुषुप्ताख्यं तमोमयम् ।
अन्योन्यस्मिन्नसत्त्वाच्च नास्तीत्येतत्त्रयं त्यजेत् ॥ १८ ॥

आत्मबुद्धिमनश्चक्षुरालोकार्थादिसंकरात् ।
भ्रांतिः स्यादात्मकर्मेति क्रियाणां संनिपाततः ॥ १९ ॥
निमीलोन्मीलने स्थाने वायव्ये ते न चक्षुषः ।
प्रकाशत्वान्मनस्येवं बुद्धौ न स्तः प्रकाशतः ॥ २० ॥
संकल्पाध्यवसायौ तु मनोबुद्ध्योर्यथा क्रमात् ।
नेतरेतरधर्मत्वं सर्वं चात्मनि कल्पितम् ॥ २१ ॥
स्थानावच्छेददृष्टिः स्यादिंद्रियाणां तदात्मताम् ।
गता धीस्तां हि पश्यञ्ज्ञो देहमात्र इवेक्ष्यते ॥ २२ ॥
क्षणिकं हि तदत्यर्थं धर्ममात्रं निरंतरम् ।
सादृश्याद्दीपवत्तद्धीस्तच्छांतिः पुरुषार्थता ॥ २३ ॥
स्वाकारान्यावभासं च येषां रूपादि विद्यते ।
येषां नास्ति ततश्चान्यत्पूर्वासंगतिरुच्यते ॥ २४ ॥
बाह्याकारत्वतो ज्ञप्तेः स्मृत्यभावः सदा क्षणात् ।
क्षणिकत्वाच्च संस्कारं नैवाधत्ते क्वचित्तु धीः ॥ २५ ॥
आधारस्याप्यसत्त्वाच्च तुल्यतानिर्निमित्ततः ।
स्थाने वा क्षणिकत्वस्य हानं स्यान्न तदिष्यते ॥ २६ ॥
शांतेश्चायत्नसिद्धत्वात्साधनोक्तिरनर्थिका ।
एकैकस्मिन्समाप्तत्वाच्छांतेरन्यानपेक्षता ॥ २७ ॥
अपेक्षा यदि भिन्नेऽपि परसंतान इष्यताम् ।
सर्वार्थे क्षणिके कस्मिंस्तथाप्यन्यानपेक्षता ॥ २८ ॥
तुल्यकालसमुद्भूताावितरेतरयोगिणौ ।
योगाच्च संस्कृतो यस्तु सोऽन्यं हीक्षितुमर्हति ॥ २९ ॥
मृषाध्यासस्तु यत्र स्यात्तन्नाशस्तत्र नो मतः ।
सर्वनाशो भवेद्यस्य मोक्षः कस्य फलं वद ॥ ३० ॥
अस्ति तावत्स्वयं नाम ज्ञानं वाऽऽत्माऽन्यदेव वा ।

भावाभावज्ञतस्तस्य नाभावस्त्वधिगम्यते ॥ ३१ ॥
येनाधिगम्यतेऽभावस्तत्सत्स्यात्तन्न चेद्भवेत् ।
भावाभावानभिज्ञत्वं लोकस्य स्यान्न चेष्यते ॥ ३२ ॥
सदसत्सदसच्चेति विकल्पात्प्राग्यदिष्यते ।
तदद्वैतं समत्वात्तु नित्यं चान्यद्विकल्पितात् । ३३ ॥
विकल्पोद्भवतोऽसत्त्वं स्वप्नदृश्यवदिष्यताम् ।
द्वैतस्य प्रागसत्त्वाच्च सदसत्त्वादिकल्पनात् ॥ ३४ ॥
वाचारंभणशास्त्राच्च विकाराणां ह्यभावता ।
मृत्योः स मृत्युमित्यादेर्मम मायेति च स्मृतेः ॥ ३५ ॥
विशुद्धिश्चात एवास्य विकल्पाच्च विलक्षणः ।
उपादेयो न हेयोऽत आत्मा नान्यैरकल्पितः ॥ ३६ ॥
अप्रकाशो यथाऽऽदित्ये नास्ति ज्योतिःस्वभावतः ।
नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनि ॥ ३७ ॥
तथाऽविक्रियरूपत्वान्नावस्थांतरमात्मनः ।
अवस्थांतरवत्त्वे हि नाशोऽस्य स्यान्न संशयः ॥ ३८ ॥
मोक्षोऽवस्थांतरं यस्य कृतकः स चलो ह्यतः ।
न संयोगो वियोगो वा मोक्षो युक्तः कथंचन ॥ ३९ ॥
संयोगस्याप्यनित्यत्वाद्वियोगस्य तथैव च ।
गमनागमने चैव स्वरूपं तु न हीयते ॥ ४० ॥
स्वरूपस्यानिमित्तत्वात्सनिमित्ता हि चापरे ।
अनुपात्तं स्वरूपं हि स्वेनात्यक्तं तथैव च ॥ ४१ ॥
स्वरूपत्वान्न सर्वस्य त्यक्तुं शक्यो ह्यनन्यतः ।
ग्रहीतुं वा ततो नित्योऽविषयत्वात्पृथक्त्वतः ॥ ४२ ॥
आत्मार्थत्वाच्च सर्वस्य नित्य आत्मैव केवलः ।
सर्वा; साधनैः सह मोक्षवित् ॥ ४३ ॥

आत्मलाभः परो लाभ इति शास्त्रोपपत्तयः ।
अलाभोऽनात्मलाभस्तु त्यजेत्तस्मादनात्मताम् ॥ ४४ ॥
गुणानां समभावस्य भ्रंशो न ह्युपपद्यते ।
अविद्यादेः प्रसुप्तत्वान्न चान्यो हेतुरुच्यते ॥ ४५ ॥
इतरेतरहेतुत्वे प्रवृत्तिः स्यात्सदा न वा ।
नियमो न प्रवृत्तीनां गुणेष्वात्मनि वा भवेत् ॥ ४६ ॥
विशेषो मुक्तबद्धानां तादर्थ्ये न च युज्यते ।
अर्थार्थिनोस्त्वसंबंधो नार्थी ज्ञो नेतरोऽपि वा ॥ ४७ ॥
प्रधानस्य च पारार्थ्यं पुरुषस्याविकारतः ।
न युक्तं सांख्यशास्त्रेऽपि विकारेऽपि न युज्यते ॥ ४८ ॥
संबंधानुपपत्तेश्च प्रकृतेः पुरुषस्य च ।
मिथोऽयुक्तं तदर्थत्वं प्रधानस्याचितित्वतः ॥ ४९ ॥
क्रियोत्पत्तौ विनाशित्वं ज्ञानमात्रे च पूर्ववत् ।
निर्निमित्ते त्वनिर्मोक्षः प्रधानस्य प्रसज्यते ॥ ५० ॥
न प्रकाश्यं यथोष्णत्वं ज्ञानेनैवं सुखादयः ।
एकनीडत्वतोऽग्राह्याः स्युः कणादादिवर्त्मनाम् ॥ ५१ ॥
युगपत्समवेतत्वं सुखविज्ञानयोरपि ।
मनोयोगैकहेतुत्वादग्राह्यत्वं सुखस्य च ॥ ५२ ॥
तथाऽन्येषां च भिन्नत्वाद्युगपज्जन्म नेष्यते ।
गुणानां समवेतत्वं ज्ञानं चेन्न विशेषणात् ॥ ५३ ॥
ज्ञानेनैव विशेषत्वाज्ज्ञानाप्यत्वं स्मृतेस्तथा ।
सुखं ज्ञातं मयेत्येवं तत्त्वाज्ञानात्मकत्वतः ॥ ५४ ॥
सुखादेर्नात्मधर्मत्वमात्मनस्तेऽविकारतः ।
भेदादन्यस्य कस्मान्न मनसो वाऽविशेषतः ॥ ५५ ॥
स्यान्मालाऽपरिहार्या तु ज्ञानं चेज्ज्ञेयतां व्रजेत् ।

युगपद्वापि चोत्पत्तिरभ्युपेताऽत इष्यते ॥ ५६ ॥
अनवस्थान्तरत्वाच्च बंधो नात्मनि विद्यते ।
नाशुद्धिश्चाप्यसंगत्वादसंगो हीति च श्रुतेः ॥ ५७ ॥
सूक्ष्मैकागोचरेभ्यश्च न लिप्यत इति श्रुतेः ।
एवं तर्हि न मोक्षोऽस्ति बंधाभावात्कथंचन ॥ ५८ ॥
शास्त्रानर्थक्यमेव स्यान्न बुद्धेर्भ्रान्तिरिष्यते ।
बंधो मोक्षश्च तन्नाशः स यथोक्तो न चान्यथा ॥ ५९ ॥
बोधात्मज्योतिषा दीप्ता बोधमात्मनि मन्यते ।
बुद्धिर्नान्योऽस्ति बोद्धेति सेयं भ्रांतिर्हि धीगता ॥ ६० ॥
बोधस्यात्मस्वरूपत्वान्नित्यं तत्रोपचर्यते ।
अविवेकोऽप्यनाद्योऽयं संसारो नान्य इष्यते ॥ ६१ ॥
मोक्षस्तन्नाश एव स्यान्नान्यथानुपपत्तितः ।
येषां वस्त्वंतरापत्तिर्मोक्षो नाशस्तु तैर्मतः ॥ ६२ ॥
अवस्थान्तरमप्येवमविकारान्न युज्यते ।
विकारेऽवयवित्वं स्यात्ततो नाशो घटादिवत् ॥ ६३ ॥
तस्मात् भ्रांतिरतोऽन्या हि बंधमोक्षादिकल्पनाः ।
सांख्यकाणादबौद्धानां मीमांसाहतकल्पनाः ॥ ६४ ॥
शास्त्रयुक्तिविहीनत्वान्नादर्तव्याः कदाचन ।
शक्यन्ते शतशो वक्तुं दोषास्तासां सहस्रशः ॥ ६५ ॥
अपि निंदोपपत्तेश्च यान्यतोऽन्यानि चेत्यतः ।
त्यक्त्वातो ह्यन्यशास्त्रोक्तीर्मतिं कुर्याद्दृढां बुधः ॥ ६६ ॥
श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनार्जवम् ।
वेदान्तस्यैव तत्त्वार्थे व्यासस्याभिमते तथा ॥ ६७ ॥
इति प्रणुन्ना द्वयवादकल्पना निरात्मवादाश्च तथाहि युक्तितः ।
व्यपेतशंकाः परवादतः स्थिरा मुमुक्षवो ज्ञानपथे स्युरित्युत ॥ ६८

स्वसाक्षिकं ज्ञानमतीव निर्मलं विकल्पनाभ्यो विपरीतमद्वयम् ।
अवाप्य सम्यग्यदि निश्चितो भवेन्निरन्वयो निर्वृतिमेति शाश्वतीम् ॥६९॥
इदं रहस्यं परमं परायणं व्यपेतदोषैरभिमानवर्जितैः ।
समीक्ष्य कार्या मतिरार्जवे सदा न तत्त्वदृक्स्वान्यमतिर्हि कश्चन ॥७०॥
अनेकजन्मान्तरसंचितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकैः ।
इदं विदित्वा परमं हि पावनं न लिप्यते व्योमवदेव कर्मभिः ॥ ७१ ॥
प्रशान्तचित्ताय जितेन्द्रियाय च प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे ॥ ७२ ॥
परस्य देहे न यथाभिमानिता परस्य तद्वत्परमार्थमीक्ष्य च ।
इदं हि विज्ञानमतीव निर्मलं संप्राप्य मुक्तोऽथ भवेच्च सर्वतः ॥ ७३ ॥
नहीह लाभोऽभ्यधिकोऽस्ति कश्चन स्वरूपलाभात्स इतो हि नान्यतः ।
न देयमैन्द्रादपि राज्यतोऽधिकं स्वरूपलाभं त्वपरीक्ष्य यत्नतः ॥ ७४ ॥

---

१७ सम्यङ्मतिप्रकरणम् ।

आत्मा ज्ञेयः परो ह्यात्मा यस्मादन्यन्न विद्यते ।
सर्वज्ञः सर्वदृक् शुद्धस्तस्मै ज्ञेयात्मने नमः ॥ १ ॥
पदवाक्यप्रमाणज्ञैर्दीपभूतैः प्रकाशितम् ।
ब्रह्म वेदरहस्यं यैस्तान्नित्यं प्रणतोऽस्म्यहम् ॥ २ ॥
यद्वाक्सूर्यांशुसंपातप्रनष्टध्वान्तकल्मषः ।
प्रणम्य तान्गुरून्वक्ष्ये ब्रह्मविद्याविनिश्चयम् ॥ ३ ॥
आत्मलाभात्परो नान्यो लाभः कश्चन विद्यते ।
यदर्था वेदवादाश्च स्मार्ताश्चापि तु याः क्रियाः ॥ ४ ॥
आत्मार्थोऽपि हि यो लाभः सुखायेष्टो विपर्ययः ।
आत्मलाभः परः प्रोक्तो नित्यत्वाद्ब्रह्मवेदिभिः ॥ ५ ॥
स्वयं लब्धस्वभावत्वाल्लाभस्तस्य न चान्यतः ।

अन्यापेक्षस्तु यो लाभः सोऽन्यदृष्टिसमुद्भवः ॥ ६ ॥
अन्यदृष्टिस्त्वविद्या स्यात्तन्नाशो मोक्ष उच्यते ।
ज्ञानेनैव तु सोऽपि स्याद्विरोधित्वान्न कर्मणा ॥ ७ ॥
कर्मकार्यस्त्वनित्यः स्यादविद्याकामकारणः ।
प्रमाणं वेद एवात्र ज्ञानस्याधिगमे स्मृतः ॥ ८ ॥
ज्ञानैकार्थपरत्वात्तं वाक्यमेकं ततो विदुः ।
एकत्वं ह्यात्मनो ज्ञेयं वाक्यार्थप्रतिपत्तितः ॥ ९ ॥
वाच्यभेदात्तु तद्भेदः कल्प्यो वाच्योऽपि तच्छ्रुतेः ।
त्रयं त्वेतत्ततः प्रोक्तं रूपं नाम च कर्म च ॥ १० ॥
असदेतत्त्रयं तस्मादन्योन्येन हि कल्पितम् ।
कृतो वर्णो यथाशब्दाच्छ्रुतोऽन्यत्र धिया बहिः ॥ ११ ॥
दृष्टं चापि यथारूपं बुद्धेः शब्दाय कल्पते ।
एवमेतज्जगत्सर्वं भ्रांतिबुद्धिविकल्पितम् ॥ १२ ॥
असदेतत्ततो युक्तं सच्चिन्मात्रं न कल्पितम् ।
वेदश्चापि स एवाद्यो वेद्यं चान्यत्तु कल्पितम् ॥ १३ ॥
येन वेत्ति स वेदः स्यात्स्वप्ने सर्वं तु मायया ।
येन पश्यति तच्चक्षुः शृणोति श्रोत्रमुच्यते ॥ १४ ॥
येन स्वप्नगतो वक्ति सा वाग्घ्राणं तथैव च ।
रसनस्पर्शने चैव मनश्चान्यत्तथेंद्रियम् ॥ १५ ॥
कल्प्योपाधिभिरेवैतद्भिन्नं ज्ञानमनेकधा ।
आधिभेदाद्यथा भेदो मणेरेकस्य जायते ॥ १६ ॥
जाग्रतश्च तथा भेदो ज्ञानस्यास्य त्रिकल्पितः ।
बुद्धिस्थं व्याकरोत्यर्थं भ्रांत्या तृष्णोद्भवक्रियः ॥ १७ ॥
स्वप्ने तद्वत्प्रबोधे यो बहिर्भ्रांतस्तथैव च ।
आलेख्याध्ययने यद्वत्तदन्योन्यधियोद्भवम् ॥ १८ ॥

यदायं कल्पयेद्भेदं तत्कामः सन्यथाक्रतुः ।
यत्कामस्तत्क्रतुर्भूत्वा कृतं यत्तत्प्रपद्यते ॥ १९ ॥
अविद्याप्रभवं सर्वंनसत्तस्मादिदं जगत् ।
तद्धता दृश्यते यस्मात्सुषुप्ते न च गृह्यते ॥ २० ॥
विद्याविद्ये श्रुतिप्रोक्ते एकत्वान्यधियौ हि नः ।
तस्मात्सर्वप्रयत्नेन शास्त्रे विद्या विधीयते ॥ २१ ॥
चित्ते ह्यादर्शवद्यस्माच्छुद्धे विद्या प्रकाशते ।
यमैर्नित्यैश्च यज्ञैश्च तपोभिस्तस्य शोधनम् ॥ २२ ॥
शारीरादि तपः कुर्यात्तद्विशुद्ध्यर्थमुत्तमम् ।
मनआदिसमाधानं तत्तद्देहविशोषणम् ॥ २३ ॥
" मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः ।
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते " ॥ २४ ॥
दृष्टं जागरितं विद्यात्स्मृतं स्वप्नं तदेव तु ।
सुषुप्तं तदभावं च स्वमात्मानं परं पदम् ॥ २५ ॥
सुषुप्त्याख्यं तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ।
स्वात्मबोधप्रदग्धं स्याद्बीजं दग्धं यथाभवम् ॥ २६ ॥
तदेवैकं त्रिधा ज्ञेयं मायाबीजं पुनः क्रमात् ।
मायाव्यात्माऽविकारोऽपि बहुधैको जलार्कवत् ॥ २७ ॥
बीजं चैकं यथा भिन्नं प्राणस्वप्नादिभिस्तथा ।
स्वप्नजाग्रच्छरीरेषु तद्वच्चात्मा जलेंदुवत् ॥ २८ ॥
मायाहस्तिनमारुह्य मायाव्येको यथा व्रजेत् ।
आगच्छंस्तद्वदेवात्मा प्राणस्वप्नादिगोचरः ॥ २९ ॥
न हस्ती न तदारूढो मायाव्यन्यो यथा स्थितः ।
न प्राणादि न तद्द्रष्टा यथा ज्ञोऽन्यः सदादृशिः ॥ ३० ॥
अबद्धचक्षुषो नास्ति माया मायाविनोऽपि वा ।

बद्धाक्षस्यैव सा माया मायाऽयेव ततो भवेत् ॥ ३१ ॥
साक्षादेव स विज्ञेयः साक्षादात्मेति च श्रुतेः ।
भिद्यते हृदयग्रंथिर्न चेदित्यादितः श्रुतेः ॥ ३२ ॥
अशब्दादित्वतो नास्य ग्रहणं चेंद्रियैर्भवेत् ।
सुखादिभ्यस्तथान्यत्वाद् बुद्ध्या वापि कथं भवेत् ॥ ३३ ॥
अदृश्योऽपि यथा राहुश्चंद्रे बिंबं यथांऽभसि ।
सर्वगोऽपि तथैवात्मा बुद्धावेव स गृह्यते ॥ ३४ ॥
भानोर्बिंबं यथा चौष्ण्यं जले दृष्टं न चांभसः ।
बुद्धौ बोधो न तद्धर्मस्तथैव स्याद्विधर्मतः ॥ ३५ ॥
चक्षुर्युक्ता धियो वृत्तिर्या तां पश्यन्नलुप्तदृक् ।
दृष्टेर्द्रष्टा भवेदात्मा श्रुतेः श्रोता तथा भवेत् ॥ ३६ ॥
केवलां मनसो वृत्तिं पश्यन्मंता मतेरजः ।
विज्ञाताऽलुप्तशक्तित्वात्तया शास्त्रं नहीत्यतः ॥ ३७ ॥
ध्यायतीत्यविकारित्वं तथा लेलायतीत्यपि ।
अत्र स्तेनेति शुद्धत्वं तथाऽनन्वागतं श्रुतेः ॥ ३८ ॥
शक्त्यलोपात्सुषुप्ते ज्ञस्तथा बोधेऽविकारतः ।
ज्ञेयस्यैव विशेषस्तु यत्र वेति श्रुतेर्वचः ॥ ३९ ॥
व्यवधानाद्धि पारोक्ष्यं लोकदृष्टेरनात्मनः ।
दृष्टेरात्मस्वरूपत्वात्प्रत्यक्षं ब्रह्म तत्स्मृतम् ॥ ४० ॥
नहि दीपांतरापेक्षा यद्वद्दीपप्रकाशने ।
बोधस्यात्मस्वरूपत्वान्न बोधोऽन्यस्तथेष्यते ॥ ४१ ॥
विषयत्वं विकारित्वं नानात्वं वा न हीष्यते ।
न हेयो आत्मा नान्येन वा ततः ॥ ४२ ॥
सबाह्याभ्यंतरोऽजीर्णो जन्ममृत्युजरातिगः ।
अहमात्मेति यो वेत्ति कुतोऽन्वेव बिभेति सः ॥ ४३ ॥

प्रागेवैतद्विधेः कर्म वर्णित्वादेरपोहनात् ।
तदस्थूलादिशास्त्रेभ्यस्तत्त्वमेवेति निश्चयात् ॥ ४४ ॥
पूर्वे देहपरित्यागे जात्यादीनां प्रहाणतः ।
देहस्यैव तु जात्यादिस्तस्याप्येवं ह्यनात्मता ॥ ४५ ॥
ममाहं चेत्यतोऽविद्या शरीरादिष्वनात्मसु ।
आत्मज्ञानेन हेया स्यादसुराणामिति श्रुतेः ॥ ४६ ॥
दशाहाशौचकार्याणां पारिव्राज्ये निवर्तनम् ।
यथा ज्ञानस्य संप्राप्तौ तद्वज्जात्यादिकर्मणाम् ॥ ४७ ॥
यत्कामस्तत्क्रतुर्भूत्वा कृतं त्वज्ञः प्रपद्यते ।
यदा स्वात्महृशः कामाः प्रमुच्यन्तेऽमृतस्तदा ॥ ४८ ॥
आत्मरूपविधेः कार्यं क्रियादिभ्यो निवर्तनम् ।
न साध्यं साधनं वाऽऽत्मा नित्यतृप्तः स्मृतेर्मतः ॥ ४९ ॥
उत्पाद्याप्यविकार्याणि संस्कार्यं च क्रियाफलम् ।
नातोऽन्यत्कर्मणा कार्यं त्यजेत्तस्मात्ससाधनम् ॥ ५० ॥
तापान्तरत्वादनित्यत्वादात्मार्थत्वाच्च या बहिः ।
संहृत्यात्मनि तां प्रीतिं सत्यार्थी गुरुमाश्रयेत् ॥ ५१ ॥
शांतं प्राज्ञं तथा मुक्तं निष्क्रियं ब्रह्मणि स्थितम् ।
श्रुतेराचार्यवान्वेद तद्विद्धीति स्मृतेस्तथा ॥ ५२ ॥
स गुरुस्तारयेद्युक्तं शिष्यं शिष्यगुणान्वितम् ।
ब्रह्मविद्याप्लवेनाशु स्वान्तध्वान्तमहोदधिम् ॥ ५३ ॥
दृष्टिः स्पृष्टिः श्रुतिर्घ्रातिर्मतिर्विज्ञातिरेव च ।
शक्तयोऽन्याश्च भिद्यन्ते चिद्रूपत्वेऽप्युपाधिभिः ॥ ५४ ॥
अपायोद्भूतिहीनाभिर्नित्यं दीप्यन्रविर्यथा ।
सर्वगः सर्वदृक् शुद्धः सर्वं जानाति सर्वदा ॥ ५५ ॥
अन्यदृष्टिः शरीरस्थस्तावन्मात्रो ह्यविद्यया ।

जलेंद्वाद्युपमाभिस्तु तद्धर्मो च विभाव्यते ॥ ५६ ॥
दृष्ट्वा बाह्यं निमील्याथ स्मृत्वा तत्प्रविहाय च ।
अथोन्मील्यात्मनो दृष्टिं ब्रह्म प्राप्नोत्यनध्वगः ॥ ५७ ॥
प्राणाद्येवं त्रिकं हित्वा तीर्णोऽज्ञानमहोदधिम् ।
स्वात्मस्थो निर्गुणः शुद्धो बुद्धो मुक्तः स्वतो हि सः ॥ ५८॥
अजोऽहं चामरोऽमृत्युरजरोऽभय एव च ।
सर्वज्ञः सर्वदृक् शुद्ध इति बुद्धो न जायते ॥ ५९ ॥
पूर्वोक्तं यत्तमोबीजं तन्नास्तीति विनिश्चयः ।
तदभावे कुतो जन्म ब्रह्मैकत्वं विजानतः ॥ ६० ॥
क्षीरात्सर्पिर्यथोद्धृत्य क्षिप्तं तस्मिन्न पूर्ववत् ।
बुद्ध्यादेर्ज्ञस्तथाऽसत्यान्न देही पूर्ववद्भवेत् ॥ ६१ ॥
सत्यं ज्ञानमनन्तं च रसादेः पंचकात्परम् ।
स्यामदृश्यादिशास्त्रोक्तमहं ब्रह्मेति निर्भयः ॥ ६२ ॥
यस्माद्भीताः प्रवर्तन्ते वाङ्मनःपावकादयः ।
तदात्मानंदतत्त्वज्ञो न बिभेति कुतश्चन ॥ ६३ ॥
नामादिभ्यः परे भूम्नि स्वाराज्ये चेत्स्थितोऽद्वये ।
प्रणमेत्कं तदाऽऽत्मज्ञो न कार्यं कर्मणा तदा ॥ ६४ ॥
विराड्वैश्वानरो बाह्यः स्मरन्नन्तः प्रजापतिः ।
प्रविलीने तु सर्वस्मिन्प्राज्ञोऽव्याकृतमुच्यते ॥ ६५ ॥
वाचारंभणमात्रत्वात्सुषुप्तादि त्रिकं त्वसत् ।
सत्यो ज्ञश्चाहमित्येवं सत्यसन्धो विमुच्यते ॥ ६६ ॥
भारूपत्वाद्यथा भानोर्नाहोरात्रे तथैव च ।
ज्ञानाज्ञाने न मे स्यातां चिद्रूपत्वाविशेषतः ॥ ६७ ॥
शास्त्रस्यानतिशंक्यत्वाद्ब्रह्मैव स्यामहं सदा ।
ब्रह्मणो मे न हेयं स्यादुग्राह्यं वेति च संस्मरेत् ॥ ६८ ॥

अहमेव च भूतेषु सर्वेष्वेको नभो यथा ।
मयि सर्वाणि भूतानि पश्यन्नेवं न जायते ॥ ६९ ॥
न बाह्यं मध्यतो वान्तर्विद्यतेऽन्यत्स्वतः क्वचित् ।
अबाह्यान्तःश्रुतेः किंचित्तस्माच्छुद्धः स्वयंप्रभः ॥ ७० ॥
नेति नेत्यादिशास्त्रेभ्यः प्रपंचोपशमोऽद्वयः ।
अविज्ञातादिशास्त्राच्च नैव ज्ञेयो ह्यतोऽन्यथा ॥ ७१ ॥
सर्वस्यात्माऽहमेवेति ब्रह्म चेद्विदितं परम् ।
स आत्मा सर्वभूतानामात्मा ह्येषामिति श्रुतेः ॥ ७२ ॥
जीवश्चेत्परमात्मानं स्वात्मानं देवमंजसा ।
देवोपास्यः स देवानां पशुत्वाच्च निवर्तते ॥ ७३ ॥
अहमेव सदात्मज्ञः शून्यस्त्वन्यैर्यथांबरम् ।
इत्येवं सत्यसंधत्वादसद्धाता न बध्यते ॥ ७४ ॥
कृपणास्तेऽन्यथैवातो विदुर्ब्रह्म परं हि ये ।
स्वराड्योऽनन्यदृक् स्वस्थस्तस्य देवा असन्वशे ॥ ७५ ॥
हित्वा जात्यादिसंबंधान्वाचोऽन्याः सह कर्मभिः ।
ओमित्येवं सदात्मानं सर्वं शुद्धं प्रपद्यथ ॥ ७६ ॥
सेतुं सर्वव्यवस्थानामहोरात्रादिवर्जितम् ।
तिर्यगूर्ध्वमधः सर्वं सकृज्ज्योतिरनामयम् ॥ ७७ ॥
धर्माधर्मविनिर्मुक्तं भूतभव्यात्कृताकृतात् ।
स्वमात्मानं परं विद्याद्विमुक्तं सर्वबंधनैः ॥ ७८ ॥
अकुर्वन्सर्वकृच्छुद्धस्तिष्ठन्नत्येति धावतः ।
मायया सर्वशक्तित्वादजः सन्बहुधा मतः ॥ ७९ ॥
राजवत्साक्षिमात्रत्वात्सांनिध्याद्भ्रामको यथा ।
भ्रामयञ्जगदात्माऽहं निष्क्रियोऽकारकोऽद्वयः ॥ ८० ॥
निर्गुणं निष्क्रियं नित्यं निर्द्वंद्वं यन्निरामयम् ।

शुद्धं बुद्धं तथा मुक्तं तद्ब्रह्मास्मीति धारयेत् ।। ८१ ।।
बंधं मोक्षं च सर्वं यत इदमुभयं हेयमेकं द्वयं च
ज्ञेयाज्ञेयाभ्यतीतं परममधिगतं तत्त्वमेकं विशुद्धम् ।
विज्ञायैतद्यथावच्छ्रुतिमुनिगदितं शोकमोहावतीतः
सर्वज्ञः सर्वकृत्स्याद्भवभयरहितो ब्राह्मणोऽवाप्तकृत्यः ।। ८२ ।
न स्वयं स्वस्य नान्यश्च नान्यस्यात्मा च हेयगः ।
उपादेयो न चाप्येवमिति सम्यङ्मतिः स्मृता ।। ८३ ।।
आत्मप्रत्यायिका ह्येषा सर्ववेदान्तगोचरा ।
ज्ञात्वैतां हि विमुच्यन्ते सर्वसंसारबंधनैः ।। ८४ ।।
रहस्यं सर्ववेदानां देवानां चापि यत्परम् ।
पवित्रं परमं ह्येतत्तदेतत्संप्रकाशितम् ।। ८५ ।।
नैतद्देयमशान्ताय रहस्यं ज्ञानमुत्तमम् ।
विरक्ताय प्रदातव्यं शिष्यायानुगताय च ।। ८६ ।।
ददतश्चात्मनो ज्ञानं निष्क्रियोऽन्यो न विद्यते ।
ज्ञानमिच्छंस्तरेत्तस्माद्युक्तः शिष्यगुणैः सदा ।। ८७ ।।
ज्ञानं ज्ञेयं तथा ज्ञाता यस्मादन्यो न विद्यते ।
सर्वज्ञः सर्वशक्तिर्यस्तस्मै ज्ञानात्मने नमः ।। ८८ ।।
विद्यया तारिताः स्मो यैर्जन्ममृत्युमहोदधिम् ।
सर्वज्ञेभ्यो नमस्तेभ्यो गुरुभ्योऽज्ञानसंकुलम् ।। ८९ ।।

१८ तत्त्वमसिप्रकरणम् ।।

येनात्मना विलीयन्ते उद्भवन्ति च वृत्तयः ।
नित्यावगतये तस्मै नमो धीप्रत्यगात्मने ।। १ ।।
प्रमथ्य वज्रोपमयुक्तिसंभृतैः श्रुतेररातीञ्शतशो वचोसिभिः
ररक्ष वेदार्थनिधिं विशालधीर्नमो यतीन्द्राय गुरोर्गरीयसे ।।

नित्यमुक्तः सदेवास्मीत्येवं चेन्न भवेन्मतिः ।
किमर्थं श्रावयत्येवं मातृवच्छ्रुतिरादरात् ॥ ३ ॥
सिद्धादेवाहमित्यस्माद्युष्मद्धर्मो निषिध्यते ।
रज्ज्वामिवाहिधीर्युक्त्या तत्त्वमित्यादिशासनैः ॥ ४ ॥
शास्त्रप्रामाण्यतो ज्ञेया धर्मादेरस्तिता यथा ।
विषापोहो यथा ध्यानान्निवृत्तिः पाप्मनस्तथा ॥ ५ ॥
सद्ब्रह्माहं करोमीति प्रत्ययावात्मसाक्षिकौ ।
तयोरज्ञानजस्यैव त्यागो युक्ततरो मतः ॥ ६ ॥
सदस्मीति प्रमाणोत्था धीरन्या तन्निभोद्भवा ।
प्रत्यक्षादिनिभा वाऽपि बाध्यते दिग्भ्रमादिवत् ॥ ७ ॥
कर्ता भोक्तेति यच्छास्त्रं लोकबुद्ध्यनुवादि तत् ।
सदस्मीति श्रुतेर्जाता बाध्यतेऽन्या तयैव धीः ॥ ८ ॥
सदेव त्वमसीत्युक्ते नात्मनो मुक्तता स्थिरा ।
प्रवर्तते प्रसंचक्षामतो युक्त्याऽनुचिंतयेत् ॥ ९ ॥
सकृदुक्तं न गृह्णाति वाक्यार्थज्ञोऽपि यो भवेत् ।
अपेक्षतेऽत एवान्यदवोचाम द्वयं हि तत् ॥ १० ॥
नियोगोऽप्रतिपन्नत्वात्कर्मणां स यथा भवेत् ।
अविरुद्धो भवेत्तावद्यावत्संवेद्यताऽदृढा ॥ ११ ॥
चेष्टितं च तथा मिथ्या स्वच्छंदः प्रतिपद्यते ।
प्रसंख्यानमतः कार्यं यावदात्मानुभूयते ॥ १२ ॥
सदस्मीति च विज्ञानमक्षजो बाधते ध्रुवम् ।
शब्दोत्थं दृढसंस्कारो दोषैश्चाकृष्यते बहिः ॥ १३ ॥
श्रुतानुमानजन्मानौ सामान्यविषयौ यतः ।
प्रत्ययावक्षजोऽवश्यं विशेषार्थो निवारयेत् ॥ १४ ॥
वाक्यार्थप्रत्ययी कश्चिन्निर्दुःखो नोपलभ्यते ।

यदि वा दृश्यते कश्चिद्वाक्यार्थश्रुतिमात्रतः ॥ १५ ॥
निर्दुःखोऽतीतदेहेषु कृतभावोऽनुमीयते ।
चर्या नोऽशास्त्रसंवेद्या स्यादनिष्टं तथा सति ॥ १६ ॥
सदसीति फलं चोक्त्वा विधेयं साधनं यतः ।
स तदन्यत्प्रसंख्यानात्प्रसिद्धार्थमिहेष्यते ॥ १७ ॥
तस्मादनुभवायैव प्रसंचक्षीत यत्नतः ।
त्यजन्साधनतत्साध्यविरुद्धं शमनादिमान् ॥ १८ ॥
नैतदेवं रहस्यानां नेति नेत्यवमानतः ।
क्रियासाध्यं पुरा श्राव्यं न मोक्षो नित्यसिद्धतः ॥ १९ ॥
पुत्रदुःखं यथाध्यस्तं पित्राऽदुःखे स्व आत्मनि ।
अहंकर्ता तथाऽध्यस्तो नित्यादुःखे स्व आत्मनि ॥ २० ॥
सोऽध्यासो नेति नेतीति प्राप्तवत्प्रतिषिध्यते ।
भूयोऽध्यासविधिः कश्चित्कुतश्चिन्नोपपद्यते ॥ २१ ॥
आत्मनीह यथाऽध्यासः प्रतिषेधस्तथैव च ।
मलाध्यासनिषेधौ खे क्रियेते च यथाऽबुधैः ॥ २२ ॥
प्राप्तश्चेत्प्रतिषिध्येत मोक्षोऽनित्यो भवेद्ध्रुवम् ।
अतोऽप्राप्तनिषेधोऽयं दिव्याग्निचयनादिवत् ॥ २३ ॥
संभाव्यो गोचरे शब्दः प्रत्ययो वा न चान्यथा ।
न संभाव्यौ तदात्मत्वादहंकर्तुस्तथैव च ॥ २४ ॥
अहंकर्त्रात्मनि न्यस्तं चैतन्ये कर्तृतादि यत् ।
नेति नेतीति तत्सर्वं साहंकर्त्रा निषिध्यते ॥ २५ ॥
उपलब्धिः स्वयंज्योतिर्दृशिः प्रत्यक्सदक्रियः ।
साक्षात्सर्वांतरः साक्षी चेता नित्योऽगुणोऽद्वयः ॥ २६ ॥
संनिधौ सर्वदा तस्य स्यात्तदाभोऽभिमानकृत् ।
आत्मात्मीयं द्वयं चातः स्यादहंममगोचरः ॥ २७ ॥

जातिकर्मादिमत्त्वाद्धि तस्मिञ्शब्दास्त्वहंकृति ।
न कश्चिद्वर्तते शब्दस्तदभावात्स्व आत्मनि ॥ २८ ॥
आभासो यत्र तत्रैव शब्दाः प्रत्यग्दृशि स्थिताः ।
लक्षयेयुर्न साक्षात्तमभिदध्युः कथंचन ॥ २९ ॥
नह्यजात्यादिमान्कश्चिदर्थः शब्दैर्निरूप्यते ॥ ३० ॥
आत्माभासो यथाहंकृदात्मशब्दैस्तथोच्यते ।
उल्मुकादौ यथाग्न्यर्थाः परार्थत्वान्न चांजसा ॥ ३१ ॥
मुखादन्यो मुखाभासो यथाऽऽदर्शानुकारतः ।
आभासान्मुखमप्येवमादर्शाननुवर्तनात् ॥ ३२ ॥
अहंकृत्यात्मनिर्भासो मुखाभासवदिष्यते ।
मुखवत्स्मृत आत्मान्योऽविविक्तौ तौ तथैव च ॥ ३३ ॥
संसारी च स इत्येक आभासो यस्त्वहंकृतिः ।
वस्तु च्छाया स्मृतेरन्यन्माधुर्यादि च कारणम् ॥ ३४ ॥
ह्रैकदेशो विकारो वा तदाभासाश्रयः परे ।
अहंकर्तैव संसारी स्वतंत्र इति केचन ॥ ३५ ॥
अहंकारादिसंतानः संसारी नान्वयी पृथक् ।
इत्येवं सौगता आहुस्तत्र न्यायो विचार्यताम् ॥ ३६ ॥
संसारिणां कथा त्वास्तां प्रकृतं त्वधुनोच्यते ।
मुखाभासो य आदर्शे धर्मो नान्यतरस्य सः ।
द्वयोरेकस्य चेद्धर्मो वियुक्तेऽन्यतरे भवेत् ॥ ३७ ॥
मुखेन व्यपदेशात्स मुखस्यैवेति चेन्मतम् ।
नादर्शानुविधानाच्च मुखे सत्यविभावतः ॥ ३८ ॥
द्वयोरेवेति चेत्तन्न द्वयोरेवाप्यदर्शनात् ।
अदृश्यस्य सतो दृष्टिः स्याद्राहोश्चंद्रसूर्ययोः ॥ ३९ ॥
राहोः प्रागेव वस्तुत्वं सिद्धं शास्त्रप्रमाणतः ।

छायापक्षे त्ववस्तुत्वं तस्य स्यात्पूर्वयुक्तितः ॥ ४० ॥
छायाक्रांतेर्निषेधोऽयं नतु वस्तुत्वसाधकः ।
नह्यर्थांतरनिष्ठं सद्वाक्यमर्थांतरं वदेत् ॥ ४१ ॥
माधुर्यादि च यत्कार्यमुष्णद्रव्याद्यसेवनात् ।
छायाया न त्वदृष्टत्वादपामेव च दर्शनात् ॥ ४२ ॥
आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा ।
गम्यंते शास्त्रयुक्तिभ्यामाभासासत्त्वमेव च ॥ ४३ ॥
न दृशेरविकारित्वादाभासस्याप्यवस्तुतः ।
नाचितित्वादहंकर्तुः कस्य संसारिता भवेत् ॥ ४४ ॥
अविद्यामात्र एवातः संसारोऽस्त्वविवेकतः ।
कूटस्थेनात्मना नित्यमात्मवानात्मनीव सः ॥ ४५ ॥
रज्जुसर्पो यथा रज्ज्वा सात्मकः प्राग्विवेकतः ।
अवस्तुसन्नपि ह्येष कूटस्थेनात्मना तथा ॥ ४६ ॥
आत्माभासाश्रयश्चात्मा प्रत्ययैः स्वैर्विकारवान् ।
सुखी दुःखी च संसारी नित्य एवेति केचन ॥ ४७ ॥
आत्माभासापरिज्ञानाद्याथात्म्येन विमोहिताः ।
अहंकर्तारमात्मेति मन्यंते ते निरागमाः ॥ ४८ ॥
संसारो वस्तुसंस्तेषां कर्तृभोक्तृत्वलक्षणः ।
आत्माभासाश्रयाज्ञानात्संसरंत्यविवेकतः ॥ ४९ ॥
चैतन्याभासता बुद्धेरात्मनस्तत्स्वरूपता ।
स्याच्चेत्तं ज्ञानशब्दैश्च वेदः शास्तीति युज्यते ॥ ५० ॥
प्रकृतिप्रत्ययार्थौ यौ भिन्नावेकाश्रयौ यथा ।
करोति गच्छतीत्यादौ दृष्टौ लोकप्रसिद्धितः ॥ ५१ ॥
नानयोर्द्व्याश्रयत्वं च लोके दृष्टं स्मृतौ तथा ।
जानात्यर्थेषु को हेतुर्द्व्याश्रयत्वे निगद्यताम् ॥ ५२ ॥

आत्माभासस्तु तिङ्वाच्यो धात्वर्थश्च धियः क्रिया ।
उभयं चाविवेकेन जानातीत्युच्यते मृषा ॥ ५३ ॥
न बुद्धेरवबोधोऽस्ति नात्मनो विद्यते क्रिया ।
अतो नान्यतरस्यापि जानातीति च युज्यते ॥ ५४ ॥
नाप्यतो भावशब्देन ज्ञप्तिरित्यपि युज्यते ।
न ह्यात्मा विक्रियामात्रं नित्य आत्मेति शासनात् ॥ ५५ ॥
न बुद्धेर्बुद्धिवाच्यत्वं करणं न ह्यकर्तृकम् ।
नापि ज्ञायत इत्येवं कर्मशब्दैर्निरूप्यते ॥ ५६ ॥
न येषामेक एवात्मा निर्दुःखोऽविक्रियः सदा ।
तेषां स्याच्छब्दवाच्यत्वं ज्ञेयत्वं चात्मनः सदा ॥ ५७ ॥
यदाहंकर्तुरात्मत्वं तदा शब्दार्थमुख्यता ।
नाशनायादिमत्त्वात्तु श्रुतौ तस्यात्मतेष्यते ॥ ५८ ॥
हंत तर्हि न मुख्यार्थो नापि गौणः कथंचन ।
जानातीत्यादिशब्दस्य गतिर्वाच्या तथापि तु ॥ ५९ ॥
शब्दानामयथार्थत्वे वेदस्याप्यप्रमाणता ।
सा च नेष्टा ततो ग्राह्या गतिरस्य प्रसिद्धितः ॥ ६० ॥
प्रसिद्धिर्मूढलोकस्य यदि ग्राह्या निरात्मता ।
लौकायतिकसिद्धांतः स चानिष्टः प्रसज्यते ॥ ६१ ॥
अभियुक्तप्रसिद्धिश्चेत्पूर्ववद्दुर्विवेकता ।
गतिशून्यं न वेदोऽयं प्रमाणं संवदत्युत ॥ ६२ ॥
आदर्शमुखसामान्यं मुखस्येष्टं हि मानवैः ।
मुखस्य प्रतिबिंबो हि मुखाकारेण दृश्यते ॥ ६३ ॥
यत्र यस्यावभासस्तु तयोरेवाविवेकतः ।
जानातीति क्रियां सर्वो लोको वक्ति स्वभावतः ॥ ६४ ॥
बुद्धेः कर्तृत्वमध्यस्य जानातीति ज्ञ उच्यते ।

तथा चैतन्यमध्यस्य ज्ञत्वं बुद्धेरिहोच्यते ॥ ६५ ॥
स्वरूपं चात्मनो ज्ञानं नित्यं ज्योतिःश्रुतेर्यतः ।
न बुद्ध्या क्रियते तस्मान्नात्मनाऽन्येन वा सदा ॥ ६६ ॥
देहेऽहंप्रत्ययो यद्वज्जानातीति च लौकिकाः ।
वदंति ज्ञानकर्तृत्वं तद्वद्बुद्धेस्तथाऽऽत्मनः ॥ ६७ ॥
बौद्धैस्तु प्रत्ययैरेवं क्रियमाणैश्च चिन्निभैः ।
मोहिताः क्रियते ज्ञानमित्याहुस्तार्किका जनाः ॥ ६८ ॥
तस्माज्ज्ञाभासबुद्धीनामविवेकात्प्रवर्तिताः ।
जानातीत्यादिशब्दश्च प्रत्ययो या च तत्स्मृतिः ॥ ६९ ॥
आदर्शानुविधायित्वं छायाया अस्यते मुखे ।
बुद्धिधर्मानुकारित्वं ज्ञाभासस्य तथेष्यते ॥ ७० ॥
बुद्धेस्तु प्रत्ययास्तस्मादात्माभासेन दीपिताः ।
ग्राहका इव भासन्ते दहन्तीवोल्मुकादयः ॥ ७१ ॥
स्वयमेवावभास्यंते ग्राहकाः स्वयमेव च ।
इत्येवं ग्राहकास्तित्वं प्रतिषेधंति सौगताः ॥ ७२ ॥
यद्येवं नान्यदृश्यास्ते किं तद्वारणमुच्यताम् ।
भावाभावौ हि तेषां यौ नान्यग्राह्यौ सता यदि ॥ ७३ ॥
अन्वयी ग्राहकस्तेषामित्येतदपि तत्समम् ।
अचितित्वस्य तुल्यत्वादन्यस्मिन्ग्राहके सति ॥ ७४ ॥
अध्यक्षस्य समीपे तु सिद्धिः स्यादिति चेन्मतम् ।
नाध्यक्षेऽनुपकारित्वादन्यत्रापि प्रसंगतः ॥ ७५ ॥
अर्थी दुःखी च यः श्रोता स त्वध्यक्षोऽथवेतरः ।
अध्यक्षस्य च दुःखित्वमर्थित्वं च न ते मतम् ॥ ७६ ॥
कर्ताध्यक्षः सदस्मीति नैव सद्ग्रहमर्हति ।
सदेवासीति मिथ्योक्तिः श्रुतेरपि न युज्यते ॥ ७७ ॥

अविविच्योभयं वक्ति श्रुतिश्चेत्स्याद्ग्रहस्तथा ।
अस्मदस्तु विविच्यैव त्वमेवेति वदेद्यदि ।
प्रत्ययान्वयिनिष्ठत्वमुक्तदोषः प्रसज्यते ॥ ७८ ॥
त्वमित्यध्यक्षनिष्ठश्चेदहमध्यक्षयोः कथम् ।
संबंधो वाच्य एवात्र येन त्वमिति लक्षयेत् ॥ ७९ ॥
द्रष्टृदृश्यत्वसंबंधो यद्यध्यक्षेऽक्रिये कथम् ॥ ८० ॥
अक्रियत्वेऽपि तादात्म्यमध्यक्षस्य भवेद्यदि ।
आत्माध्यक्षो ममास्तीति संबंधाग्रहणेन धीः ॥ ८१ ॥
संबंधग्रहणं शास्त्रादिति चेन्मन्यसे नहि ।
पूर्वोक्ताः स्युस्त्रयो दोषा ग्रहो वा स्यान्ममेति च ॥ ८२ ॥
अदृशिर्दृशिरूपेण भाति बुद्धिर्यदा तदा ।
प्रत्यया अपि तस्याः स्युस्तप्तायोविस्फुलिंगवत् ॥ ८३ ॥
आभासस्तदभावश्च दृशेः सीम्नो न चान्यथा ।
लोकस्य युक्तितः स्यातां तद्ग्रहश्च तथा सति ॥ ८४ ॥
नन्वेवं दृशिसंक्रांतिरयः पिंडेऽग्निवद्भवेत् ।
मुखाभासवदित्येतदादर्शे तन्निराकृतम् ॥ ८५ ॥
कृष्णायो लोहिताभासमित्येतद्दृष्टमुच्यते ।
दृष्टदार्ष्टांततुल्यत्वं न तु सर्वात्मना क्वचित् ॥ ८६ ॥
तथैव चेतनाभासं चित्तं चैतन्यवद्भवेत् ।
मुखाभासो यथाऽऽदर्शे आभासश्चोदितो मृषा ॥ ८७ ॥
चित्तं चेतनमित्येतच्छास्त्रयुक्तिविवर्जितम् ।
देहस्यापि प्रसंगः स्याच्चक्षुरादेस्तथैव च ॥ ८८ ॥
तदप्यस्त्विति चेत्तन्न लोकायतिकसंगतेः ।
न च धीर्दृशिरस्मीति यद्याभासो न चेतसि ॥ ८९ ॥
सदस्मीति धियोऽभावे व्यर्थं स्यात्तत्त्वमस्यपि ।

युष्मदस्मद्विभागज्ञे स्यादर्थवदिदं वचः ॥ ९० ॥
ममेदंप्रत्ययौ ज्ञेयौ युष्मद्येव न संशयः ।
अहमित्यस्मदीष्टः स्यादयमस्मीति चोभयोः ॥ ९१ ॥
अन्योन्यापेक्षया तेषां प्रधानगुणतेष्यते ।
विशेषणविशेष्यत्वं तथा ग्राह्यं हि युक्तितः ॥ ९२ ॥
ममेदं द्वयमप्येतन्मध्यमस्य विशेषणम् ।
धनी गोमान्यथा तद्वद्देहोऽहंकर्तुरेव च ॥ ९३ ॥
बुद्ध्यारूढं सदा सर्वं साहंकर्ता च साक्षिणः ।
तस्मात्सर्वावभासो ज्ञः किंचिदप्यस्पृशन्सदा ॥ ९४ ॥
प्रतिलोममिदं सर्वं यथोक्तं लोकबुद्धितः ।
अविवेकधियामस्ति नास्ति सर्वं विवेकिनाम् ॥ ९५ ॥
अन्वयव्यतिरेकौ हि पदार्थस्य पदस्य च ।
स्यादेतदहमित्यत्र युक्तिरेवावधारणे ॥ ९६ ॥
नाद्राक्षमहमित्यस्मिन्सुषुप्तेऽन्यन्मनागपि ।
न वारयति दृष्टिं स्वां प्रत्ययं तु निषेधति ॥ ९७ ॥
स्वयंज्योतिर्न हि द्रष्टुरित्येवं संविदोऽस्तिताम् ।
कौटस्थ्यं च तथा तस्याः प्रत्ययस्य तु लुप्तताम् ।
स्वयमेवाब्रवीच्छास्त्रं प्रत्ययावगती पृथक् ॥ ९८ ॥
एवं विज्ञातवाक्यार्थे श्रुतिलोकप्रसिद्धितः ।
श्रुतिस्तत्त्वमसीत्याह श्रोतुर्मोहापनुत्तये ॥ ९९ ॥
ब्रह्मा दाशरथेर्यद्वदुक्त्यैवापानुदत्तमः ।
तस्य विष्णुत्वसंबोधे न यत्नान्तरमूचिवान् ॥ १०० ॥
अहंशब्दस्य निष्ठा या ज्योतिषि प्रत्यगात्मनि ।
सैवोक्ता सदसीत्येवं फलं तत्र विमुक्तता ॥ १०१ ॥
श्रुतमात्रेण चेन्न स्यात्कार्यं तत्र भवेद्ध्रुवम् ।

व्यवहारात्पुरापीष्टः सद्भावः स्वयमात्मनः ॥ १०२ ॥
अशनायादिनिर्मुक्त्यै तत्काला जायते प्रमा ।
तत्त्वमस्यादिवाक्यार्थे त्रिषु कालेष्वसंशयः ॥ १०३ ॥
प्रतिबंधविहीनत्वात्स्वयं चानुभवात्मनः ।
जायेतैव प्रमा तत्र स्वात्मन्येव न संशयः ॥ १०४ ॥
किं सदेवाहमस्मीति किंवाऽन्यत्प्रतिपद्यते ।
सदेव चेदहंशब्दः सता मुख्यार्थ इष्यताम् ॥ १०५ ॥
अन्यच्चेत्सदहंग्राहप्रतिपत्तिर्मृषैव सा ।
तस्मान्मुख्यग्रहे नास्ति वारणावगतेरिह ॥ १०६ ॥
प्रत्ययी प्रत्ययश्चैव यदाभासौ तदर्थता ।
तयोरन्वितिमत्त्वाच्च चैतन्ये कल्प्यते फलम् ॥ १०७ ॥
कूटस्थेऽपि फलं योग्यं राजनीव जयादिकम् ।
तदनात्मत्वहेतुभ्यां क्रियायाः प्रत्ययस्य च ॥ १०८ ॥
आदर्शस्तु यदाभासो मुखाकारः स एव सः ।
यथैवं प्रत्ययादर्शो यदाभासस्तदा ह्यहम् ॥ १०९ ॥
इत्येवं प्रतिपत्तिः स्यात्सदस्मीति च नान्यथा ।
तत्त्वमित्युपदेशोऽपि द्वाराभावादनर्थकः ॥ ११० ॥
श्रोतुः स्यादुपदेशश्चेदर्थवत्त्वं तदा भवेत् ।
अध्यक्षस्य न चेदिष्टं श्रोतृत्वं कस्य तद्भवेत् ॥ १११ ॥
अध्यक्षस्य समीपे स्याद्बुद्धेरेवेति चेन्मतम् ।
न तत्कृतोपकारोऽस्ति काष्ठाद्यद्वन्न कल्प्यते ॥ ११२ ॥
बुद्धौ चेत्तत्कृतः कश्चिन्नन्वेवं परिणामिता ।
आभासेऽपि च को दोषः सति श्रुत्याद्यनुग्रहे ॥ ११३ ॥
आभासे परिणामश्चेन्न रज्ज्वादिनिभत्ववत् ।
सर्पादेश्च तथाऽवोचमादर्शे च मुखत्ववत् ॥ ११४ ॥

नात्माभासत्वसिद्धिश्चेदात्मनो ग्रहणात्पृथक् ।
मुखादेश्च पृथक्सिद्धिरिह त्वन्योन्यसंश्रयः ॥ ११५ ॥
अध्यक्षस्य पृथक्सिद्धावाभासस्य तदीयता ।
आभासस्य तदीयत्वे ह्यध्यक्षव्यतिरिक्तता ॥ ११६ ॥
नैवं स्वप्ने पृथक्सिद्धेः प्रत्ययस्य दृशेस्तथा ।
रथादेस्तत्र शून्यत्वात्प्रत्ययस्यात्मना ग्रहः ॥ ११७ ॥
अवगत्या हि संव्याप्तः प्रत्ययो विषयाकृतिः ।
जायते स यदाकारः स बाह्यो विषयो मतः ॥ ११८ ॥
कर्मेप्सिततमत्वात्स तद्वान्कार्ये नियुज्यते ।
आकारो यत्र चार्प्येत करणं तदिहोच्यते ॥ ११९ ॥
यदाभासेन संव्याप्तः स ज्ञातेति निगद्यते ।
त्रयमेतद्विविच्यात्र यो जानाति स आत्मवित् ॥ १२० ॥
सम्यक्संशयमिथ्योक्ताः प्रत्यया व्यभिचारिणः ।
एकैवावगतिस्तेषु भेदस्तु प्रत्ययार्पितः ॥ १२१ ॥
आधिभेदाद्यथा भेदो मणेरवगतेस्तथा ।
अशुद्धिः परिणामश्च सर्वं प्रत्ययसंश्रयात् ॥ १२२ ॥
प्रथनं ग्रहणं सिद्धिः प्रत्ययानामिहान्यतः ।
आपरोक्ष्यात्तदेवोक्तमनुमानं प्रदीपवत् ॥ १२३ ॥
किमन्यद्ग्राहयेत्कश्चित्प्रमाणेन तु केनचित् ।
विनैव तु प्रमाणेन निवृत्त्यान्यस्य शेषतः ॥ १२४ ॥
शब्देनैव प्रमाणेन निवृत्तिश्चेदिहोच्यते ।
अध्यक्षस्याप्रसिद्धत्वाच्छून्यतैव प्रसज्यते ॥ १२५ ।
चेतनस्त्वं कथं देह इति चेन्नाप्रसिद्धितः ।
चेतनस्यान्यतः सिद्धावेवं स्यादन्यहानतः ॥ १२६ ॥
अध्यक्षः स्वयमस्त्येव चेतनस्यापरोक्षतः ।

तुल्य एवं प्रबोधः स्यादन्यस्यासत्त्ववादिना ॥ १२७ ॥
अहमज्ञासिषं चेदमिति लोकस्मृतेरिह ।
करणं कर्म कर्ता च सिद्धास्त्वेकक्षणे किल ॥ १२८ ॥
प्रामाण्येऽपि स्मृतेः शैघ्र्याद्यौगपद्यं विभाव्यते ।
क्रमेण ग्रहणं पूर्वं स्मृतेः पश्चात्तथैव च ॥ १२९ ॥
अज्ञासिषमिदं मां चेत्यपेक्षा जायते ध्रुवम् ।
विशेषोऽपेक्ष्यते यत्र तत्र नैवैककालता ॥ १३० ॥
आत्मनो ग्रहणे चापि त्रयाणामिह संभवात् ।
आत्मन्यासक्तकर्तृत्वं न स्यात्करणकर्मणोः ॥ १३१ ॥
व्याप्तुमिष्टं च यत्कर्तुः क्रियया कर्म तत्स्मृतम् ।
अतो हि कर्तृतंत्रत्वं तस्येष्टं नान्यतंत्रता ॥ १३२ ॥
शब्दाद्वानुमितेर्वापि प्रमाणाद्वा ततोऽन्यतः ।
सिद्धिः सर्वपदार्थानां स्यादज्ञं प्रति नान्यथा ॥ १३३ ॥
अध्यक्षस्यापि सिद्धिः स्यात्प्रमाणेन विनैव वा ।
विना स्वस्य प्रसिद्धिस्तु नाज्ञं प्रत्युपयुज्यते ॥ १३४ ॥
तस्यैवाज्ञत्वमिष्टं चेज्ज्ञानत्वेऽन्या मतिर्भवेत् ।
अन्यस्यैवाज्ञतायां च तद्विज्ञाने ध्रुवा भवेत् ॥ १३५ ॥
ज्ञातता स्वात्मलाभो वा सिद्धिः स्यादन्यदेव वा ।
ज्ञातत्वेऽनंतरोक्तौ त्वं पक्षौ संस्मर्तुमर्हसि ॥ १३६ ॥
सिद्धिः स्यात्स्वात्मलाभश्चेद्यत्नस्तत्र निरर्थकः ।
सर्वलोकप्रसिद्धत्वात्स्वहेतुभ्यस्तु वस्तुनः ॥ १३७ ॥
ज्ञानज्ञेयादिवादेऽतः सिद्धिर्ज्ञातत्वमुच्यते ।
अध्यक्षाध्यक्ष्ययोः सिद्धिर्ज्ञेयत्वं नात्मलाभता ॥ १३८ ॥
स्पष्टत्वं कर्मकर्त्रादेः सिद्धिता यदि कल्प्यते ।
स्पष्टताऽस्पष्टते स्यातामन्यस्यैव न चात्मनः ॥ १३९ ॥

अद्रष्टुर्नैव चान्धस्य स्पष्टीभावो घटस्य तु ।
कर्त्रादेः स्पष्टतेष्टा चेद्द्रष्टृताऽध्यक्षकर्तृका ॥ १४० ॥
अनुभूतेः किमन्यस्मिन्स्यात्तवापेक्षया वद ।
अनुभवितरीष्टा स्यात्सोऽप्यनुभूतिरेव नः ॥ १४१ ॥
"अभिन्नोऽपि हि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" ॥ १४२ ॥
"भूतिर्येषां क्रिया सैव कारकं सैव चोच्यते ।
सत्त्वं नाशित्वमस्याश्चेत्सकर्तृत्वं तथेष्यताम्" ॥ १४३ ॥
न कश्चिच्चेष्यते धर्म इति चेत्पक्षहानता ।
नन्वस्तित्वादयो धर्मा नास्तित्वादिनिवृत्तयः ।
न भूतेस्तर्हि नाशित्वं स्वालक्षण्यं मतं हि ते ॥ १४४ ॥
स्वलक्षणावधिर्नाशो नाशोऽनाशनिवृत्तिता ।
अगोरसत्त्वं गोत्वं ते न तु तद्गोत्वलक्षणम् ॥ १४५ ॥
क्षणवाच्योऽपि योऽर्थः स्यात्सोऽप्यन्याभाव एव ते ॥ १४६ ॥
भेदाभावेऽप्यभावस्य भेदो नामभिरिष्यते ।
नामभेदैरनेकत्वमेकस्य स्यात्कथं तव ॥ १४७ ॥
अपोहो यदि भिन्नानां वृत्तिस्तस्य कथं गवि ।
नाभावा भेदकाः सर्वे विशेषा वा कथंचन ॥ १४८ ॥
नामजात्यादयो यद्वत्संविदस्तेऽविशेषतः ॥ १४९ ॥
प्रत्यक्षमनुमानं वा व्यवहारे यदिच्छसि ।
क्रियाकारकभेदैस्तदभ्युपेयं ध्रुवं भवेत् ॥ १५० ॥
तस्मान्नीलं तथा पीतं घटादिर्वा विशेषणम् ।
संविदस्तदुपेयं स्याद्येन चाप्यनुभूयते ॥ १५१ ॥
रूपादीनां यथान्यः स्याद्ग्राह्यत्वाद्ग्राहकस्तथा ।
प्रत्ययस्य तथान्यः स्याद्व्यंजकत्वात्प्रदीपवत् ॥ १५२ ॥

अध्यक्षस्य दृशेः कीदृक्संबंधः संभविष्यति ।
अध्यक्ष्येण तु दृश्येन मुक्त्वान्यो द्रष्टृदृश्यताम् ॥ १५३ ॥
अध्यक्षेण कृता दृष्टिर्दृश्यं व्याप्नोत्यथापि वा ।
नित्याध्यक्षकृतः कश्चिदुपकारो भवेद्धियाम् ॥ १५४ ॥
स चोक्तस्तन्निभत्वं प्राक्संव्याप्तिश्च घटादिषु ।
यथाऽऽलोकादिसंव्याप्तिर्व्यंजकत्वाद्धियस्तथा ॥ १५५ ॥
आलोकस्थो घटो यद्वद्बुद्ध्यारूढो भवेत्तथा ।
धीव्याप्तिः स्याद्घटारोहो धियो व्याप्तौ क्रमो भवेत् ॥ १५६ ॥
पूर्वं स्यात्प्रत्ययव्याप्तिस्ततोऽनुग्रह आत्मनः ।
कृत्स्नाध्यक्षस्य नो युक्तः कालाकाशादिवत्क्रमः ॥ १५७ ॥
विषयग्रहणं यस्य कारणापेक्षया भवेत् ।
सत्येव ग्राह्यशेषे च परिणामी स चित्तवत् ॥ १५८ ॥
अध्यक्षोऽहमिति ज्ञानं बुद्धेरेव विनिश्चयः ।
नाध्यक्षस्याविशेषत्वान्न तस्यास्ति परो यतः ॥ १५९ ॥
कर्त्रा चेदहमित्येवमनुभूयेत मुक्तता ।
सुखदुःखविनिर्मोको नाहंकर्तरि युज्यते ॥ १६० ॥
देहादावभिमानोत्थो दुःखीति प्रत्ययो ध्रुवम् ।
कुंडलीप्रत्ययो यद्वत्प्रत्यगात्माभिमानिना ॥ १६१ ॥
बाध्यते प्रत्ययेनेह विवेकेनाविवेकवान् ।
विपर्यासेऽसदंतं स्यात्प्रमाणस्याप्रमाणतः ॥ १६२ ॥
दाहच्छेदविनाशेषु दुःखित्वं ।
नैव ह्यन्यस्य दाहादावन्यो दुःखी भवेत्क्वचित् ॥ १६३ ॥
अस्पर्शत्वाददेहत्वान्नाहं दाह्यो यतः सदा ।
तस्मान्मिथ्याभिमानोत्थं मृते पुत्रे मृतिर्यथा ॥ १६४ ॥
कुंडल्यहमिति ह्येतद्बाध्येतैव विवेकिना ।

दुःखीति प्रत्ययस्तद्वत्केवलाहंधिया सह ॥ १६५ ॥
सिद्धे दुःखित्व इष्टं स्यात्तच्छक्तिश्छंदसात्मनः ।
मिथ्याभिमानतो दुःखी तेनार्थापादनक्षमः ॥ १६६ ॥
अस्पर्शोऽपि यथा स्पर्शमचलश्चलनादि च ।
अविवेकात्तथा दुःखं मानसं चात्मनीक्षते ॥ १६७ ॥
विवेकात्मधिया दुःखं नुद्यते चलनादिवत् ।
अविवेकस्वभावेन मनो गच्छत्यनिच्छतः ॥ १६८ ॥
तदा नु दृश्यते दुःखं नैश्चल्ये नैव तस्य तत् ।
प्रत्यगात्मनि तस्मात्तद्दुःखं नैवोपपद्यते ॥ १६९ ॥
त्वंसतोस्तुल्यनीडत्वान्नीलाश्ववदिदं भवेत् ॥ १७० ॥
निर्दुःखवाचिना योगात्त्वंशब्दस्य तदर्थता ।
प्रत्यगात्माभिधानेन तच्छब्दस्य युतेस्तथा ॥ १७१ ॥
दशमस्त्वमसीत्येवं वाक्यं स्यात्प्रत्यगात्मनि ॥ १७२ ॥
स्वार्थस्य ह्यप्रहाणेन विशिष्टार्थसमर्पकौ ।
प्रत्यगात्मावगत्यंतौ नान्योऽर्थोऽर्थाद्विरोध्यतः ॥ १७३ ॥
नवबुद्ध्यपहाराद्धि स्वात्मानं दशपूरणम् ।
अपश्यञ्ज्ञातुमेवेच्छेत्स्वमात्मानं जनस्तथा ॥ १७४ ॥
अविद्याबद्धचक्षुष्ट्वात्कामापहृतधीः सदा ।
विविक्तं दृशिमात्मानं नेक्षते दशमं यथा ॥ १७५ ॥
दशमस्त्वमसीत्येवं तत्त्वमस्यादिवाक्यतः ।
स्वमात्मानं विजानाति कृत्स्नांतःकरणेक्षणम् ॥ १७६ ॥
इदं पूर्वमिदं पश्चात्पदं वाक्यं भवेदिति ।
अन्वयव्यतिरेकाभ्यां ततो वाक्यार्थबोधनम् ॥ १७७ ॥
वाक्ये हि श्रूयमाणानां पदानामर्थसंस्मृतिः ।
नियमो नैव वेदेऽस्ति पदसांगत्यमर्थतः ॥ १७८ ॥

यदा नित्येषु वाक्येषु पदार्थस्तु विविच्यते ।
वाक्यार्थज्ञानसंक्रांत्यै तदा प्रश्नो न युज्यते ॥ १७९ ॥
अन्वयव्यतिरेकोक्तिः पदार्थस्मरणाय तु ।
स्मृत्यभावे न वाक्यार्थो ज्ञातुं शक्यो हि केनचित् ॥ १८० ॥
तत्त्वमस्यादिवाक्येषु त्वंपदार्थाविवेकतः ।
व्यज्यते नैव वाक्यार्थो नित्यमुक्तोऽहमित्यतः ॥ १८१ ॥
अन्वयव्यतिरेकोक्तिस्तद्विवेकाय नान्यथा ।
त्वंपदार्थविवेके हि पाणावर्पितबिल्ववत् ॥ १८२ ॥
वाक्यार्थो व्यज्यते चैवं केवलोऽहंपदार्थतः ।
दुःखीत्येतदपोहेन प्रत्यगात्मविनिश्चयात् ॥ १८३ ॥
तत्रैवं संभवत्यर्थे श्रुतहानाश्रुतार्थधीः ।
नैव कल्पयितुं युक्ता पदवाक्यार्थकोविदैः ॥ १८४ ॥
प्रत्यक्षादीनि बाधेरन्कृष्णलादिषु पाकवत् ।
अक्षजादिनिभैरेतैः कथं स्याद्वाक्यबाधनम् ॥ १८५ ॥
दुःख्यस्मीति सति ज्ञाने निर्दुःखीति न जायते ।
प्रत्यक्षादिनिभत्वेऽपि वाक्यान्न व्यभिचारतः ॥ १८६ ॥
स्वप्ने दुःख्यहमध्यासं दाहच्छेदादिहेतुतः ।
तत्कालभाविभिर्वाक्यैर्न बाधः क्रियते यदि ॥ १८७ ॥
समाप्तेस्तर्हि दुःखस्य प्राक्च तद्बाध इष्यताम् ।
न हि दुःखस्य संतानो भ्रांतेर्वा दृश्यते क्वचित् ॥ १८८ ॥
प्रत्यगात्मन आत्मत्वं दुःख्यस्मीत्यस्य बाधया ।
दशमं नवमस्येव वेद चेदविरुद्धता ॥ १८९ ॥
नित्यमुक्तत्वविज्ञानं वाक्याद्भवति नान्यतः ।
वाक्यार्थस्यापि विज्ञानं पदार्थस्मृतिपूर्वकम् ॥ १९० ॥
अन्वयव्यतिरेकाभ्यां पदार्थः स्मर्यते ध्रुवम् ।

एवं निर्दुःखमात्मानमक्रियं प्रतिपद्यते ॥ १९१ ॥
सदेवेत्यादिवाक्येभ्यः प्रमा स्फुटतरा भवेत् ।
दशमस्त्वमसीत्यस्माद्यथैवं प्रत्यगात्मनि ॥ १९२ ॥
प्रबोधेन यथा स्वाप्नं सर्वदुःखं निवर्तते ।
प्रत्यगात्मधिया तद्वद्दुःखित्वं सर्वदाऽऽत्मनः ॥ १९३ ॥
कृष्णलादौ प्रमाजन्म तदन्यार्थोऽमदुत्वतः ।
तत्त्वमस्यादिवाक्येषु न त्वेवमविरोधतः ॥ १९४ ॥
वाक्ये तत्त्वमसीत्यस्मिन्ज्ञातार्थं तदसिद्वयम् ।
त्वमर्थे सत्यसाहाय्याद्वाक्यं नोत्पादयेत्प्रमाम् ॥ १९५ ॥
तत्त्वमोस्तुल्यनीडार्थमसीत्येतत्पदं भवेत् ॥ १९६ ॥
तच्छब्दः प्रत्यगात्मार्थस्तच्छब्दार्थस्त्वमस्तथा ।
दुःखित्वात्प्रत्यगात्मत्वं वारयेतामुभावपि ॥ १९७ ॥
एवं च नेतिनेत्यर्थं गमयेतां परस्परम् ॥ १९८ ॥
एवं तत्त्वमसीत्यस्य गम्यमाने फले कथम् ।
अप्रमाणत्वमस्योक्त्वा क्रियापेक्षत्वमुच्यते ॥ १९९ ॥
तस्मादाद्यंतमध्येषु कुर्वित्येतद्विरोध्यतः ।
न कल्प्यमश्रुतत्वाच्च श्रुतत्यागोऽप्यनर्थकः ॥ २०० ॥
यथानुभूयते तृप्तिर्भुजेर्वाक्यान्न गम्यते ।
वाक्यस्य विधृतिस्तद्वद्दोशकृत्पायसी क्रिया ॥ २०१ ॥
सत्यमेवमनात्मार्थवाक्यात्पाक्ष्यबोधनम् ।
प्रत्यगात्मनि न त्वेवं संख्याप्राप्तिवदध्रुवम् ॥ २०२ ॥
स्वयंवेद्यत्वपर्यायः स्वप्रमाणक इष्यताम् ।
निवृत्तावहमः सिद्धः स्वात्मनोऽनुभवश्च नः ॥ २०३ ॥
बुद्धीनां विषयो दुःखं नो यस्य विषया मताः ।
कुतोऽस्य दुःखसंबंधो दृशेः स्यात्प्रत्यगात्मनः ॥ २०४ ॥

दृशिरेवानुभूयेत स्वेनैवानुभवात्मना ।
तदाभासतया जन्म धियोऽस्यानुभवः स्मृतः ॥ २०५ ॥
अशनायादिनिर्मुक्तः सिद्धो मोक्षस्त्वमेव सः ।
श्रोतव्यादि तवेत्येतद्विरुद्धं कथमुच्यते ॥ २०६ ॥
सेत्स्यतीत्येव चेत्तस्याच्छ्रवणादि तदा भवेत् ।
मोक्षस्यानित्यतैवं स्याद्विरोधे नान्यथा वचः ॥ २०७ ॥
श्रोतृश्रोतव्ययोर्भेदो यदीष्टः स्याद्भवेदिदम् ।
इष्टार्थकोप एवं स्यान्न युक्तं सर्वथा वचः ॥ २०८ ॥
सिद्धो मोक्षोऽहमित्येव ज्ञात्वात्मानं भवेद्यदि ।
चिकीर्षुर्यः स मूढात्मा शास्त्रं चोद्घाटयत्यपि ॥ २०९ ॥
नहि सिद्धस्य कर्तव्यं सकार्यस्य न सिद्धता ।
उभयालंबनं कुर्वन्नात्मानं वंचयत्यपि ॥ २१० ॥
सिद्धो मोक्षस्त्वमित्येतद्वस्तुमात्रं प्रदर्श्यते ।
श्रोतुस्तथात्वविज्ञाने प्रवृत्तिः स्यात्कथं न्विति ॥ २११ ॥
कर्ता दुःख्यहमस्मीति प्रत्यक्षेणानुभूयते ।
कर्ता दुःखी च मा भूवमिति यत्नो भवेत्ततः ॥ २१२ ॥
तद्विज्ञानाय युक्त्यादि कर्तव्यं श्रुतिरब्रवीत् ।
कर्तृत्वाद्यनुवादेन सिद्धत्वानुभवाय तु ॥ २१३ ॥
निर्दुःखो निष्क्रियोऽकामः सिद्धो मोक्षोऽहमित्यपि ।
गृहीत्वैव विरुद्धार्थमादध्यात्कथमेव सः ॥ २१४ ॥
सकामः सक्रियो सिद्ध इति मेऽनुभवः कथम् ।
अतो मे विपरीतस्य तद्भवान्वक्तुमर्हति ॥ २१५ ॥
इहैव घटते प्रश्नो न मुक्तत्वानुभूतये ।
प्रमाणेन विरोधी यः सोऽत्रार्थः प्रश्नमर्हति ॥ २१६ ॥
अहं निर्मुक्त इत्येव सदसीत्यन्यमानजः ।

प्रत्यक्षाभासजन्यत्वाद्दुःखित्वं प्रश्नमर्हति ॥ २१७ ॥
पृष्टमाकांक्षितं वाच्यं दुःखाभावमभीप्सितम् ॥ २१८ ॥
कथं हीदं निवर्तेत दुःखं सर्वात्मना मम ।
इति प्रश्नानुरूपं यद्वाच्यं दुःखनिवर्तकम् ॥ २१९ ॥
श्रुतेः स्वात्मनि नाशंका प्रामाण्ये सति विद्यते ।
तस्मादात्मविमुक्तत्वं प्रत्याययति तद्वचः ।
वक्तव्यं तत्तथार्थं स्याद्विरोधेऽसति केनचित् ॥ २२० ॥
इतोऽन्योऽनुभवः कश्चिदात्मनो नोपपद्यते ।
अविज्ञातं विजानतां विज्ञातारमिति श्रुतेः ॥ २२१ ॥
त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् ।
साधनत्वं व्रजत्येवं शांतो दांतानुशासनात् ॥ २२२ ॥
त्वमर्थं प्रत्यगात्मानं पश्येदात्मानमात्मनि ।
वाक्यार्थं तत आत्मानं सर्वं पश्यति केवलम् ॥ २२३ ॥
सर्वमात्मेति वाक्यार्थे विज्ञातेऽस्य प्रमाणतः ।
असत्त्वे ह्यन्यमानस्य विधिस्तं योजयेत्कथम् ॥ २२४ ॥
तस्माद्वाक्यार्थविज्ञानान्नोर्ध्वं कर्मविधिर्भवेत् ।
नहि ब्रह्मास्मि कर्तेति विरुद्धे भवतो धियौ ॥ २२५ ॥
ब्रह्मास्मीति च विद्येयं नैव कर्तेति बाध्यते ।
सकामो बद्ध इत्येवं प्रमाणाभासजातया ॥ २२६ ॥
शास्त्राद्ब्रह्मास्मि नान्योऽहमिति बुद्धिर्भवेद्दृढा ।
यदा युक्ता तदैवंधीर्यथा देहात्मधीरिति ॥ २२७ ॥
सभयादभयं प्राप्तस्तदर्थं यतते च यः ।
स पुनः सभयं गंतुं स्वतंत्रश्चेन्न हीच्छति ॥ २२८ ॥
यथेष्टाचरणप्राप्तिः संन्यासादिविधौ कुतः ।
पदार्थाज्ञानबुद्धस्य वाक्यार्थानुभवार्थिनः ॥ २२९ ॥

अतः सर्वमिदं सिद्धं यत्प्रागस्माभिरीरितम् ॥ २३० ॥
यो हि यस्माद्विरक्तः स्यान्नासौ तस्मै प्रवर्तते ।
लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते ॥ २३१ ॥
क्षुधया पीड्यमानोऽपि न विषं ह्यत्तुमिच्छति ।
मृष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ॥ २३२ ॥
वेदांतवाक्यपुष्पेभ्यो ज्ञानामृतमधूत्तमम् ।
उज्जहारालिवद्यो नस्तस्मै सद्गुरवे नमः ॥ २३३ ॥

---

१९ अथात्ममनःसंवादप्रकरणम् ॥

प्रयुज्य तृष्णाज्वरनाशकारणं चिकित्सितं ज्ञानविरागभेषजम् ।
न याति कामज्वरसन्निपातजां शरीरमालां शतयोगदुःखिताम् ॥ १ ॥
अहंममेति त्वमनर्थमीहसे परार्थमिच्छंति तवान्य ईहितम् ।
न तेऽर्थबोधो न हि मेऽस्ति चार्थिता ततश्च युक्तः शम एव ते मनः ॥२॥
यतो न चान्यः परमात्सनातनात्सदैव तृप्तोऽहमतो न मेऽर्थिता ।
सदैव तृप्तश्च न कामये हितं यतस्व चेतः प्रशमाय ते हितम् ॥ ३ ॥
षडूर्मिमालाभ्यतिवृत्त एव यः स एव चात्मा जगतश्च नः श्रुतेः ।
प्रमाणतश्चापि मया प्रवेद्यते मुधैव तस्माच्च मनस्तवेहितम् ॥ ४ ॥
त्वयि प्रशांते नहि चास्ति भेदधीर्यतो जगन्मोहमुपैति मायया ।
ग्रहो हि मायाप्रभवस्य कारणं ग्रहाद्विमोके नहि मास्ति कस्यचित् ॥ ५ ॥
न मेऽस्ति मोहस्तव चेष्टितेन हि प्रबुद्धतत्त्वस्त्वसितो ह्यविक्रियः ।
न पूर्वतत्त्वोत्तरभेदता हि नो वृथैव तस्माच्च मनस्तवेहितम् ॥ ६ ॥
यतश्च नित्योऽहमतो न चान्यथा विकारयोगे हि भवेदनित्यता ।
सदा प्रभातोऽहमतो हि चाद्वयो विकल्पितं चाप्यसदित्यवस्थितम् ॥ ७ ॥
अभावरूपं त्वमसीह हे मनो निरीक्ष्यमाणे न हि युक्तितोऽस्तिता ।
सतो ह्यनाशादसतोऽप्यजन्मतो द्वयं च चेतस्तव नास्तितेष्यते ॥ ८ ॥

द्रष्टा च दृश्यं च तथा च दर्शनं भ्रमस्तु सर्वस्तव कल्पितो हि सः ।
दृशेश्च भिन्नं न हि दृश्यमीक्ष्यते स्वपन्प्रबोधेन तथा न भिद्यते ॥ ९ ॥
विकल्पना वापि तथाऽद्वया भवेदवस्तुयोगात्तदलातचक्रवत् ।
न शक्तिभेदोऽस्ति यतो न चात्मनां ततोऽद्वयत्वं श्रुतितोऽवसीयते ॥ १० ॥
मिथश्च भिन्ना यदि ते हि चेतनाः क्षयस्तु तेषां परिमाणयोगतः ।
ध्रुवो भवेद्भेदवतां हि दृष्टतो जगत्क्षयश्चापि समस्तमोक्षतः ॥ ११ ॥
न मेऽस्ति कश्चिन्न च सोऽस्मि कस्यचिद्यतोऽद्वयोऽहं न हि चास्ति कल्पितम् ।
अकल्पितश्चास्मि पुरा प्रसिद्धितो विकल्पनाया द्वयमेव कल्पितम् ॥ १२ ॥
विकल्पना चाप्यभवे न विद्यते सदन्यदित्येवमतो न नास्तिता ।
यतः प्रवृत्ता तव चापि कल्पना पुरा प्रसिद्धेर्न च तद्विकल्पितम् ॥ १३ ॥
असद्द्वयं तेऽपि हि यद्यदीक्ष्यते न दृष्टमित्येव न चैव नास्तिता ।
यतः प्रवृत्ता सदसद्विकल्पना विचारवद्वापि तथाऽद्वयं च सत् ॥ १४ ॥
सदभ्युपेतं भवतोपकल्पितं विचारहेतोर्यदि तस्य नास्तिता ।
विचारहानाच्च तथैव संस्थितं न चेत्तदिष्टं नितरां सदिष्यते ॥ १५ ॥
असत्समं चैव सदित्यपीति चेदनर्थवत्त्वान्नरशृंगतुल्यतः ।
अनर्थवत्त्वं त्वसति ह्यकारणं न चैव तस्मान्न विपर्ययेऽन्यथा ॥ १६ ॥
असिद्धतश्चापि विचारकारणाद्द्वयं च तस्मात्प्रसृतं च मायया ।
श्रुतेः स्मृतेश्चापि तथा हि युक्तितः प्रसिध्यतीत्थं न तु युज्यतेऽन्यथा ॥ १७ ॥
विकल्पनाच्चापि विधर्मकं श्रुतेः पुरा प्रसिद्धेश्च विकल्पितोऽद्वयम् ।
न चेति नेतीति यथा विकल्पितं निषिध्यतेऽत्राप्यविशेषसिद्धये । १८ ॥
अकल्पितेऽप्येवमजेऽद्वयेऽक्षरे विकल्पयंतः सदसच्च जन्मभिः ।
स्वचित्तमायाप्रभवं च ते भवं जरां च मृत्युं च नियांति संततम् ॥ १९ ॥
भवाभवत्वं तु न चेदवस्थितिर्न चास्य चान्यस्थितिजन्म नान्यथा ।
सतो ह्यसत्त्वादसतश्च सत्त्वतो न च क्रियाकारकमित्यतोऽप्यजम् ॥ २० ॥

अकुर्वदिष्टं यदि वास्य कारकं न किंचिदन्यन्ननु नास्त्यकारकम् ।
सतोऽविशेषादसतश्च सच्च्युतौ तुलांतयोर्यद्वदनिश्चयान्न हि ॥ २१ ॥
न चेत्स इष्टः सदसद्विपर्ययः कथं भवः स्यात्सदसद्व्यवस्थितौ ।
विभक्तमेतद्द्वयमप्यवस्थितं न जन्म तस्माच्च मनो हि कस्यचित् ॥ २२ ॥
अथाभ्युपेत्यापि भवं तवेच्छतो ब्रवीमि नार्थस्तव चेष्टितेन मे ।
न हानवृद्धी न यतः स्वतोऽसतो भवोऽन्यतो वा यदि वारितता तयोः ॥२३॥
ध्रुवा ह्यनित्याश्च न चान्ययोगिनो मिथश्च कार्यं न च तेषु युज्यते ।
अतो न कस्यापि हि किंचिदिष्यते स्वयं च तत्त्वं न निरुक्तिगोचरम् ॥२४॥
समं तु तस्मात्सततं विभातवद्द्वयाद्विमुक्तं सदसद्विकल्पितात् ।
निरीक्ष्य युक्त्या श्रुतितस्तु बुद्धिमानशेषनिर्वाणमुपैति दीपवत् ॥ २५ ॥
अवेद्यमेकं यदनन्यवेदिनां कुतार्किकाणां च सुवेद्यमन्यथा ।
निरीक्ष्य चेत्थं त्वगुणग्रहोऽगुणं न याति मोहं ग्रहदोषमुक्तितः ॥ २६ ॥
अतोऽन्यथा न ग्रहनाश इष्यते विमोहबुद्धेर्ग्रह एव कारणम् ।
ग्रहोऽप्यहेतुस्त्वनलस्त्वनिंधनो यथा प्रशांतिं परमां तथा व्रजेत् ॥ २७ ॥
विमथ्य वेदोदधितः समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः ।
तथाऽमृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः ॥२८॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यशिष्यस्य
श्रीशंकरभगवतः कृतिः सकलवेदोपनिषत्सारोपदेशसाहस्री समाप्ता ॥

वेदान्तस्तोत्राणि ।

प्रातःस्मरणम्

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तमवैति नित्यं
तद्ब्रह्म निष्कलमहं न च भूतसंघः ॥ १ ॥
प्रातर्भजामि मनसां वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण ।
यन्नेति नेति वचनैर्निगमा अवोचु-
स्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥ २ ॥
प्रातर्नमामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ।
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजंगम इव प्रतिभासितं वै ॥ ३ ॥
श्लोकत्रयमिदं पुण्यं लोकत्रयविभूषणम् ।
प्रातःकाले पठेद्यस्तु स गच्छेत्परमं पदम् ॥ ४ ॥

अद्वैतपंचकम् ।

नाहं देहो नेंद्रियाण्यंतरंगो नाहंकारः प्राणवर्गो न बुद्धिः ।
दारापत्यक्षेत्रवित्तादिदूरः साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥ १ ॥
रज्ज्वज्ञानाद्भाति रज्जौ यथाहिः स्वात्माज्ञानादात्मनो जीवभावः ।
आप्तोक्त्याऽहिभ्रांतिनाशे स रज्जुर्जीवो नाहं देशिकोक्त्या शिवोऽहम् ॥२॥
आभातीदं विश्वमात्मन्यसत्यं सत्यज्ञानानंदरूपे विमोहात् ।

निद्रामोहात्स्वप्नवत्तन्न सत्यं शुद्धः पूर्णो नित्य एकः शिवोऽहम् ॥ ३ ॥
मत्तो नान्यत्किंचिदत्रास्ति विश्वं सत्यं बाह्यं वस्तु मायोपक्लृप्तम् ।
आदर्शान्तर्भासमानस्य तुल्यं मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥ ४ ॥
नाहं जातो न प्रवृद्धो न नष्टो देहस्योक्ताः प्राकृताः सर्वधर्माः ।
कर्तृत्वादिश्चिन्मयस्यास्ति नाहंकारस्यैव ह्यात्मनो मे शिवोऽहम् ॥ ५ ॥

आत्मषट्कम् ।

मनोबुद्ध्यहंकारचित्तानि नाहं नच श्रोत्रजिह्वे नच घ्राणनेत्रे ।
न च व्योमभूमिर्न तेजो न वायुश्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥१॥
न च प्राणसंज्ञो न पंचानिला मे न वा सप्तधातुर्न वा पंचकोशः ।
न वाक्पाणिपादौ न चोपस्थपायू चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥२॥
न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्थो न कामो न मोक्षश्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥३॥
न पुण्यं न पापं न सौख्यं न दुःखं न मंत्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥४॥
न मे मृत्युशंका न मे जातिभेदः पिता नैव मे नैव माता न जन्म ।
न बंधुर्न मित्रं गुरुर्नैव शिष्यश्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥ ५ ॥
अहं निर्विकल्पो निराकाररूपो विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणि ।
सदा मे समत्वं न मुक्तिर्न बंधश्चिदानंदरूपः शिवोऽहं शिवोऽहम् ॥ ६ ॥

उपदेशपंचकम् ।

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयता-
मात्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥१॥

संगः सत्सु विधीयतां भगवतो भक्तिर्दृढाऽऽधीयतां
शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यताम् ।
सद्विद्वानुपसृप्यतां प्रतिदिनं तत्पादुके सेव्यतां
ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् ॥ २ ॥
वाक्यार्थश्च विचार्यतां श्रुतिशिरःपक्षः समाश्रीयतां
दुस्तर्कात्सुविरम्यतां श्रुतिमतस्तर्कोऽनुसंधीयताम् ।
ब्रह्मास्मीति विभाव्यतामहरहर्गर्वः परित्यज्यतां
देहेऽहंमतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम् ॥ ३ ॥
क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां
स्वाद्वन्नं न तु याच्यतां विधिवशात्प्राप्तेन संतुष्यताम् ।
शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यता-
मौदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् ॥ ४ ॥
एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् ।
प्राक्कर्म प्रविलाप्यतां चिति बलान्नाप्युत्तरैः श्लिष्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम् ॥ ५ ॥

यः श्लोकपंचकमिदं पठते मनुष्यः
संचिंतयत्यनुदिनं स्थिरतामुपेत्य ।
तस्याशु संसृतिदवानलतीव्रघोर-
तापः प्रशान्तिमुपयाति चितिप्रसादात् ॥

काशी-पंचकम् ।

मनोनिवृत्तिः परमोपशान्तिः सा तीर्थवर्या मणिकर्णिका च ।
ज्ञानप्रवाहा विमलादिगंगा सा काशिकाऽहं निजबोधरूपा ॥ १ ॥

यस्यामिदं कल्पितमिंद्रजालं चराचरं भाति मनोविलासम् ।
सच्चित्सुखैका परमात्मरूपा सा काशिकाऽहं निजबोधरूपा ॥ २ ॥
कोशेषु पंचस्वधिराजमाना बुद्धिर्भवानी प्रतिदेहगेहम् ।
साक्षी शिवः सर्वगतोऽन्तरात्मा सा काशिकाऽहं निजबोधरूपा ॥ ३ ॥
काश्यां हि काश्यते काशी काशी सर्वप्रकाशिका ।
सा काशी विदिता येन तेन प्राप्ता हि काशिका ॥ ४ ॥
काशीक्षेत्रं शरीरं त्रिभुवनजननी व्यापिनी ज्ञानगंगा
भक्तिः श्रद्धा गयेयं निजगुरुचरणध्यानयोगः प्रयागः ।
विश्वेशोऽयं तुरीयः सकलजनमनःसाक्षिभूतोऽन्तरात्मा
देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥ ५ ॥

कौपीन-पंचकम् ।

वेदान्तवाक्येषु सदा रमन्तो भिक्षान्नमात्रेण च तुष्टिमन्तः ।
विशोकमंतःकरणे रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ १ ॥
मूलं तरोः केवलमाश्रयन्तः पाणिद्वयं भोक्तुममन्त्रयन्तः ।
कन्यामिव श्रीमपि कुत्सयन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ २ ॥
देहादिभावं परिवर्तयन्तः आत्मानमात्मन्यवलोकयन्तः ।
नान्तं न मध्यं न बहिः स्मरन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ३ ॥
स्वानन्दभावे परितुष्टिमन्तः संशान्तसर्वेन्द्रियतुष्टिमन्तः ।
अहर्निशं ब्रह्मणि ये रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ४ ॥
पंचाक्षरं पावनमुच्चरन्तः पतिं पशूनां हृदि भावयन्तः ।
भिक्षाशिनो दिक्षु परिभ्रमन्तः कौपीनवन्तः खलु भाग्यवन्तः ॥ ५ ॥

चर्पटपंजरिका-स्तोत्रम् ।

दिनमपि रजनी सायं प्रातः शिशिरवसंतौ पुनरायातः ।
कालः क्रीडति गच्छत्यायुस्तदपि न मुंचत्याशावायुः ॥ १ ॥
भज गोविंदं भज गोविंदं भज गोविंदं मूढमते ।
प्राप्ते सन्निहिते मरणे नहि नहि रक्षति डुकृञ्करणे । (ध्रुवपदम्) ।
अग्रे वह्निः पृष्ठे भानू रात्रौ चुबुकसमर्पितजानुः ।
करतलभिक्षा तरुतलवासस्तदपि न मुंचत्याशापाशः ॥ २ ॥
यावद्वित्तोपार्जनसक्तस्तावन्निजपरिवारो रक्तः ।
पश्चाद्धावति जर्जरदेहे वार्तां पृच्छति कोऽपि न गेहे ॥ ३ ॥
जटिलो मुण्डी लुञ्चितकेशः काषायाम्बरबहुकृतवेषः ।
पश्यन्नपि च न पश्यति मूढ उदरनिमित्तं बहुकृतवेषः ॥ ४ ॥
भगवद्गीता किंचिदधीता गंगाजललवकणिका पीता ।
सकृदपि यस्य मुरारिसमर्चा तस्य यमः किं कुरुते चर्चाम् ॥ ५ ॥
अंगं गलितं पलितं मुण्डं दशनविहीनं जातं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं तदपि न मुञ्चत्याशापिण्डम् ॥ ६ ॥
बालस्तावत्क्रीडासक्तस्तरुणस्तावत्तरुणीरक्तः ।
वृद्धस्तावच्चिन्तामग्नः परे ब्रह्मणि कोऽपि न लग्नः ॥ ७ ॥
पुनरपि जननं पुनरपि मरणं पुनरपि जननीजठरे शयनम् ।
इह संसारे भवदुस्तारे कृपयाऽपारे पाहि मुरारे ॥ ८ ॥
पुनरपि रजनी पुनरपि दिवसः पुनरपि पक्षः पुनरपि मासः ।
पुनरप्ययनं पुनरपि वर्षं तदपि न मुञ्चत्याशामर्षम् ॥ ९ ॥
वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारो ज्ञाते तत्त्वे कः संसारः ॥ १० ॥
नारीस्तनभरनाभिनिवेशं मिथ्यामायामोहावेशम् ।
एतन्मांसवसादिविकारं मनसि विचारय वारंवारम् ॥ ११ ॥

कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय सर्वमसारं विश्वं त्यक्त्वा स्वप्नविचारम् ॥ १२ ॥
गेयं गीतानामसहस्रं ध्येयं श्रीपतिरूपमजस्रम् ।
नेयं सज्जनसंगे चित्तं देयं दीनजनाय च वित्तम् ॥ १३ ॥
यावज्जीवो निवसति देहे कुशलं तावत्पृच्छति गेहे ।
गतवति वायौ देहापाये भार्या बिभ्यति तस्मिन्काये ॥ १४ ॥
सुखतः क्रियते रामाभोगः पश्चाद्धन्त शरीरे रोगः ।
यद्यपि लोके मरणं शरणं तदपि न मुञ्चति पापाचरणम् ॥ १५ ॥
रथ्याचर्पटविरचितकन्थः पुण्यापुण्यविवर्जितपन्थः ।
नाहं न त्वं नायं लोकस्तदपि किमर्थं क्रियते शोकः ॥ १६ ॥
कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन ॥ १७ ॥

दक्षिणामूर्ति-स्तोत्रम् ।

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥
बीजस्यान्तरिवांकुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृंभयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥
यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थकं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवांभोनिधौ

तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥
नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पंदते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जग-
त्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥
देहं प्राणामपींद्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालांधजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥
राहुग्रस्तदिवाकरेंदुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥
बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यंतः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो भद्रया मुद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥
विश्वं पश्यति कार्यकारणतया स्वस्वामिसंबंधतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामित-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८ ॥
भूरंभांस्यनलोऽनिलोऽबरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत् किंचन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९ ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्य श्रवणात्तथार्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिद्ध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥

द्वादशपंजरिकास्तोत्रम् ।

मूढ जहीहि धनागमतृष्णां कुरु सद्बुद्धिं मनसि वितृष्णाम् ।
यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तम् ॥ १ ॥
अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम् ।
पुत्रादपि धनभाजां भीतिः सर्वत्रैषा विहिता नीतिः ॥ २ ॥
का ते कान्ता कस्ते पुत्रः संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातस्तत्त्वं चिन्तय यदिदं भ्रातः ॥ ३ ॥
मा कुरु जनधनयौवनगर्वं हरति निमेषात्कालः सर्वम् ।
मायामयमिदमखिलं हित्वा ब्रह्मपदं त्वं प्रविश विदित्वा ॥ ४ ॥
कामं क्रोधं मोहं लोभं त्यक्त्वात्मानं भावय कोऽहम् ।
आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः ॥ ५ ॥
सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥ ६ ॥
शत्रौ मित्रे पुत्रे बन्धौ मा कुरु यत्नं विग्रहसंधौ ।
भव समचित्तः सर्वत्र त्वं वाञ्छस्यचिराद्यदि विष्णुत्वम् ॥ ७ ॥
त्वयि मयि चान्यत्रैको विष्णुर्व्यर्थं कुप्यसि सर्वसहिष्णुः ।
सर्वस्मिन्नपि पश्यात्मानं सर्वत्रोत्सृज भेदाज्ञानम् ॥ ८ ॥
प्राणायामं प्रत्याहारं नित्यानित्यविवेकविचारम् ।
जाप्यसमेतसमाधिविधानं कुर्ववधानं महदवधानम् ॥ ९ ॥
नलिनीदलगतसलिलं तरलं तद्वज्जीवितमतिशयचपलम् ।

विद्धि व्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम् ॥ १० ॥
का ते ऽष्टादशदेशे चिन्ता वातुल तव किं नास्ति नियन्ता ।
यस्त्वां हस्ते सुदृढनिबद्धं बोधयति प्रभवादिविरुद्धम् ॥ ११ ॥
गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद्भव मुक्तः ।
सेन्द्रियमानसनियमादेवं द्रक्ष्यसि निजहृदयस्थं देवम् ॥ १२ ॥
द्वादशपंजरिकामय एषः शिष्याणां कथितो ह्युपदेशः ।
येषां चित्ते नैव विवेकस्ते पच्यन्ते नरकमनेकम् ॥ १३ ॥

धन्याष्टकम् ।

तज्ज्ञानं प्रशमकरं यदिंद्रियाणां
तज्ज्ञेयं यदुपनिषत्सु निश्चितार्थम् ।
ते धन्या भुवि परमार्थनिश्चितेहाः
शेषास्तु भ्रमनिलये परिभ्रमन्तः ॥ १ ॥
आदौ विजित्य विषयान्मदमोहराग-
द्वेषादिशत्रुगणमाहृतयोगराज्याः ।
ज्ञात्वा मतं समनुभूय परात्मविद्या-
कान्तासुखं वनगृहे विचरन्ति धन्याः ॥ २ ॥
त्यक्त्वा गृहे रतिमधोगतिहेतुभूता-
मात्मेच्छयोपनिषदर्थरसं पिबन्तः ।
वीतस्पृहा विषयभोगपदे विरक्ता
धन्याश्चरन्ति विजनेषु विरक्तसंगाः ॥ ३ ॥
त्यक्त्वा ममाहमिति बंधकरे पदे द्वे
मानावमानसदृशाः समदर्शिनश्च ।
कर्तारमन्यमवगम्य तदर्पितानि
कुर्वन्ति कर्मपरिपाकफलानि धन्याः ॥ ४ ॥

त्यक्त्वैषणात्रयमवेक्षितमोक्षमार्गा
भैक्षामृतेन परिकल्पितदेहयात्राः ।
ज्योतिः परात्परतरं परमात्मसंज्ञं
धन्या द्विजा रहसि हृद्यवलोकयन्ति ॥ ५ ॥
नासन्न सन्न सदसन्न महन्न चाणु
न स्त्री पुमान्न च नपुंसकमेकबीजम् ।
यैर्ब्रह्म तत्समनुपासितमेकचित्तै-
र्धन्या विरेजुरितरे भवपाशबद्धाः ॥ ६ ॥
अज्ञानपंकपरिमग्नमपेतसारं
दुःखालयं मरणजन्मजरावसक्तम् ।
संसारबंधनमनित्यमवेक्ष्य धन्या
ज्ञानासिना तदवशीर्य विनिश्चयन्ति ॥ ७ ॥
शान्तैरनन्यमतिभिर्मधुरस्वभावै-
रेकत्वनिश्चितमनोभिरपेतमोहैः ।
साकं वनेषु विदितात्मपदस्वरूपं
तद्वस्तु सम्यगनिशं विमृशन्ति धन्याः ॥ ८ ॥

निर्गुणमानसपूजा ।

आराधयामि मणिसंनिभमात्मलिंगं
मायापुरीहृदयपंकजसंनिविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकै-
र्नित्यं समाधिकुसुमैरपुनर्भवाय ॥ १ ॥
अयमेकोऽवशिष्टोऽस्मीत्येवमावाहयेच्छिवम् ।
आसनं कल्पयेत्पश्चात्स्वप्रतिष्ठात्मचिंतनम् ॥ २ ॥
पुण्यपापरजःसंगो मम नास्तीति वेदनम् ।

पाद्यं समर्पयेद्विद्वान्सर्वकल्मषनाशनम् ॥ ३ ॥
अनादिकल्पसंवृद्धमूलाज्ञानजलांजलिम् ।
विसृजेदात्मलिंगस्य तदेवार्घ्यसमर्पणम् ॥ ४ ॥
ब्रह्मानंदाब्धिकल्लोलकणकोटयंशलेशकम् ।
पिबन्तींद्रादय इति ध्यानमाचमनं मतम् ॥ ५ ॥
ब्रह्मानंदजलेनैव लोकाः सर्वे परिप्लुताः ।
अच्छेद्योऽयमिति ध्यानमभिषेचनमात्मनः ॥ ६ ॥
निरावरणचैतन्यं प्रकाशोऽस्मीति चिंतनम् ।
आत्मलिंगस्य सद्वस्त्रमित्येवं चिंतयेन्मुनिः ॥ ७ ॥
त्रिगुणात्माशेषलोकमालिकासूत्रमस्म्यहम् ।
इति निश्चयमेवात्र ह्युपवीतं परं मतम् ॥ ८ ॥
अनेकवासनामिश्रप्रपंचोऽयं धृतो मया ।
नान्येनेत्यनुसंधानमात्मनश्चंदनं भवेत् ॥ ९ ॥
रजःसत्त्वतमोवृत्तित्यागरूपैस्तिलाक्षतैः ।
आत्मलिंगं यजेन्नित्यं जीवन्मुक्तिप्रसिद्धये ॥ १० ॥
ईश्वरो गुरुरात्मेति भेदत्रयविवर्जितैः ।
बिल्वपत्रैरद्वितीयैरात्मलिंगं यजेच्छिवम् ॥ ११ ॥
समस्तवासनात्यागं धूपं तस्य विचिंतयेत् ।
ज्योतिर्मयात्मविज्ञानं दीपं संदर्शयेद्बुधः ॥ १२ ॥
नैवेद्यमात्मलिंगस्य ब्रह्मांडाख्यं महोदनम् ।
पिबानंदरसं स्वादु मृत्युरस्योपसेचनम् ॥ १३ ॥
अज्ञानोच्छिष्टहस्तस्य क्षालनं ज्ञानवारिणा ।
विशुद्धस्यात्मलिंगस्य हस्तप्रक्षालनं स्मरेत् ॥ १४ ॥
रागादिगुणशून्यस्य शिवस्य परमात्मनः ।
सरागविषयाभ्यासत्यागस्तांबूलचर्वणम् ॥ १५ ॥

अज्ञानध्वांतविध्वंसप्रचंडमतिभास्करम् ।
आत्मनो ब्रह्मताज्ञानं नीराजनमिहात्मनः ॥ १६ ॥
विविधब्रह्मसंदृष्टिमालिकाभिरलंकृतम् ।
पूर्णानंदात्मतादृष्टिं पुष्पांजलिमनुस्मरेत् ॥ १७ ॥
परिभ्रमन्ति ब्रह्मांडसहस्राणि मयीश्वरे ।
कूटस्थाचलरूपोऽहमिति ध्यानं प्रदक्षिणम् ॥ १८ ॥
विश्ववंद्योऽहमेवास्मि नास्ति वंद्यो मदन्यतः ।
इत्यालोचनमेवात्र स्वात्मलिंगस्य वंदनम् ॥ १९ ॥
आत्मनः सत्क्रिया प्रोक्ता कर्तव्याभावभावना ।
नामरूपव्यतीतात्मचिंतनं नामकीर्तनम् ॥ २० ॥
श्रवणं तस्य देवस्य श्रोतव्याभावचिंतनम् ।
मननं त्वात्मलिंगस्य मंतव्याभावचिंतनम् ॥ २१ ॥
ध्यातव्याभावविज्ञानं निदिध्यासनमात्मनः ।
समस्तभ्रांतिविक्षेपराहित्येनात्मनिष्ठता ॥ २२ ॥
समाधिरात्मनो नाम नान्यच्चित्तस्य विभ्रमः ।
तत्रैव ब्रह्मणि सदा चित्तविश्रांतिरिष्यते ॥ २३ ॥
एवं वेदांतकल्पोक्तस्वात्मलिंगप्रपूजनम् ।
कुर्वन्नामरणं वापि क्षणं वा सुसमाहितः ॥ २४ ॥
सर्वदुर्वासनाजाल पदपांसुमिव त्यजेत् ।
विधूयाज्ञानदुःखौघं मोक्षानंदं समश्नुते ॥ २५ ॥

निर्वाणमंजरी ।

अहं नामरो नैव मर्त्यो न दैत्यो न गंधर्वयक्षः पिशाचप्रभेदः ।
पुमान्नैव न स्त्री तथा नैव षंढः प्रकृष्टप्रकाशस्वरूपः शिवोऽहम् ॥ १ ॥
अहं नैव बालो युवा नैव वृद्धो न वर्णी न च ब्रह्मचारी गृहस्थः ।

वनस्थोऽपि नाहं न संन्यस्तधर्मा जगज्जन्मनाशैकहेतुः शिवोऽहम् ॥२॥
अहं नैव मन्ता न गन्ता न वक्ता न कर्ता न भोक्ता न मुक्ताश्रमस्थः ।
यथाहं मनोवृत्तिभेदस्वरूपस्तथा सर्ववृत्तिप्रदीपः शिवोऽहम् ॥ ३ ॥
यदंतर्बहिर्व्यापकं नित्यशुद्धं यदेकं सदा सच्चिदानंदकंदम् ।
यतः स्थूलसूक्ष्मप्रपंचस्य भानं यतस्तत्प्रसूतिस्तदेवाहमस्मि ॥ ४ ॥
यतः कालमृत्युर्बिभेति प्रकामं यतश्चित्तबुद्धींद्रियाणां विलासः ।
हरिब्रह्मरुद्रेंद्रचंद्रादि नाम प्रकाशो यतः स्यात्तदेवाहमस्मि ॥ ५ ॥
यदाकाशवत्सर्वगं शान्तरूपं परंज्योतिराकारशून्यं वरेण्यम् ।
यदाद्यंतशून्यं परं शंकराख्यं यदंतर्विभाव्यं तदेवाहमस्मि ॥ ६ ॥

परा पूजा ।

अखंडे सच्चिदानंदे निर्विकल्पैकरूपिणि ।
स्थितेऽद्वितीयभावेऽस्मिन्कथं पूजा विधीयते ॥ १ ॥
पूर्णस्यावाहनं कुत्र सर्वाधारस्य चासनम् ।
स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥ २ ॥
निर्मलस्य कुतः स्नानं वस्त्रं विश्वोदरस्य च ।
अगोत्रस्य त्ववर्णस्य कुतस्तस्योपवीतकम् ॥ ३ ॥
निर्लेपस्य कुतो गंधः पुष्पं निर्वासनस्य च ।
निर्विशेषस्य का भूषा कोऽलंकारो निराकृतेः ॥ ४ ॥
निरंजनस्य किं धूपैर्दीपैर्वा सर्वसाक्षिणः ।
निजानंदैकतृप्तस्य नैवेद्यं किं भवेदिह ॥ ५ ॥
विश्वानंदयितुस्तस्य किं तांबूलं प्रकल्प्यते ।
स्वयंप्रकाशचिद्रूपो योऽसावर्कादिभासकः ॥ ६ ॥
प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नतिः ।
वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥ ७ ॥

स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः ।
अन्तर्बहिश्च पूर्णस्य कथमुद्वासनं भवेत् ॥ ८ ॥
एवमेव परा पूजा सर्वावस्थासु सर्वदा ।
एकबुद्ध्या तु देवेशे विधेया ब्रह्मवित्तमैः ॥ ९ ॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं
पूजा ते विविधोपभोगरचना निद्रा समाधिस्थितिः ।
संचारस्तु पदोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥ १० ॥

मनीषा-पंचकम् ।

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या संविदुज्जृंभते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चे
च्चांडालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ १ ॥
ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणयाऽशेषं मया कल्पितम् ।
इत्थं यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले
चांडालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ॥ २ ॥
शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो-
र्नित्यं ब्रह्म निरंतरं विमृशता निर्व्याजशान्तात्मना ।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ॥ ३ ॥
या तिर्यङ्नरदेवताभिरहमित्यंतः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः ।
तां भास्यैः पिहितार्कमंडलनिभां स्फूर्तिं सदा भावयन्

योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ॥ ४ ॥
यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखांबुधौ गलितधीर्ब्रह्मैव न ब्रह्मवि-
द्यः कश्चित्स सुरेंद्रवंदितपदो नूनं मनीषा मम ॥ ५ ॥

विज्ञान–नौका ।

तपोयज्ञदानादिभिः शुद्धबुद्धिर्विरक्तो नृपादौ पदे तुच्छबुद्ध्या ।
परित्यज्य सर्वं यदाप्नोति तत्त्वं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ १ ॥
दयालुं गुरुं ब्रह्मनिष्ठं प्रशांतं समाराध्य भक्त्या विचार्य स्वरूपम् ।
यदाप्नोति तत्त्वं निदिध्यास्य विद्वान् परं ब्रह्म नित्यं तदेवाहमस्मि ॥२॥
यदानंदरूपं प्रकाशस्वरूपं निरस्तप्रपंचं परिच्छेदशून्यम् ।
अहं ब्रह्मवृत्त्यैकगम्यं तुरीयं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ३ ॥
यदज्ञानतो भाति विश्वं समस्तं विनष्टं च सद्यो यदात्मप्रबोधे ।
मनोवागतीतं विशुद्धं विमुक्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ४ ॥
निषेधे कृते नेतिनेतीति वाक्यैः समाधिस्थितानां यदाभाति पूर्णम् ।
अवस्थात्रयातीतमद्वैतमेकं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ५ ॥
यदानंदलेशैः समानन्दि विश्वं यदाभाति सत्त्वे सदाभाति सर्वम् ।
यदालोचिते हेयमन्यत्समस्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ६ ॥
अनंतं विभुं सर्वयोनिं निरीहं शिवं संगहीनं यदोंकारगम्यम् ।
निराकारमत्युज्ज्वलं मृत्युहीनं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ७ ॥
यदानंदसिन्धौ निमग्नः पुमान्स्यादविद्याविलासः समस्तप्रपंचः ।
तदा न स्फुरत्यद्भुतं यन्निमित्तं परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ८ ॥
स्वरूपानुसंधानरूपां स्तुतिं यः पठेदादराद्भक्तिभावो मनुष्यः ।
शृणोतीह वा नित्यमुद्युक्तचित्तो भवेद्विष्णुरत्रैव वेदप्रमाणात् ॥ ९ ॥

षट्पदीस्तोत्रम् ।

अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय तारय संसारसागरतः ॥ १ ॥
दिव्यधुनीमकरंदे परिमलपरिभोगसच्चिदानंदे ।
श्रीपतिपदारविंदे भवभयखेदच्छिदे वंदे ॥ २ ॥
सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ॥ ३ ॥
उद्धृतनग नगभिदनुज दनुजकुलामित्र मित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भवतिरस्कारः ॥ ४ ॥
मत्स्यादिभिरवतारैरवतारवताऽवता सदा वसुधाम् ।
परमेश्वर परिपाल्यो भवता भवतापभीतोऽहम् ॥ ५ ॥
दामोदर गुणमंदिर सुंदरवदनारविंद गोविंद ।
भवजलधिमथनमंदर परमं दरमपनय त्वं मे ॥ ६ ॥
नारायण करुणामय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदनसरोजे सदा वसतु ॥ ७ ॥

हरिमीडे ।

स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं
यस्मिन्नेतत्संसृतिचक्रं भ्रमतीत्थम् ।
यस्मिन् दृष्टे नश्यति तत्संसृतिचक्रं
तं संसारध्वान्तविनाशं हरिमीडे ॥ १ ॥
यस्यैकांशादित्थमशेषं जगदेत-
त्प्रादुर्भूतं येन पिनद्धं पुनरित्थम् ।
येन व्याप्तं येन विबुद्धं सुखदुःखै-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ २ ॥

सर्वज्ञो यो यश्च हि सर्वस्सकलो यो
यश्चानंदोऽनंतगुणो यो गुणधामा ।
यश्चाव्यक्तो व्यक्तसमस्तः सदसद्य-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ ३ ॥
यस्मादन्यन्नास्त्यपि नैवं परमार्थं
दृश्यादन्यो निर्विषयज्ञानमयत्वात् ।
ज्ञातृज्ञानज्ञेयविहीनोऽपि सदा ज्ञ-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ ४ ॥
आचार्येभ्यो लब्धसुसूक्ष्माच्युततत्त्वा
वैराग्येणाभ्यासबलाच्चैव द्रढिम्ना ।
भक्त्यैकाग्रध्यानपरा यं विदुरीशं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ५ ॥
प्राणानायम्योमिति चित्तं हृदि रुध्वा
नान्यत्स्मृत्वा तत्पुनरत्रैव विलाप्य ।
क्षीणे चित्ते भादृशिरस्मीति विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ६ ॥
यं ब्रह्माख्यं देवमनन्यं परिपूर्णं
हृत्स्थं भक्तैर्लभ्यमजं सूक्ष्ममतर्क्यम् ।
ध्यात्वाऽऽत्मस्थं ब्रह्मविदो यं विदुरीशं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ७ ॥
मात्रातीतं स्वात्मविकाशात्मविबोधं
ज्ञेयातीतं ज्ञानमयं हृद्युपलभ्यम् ।
भावग्राह्यानंदमनन्यं च विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ८ ॥
यद्यद्वेद्यं वस्तु सतत्त्वं विषयाख्यं

तत्तद्ब्रह्मैवेति विदित्वा तदहं च ।
ध्यायन्त्येवं यं सनकाद्या मुनयोऽजं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ९ ॥
यद्यद्वेद्यं तत्तदहं नेति विहाय
स्वात्मज्योतिर्ज्ञानमयानंदमवाप्य ।
तस्मिन्नस्मीत्यात्मविदो यं विदुरीशं
तं संसारध्वान्तविनाशं हरिमीडे ॥ १० ॥
हित्वा हित्वा दृश्यमशेषं सविकल्पं
मत्वा शिष्टं भादृशिमात्रं गगनाभम् ।
त्यक्त्वा देहं यं प्रविशन्त्यच्युतभक्ता-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ ११ ॥
सर्वत्रास्ते सर्वशरीरी न च सर्वः ।
सर्वं वेत्त्येवेह न यं वेत्ति च सर्वः ।
सर्वत्रान्तर्यामितयेत्थं यमयन्य-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ १२ ॥
सर्वं दृष्ट्वा स्वात्मनि युक्त्या जगदेतत्
दृष्ट्वात्मानं चैवमजं सर्वजनेषु ।
सर्वात्मैकोऽस्मीति विदुर्यं जनहृत्स्थं
तं संसारध्वान्तविनाशं हरिमीडे ॥ १३ ॥
सर्वत्रैकः पश्यति जिघ्रत्यथ भुंक्ते
स्प्रष्टा श्रोता बुध्यति चेत्याहुरिमं यम् ।
साक्षी चास्ते कर्तृषु पश्यन्निति चान्ये
तं संसारध्वान्तविनाशं हरिमीडे ॥ १४ ॥
पश्यन् शृण्वन्नत्र विजानन् रसयन् सन्
जिघ्रन्बिभ्रद्देहमिमं जीवतयेत्थम् ।

इत्यात्मानं यं विदुरीशं विषयज्ञं
तं संसारध्वान्तविनाशं हरिमीडे ॥ १५ ॥
जाग्रद् दृष्ट्वा स्थूलपदार्थानथ मायां
दृष्ट्वा स्वप्नेऽथापि सुषुप्तौ सुखनिद्राम् ।
इत्यात्मानं वीक्ष्य मुदाऽऽस्ते च तुरीये
तं संसारध्वान्तविनाशं हरिमीडे ॥ १६ ॥
पश्यन् शुद्धोऽप्यक्षर एको गुणभेदा-
न्नानाकारान् स्फाटिकवद्भाति विचित्रः ।
भिन्नश्छिन्नश्चायमजः कर्मफलैर्य-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ १७ ॥
ब्रह्मा विष्णू रुद्रहुताशौ रविचंद्रा-
विंद्रो वायुर्यज्ञ इतीत्थं परिकल्प्य ।
एकं सन्तं यं बहुधाऽऽहुर्मतिभेदा-
त्तं संसारध्वान्तविनाशं हरिमीडे ॥ १८ ॥
सत्यं ज्ञानं शुद्धमनंतं व्यतिरिक्तं
शान्तं गूढं निष्कलमानंदमनन्यम् ।
इत्याहादौ यं वरुणोऽसौ भृगवेऽजं
तं संसारध्वान्तविनाशं हरिमीडे ॥ १९ ॥
कोशानेतान्पंच रसादीनतिहाय
ब्रह्मास्मीति स्वात्मनि निश्चित्य दृशिस्थम् ।
पित्रा शिष्टो वेद भृगुर्यं यजुरंते
तं संसारध्वान्तविनाशं हरिमीडे ॥ २० ॥
येनाविष्टो यस्य च शक्त्या यदधीनः
क्षेत्रज्ञोऽयं कारयिता जंतुषु कर्तुः ।
कर्ता भोक्ताऽऽत्मात्र हि चिच्छक्त्यधिरूढ-

स्तं संसारध्वान्तविनाशं हरिमीडे ॥ २१ ॥
सृष्ट्वा सर्वं स्वात्मतयैवेत्थमतर्क्यं
व्याप्याथांतः कृत्स्नमिदं सृष्टमशेषम् ।
सच्च त्यच्चाभूत्परमात्मा स य एक-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ २२ ॥
वेदान्तैश्चाध्यात्मिकशास्त्रैश्च पुराणैः
शास्त्रैश्चान्यैः सात्त्वततंत्रैश्च यमीशम् ।
दृष्ट्वाऽथान्तश्चेतसि बुद्ध्वा विविशुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ २३ ॥
श्रद्धाभक्तिध्यानशमाद्यैर्यतमानै-
र्ज्ञातुं शक्यो देव इहैवाशु य ईशः ।
दुर्विज्ञेयो जन्मशतैश्चापि विना तै-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ २४ ॥
यस्यातर्क्यं स्वात्मविभूतेः परमार्थं
सर्वं खल्वित्यत्र निरुक्तं श्रुतिविद्भिः ।
तज्जातित्वादब्धितरंगाभमभिन्नं
तं संसारध्वान्तविनाशं हरिमीडे ॥ २५ ॥
दृष्ट्वा गीतास्वक्षरतत्त्वं विधिनाऽजं
भक्त्या गुर्व्या लभ्य हृदिस्थं दृशिमात्रम् ।
ध्यात्वा तस्मिन्नस्म्यहमित्यत्र विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ २६ ॥
क्षेत्रज्ञत्वं प्राप्य विभुः पंचमुखैर्यो
भुंक्तेऽजस्रं भोग्यपदार्थान् प्रकृतिस्थः ।
क्षेत्रे क्षेत्रेऽप्स्विदुवेदको बहुधाऽऽस्ते
तं संसारध्वान्तविनाशं हरिमीडे ॥ २७ ॥

युक्त्याऽऽलोड्य व्यासवचांस्यत्र हि लभ्यः
क्षेत्रक्षेत्रज्ञान्तरविद्भिः पुरुषाख्यः ।
योऽहं सोऽसौ सोऽस्म्यहमेवेति विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ २८ ॥
एकीकृत्यानेकशरीरस्थमिमं ज्ञं
यं विज्ञायेहैव स एवाशु भवन्ति ।
यस्मिँल्लीना नेह पुनर्जन्म लभन्ते
तं संसारध्वान्तविनाशं हरिमीडे ॥ २९ ॥
द्वंद्वैकत्वं यच्च मधुब्राह्मणवाक्यैः
कृत्वा शक्रोपासनमासाद्य विभूत्या ।
योऽसौ सोऽहं सोऽस्म्यहमेवेति विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३० ॥
योऽयं देहे चेष्टयितान्तःकरणस्थः
सूर्ये चासौ तापयिता सोऽस्म्यहमेव ।
इत्यात्मैक्योपासनया यं विदुरीशं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३१ ॥
विज्ञानांशो यस्य सतः शक्त्यधिरूढो
बुद्धिर्बुध्यत्यत्र बहिर्बोध्यपदार्थान् ।
नैवान्तःस्थं बुध्यति यं बोधयितारं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३२ ॥
कोऽयं देहे देव इतीत्थं सुविचार्य
ज्ञाता श्रोता मंतयिता चैष हि देवः ।
इत्यालोच्य ज्ञांश इहास्मीति विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३३ ॥
को ह्येवान्यादात्मनि न स्यादयमेष

ह्येवानंदः प्राणिति चापानिति चेति ।
इत्यस्तित्वं वक्त्युपपत्त्या श्रुतिरेषा
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३४ ॥
प्राणो वाऽहं वाक्श्रवणादीनि मनो वा
बुद्धिर्वाऽहं व्यस्त उताहोऽपि समस्तः ।
इत्यालोच्य ज्ञप्तिरिहास्मीति विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३५ ॥
नाहं प्राणो नैव शरीरं न मनोऽहं
नाहं बुद्धिर्नाहमहंकारधियौ च ।
योऽत्र ज्ञांशः सोऽस्म्यहमेवेति विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३६ ॥
सत्तामात्रं केवलविज्ञानमजं सत्
सूक्ष्मं नित्यं तत्त्वमसीत्यात्मसुताय ।
साम्नामंते प्राह पिता यं विभुमाद्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३७ ॥
मूर्तामूर्ते पूर्वमपोह्याथ समाधौ
दृश्यं सर्वं नेति च नेतीति विहाय ।
चैतन्यांशे स्वात्मनि सन्तं च विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ३८ ॥
ओतं प्रोतं यत्र च सर्वं गगनान्तं
योऽस्थूलानण्वादिषु सिद्धोऽक्षरसंज्ञः ।
ज्ञाताऽतोऽन्यो नेत्युपलभ्यो न च वेद्य-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ ३९ ॥
तावत्सर्वं सत्यमिवाभाति यदेत-
द्यावत्सोऽस्मीत्यात्मनि यो ज्ञो नहि दृष्टः ।

दृष्टे यस्मिन्सर्वमसत्यं भवतीदं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ४० ॥
रागामुक्तं लोहयुतं हेम यथाग्नौ ।
योगाष्टांगैरुज्ज्वलितज्ञानमयाग्नौ ।
दग्ध्वाऽऽत्मानं ज्ञं परिशिष्टं च विदुर्यं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ४१ ॥
यं विज्ञानज्योतिषमाद्यं सुविभान्त
हृद्यर्केंद्वग्न्योकसमीडयं तडिदाभम् ।
भक्त्याराध्येहैव विशन्त्यात्मनि सन्तं
तं संसारध्वान्तविनाशं हरिमीडे ॥ ४२ ॥
पायाद्भक्तं स्वात्मनि सन्तं पुरुषं यो
भक्त्या स्तौतीत्यांगिरसं विष्णुरिमं माम् ।
इत्यात्मानं स्वात्मनि संहृत्य सदैक-
स्तं संसारध्वान्तविनाशं हरिमीडे ॥ ४३ ॥

भक्तिस्तोत्राणि

शिवभुजंगप्रयातस्तोत्रम् ।

गलद्दानगण्डं मिलद्भृंगखण्डं चलच्चारुशुंडं जगत्त्राणशौंडम् । लसद्दंतकांडं विपद्भंगचंडं शिवप्रेमपिंडं भजे वक्रतुंडम् ॥ १ ॥ अनाद्यं-तमाद्यं परं तत्त्वमर्थं चिदाकारमेकं तुरीयं त्वमेयम् । हरिब्रह्ममृग्यं पर-ब्रह्मरूपं मनोवागतीतं महः शैवमीडे ॥ २ ॥ स्वशक्त्यादिशक्त्यंतसिंहास-नस्थं मनोहारिसर्वांगरत्नादिभूषम् । जटाहींदुगंगास्थिशश्यर्कमौलिं परं शक्तिमित्रं नुमः पंचवक्त्रम् ॥ ३ ॥ शिवेशानतत्पूरुषाघोरवामादिभि-र्ब्रह्मभिर्हृन्मुखैः षड्भिरंगैः । अनौपम्यषट्त्रिंशतं तत्त्वविद्यामतीतं परं त्वां कथं वेत्ति को वा ॥ ४ ॥ प्रवालप्रवाहप्रभाशोणमर्धं मरुत्वन्मणि-श्रीमहःश्याममर्धम् । गुणस्यूतमेकं वपुश्चैकमंतः स्मरामि स्मरापत्तिसं-पत्तिहेतुम् ॥ ५ ॥ स्वसेवासमायातदेवासुरेंद्रानमन्मौलिमंदारमालाभिषि-क्तम् । नमस्यामि शंभो पदांभोरुहं ते भवांभोधिपोतं भवानीविभाव्यम् ॥ ६ ॥ जगन्नाथ मन्नाथ गौरीसनाथ प्रपन्नानुकंपिन्विपन्नार्तिहारिन् । महःस्तोममूर्ते समस्तैकबन्धो नमस्ते नमस्ते पुनस्ते नमोऽस्तु ॥ ७ ॥ महादेव देवेश देवादिदेव स्मरारे पुरारे यमारे हरेति । ब्रुवाणः स्मरि-ष्यामि भक्त्या भवन्तं ततो मे दयाशील देव प्रसीद ॥ ८ ॥ विरूपाक्ष विश्वेश विद्यादिकेश त्रयीमूल शंभो शिव त्र्यंबक त्वम् । प्रसीद स्मर त्राहि पश्याव पुष्य क्षमस्वाप्नुहीति क्षपा हि क्षिपामः ॥ ९ ॥ त्वदन्यः शरण्यः प्रपन्नस्य नेति प्रसीद स्मरन्नेव हन्यास्तु दैन्यम् । न चेत्ते भवे-द्भक्तवात्सल्यहानिस्ततो मे दयालो दयां संनिधेहि ॥ १० ॥ अयं दान-कालस्त्वहं दानपात्रं भवान्नाथ दाता त्वदन्यं न याचे । भवद्भक्तिमेव स्थिरां देहि मह्यं कृपाशील शंभो कृतार्थोस्मि तस्मात् ॥ ११ ॥ पशुं वेत्सि चेन्मां त्वमेवाधिरूढं कलंकीति वा मूर्ध्नि धत्से त्वमेव । द्विजिह्वः

पुनः सोपि ते कंठभूषा त्वदंगीकृताः शर्व सर्वेऽपि धन्याः ॥ १२ ॥ न शक्नोमि कर्तुं परद्रोहलेशं कथं प्रीयसे त्वं न जाने गिरीश । तदा हि प्रसन्नोसि कस्यापि कान्तासुतद्रोहिणो वा पितृद्रोहिणो वा ॥१३॥ स्तुतिं ध्यानमर्चां यथावद्विधातुं भजन्नप्यजानन्महेशावलंबे । त्रसन्तं सुतं त्रातुमग्रे मृकंडोर्यमप्राणनिर्वापणं त्वत्पदाब्जम् ॥ १४ ॥ अकंठे कलंकादनंगे भुजंगादपाणौ कपालादभालेऽनलाक्षात् । अमौलौ शशांकादवामे कलत्रादहं देवमन्यं न मन्ये न मन्ये ॥ १५ ॥

शिवपंचाक्षरस्तोत्रम् ।

नागेंद्रहाराय त्रिलोचनाय भस्मांगरागाय महेश्वराय । नित्याय शुद्धाय दिगंबराय तस्मै नकाराय नमः शिवाय ॥१॥ मंदाकिनीसलिलचंदनचर्चिताय नंदीश्वरप्रमथनाथमहेश्वराय । मंदारपुष्पबहुपुष्पसुपूजिताय तस्मै मकाराय नमः शिवाय ॥२॥ शिवाय गौरीवदनाब्जवृंदसूर्याय दक्षाध्वरनाशकाय । श्रीनीलकंठाय वृषध्वजाय तस्मै शिकाराय नमः शिवाय ॥३॥ वसिष्ठकुंभोद्भवगौतमार्यमुनींद्रदेवार्चितशेखराय । चंद्रार्कवैश्वानरलोचनाय तस्मै वकाराय नमः शिवाय ॥४॥ यक्षस्वरूपाय जटाधराय पिनाकहस्ताय सनातनाय । दिव्याय देवाय दिगंबराय तस्मै यकाराय नमः शिवाय ॥५॥ पंचाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ । शिवलोकमवाप्नोति शिवेन सह मोदते ॥६॥

वेदसारशिवस्तवः ।

पशूनां पतिं पापनाशं परेशं गजेंद्रस्य कृत्तिं वसानं वरेण्यम् । जटाजूटमध्ये स्फुरद्गांगवारिं महादेवमेकं स्मरामि स्मरारिम् ॥१॥ महेशं सुरेशं सुरारातिनाशं विभुं विश्वनाथं विभूत्यंगभूषम् । विरूपाक्षमिंद्वर्कवह्नित्रिनेत्रं सदानंदमीडे प्रभुं पंचवक्त्रम् ॥२॥ गिरीशं गणेशं गले नील-

वर्णं गवेंद्राधिरूढं गणातीतरूपम् । भवं भास्वरं भस्मना भूषितांगं भवानीकलत्रं भजे पंचवक्त्रम् ॥३॥ शिवाकान्त शंभो शशांकार्धमौले महेशान शूलिन् जटाजूटधारिन् । त्वमेको जगद्व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥४॥ परात्मानमेकं जगद्बीजमाद्यं निरीहं निराकारमोंकारवेद्यम् । यतो जायते पाल्यते येन विश्वं तमीशं भजे लीयते यत्र विश्वम् ॥५॥ न भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तंद्रा न निद्रा। न ग्रीष्मो न शीतं न देशो न वेषो न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥६॥ अजं शाश्वतं कारणं कारणानां शिवं केवलं भासकं भासकानाम् । तुरीयं तमःपारमाद्यंतहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥७॥ नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानंदमूर्ते । नमस्ते नमस्ते तपोयोगगम्य नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥८॥ प्रभो शूलपाणे विभो विश्वनाथ महादेव शंभो महेश त्रिनेत्र । शिवाकान्त शान्त स्मरारे पुरारे त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥९॥ शंभो महेश करुणामय शूलपाणे गौरीपते पशुपते पशुपाशनाशिन् । काशीपते करुणया जगदेतदेकस्त्वं हंसि पासि विदधासि महेश्वरोऽसि ॥१०॥ त्वत्तो जगद्भवति देव भव स्मरारे त्वय्येव तिष्ठति जगन्मृड विश्वनाथ । त्वय्येव गच्छति लयं जगदेतदीश लिंगात्मकं हर चराचरविश्वरूपिन् ॥११॥

कालभैरवाष्टकम् ।

देवराजसेव्यमानपावनांघ्रिपंकजं व्यालयज्ञसूत्रमिंदुशेखरं कृपाकरम् । नारदादियोगिवृंदवंदितं दिगंबरं काशिकापुराधिनाथकालभैरवं भजे ॥१॥ भानुकोटिभास्वरं भवाब्धितारकं परं नीलकंठमीप्सितार्थदायकं त्रिलोचनम् । कालकालमंबुजाक्षमक्षशूलमक्षरं काशिका० ॥२॥ शूलटंकपाशदंडपाणिमादिकारणं श्यामकायमादिदेवमक्षरं निरामयम् । भीमविक्रमं प्रभुं विचित्रतांडवप्रियं काशिका० ॥३॥ भुक्तिमुक्तिदायकं प्रशस्त-

चारुविग्रहं भक्तवत्सलं स्थितं समस्तलोकविग्रहम् । विनिक्वणन्मनोज्ञहेमकिंकिणीलसत्कटिं काशिका० ॥ ४ धर्मसेतुपालकं त्वधर्ममार्गनाशकं कर्मपाशमोचकं सुशर्मदायकं विभुम् । स्वर्णवर्णशेषपाशशोभितांगमंडलं काशिका० ॥ ५ ॥ रत्नपादुकाप्रभाभिरामपादयुग्मकं नित्यमद्वितीयमिष्टदैवतं निरंजनम् । मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं कशिका० ॥ ६ ॥ अट्टहासभिन्नपद्मजांडकोशसंततिं दृष्टिपातनष्टपापजालमुग्रशासनम् । अष्टसिद्धिदायकं कपालमालिकंधरं काशिका० ॥ ८ ॥ भूतसंघनायकं विशालकीर्तिदायकं काशिवासलोकपुण्यपापशोधकं विभुम् । नीतिमार्गकोविदं पुरातनं जगत्पतिं काशिका० ॥ ८ ॥ कालभैरवाष्टकं पठन्ति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम् । शोकमोहदैन्यलोभकोपतापनाशनं ते प्रयान्ति कालभैरवांघ्रिसन्निधिं ध्रुवम् ॥ ९ ॥

श्रीमदच्युताष्टकम् ।

अच्युताच्युत हरे परमात्मन् राम कृष्ण पुरुषोत्तम विष्णो । वासुदेव भगवन्ननिरुद्ध श्रीपते शमय दुखःमशेषम् ॥ १ ॥ विश्वमंगल विभो जगदीश नंदनंदन नृसिंह नरेंद्र । मुक्तिदायक मुकुंद मुरारे श्रीपते शमय दुःखमशेषम् ॥ २ ॥ रामचंद्र रघुनायक देव दीननाथ दुरितक्षयकारिन् । यादवेंद्र यदुभूषण यज्ञ श्रीपते शमय दुःखमशेषम् ॥ ३ ॥ देवकीतनय दुःखदवाग्ने राधिकारमण रम्यसुमूर्ते । दुखःमोचन दयार्णव नाथ श्रीपते शमय दुःखमशेषम् ॥ ४ ॥ गोपिकावदनचंद्रचकोर नित्य निर्गुण निरंजन जिष्णो । पूर्णरूप जय शंकर शर्व श्रीपते शमय दुःखमशेषम् ॥ ५ ॥ गोकुलेश गिरिधारण धीर यमुनाच्छतटलेखन वीर । नारदादिमुनिवंदितपाद श्रीपते शमय दुःखमशेषम् ॥ ६ ॥ द्वारकाधिप दुरंतगुणाब्धे प्राणनाथ परिपूर्ण भवारे । ज्ञानगम्य गुणसागर ब्रह्मन् श्रीपते शमय दुःखमशेषम् ॥ ७ ॥ दुष्टनिर्दलन देव दयालो पद्मनाभ धरणीधरधारिन् । रावणांतक रमेश मुरारे श्रीपते शमय

दुःखमशेषम् ॥ ८ ॥ अच्युताष्टकमिदं रमणीयं निर्मितं भवभयं विनिहंतुम् ॥ यः पठेद्विषयवृत्तिनिवृत्तिर्जन्मदुःखमखिलं स जहाति ॥ ९ ॥

अच्युताष्टकम् ।

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम् । श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचंद्रं भजे ॥ १ ॥ अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितं । इंदिरामंदिरं चेतसा सुंदरं देवकीनंदनं नंदजं संदधे ॥ २ ॥ विष्णवे जिष्णवे शंखिने चक्रिणे रुक्मिणीरागिणे जानकीजानये । बल्लवीवल्लभायार्चितायात्मने कंसविध्वंसिने वंशिने ते नमः ॥ ३ ॥ कृष्ण गोविंद हे राम नारायण श्रीपते वासुदेवाजित श्रीनिधे । अच्युतानंत हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक ॥४॥ राक्षसक्षोभितः सीतया शोभितो दंडकारण्यभूपुण्यताकारणः । लक्ष्मणेनान्वितो वानरैः सेवितोऽगस्त्यसंपूजितो राघवः पातु माम् ॥ ५ ॥ धेनुकारिष्टकोऽनिष्टकृद्द्वेषिणां केशिहा कंसहृद्वंशिकावादकः । पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा ॥६॥ विद्युदुद्द्योतवान्प्रस्फुरद्वाससं प्रावृडंभोदवत्प्रोल्लसद्विग्रहम् । वन्यया मालया शोभितोरःस्थलं लोहितांघ्रिद्वयं वारिजाक्ष भजे ॥७॥ कुंचितैः कुंतलैर्भ्राजमानाननं रत्नमौलिं लसत्कुंडलं गंडयोः । हारकेयूरकं कंकणप्रोज्ज्वलं किंकिणीमंजुलं श्यामलं तं भजे ॥८॥ अच्युतस्याष्टकं यः पठेदिष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् । वृत्ततः सुंदरं कर्तृ विश्वंभरं तस्य वश्यो हरिर्जायते सत्वरम् ॥९॥

नारायणस्तोत्रम् ।

॥ नारायण नारायण जय गोविंद हरे । नारायण नारायण जय

गोपाल हरे ॥ ध्रु० ॥ करुणापारावारा वरुणालयगंभीरा । नारायण० ॥ ॥१॥ घननीरदसंकाशा कृतकलिकल्मषनाशा । नारायण० ॥२॥ यमुनातीरविहारा धृतकौस्तुभमणिहारा । नारायण० ॥ ३ ॥ पीतांबरपरिधाना सुरकल्याणनिधाना । नारायण० ॥४॥ मंजुलगुंजाभूषा मायामानुषवेषा । नारायण० ॥५॥ राधाऽधरमधुरसिका रजनीकरकुलतिलका । नारायण० ॥६॥ मुरलीगानविनोदा वेदस्तुतभूपादा । नारायण० ॥७॥ बर्हिनिबर्हापीडा नटनाटकफणिक्रीडा । नारायण० ॥८॥ वारिजभूषाभरणा राजीवरुक्मिणीरमणा । नारायण० ॥९॥ जलरुहदलनिभनेत्रा जगदारंभकसूत्रा । नारायण० ॥१०॥ पातकरजनीसंहर करुणालय मामुद्धर । नारायण० ॥११॥ अघबकक्षयकंसारे केशव कृष्ण मुरारे । नारायण० ॥१२॥ हाटकनिभपीतांबर अभयं कुरु मे मावर । नारायण० ॥१३॥ दशरथराजकुमारा दानवमदसंहारा । नारायण० ॥१४॥ गोवर्धनगिरिरमणा गोपीमानसहरणा । नारायण० ॥१५॥ शरयूतीरविहारा सज्जनऋषिमंदारा । नारायण० ॥१६॥ विश्वामित्रमखत्रा विविधपरासुचरित्रा । नारायण० ॥१७॥ ध्वजवज्रांकुशपादा धरणीसुतसहमोदा । नारायण० ॥१८॥ जनकसुताप्रतिपाला जय जय संस्मृतिलीला । नारायण० ॥१९॥ दशरथवाग्धृतिभारा दंडकवनसंचारा । नारायण० ॥२०॥ मुष्टिकचाणूरसंहारा मुनिमानसविहारा । नारायण० ॥२१॥ वालिविनिग्रहशौर्या वरसुग्रीवहितार्या । नारायण० ॥२२॥ मां मुरलीकर धीवर पालय पालय श्रीधर । नारायण० ॥२३॥ जलनिधिबंधनधीरा रावणकंठविदारा । नारायण० ॥२४॥ ताटीमददलनाढ्या नटगुणविविधधनाढ्या । नारायण० ॥२५॥ गौतमपत्नीपूजन करुणाघनावलोकन । नारायण० ॥२६॥ संभ्रमसीताहारा साकेतपुरविहारा । नारायण० ॥२७॥ अचलोद्धृतिचंचत्कर भक्तानुग्रहतत्पर । नारायण० ॥२८॥ नैगमगानविनोदा रक्षःसुतप्रल्हादा

नारायण० ॥२९॥ भारतियतिवरशंकर नामामृतमखिलान्तर । नारायण नारायण जय गोपाल हरे ॥ ३० ॥

विष्णुपादादिकेशान्तवर्णनस्तोत्रम् ।

लक्ष्मीभर्तुर्भुजाग्रे कृतवसति सितं यस्य रूपं विशालं नीलाद्रेस्तुंगश्रृंगस्थितमिव रजनीनाथबिंबं विभाति । पायान्नः पांचजन्यः स सकुलदितिजत्रासनैः पूरयन्स्वैर्निध्वानैर्नीरदौघध्वनिपरिभवदैरंबरं कम्बुराजः ॥१॥ आहुर्यस्य स्वरूपं क्षणमुखमखिलं सूरयः कालमेतं ध्वांतस्यैकांतमंतं यदपि च परमं सर्वधाम्नां च धाम । चक्रं तच्चक्रपाणेर्दितिजतनुगलद्रक्तधाराक्तधारं शश्वन्नो विश्ववंद्यं वितरतु विपुलं शर्म घर्मांशुशोभम् ॥२॥ अव्यान्निर्घातघोरो हरिभुजपवनामर्शनाध्मातमूर्तेरस्मान्विस्मेरनेत्रत्रिदशनुतिवचःसाधुकारैः सुतारः । सर्वं संहर्तुमिच्छोररिकुलभुवनं स्फारविस्फारनादः संयत्कल्पांतसिंधौ शरसलिलघटावार्मुचः कार्मुकस्य ॥३॥ जीमूतश्यामभासा मुहुरपि भगवद्बाहुना मोहयन्ती युद्धेषूद्धूयमाना झटिति तडिदिवालक्ष्यते यस्य मूर्तिः । सोऽसिस्त्रासाकुलाक्षत्रिदशवपुरिपुःशोणितास्वाददृप्तो नित्यानंदाय भूयान्मधुमथनमनोनंदको नंदको नः ॥४॥ कम्राकारा मुरारेः करकमलतलेनानुरागाद्गृहीता सम्यग्वृत्ता स्थिताग्रे सपदि न सहते दर्शनं या परेषाम् । राजन्ती दैत्यजीवासवमदमुदितलोहितालेपनार्द्रा कामं दीप्तांशुकान्ता प्रदिशतु दयितेवास्य कौमोदकी नः ॥५॥ यो विश्वप्राणभूतस्तनुरपि च हरेर्यानकेतुस्वरूपो यं संचिंत्यैव सद्यः स्वयमुरगवधूवर्गगर्भाः पतन्ति । चंचच्चंडोरुतुंडत्रुटितफणिवसारक्तपंकांकितास्यं वंदे छंदोमयं तं खगपतिममलस्वर्णवर्णं सुपर्णं ॥६॥ विष्णोर्विश्वेश्वरस्य प्रवरशयनकृत्सर्वलोकैकधर्ता सोऽनंतः सर्वभूतः पृथुविमलयशाः सर्ववेदैश्च वेद्यः । पाता विश्वस्य शश्वत्सकलसुररिपुध्वंसनः पापहन्ता सर्वज्ञः सर्वसाक्षी सकलविषभयात्पातु भोगीश्व

नः ॥ ७ ॥ वाग्भूगौर्यादिभेदैर्विदुरिह मुनयो यां यदीयैश्च पुंसां कारुण्यार्द्रैः कटाक्षैः सकृदपि पतितैः संपदः स्युः समग्राः । कुंदेंदुस्वच्छमंदस्मितमधुरमुखांभोरुहां सुंदरांगीं वंदे वंद्यामशेषैरपि मुरभिदुरोमंदिरामिंदिरां ताम् ॥ ८ ॥ या सूते सत्त्वजालं सकलमपि सदा संनिधानेन पुंसो धत्ते या सत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम् । धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥ ९ ॥ येभ्योऽसूयद्भिरुच्चैः सपदि पदमुरु त्यज्यते दैत्यवर्गैर्येभ्यो धर्तुं च मूर्ध्ना स्पृहयति सततं सर्वगीर्वाणवर्गः । नित्यं निर्मूलनेयुर्निचिततरममी भक्तिनिघ्नात्मनां नः पद्माक्षस्यांघ्रिपद्मद्वयतलनिलयाः पांसवः पापपंकम् ॥ १० ॥ रेखा लेखाभिवंद्याश्चरणतलगताश्चक्रमत्स्यादिरूपाः स्निग्धाः सूक्ष्माः सुजाता मृदुललिततरक्षामसूत्रायमाणाः । दद्युर्नो मंगलानि भ्रमरभरजुषा कोमलेनाब्धिजायाः कम्रेणाम्रेडयमानाः किसलयमृदुना पाणिना चक्रपाणेः ॥ ११ ॥ यस्मादाक्रामतो द्यां गरुडमणिशिलाकेतुदंडायमानादाश्च्योतन्ती बभासे सुरसरिदमला वैजयन्तीव कान्ता । भूमिष्ठो यस्तथान्यो भुवनगृहबृहत्स्तंभशोभां दधानः पातामेतौ पयोजोदरललिततलौ पंकजाक्षस्य पादौ ॥ १२ ॥ आक्रामद्भ्यां त्रिलोकीमसुरसुरपती तत्क्षणादेव नीतौ याभ्यां वैरोचनींद्रौ युगपदपि विपत्संपदारेकधाम । ताभ्यां ताम्रोदराभ्यां मुहुरहमजितस्यांचिताभ्यामुभाभ्यां प्राज्यैश्वर्यप्रदाभ्यां प्रणतिमुपगतः पादपंकेरुहाभ्याम् ॥ १३ ॥ येभ्यो वर्णश्चतुर्थश्चरणत उदभूदादिसर्गे प्रजानां साहस्री चापि संख्या प्रकटमभिहिता सर्ववेदेषु येषाम् । व्याप्ता विश्वंभरा यैरतिविततनोर्विश्वमूर्तेर्विराजो विष्णोस्तेभ्यो महद्भ्यः सततमपि नमोऽस्त्वंघ्रिपंकेरुहेभ्यः ॥ १४ ॥ विष्णोः पादद्वयाग्रे विमलनखमणिभ्राजिता राजते या राजीवस्येव रम्या हिमजलकणिकालंकृताग्रा दलाली । अस्माकं विस्मयार्हाण्यखिलमुनिजनप्रार्थनीयानि सेयं दद्यादा-

द्यानवद्या ततिरतिरुचिरा मंगलान्यंगुलीनाम् ॥ १५ ॥ यस्यां दृष्ट्वामलायां प्रतिकृतिममराः स्वां भवन्त्यानमंतः सेंद्राः सांद्रीकृतेर्ष्याः स्वपरसुरकुलाशंकयातंकवन्तः । सा सद्यः सातिरेकां सकलसुखकरीं संपदं साधयेन्नश्चंचच्चार्वंशुचक्रा चरणनलिनयोश्चक्रपाणेर्नखाली ॥ १६ ॥ पादांभोजन्मसेवासमवनतसुरव्रातभास्वत्किरीटप्रत्युप्तोच्चावचाश्मप्रवरकरगणैश्चित्रितं यद्विभाति । नम्रांगाणां हरेर्नो हरिदुपलमहाकूर्मसौंदर्यहारिच्छायं श्रेयःप्रदायि प्रपदयुगमिदं प्रापयेत्पापमंतम् ॥ १७ ॥ श्रीमत्यौ चारुवृत्ते करपरिमलनानंदहृष्टे रमायाः सौंदर्याढ्येंद्रनीलोपलरचितमहादंडयोः कांतिचौरे । सुरींद्रैः स्तूयमाने सुरकुलसुखदे सूदितारातिसंघे जंघे नारायणीये मुहुरपि जयतामस्मदंहो हरन्त्यौ ॥१८॥ सम्यक् साह्यं विधातुं सममपि सततं जंघयोः खिन्नयोर्ये भारीभूतोरुदंडद्वयभरणकृतोत्तंभभावं भजेते । चित्तादर्शं निधातुं महितमिव सतां ते समुद्गायमाने वृत्ताकारे विधत्तां हृदि मुदमजितस्यानिशं जानुनी नः ॥१९॥ देवो भीतिं विधातुः सपदि विदधतौ कैटभाख्यं मधुं यावारोप्यारूढगर्वावधिजलधि ययोरेव दैत्यो जघान । वृत्तावन्योन्यतुल्यौ चतुरमुपचयं बिभ्रतावभ्रनीलावूरू चारू हरेस्तौ मुदमतिशयिनीं मानसे नो विधत्ताम् ॥२०॥ पीतेन द्योतते यच्चतुरपरिहितेनांबरेणात्युदारं जातालंकारयोगं जलमिव जलधेर्वाडवाग्निप्रभाभिः । एतत्पातित्यदाम्नो जघनमतिघनादेनसो माननीयं सातत्येनैव चेतो विषयमवतरत्पातु पीतांबरस्य ॥२१॥ यस्या दाम्न्या विधाम्नो जघनकलितया भ्राजतेऽगं यथाब्धेर्मध्यस्थो मंदराद्रिर्भुजगपतिमहाभोगसंनद्धमध्यः । कांची सा कांचनाभा मणिवरकिरणैरुल्लसद्भिः प्रदीप्ता कल्यां कल्याणदात्रीं मम मतिमनिशं कम्ररूपां करोतु ॥२२॥ उन्नम्रं कम्रमुच्चैरुपचितमुदभूद्यत्र पत्रैर्विचित्रैः पूर्वं गीर्वाणपूज्यं कमलजमधुपस्यास्पदं तत्पयोजम् । तस्मिन्नीलाश्मनीलैस्तरलरुचिजलैः पूरिते केलिबुद्ध्या नालीकाक्षस्य नाभीसरसि वसतु

नश्चित्तहंसश्चिराय ॥२३॥ पातालं यस्य नालं वलयमपि दिशां पत्रपंक्तिं नगेंद्रान्विद्वांसः केसरालीर्विदुरिह विपुलां कर्णिकां स्वर्णशैलम् । भूयाद्गायत्स्वयंभूमधुकरभवनं भूमयं कामदं नो नालीकं नाभिपद्माकरभवमुरु तन्नागशब्दस्य शौरेः ॥२४॥ कांत्यंभःपूरपूर्णे लसदसितवलीभंगभास्वत्तरंगे गंभीराकारनाभीचतुरतरमहावर्तशोभिन्युदारे । क्रीडत्वानद्धहेमोदरनलिनमहावाडवाग्निप्रभाढ्ये कामं दामोदरीयोदरसलिलनिधौ चित्तमत्स्यश्चिरं नः ॥२५॥ नाभीनालीकमूलादधिकपरिमलोन्मोहितानामलीनां माला नीलेव यान्ती स्फुरति रुचिमती वक्त्रपद्मोन्मुखी या । रम्या सा रोमराजिर्महितरुचिमती मध्यभागस्य विष्णोश्चित्तस्था मा विरंसीच्चिरतरमुचितां साधयन्ती श्रियं नः ॥२६॥ आदौ कल्पस्य यस्मात्प्रभवति विततं विश्वमेतद्विकल्पैः कल्पान्ते यस्य चान्तः प्रविशति सकलं स्थावरं जंगमं च । अत्यंताचिंत्यमूर्तेश्चिरतरमजितस्यांतरिक्षस्वरूपे तस्मिन्नस्माकमंतःकरणमतिमुदा क्रीडतात्क्रोडभागे ॥२७॥ संस्तीर्णं कौस्तुभांशुप्रसरकिसलयैर्मुग्धमुक्ताफलाढ्यं श्रीवत्सोल्लासि फुल्लप्रतिवनवनमालांशुराजद्भुजान्तम् । वक्षः श्रीवृक्षकान्तं मधुकरनिकरश्यामलं शार्ङ्गपाणेः संसाराध्वश्रमार्तैरुपवनमिव यत्सेवितं तत्प्रपद्ये ॥२८॥ कांतं वक्षो नितांतं विदधदिव गलं कालिमा कालशत्रोरिंदोर्बिंबं यथांको मधुप इव तरोर्मंजरीं राजते यः । श्रीमान्नित्यं विधेयादविरलमिलितः कौस्तुभश्रीप्रतानैः श्रीवत्सः श्रीपतेः स श्रिय इव दयितो वत्स उच्चैः श्रियं नः ॥२९॥ संभूयांभोधिमध्यात्सपदि सहजया यः श्रिया संनिधत्ते नीले नारायणोरःस्थलगगनतले हारतारोपसेव्ये । आशाः सर्वाः प्रकाशा विदधदपि दधच्चात्मभासान्यतेजांस्याश्चर्यस्याकरो नो द्युमणिरिव मणिः कौस्तुभः सोऽस्तु भूत्यै ॥३०॥ या वायावानुकूल्यात्सरति मणिरुचा भासमाना समाना साकं सा कंपमंसे वसति विदधती वासुभद्रं सुभद्रम् । सारं सारंगसंघैर्मुखरितकुसुमा मेचकान्ता च कान्ता माला मालालितास्मान्न विरमतु सुखैर्योजयन्ती जयन्ती ॥३१॥ हारस्योरुप्रभाभिः प्रति-

वनवनमालांशुभिः प्रांशुभिर्यच्छ्रीभिश्चाप्यंगदानां शबलितरुचिभिर्निष्कभाभिश्च भाति । बाहुल्येनैव बद्धांजलिपुटमजितस्याभियाचामहे तद्धं धार्तिं बाधतां नो बहुविहितकरीं बंधुरं बाहुमूलम् ॥३२॥ विश्वत्राणैकदीक्षास्तदनुगुणगणक्षत्रनिर्माणदक्षाः कर्तारो दुर्निरूपाः स्फुटगुरुयशसां कर्मणामद्भुतानाम् । शार्ङ्गं बाणं कृपाणं फलकमरिगदे पद्मशंखौ सहस्रं बिभ्राणाः शस्त्रजालं मम ददतु हरेर्बाहवो मोहहानिम् ॥३३॥ कंठाकल्पोद्गतेर्यः कनकमयलसत्कुंडलोस्रैरुदारैरुद्योतैः कौस्तुभस्याप्युरुभिरुपचितश्चित्रवर्णो विभाति । कंठाश्लेषे रमायाः करवलयपदैर्मुद्रिते भद्ररूपे वैकुंठीयेऽत्र कंठे वसतु मम मतिः कुंठभावं विहाय ॥३४॥ पद्मानंदप्रदाता परिलसदरुणश्रीपरीताग्रभागः काले काले च कम्बुप्रवरशशधरापूरणे यः प्रवीणः । वक्त्राकाशान्तरस्थस्तिरयति नितरां दंततारौघशोभां श्रीभर्तुर्दंतवासोद्युमणिरघतमोनाशनायास्त्वसौ नः ॥३५॥ नित्यं स्नेहातिरेकान्निजकमितुरलं विप्रयोगाक्षमाया वक्त्रेंदोरंतराले कृतवसतिरिवाभाति नक्षत्रराजिः । लक्ष्मीकांतस्य कांताकृतिरतिविलसन्मुग्धमुक्ताफलश्रीर्दंताली संततं सा नतिनुतिनिरतान्रक्षतादक्षता नः ॥३६॥ ब्रह्मन्ब्रह्मण्यजिह्मां मतिमपि कुरुषे देव संभावये त्वां शंभो शक्र त्रिलोकीमवसि किममरैर्नारदाद्याः सुखं वः । इत्थं सेवावनम्रं सुरमुनिनिकरं वीक्ष्य विष्णोः प्रसन्नस्यास्येंदोरास्रवन्ती वरवचनसुधा ह्लादयेन्मानसं नः ॥३७॥ कर्णस्थस्वर्णकम्रोज्ज्वलमकरमहाकुंडलप्रोतदीप्यन्माणिक्यश्रीप्रतानैः परिमिलितमलिश्यामलं कोमलं यत् । प्रोद्यत्सूर्यांशुराजन्मरकतमुकुराकारचोरं मुरारेर्गाढामागामिनीं नो गमयतु विपदं गंडयोर्मंडलं तत् ॥३८॥ वक्त्रांभोजे लसन्तं मुहुरधरमणिं पक्वबिंबाभिरामं दृष्ट्वा दष्टुं शुकस्य स्फुटमवतरतस्तुंडदंडायते नः । घोणः शोणीकृतात्मा श्रवणयुगलसत्कुंडलोस्रैर्मुरारेः प्राणाख्यस्यानिलस्य प्रसरणसरणिः प्राणदानाय नः स्यात् ॥३९॥ विक्कालौ वेदयन्तौ जगति मुहुरिमौ संचरन्तौ रवींदू

त्रैलोक्यालोकदीपावभिदधति ययोरेव रूपं मुनींद्राः । अस्मानब्जप्रभे ते प्रचुरतरकृपानिर्भरं प्रेक्षमाणे पातामाताम्रशुक्लासितरुचिरुचिरे पद्मनेत्रस्य नेत्रे ॥ ४० ॥ लक्ष्माकारालकालिस्फुरदलिकशशांकार्धसंदर्शमीलन्नेत्रांभोजप्रबोधोत्सुकनिभृततरालीनभृंगच्छदाभे । लक्ष्मीनाथस्य लक्षीकृतविबुधगणापांगबाणासनार्धच्छाये नो भूतिभूरिप्रसवकुलशते भ्रूलते पालयेताम् ॥ ४१ ॥ पातात्पातालपातात्पतगपतिगतेर्भ्रूयुगं भुग्नमध्यं येनेषच्चालितेन स्वपदनियमिताः सासुरा देवसंघाः । नृत्यल्लालाटरंगे रजनिकरतनोरर्धखंडावदाते कालव्यालद्वयं वा विलसति समया बालिका मातरं नः ॥ ४२ ॥ रूक्षस्मारेक्षुचापच्युतशरनिकरक्षीणलक्ष्मीकटाक्षप्रोत्फुल्लत्पद्ममालाविलसितमहितस्फाटिकेशानलिंगम् । भूयाद्भूयो विभूत्यै मम भुवनपतेर्भ्रूलताद्वंद्वमध्यादुत्थं तत्पुंड्रमूर्ध्वं जनिमरणतमःखंडनं मंडनं च ॥ ४३ ॥ पीठीभूतालकान्ते कृतमुकुटमहादेवलिंगप्रतिष्ठे ललाटे नाट्यरंगे विकटतरतटे कैटभारेश्चिराय । प्रोद्घाट्यैवात्मतंद्रीप्रकटपटकुटीं प्रस्फुरन्तीं स्फुटांगं पट्वीयं भावनाख्यां चटुलमतिनटी नाटिकां नाटयेन्नः ॥४४॥ मालालीवालिधाम्नः कुवलयकलिता श्रीपतेः कुंतलाली कालिन्द्यारुह्य मूर्ध्नो गलति हरशिरःस्वर्धुनीस्पर्धया नु । राहुर्वा याति वक्त्रं सकलशशिकलाभ्रान्तिलोलान्तरात्मा लोकैरालोच्यते या प्रदिशतु सकलैः साखिलं मंगलं नः ॥४५॥ सुप्ताकाराः प्रसुप्ते भगवति विबुधैरप्यदृष्टस्वरूपा व्याप्तव्योमांतरालास्तरलरुचिजलारंजिताः स्पष्टभासः । देहच्छायोद्गमाभा रिपुवपुरगुरुप्लोषरोषाग्निधूम्याः केशाः केशिद्विषो नो विदधतु विपुलक्लेशपाशप्रणाशम् ॥४६॥ यत्र प्रत्युप्तरत्नप्रवरपरिलसद्भूरिरोचिः प्रतानस्फूर्त्या मूर्तिर्मुरारेर्द्युमणिशतचितव्योमवद्दुर्निरीक्ष्या । कुर्वत्पारेपयोधि ज्वलदकृतमहाभास्वदौर्वाग्निशंकां शश्वन्नः शर्म दिश्यात्कलिकलुषतमःपाटनं तत्किरीटम् ॥४७॥ भ्रान्त्वा भ्रान्त्वा यदंतस्त्रिभुवनगुरुरप्यब्दकोटीरनेका गन्तुं नान्तं समर्थो भ्रमर इव पुनर्नाभिनालीकनालात् । उन्मज्जन्नूर्जितश्रीस्त्रिभुवनमपरं निर्ममे तत्सदृक्षं देहांभोभिः

स देयान्निरवधिरमृतं दैत्यविद्वेषिणो नः ॥४८॥ मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यः काकुत्स्थः कंसघाती मनसिजविजयी यश्च कल्की भविष्यन् । विष्णोरंशावतारा भुवनहितकरा धर्मसंस्थापनार्थाः पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशया ये ॥४९॥ यस्माद्वाचो निवृत्ताः सममपि मनसा लक्षणामीक्षमाणाः स्वार्थालाभात्परार्थव्यपगमकथनश्लाघिनो वेदवादाः । नित्यानंदं स्वसंविन्निरवधिममृतं स्वान्तसंक्रांतबिंबच्छायापत्त्यापि नित्यं सुखयति यमिनो यत्तदव्यान्महो नः ॥५०॥ आ पादादा च शीर्ष्णो वपुरिदमनघं वैष्णवं यः स चित्ते धत्ते नित्यं निरस्ताखिलकलिकलुषे संततांतःप्रमोदः । जुह्वज्जिह्वाकृशानौ हरिचरितहविःस्तोत्रमंत्रानुपाठैस्तत्पादांभोरुहाभ्यां सततमपि नमस्कुर्महे निर्मलाभ्याम् ॥ ५१ ॥

आनंदलहरी ।

भवानि स्तोतुं त्वां प्रभवति चतुर्भिर्न वदनैः प्रजानामीशानस्त्रिपुरमथनः पंचभिरपि । न षड्भिः सेनानीर्दशशतमुखैरप्यहिपतिस्तदान्येषां केषां कथय कथमस्मिन्नवसरः ॥१॥ घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदैर्विशिष्यानाख्येयो भवति रसनामात्रविषयः । तथा ते सौंदर्यं परमशिव दृङ्मात्रविषयः कथंकारं ब्रूमः सकलनिगमागोचरगुणे ॥२॥ मुखे ते तांबूलं नयनयुगुले कज्जलकला ललाटे काश्मीरं विलसति गले मौक्तिकलता स्फुरत्कांची शाटी पृथुकटितटे हाटकमयी भजामस्त्वां गौरीं नगपतिकिशोरीमविरतम् ॥३॥ विराजन्मंदारद्रुमकुसुमहारस्तनतटी नदद्वीणानादश्रवणविलसत्कुंडलगुणा । नतांगी मातंगीरुचिरगतिभंगी भगवती सती शंभोरंभोरुहचटुलचक्षुर्विजयते ॥४॥ नवीनार्कभ्राजन्मणिकनकभूषापरिकरैर्वृतांगी सारंगीरुचिरनयनांगीकृतशिवा । तडित्पीता पीताम्बरललितमंजीरसुभगा ममापर्णा पूर्णा निरवधिसुखैरस्तु सुमुखी ॥५॥ हिमाद्रेः संभूता सुललितकरैः पल्लवयुता सुपुष्पा मुक्ताभिर्भ्रमरकलिता चालकभरैः

कृतस्थाणुस्थाना कुचफलनता सूक्तिसरसा रुजां हंत्री गंत्री विलसति चिदानंदलतिका ॥६॥ सपर्णामाकीर्णां कतिपयगुणैः सादरमिह श्रयन्त्यन्ये वल्लीं मम तु मतिरेवं विलसति । अपर्णैका सेव्या जगति सकलैर्यत्परिवृतः पुराणोऽपि स्थाणुः फलति किल कैवल्यपदवीम् ॥७॥ विधात्री धर्माणां त्वमसि सकलाम्नायजननी त्वमर्थानां मूलं धनदनमनीयांघ्रिकमले। त्वमादिः कामानां जननि कृतकंदर्पविजये सतां भक्तेर्बीजं त्वमसि परमब्रह्ममहिषी ॥८॥ प्रभूता भक्तिस्ते यदपि न ममालोलमनसस्त्वया तु श्रीमत्या सदयमवलोक्योऽहमधुना । पयोदः पानीयं दिशति मधुरं चातकमुखे भृशं शंके कैर्वा विधिभिरनुनीता मम मतिः ॥९॥ कृपापांगालोकं वितर तरसा साधुचरिते न ते युक्तोपेक्षा मयि शरणदीक्षामुपगते । न चेदिष्टं दद्यादनुपदमहो कल्पलतिका विशेषः सामान्यैः कथमितरवल्लीपरिकरैः ॥१०॥ महान्तं विश्वासं तव चरणपंकेरुहयुगे निधायान्यन्नैवाश्रितमिह मया दैवतमुमे । तथापि त्वच्चेतो यदि मयि न जायेत सदयं निरालंबो लंबोदरजननि कं यामि शरणम् ॥११॥ अयः स्पर्शे लग्नं सपदि लभते हेमपदवीं यथा रथ्यापाथः शुचि भवति गंगौघमिलितम् । तथा तत्तत्पापैरतिमलिनमंतर्मम यदि त्वयि प्रेम्णा सक्तं कथमिव न जायेत विमलम् ॥१२॥ त्वदन्यस्मादिच्छाविषयफललाभेन नियमस्त्वमर्थानामिच्छाधिकमपि समर्था वितरणे । इति प्राहुः प्रांचः कमलभवनाद्यास्त्वयि मनस्त्वदासक्तं नक्तंदिवमुचितमीशानि कुरु तत् ॥१३॥ स्फुरन्नानारत्नस्फटिकमयभित्तिप्रतिफलत्त्वदाकारं चंचच्छशधरविलासौघशिखरम् । मुकुंदब्रह्मेंद्रप्रभृतिपरिवारं विजयते तवागारं रम्यं त्रिभुवनमहाराजगृहिणि ॥१४॥ निवासः कैलासे विधिशतमखाद्याः स्तुतिकराः कुटुंबं त्रैलोक्यं कृतकरपुटः सिद्धिनिकरः । महेशः प्राणेशस्तदवनिधराधीशतनये न ते सौभाग्यस्य क्वचिदपि मनागस्ति तुलना ॥१५॥ वृषो वृद्धो यानं विषमशनमाशा निवसनं श्मशानं क्रीडाभूर्भुजगनिवहो भूषणनिधिः । समग्रा सामग्री जगति विदितैव स्मर-

रिपोर्यद्देतरैश्वर्यं तव जननि सौभाग्यमहिमा ॥१६॥ अशेषब्रह्मांड प्रलयविधिनैसर्गिकमतिः श्मशानेष्वासीनः कृतभसितलेपः पशुपतिः । दधौ कंठे हालाहलमखिलभूगोलकृपया भवत्याः संगत्याः फलमिति च कल्याणि कलये ॥१७॥ त्वदीयं सौंदर्यं निरतिशयमालोक्य परया भियै-वासीद्गंगा जलमयतनुः शैलतनये । तदेतस्यास्तास्म्यद्वदनकमलं वीक्ष्य कृपया प्रतिष्ठामातेने निजशिरसि वासेन गिरिशः ॥१८॥ विशाल श्रीखंडद्रवमृगमदाकीर्णघुसृणप्रसूनव्यामिश्रं भगवति तवाभ्यंगसलिलम् । समादाय स्रष्टा चलितपदपांसून्निजकरैः समाधत्ते सृष्टिं विबुधपुरपंके-रुहदृशाम् ॥१९॥ वसंते सानंदे कुसुमितलताभिः परिवृते स्फुरन्नाना-पद्मे सरसि कलहंसालिसुभगे । सखीभिः खेलन्तीं मलयपवनांदोलित-जलैः स्मरेद्यस्त्वां तस्य ज्वरजनितपीडाऽपसरति ॥२०॥

त्रिपुरसुंदरीस्तोत्रम् ।

कदंबवनचारिणीं मुनिकदंबकादंबिनीं नितंबजितभूधरां सुरनितंबिनीसेविताम् । नवांबुरुहलोचनामभिनवांबुदश्यामलां त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥१॥ कदंबवनवासिनीं कनकवल्लकीधारिणीं महार्हमणिहारिणीं मुखसमुल्लसद्वारुणीम् । दयाविभवकारिणीं विशदलोचनीं चारिणीं त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥२॥ कदंबवनशालया कुचभरोल्लसन्मालया कुचोपमितशैलया गुरुकृपालसद्वेलया । मदारुणकपोलया मधुरगीतवाचालया कयापि घननीलया कवचिता वयं लीलया ॥३॥ कदंबवनमध्यगां कनकमंडलोपस्थितां षडंबुरुहवासिनीं सततसिद्धसौदामिनीम् । विडंबितजपारुचिं विकचचंद्रचूडामणिं त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥ ४ ॥ कुचांचितविपंचिकां कुटिलकुंतलालंकृतां कुशेशयनिवासिनीं कुटिलचित्तविद्वेषिणीम् । मदारुणविलोचनां मनसिजारिसंमोहिनीं मतंगमुनिकन्यकां मधुरभाषिणीमाश्रये ॥५॥ स्मरेत्प्रथमपुष्पिणीं रुधिरबिंदुनीलांबरां गृहीतमधुपात्रिकां मधु-

विघूर्णनेत्रांचलाम् । घनस्तनभरोन्नतां गलितचूलिकां श्यामलां त्रिलोचनकुटुंबिनीं त्रिपुरसुंदरीमाश्रये ॥६॥ सकुंकुमविलेपनामलकचुंबिकस्तूरिकां समंदहसितेक्षणां सशरचापपाशांकुशाम् । अशेषजनमोहिनीमरुणमाल्यभूषांबरां जपाकुसुमभासुरां जपविधौ स्मराम्यंबिकाम् ॥७॥ पुरंदरपुरंध्रिकाचिकुरबंधसैरंध्रिकां पितामहपतिव्रतां पटुपटीरचर्चारताम् । मुकुंदरमणीं मणीलसदलंक्रियाकारिणीं भजामि भुवनांबिकां सुरवधूटिकाचेटिकाम् ॥८॥

अन्नपूर्णास्तोत्रम् ।

नित्यानंदकरी वराभयकरी सौंदर्यरत्नाकरी निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी । प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥१॥ नानारत्नविचित्रभूषणकरी हेमांबराडंबरी मुक्ताहारविलंबमानविलसद्वक्षोजकुम्भांतरी । काश्मीरागुरुवासिता रुचिकारी काशीपुराधीश्वरी भिक्षां देहि० ॥२॥ योगानंदकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी चंद्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी । सर्वैश्वर्यसमस्तवांछितकरी काशीपुराधीश्वरी भिक्षां देहि० ॥३॥ कैलासाचलकंदरालयकरी गौरी उमा शंकरी कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी । मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी भिक्षां देहि० ॥४॥ दृश्यादृश्यप्रभूतवाहनकरी ब्रह्मांडभांडोदरी लीलानाटकसूत्रभेदनकरी विज्ञानदीपांकुरी । श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी भिक्षां देहि० ॥५॥ उर्वी सर्वजनेश्वरी भगवती मातान्नपूर्णेश्वरी वेणीनीलसमानकुंतलहरी नित्यान्नदानेश्वरी । सर्वानंदकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि० ॥६॥ आदिक्षान्तसमस्तवर्णनकरी शंभोस्त्रिभावाकरी काश्मीरा त्रिजलेश्वरी त्रिलहरी नित्यांकुरा शर्वरी कामाकांक्षकरी जनोदयकरी काशीपुराधीश्वरी भिक्षां देहि ॥७॥ देवि

सर्वविचित्ररत्नरचिता दाक्षायणी सुंदरी वामं स्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी । भक्ताभीष्टकरी दशाशुभकरी काशीपुराधीश्वरी भिक्षां देहि० ॥८॥ चंद्रार्कानलकोटिकोटिसदृशा चंद्रांशुबिंबाधरी चंद्रार्काग्निसमानकुंतलधरी चंद्रार्कवर्णेश्वरी । मालापुस्तकपाशसांकुशधरी काशीपुराधीश्वरी भिक्षां देहि ॥९॥ क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी । दक्षाक्रंदकरी निरामयकरी काशीपुराधीश्वरी भिक्षां देहि० ॥१०॥ अन्नपूर्णे सदापूर्णे शंकरप्राणवल्लभे । ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वती ॥११॥ माता च पार्वती देवी पिता देवो महेश्वरः । बांधवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम् ॥१२॥

अंबाष्टकम् ।

चेटीभवन्निखिलखेटीकदंबतरुवाटीषु नाकिपटलीकोटीरचारुतरकोटीमणीकिरणकोटीकरंबितपदा । पाटीरगंधकुचशाटी कवित्वपरिपाटीमगाधिपसुता घोटी कुलादधिकधाटीमुदारमुखवीटीरसेन तनुताम् ॥१॥ कूलातिगामिभयतूलावलिज्वलनकीला निजस्तुतिविधाकोलाहलक्षपितकालामरी कुशलकीलालपोषणनभाः । स्थूला कुचे जलदनीला कचे कलितलीला कदंबविपिने शूलायुधप्रणतिशीला विभातु हृदि शैलाधिराजतनया ॥२॥ यत्राशयो लगति तत्रागजा वसतु कुत्रापि निस्तुलशुका सुत्रामकालमुखसत्राशनप्रकरसुत्राणकारिचरणा । छत्रानिलातिरयपत्राभिरामगुणमित्रामरीसमवधूः कुत्रासहन्मणिविचित्राकृतिः स्फुरितपुत्रादिदाननिपुणा ॥३॥ द्वैपायनप्रभृतिशापायुधत्रिदिवसोपानधूलिचरणा पापापहस्वमनुजापानुलीनजनतापापनोदनिपुणा । नीपालया सुरभिधूपालका दुरितकूपादुदंचयतु मां रूपाधिका शिखरिभूपालवंशमणिदीपायिता भगवती ॥४॥ यालीभिरात्मतनुतालीसकृत्प्रियकपालीषु खेलति भयव्यालीनकुल्यसितचूलीभरा चरणधूलीलसन्मुनिवरा । बालीभृति श्रवसि तालीदलं वहति यालीकशो-

भितिलका सालीकरोतु मम काली मनः स्वपद्नालीकसेवनविधौ ॥५॥ न्यंकाकरे वपुषि कंकादिरक्तपुषि कंकादिपक्षिविषये त्वं कामनामयसि किं कारणं हृदयपंकारिमेहि गिरिजाम् । शंकाशिलानिशितटंकायमानपदसंकाशमानसुमनोझंकारिमानततिमंकानुपेतशशिसंकाशिवक्त्रकमलाम् ॥६॥ कुंबावतीसमविडंबा गलेन नवतुंबाभवीणसविधा शं बाहुलेयशशिबिंबाभिराममुखसंबाधितस्तनभरा। अंबा कुरंगमदजंबालरोचिरिह लंबालका दिशतु मे बिंबाधरा विनतशंबायुधादिनकुरंबा कदंबविपिने ॥७॥ इंधानकीरमणिबंधा भवे हृदयबंधावतीव रसिका संधावती भुवनसंधारणेऽप्यमृतसिंधावुदारनिलया । गंधानुभानमुहुरंधालिवीतकचबंधा समर्पयतु मे शंधाम भानुमपि संधानमाशु पदसंधानमप्यगसुता ॥ ८ ॥

कृष्णाष्टकम् ।

श्रियाश्लिष्टो विष्णुः स्थिरचरवपुर्वेदविषयो धियां साक्षी शुद्धो हरिरसुरहंताब्जनयनः । गदी शंखी चक्री विमलवनमाली स्थिररुचिः शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥१॥ यतः सर्वं जातं वियदनिलमुख्यं जगदिदं स्थितौ निःशेषं योऽवति निजसुखांशेन मधुहा। लये सर्वं स्वस्मिन् हरति कलया यस्तु स विभुः शरण्यो लोकेशो मम भवतु कृष्णोऽक्षिविषयः ॥२॥ असूनायम्यादौ यमनियममुख्यैः सुकरणैर्निरुध्येदं चित्तं हृदि विलयमानीय सकलम् । यमीड्यं पश्यन्ति प्रवरमतयो मायिनमसौ शरण्यो लोकेशो मम० ॥३॥ पृथिव्यां तिष्ठन्यो यमयति महीं वेद न धरा यमित्यादौ वेदो वदति जगतामीशममलम् । नियन्तारं ध्येयं मुनिसुरनृणां मोक्षदमसौ शरण्यो लोकेशो मम० ॥४॥ महेंद्रादिर्देवं जयति दितिजान्यस्य बलतो न कस्य स्वातंत्र्यं क्वचिदपि कृतौ यत्कृतिमृते । कवित्वादेर्गर्वं परिहरति योऽसौ विजयिनः शरण्यो लोकेशो मम ॥ ५ ॥ विना यस्य ध्यानं व्रजति पशुतां सूकरमुखां विना यस्

ज्ञानं जनिमृतिभयं याति जनता । विना यस्य स्मृत्या कृमिशत-जनिं याति स विभुः शरण्यो लोकेशो मम० ॥ ६ ॥ नरातंकोत्तंकः शरणशरणो भ्रांतिहरणो घनश्यामो वामो व्रजशिशुवयस्योऽर्जुनसखः । स्वयंभूर्भूतानां जनक उचिताचारसुखदः शरण्यो लोकेशो मम० ॥७॥ यदा धर्मग्लानिर्भवति जगतां क्षोभकरणी तदा लोकस्वामी प्रकटितवपुः सेतुधृगजः । सतां धाता स्वच्छो निगमगुणगीतो व्रजपतिः शरण्यो लोकेशो मम० ॥८॥ इति हरिरखिलात्माराधितः शंकरेण श्रुतिविशद-गुणोऽसौ मातृमोक्षार्थमाद्यः । यतिवरनिकटे श्रीयुक्त आविर्बभूव स्वगुणवृत उदारः शंखचक्राब्जहस्तः ॥ ९ ॥

श्रीगोविंदाष्टकम् ।

सत्यं ज्ञानमनंतं नित्यमनाकाशं परमाकाशं गोष्ठप्रांगणरिंगणलोलमनायासं परमायासम् । मायाकल्पितनानाकारमनाकारं भुवनाकारं क्ष्मामानाथमनाथं प्रणमत गोविंदं परमानंदम् ॥१॥ मृत्स्नामत्सीहेति यशोदाताडनशैशवसंत्रासं व्यादितवक्त्रालोकितलोकालोकचतुर्दशलोकालम् । लोकत्रयपुरमूलस्तंभं लोकालोकमनालोकं लोकेशं परमेशं प्रणमत गोविंदं परमानंदम् ॥२॥ त्रैविष्टपरिपुवीरघ्नं क्षितिभारघ्नं भवरोगघ्नं कैवल्यं नवनीताहारमनाहारं भुवनाहारम् । वैमल्यस्फुटचेतोवृत्तिविशेषाभासमनाभासं शैवं केवलशान्तं प्रणमत गोविंदं परमानंदम् ॥ ३ ॥ गोपालं भूलीलाविग्रहगोपालं कुलगोपालं गोपीखेलनगोवर्धनधृतिलीलालालितगोपालम् । गोभिर्निगदितगोविंदस्फुटनामानं बहुनामानं गोपीगोचरदूरं प्रणमत गोविंदं परमानंदम् ॥ ४ ॥ गोपीमंडलगोष्ठीभेदं भेदावस्थमभेदाभं शश्वद्गोखुरनिर्धूतोत्कृतधूलीधूसरसौभाग्यम् । श्रद्धाभक्तिगृहीतानंदमचिंत्यं चिंतितसद्भावं चिंतामणिमहिमानं प्रणमत गोविंदं परमानंदम् ॥५॥ स्नानव्याकुलयोषिद्वस्त्रमुपादायागमुपारूढं व्यादित्संतीरथ दिग्वस्त्रा ह्युपदातुमुपाकर्षन्तम् । निर्धूतद्वयशोकविमोहं बुद्धं बुद्धे-

र्प्यंतस्थं सत्तामात्रशरीरं प्रणमत गोविंदं परमानंदम् ॥६॥ कांतं कारणकारणमादिमनादिं कालमनाभानं कालिंदीगतकालियशिरसि मुहुर्नृत्यन्तं सुनृत्यन्तम् । कालं कालकलातीतं कलिताशेषं कलिदोषघ्नं कालत्रयगतिहेतुं प्रणमत गोविंदं परमानंदम् ॥७॥ वृंदावनभुवि वृंदारकगणवृंदाराधित वन्देऽहं कुंदाभामलमंदस्मेरसुधानंद सुहृदानंदम् । वंद्याशेषमहामुनिमानसवंद्यानंदपदद्वंद्वं वंद्याशेषगुणाब्धि प्रणमत गोविंदं परमानंदम् ॥८॥ गोविंदाष्टकमेतदधीते गोविंदार्पितचेता यो गोविंदाच्युत माधव विष्णो गोकुलनायक कृष्णेति । गोविंदांघ्रिसरोजध्यानसुधाजलधौतसमस्ताघो गोविंदं परमानंदामृतमंतस्थं स समभ्येति ॥ ९ ॥

कृष्णाष्टकम् ।

भजे व्रजैकमंडनं समस्तपापखंडनं स्वभक्तचित्तरंजनं सदैव नंदनंदनम् । सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकं अनंगरंगसागरं नमामि कृष्णनागरम् ॥१॥ मनोजगर्वमोचनं विशाललोललोचनं विधूतगोपशोचनं नमामि पद्मलोचनम् । करारविंदभूधरं स्मितावलोकसुंदरं महेंद्रमानदारणं नमामि कृष्णवारणम् ॥२॥ कदंबसूनकुंडलं सुचारुगंडमंडलं व्रजांगनैकवल्लभं नमामि कृष्णदुर्लभम् । यशोदया समोदया सगोपया सनंदया युतं सुखैकदायकं नमामि गोपनायकम् ॥३॥ सदैव पादपंकजं मदीयमानसे निजं दधानमुत्तमालकं नमामि नंदबालकम् । समस्तदोषशोषणं समस्तलोकपोषणं समस्तगोपमानसं नमामि कृष्णलालसम् ॥४॥ भुवो भरावतारकं भवाब्धिकर्णधारकं यशोमतीकिशोरकं नमामि दुग्धचोरकम् । दृगन्तकान्तभंगिनं सदासदालसंगिनं दिने दिने नवं नवं नमामि नंदसंभवम् ॥५॥ गुणाकरं सुखाकरं कृपाकरं कृपापरं सुरद्विषन्निकंदनं नमामि गोपनंदनम् । नवीनगोपनागरं नवीनकेलिलंपटं नमामि मेघसुंदरं तडित्प्रभालसत्पटम् ॥६॥ समस्तगोपनंदनं हृदंबुजैकमोहनं नमामि कुंजमध्यगं

प्रसन्नभानुशोभनम् । निकामकामदायकं दृगन्तचारुसायकं रसालवेणुगायकं नमामि कुंजनायकम् ॥७॥ विदग्धगोपिकामनोमनोज्ञतल्पशायिनं नमामि कुंजकानने प्रवृद्धवह्निपायिनम् । यदा तदा यथा तथा तथैव कृष्णसत्कथा मया सदैव गीयतां तथा कृपा विधीयताम् । प्रमाणिकाष्टकद्वयं जपत्यधीत्य यः पुमान्भवेत्स नंदनंदने भवे भवे सुभक्तिमान् ॥८॥

पांडुरंगाष्टकम् ।

महायोगपीठे तटे भीमरथ्या वरं पुंडरीकाय दातुं मुनींद्रैः । समागत्य तिष्ठन्तमानंदकंदं परब्रह्मलिंगं भजे पांडुरंगम् ॥१॥ तडिद्वाससं नीलमेघावभासं रमामंदिरं सुंदरं चित्प्रकाशम् । वरं त्विष्टिकायां समन्यस्तपादं पर० ॥२॥ प्रमाणं भवाब्धेरिदं मामकानां नितंबः कराभ्यां धृतो येन तस्मात् । विधातुर्वसत्यै धृतोनाभिकोशः पर० ॥३॥ स्फुरत्कौस्तुभालंकृतं कंठदेशे श्रिया जुष्टकेयूरकं श्रीनिवासम् । शिवं शान्तमीड्यं वरं लोकपालं पर० ॥४॥ शरच्चंद्रबिंबाननं चारुहासं लसत्कुंडलाक्रान्तगंडस्थलांगम् । जपारागबिंबाधरं कंजनेत्रं पर० ॥५॥ किरीटोज्ज्वलत्सर्वदिक्प्रान्तभागं सुरैरर्चितं दिव्यरत्नैरनर्घ्यैः । त्रिभंगाकृतिं बर्हमाल्यावतंसं पर० ॥ ॥ विभुं वेणुनादं चरन्तं दुरन्तं स्वयं लीलया गोपवेषं दधानम् । गवां बृंदकानन्ददं चारुहासं पर० ॥७॥ अजं रुक्मिणीप्राणसंजीवनं तं परं धाम कैवल्यमेकं तुरीयम् । प्रसन्नं प्रपन्नार्तिहं देवदेवं परब्रह्मलिंगं भजे पांडुरंगम् ॥८॥ स्तवं पांडुरंगस्य वै पुण्यदं ये पठन्त्येकचित्तेन भक्त्या च नित्यम् । भवांभोनिधिं तेऽपि तीर्त्वाऽन्तकाले हरेरालयं शाश्वतं प्राप्नुवन्ति॥९॥

गंगाष्टकम् ।

भगवति भवलीलामौलिमाले तवाम्भःकणमणुपरिमाणं प्राणिनो ये स्पृशन्ति । अमरनगरनारीचामरग्राहिणीनां विगतकलिकलङ्कातङ्कमङ्के

लुठन्ति ॥ १ ॥ ब्रह्मांडं खण्डयन्ती हरशिरसि जटावल्लिमुल्लासयन्ती स्वर्लोकादापतन्ती कनकगिरिगुहागंडशैलात्स्खलन्ती । क्षोणीपृष्ठे लुठन्ती दुरितचयचमूर्निर्भरं भर्त्सयन्ती पाथोधिं पूरयन्ती सुरनगरसरित्पावनी नः पुनातु ॥२॥ मज्जन्मातंगकुंभच्युतमदमदिरामोदमत्तालिजालं स्नानैः सिद्धांगनानां कुचयुगविगलत्कुंकुमासंगपिंगम् । सायं प्रातर्मुनीनां कुशकुसुमचयैश्छिन्नतीरस्थनीरं पायान्नो गांगमंभः करिकरमकराक्रान्तरंहस्तरंगम् ॥३॥ आदावादिपितामहस्य नियमव्यापारमात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥४॥ शैलेंद्रादवतारिणी निजजले मज्जज्जनोत्तारिणी पारावारविहारिणी भवभयश्रेणीसमुत्सारिणी । शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी काशीप्रांतविहारिणी विजयते गंगा मनोहारिणी ॥५॥ कुतो वीचिर्वीचिस्तव यदि गता लोचनपथं त्वमापीता पीतांबरपुरनिवासं वितरसि । त्वदुत्संगे गंगे पतति यदि कायस्तनुभृतां तदा मातः शातक्रतवपदलाभोऽप्यतिलघुः ॥६॥ गंगे त्रैलोक्यसारे सकलसुरवधूधौतविस्तीर्णतोये पूर्णब्रह्मस्वरूपे हरिचरणरजोहारिणि स्वर्गमार्गे । प्रायश्चित्तं यदि स्यात्तव जलकणिका ब्रह्महत्यादिपापे कस्त्वां स्तोतुं समर्थस्त्रिजगदघहरे देवि गंगे प्रसीद ॥७॥ मातर्जाह्नवि शंभुसंगवलिते मौलौ निधायांजलिं त्वत्तीरे वपुषोऽवसानसमये नारायणांघ्रिद्वयम् । सानन्दं स्मरतो भविष्यति मम प्राणप्रयाणोत्सवे भूयाद्भक्तिरविच्युता हरिहाराद्वैतात्मिका शाश्वती ॥ ८ ॥ गंगाष्टकमिदं पुण्यं यः पठेत्प्रयतो नरः । सर्वपापविनिर्मुक्तो विष्णुलोकं स गच्छति ॥९॥

यमुनाष्टकम् ।

कृपापारावारां तपनतनयां तापशमनीं मुरारिप्रेयस्यां भवभयदवां भक्तिवरदाम् । वियज्ज्वालान्मुक्तां श्रियमपि सुखाप्तेः परिदिनं सदा धीरो

नूनं भजति यमुनां नित्यफलदाम् ॥१॥ भुवनचारिणि भास्करवाहिनि जाह्नविसंगिनि सिंधुसुते मधुरिपुभूषिणि माधवतोषिणि गोकुलभीति विनाशकृते । जगदघमोचनि मानसदायिनि केशवकेलिनिदानगते जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥२॥ अयि मधुरे मधुमोदविलासिनि शैलविहारिणि वेगभरे परिजनपालिनि दुष्टनिषूदिनि वांछितकामविलासधरे । व्रजपुरवासिजनार्जितपातकहारिणि विश्वजनोद्धरिके जय यमुने० ॥३॥ अतिविपदबुधिमग्नजनं भवतापशताकुलमानसकं गतिमतिहीनमशेषभयाकुलमागतपादसरोजयुगम् । ऋणभयभीतिमनिष्कृतिपातककोटिशतायुतपुंजतरं जय यमुने० ॥४॥ नवजलदद्युतिकोटिलसत्तनुहेममयाभररंजितके तडिदवहेलिपदांचलचंचलशोभितपीतसुचैलधरे । मणिमयभूषणचित्रपटासनरंजितगंजितभानुकरे जय यमुने० ॥५॥ शुभपुलिने मधुमत्तयदूद्भवरासमहोत्सवकेलिभरे उच्चकुलाचलराजितमौक्तिकहारमयाभररोदसिके । नवमणिकोटिकभास्करकंचुकिशोभिततारकहारयुते जय यमुने० ॥६॥ करिवरमौक्तिकनासिकभूषणवातचमत्कृतचंचलके मुखकमलामलसौरभचंचलमत्तमधुव्रतलोचनिके । मणिगणकुंडललोलपरिस्फुरदाकुलगंडयुगामलके जय यमुने० ॥७॥ कलरवनूपुरहेममयांचितपादसरोरुहसारुणिके धिमिधिमिधिमिधिमिधिमितालविनोदितमानसमंजुलपादगते । तव पदपंकजमाश्रितमानवचित्तसदाखिलतापहरे जय यमुने० ॥८॥

नर्मदाष्टकम्

सबिंदुसिंधुसुस्खलत्तरंगभंगरंजितं द्विषत्सु पापजातजातकारिवारिसंयुतम् । कृतांतदूतकालभूतभीतिहारिवर्मदे त्वदीयपादपंकजं नमामि देवि नर्मदे ॥१॥ त्वदंबुलीनदीनमीनदिव्यसंप्रदायकं कलौ मलौघभारहारि सर्वतीर्थनायकम् । सुमत्स्यकच्छनक्रचक्रचक्रवाकशर्मदे त्वदीय-

पाद० ॥२॥ महागभीरनीरपूरपापधूतभूतलं ध्वनत्समस्तपातकारिदारिताप्रदाचलम् । जगल्लये महाभये मृकंडुसूनुहर्म्यदे त्वदीयपाद० ॥३॥ गतं तदैव मे भयं त्वदंबु वीक्षितं यदा मृकंडुसूनुशौनकासुरारिसेवि सर्वदा । पुनर्भवाब्धिजन्मजं भवाब्धिदुःखवर्मदे त्वदीयपाद० ॥४॥ अलक्षलक्षकिन्नरामरासुरादिपूजितं सुलक्षनीरतीरधीरपक्षिलक्षकूजितम् । वसिष्ठशिष्टपिप्पलादिकर्दमादिशर्मदे त्वदीयपाद० ॥५॥ सनत्कुमारनाचिकेतकश्यपात्रिषट्पदैर्धृतं स्वकीयमानसेषु नारदादिषट्पदैः । रवींदुरंतिदेवदेवराजकर्मशर्मदे त्वदीयपाद० ॥६॥ अलक्षलक्षलक्षपापलक्षसारसायुधं ततस्तु जीवजंतुतंतुभुक्तिमुक्तिदायकम् । विरिंचिविष्णुशंकरस्वकीयधामवर्मदे त्वदीयपाद० ॥७॥ अहो मृतं स्वनं श्रुतं महेशकेशजातटे किरातसूतवाडवेषु पंडिते शठे नटे । दुरंतपापतापहारिसर्वजंतुशर्मदे त्वदीयपाद० ॥८॥ इदं तु नर्मदाष्टकं त्रिकालमेव ये सदा पठन्ति ते निरंतरं न यान्ति दुर्गतिं कदा । सुलभ्यदेहदुर्लभं महेशधामगौरवं पुनर्भवा नरा न वै विलोकयन्ति रौरवम् ॥९॥

श्रीमणिकर्णिकाष्टकम् ।

त्वत्तीरे मणिकर्णिके हरिहरौ सायुज्यमुक्तिप्रदौ वादं तौ कुरुतः परस्परमुभौ जन्तोः प्रयाणोत्सवे । मद्रूपो मनुजोऽयमस्तु हरिणा प्रोक्तः शिवस्तत्क्षणात्तन्मध्याद्भृगुलांछनो गरुडगः पीतांबरो निर्गतः ॥१॥ इंद्राद्यास्त्रिदशाः पतन्ति नियतं भोगक्षये ते पुनर्जायन्ते मनुजास्ततोऽपि पशवः कीटाः पतंगादयः । ये मातर्मणिकर्णिके तव जले मज्जन्ति निष्कल्मषाः सायुज्येऽपि किरीटकौस्तुभधरा नारायणाः स्युर्नराः ॥२॥ काशी धन्यतमा विमुक्तिनगरी सालंकृता गंगया तत्रेयं मणिकर्णिका सुखकरी मुक्तिर्हि तत्किंकरी । स्वर्लोकस्तुलितः सहैव विबुधैः काश्या समं ब्रह्मणा काशी क्षोणितले स्थिता गुरुतरा स्वर्गो लघुः खे गतः ॥३॥ गंगाती-

रमनुत्तमं हि सकलं तत्रापि काश्युत्तमा तस्यां सा मणिकर्णिकोत्तमतमा यत्रेश्वरो मुक्तिदः । देवानामपि दुर्लभं स्थलमिदं पापौघनाशक्षमं पूर्वोपार्जितपुण्यपुंजगमकं पुण्यैर्जनैः प्राप्यते ॥४॥ दुःखांभोनिधिमग्नजंतुनिवहास्तेषां कथं निष्कृतिर्ज्ञात्वैतद्धि विरंचिना विरचिता वाराणसी शर्मदा। लोकाः स्वर्गमुखास्ततोऽपि लघवो भोगांतपातप्रदाः काशी मुक्तिपुरी सदा शिवकरी धर्मार्थकामोत्तरा ॥५॥ एको वेणुधरो धराधरधरः श्रीवत्सभूषाधरो योऽप्येकः किल शंकरो विषधरो गंगाधरो माधरः । ये मातर्मणिकर्णिके तव जले मज्जन्ति ते मानवा रुद्रा वा हरयो भवन्ति बहवस्तेषां बहुत्वं कथम् ॥६॥ त्वत्तीरे मरणं तु मंगलकरं देवैरपि श्लाघ्यते शक्रस्तं मनुजं सहस्रनयनैर्द्रष्टुं सदा तत्परः । आयान्तं सविता सहस्रकिरणैः प्रत्युद्गतोऽभूत्सदा पुण्योऽसौ वृषगोऽथवा गरुडगः किं मंदिरं यास्यति ॥७॥ मध्याह्ने मणिकर्णिकास्नपनजं पुण्यं न वक्तुं क्षमः स्वीयैरब्दशतैश्चतुर्मुखसुरो वेदार्थदीक्षागुरुः । योगाभ्यासबलेन चंद्रशिखरस्तत्पुण्यपारं गतस्त्वत्तीरे प्रकरोति सुप्तपुरुषं नारायणं वा शिवम् ॥८॥ कृच्छ्रैः कोटिशतैः स्वपापनिधनं यच्चाश्वमेधैः फलं तत्सर्वं मणिकर्णिकास्नपनजे पुण्ये प्रविष्टं भवेत् । स्नात्वा स्तोत्रमिदं नरः पठति चेत्संसारपाथोनिधिं तीर्त्वा पल्वलवत्प्रयाति सदनं तेजोमयं ब्रह्मणः ॥९॥

दक्षिणामूर्तिस्तोत्रम् ।

उपासकानां यदुपासनीयमुपात्तवासं वाटशाखिमूले । तद्धाम दाक्षिण्यजुषा स्वमूर्त्या जागर्तु चित्ते मम बोधरूपम् ॥१॥ अद्राक्षमक्षीणदयानिधानमाचार्यमाद्यं वटमूलभागे । मौनेन मंदस्मितभूषितेन महर्षिलोकस्य तमो नुदन्तम् ॥२। विद्राविताशेषतमोगणेन मुद्राविशेषेण मुहुर्मुनीनाम्। निरस्य मायां दयया विधत्ते देवो महांस्तत्त्वमसीति बोधम् ॥३॥ अपारकारुण्यसुधातरंगैरपांगपातैरवलोकयन्तम् । कठोरसंसारनिदाघतप्ता-

न्मुनीनहं नौमि गुरुं गुरूणाम् ॥४॥ ममाद्यदेवो वटमूलवासी कृपाविशेषात्कृतसंनिधानः । ओंकाररूपामुपदिश्य विद्यामाविद्यकध्वान्तमपाकरोतु ॥५॥ कलाभिरिंदोरिव कल्पितांगं मुक्ताकलापैरिव बद्धमूर्तिम् । आलोकये देशिकमप्रमेयमनाद्यविद्यातिमिरप्रभातम् ॥६॥ स्वदक्षजानुस्थितवामपादं पादोदरालंकृतयोगपट्टम् । अपस्मृतेराहितपादमंगं प्रणौमि देवं प्रणिधानवन्तम् ॥७॥ तत्त्वार्थमंतेवसतामृषीणां युवापि यः सन्नुपदेष्टुमीष्टे । प्रणौमि तं प्राक्तनपुण्यजालैराचार्यमाश्चर्यगुणाधिवासम् ॥८॥ एकेन मुद्रां परशुं करेण करेण चान्येन मृगं दधानः । स्वजानुविन्यस्तकरः पुरस्तादाचार्यचूडामणिराविरस्तु ॥९॥ आलेपवन्तं मदनांगभूत्या शार्दूलकृत्त्या परिधानवन्तम् । आलोकये कंचन देशिकेन्द्रमज्ञानवाराकरवाडवाग्निम् ॥१०॥ चारुस्थितं सोमकलावतंसं वीणाधरं व्यक्तजटाकलापम् । उपासते केचन योगिनस्त्वामुपात्तनादानुभवप्रमोदम् ॥११॥ उपासते यं मुनयः शुकाद्या निराशिषो निर्ममताधिवासाः । तं दक्षिणामूर्तितनुं महेशमुपास्महे मोहमहार्तिशान्त्यै ॥१२॥ कान्त्या निन्दितकुंदकंदलवपुर्न्यग्रोधमूले वसन्कारुण्यामृतवारिभिर्मुनिजनं संभावयन्वीक्षितैः । मोहध्वान्तविभेदनं विरचयन्बोधेन तत्तादृशा देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिना ॥१३॥ अगौरनेत्रैरललाटनेत्रैरशान्तवेषैरभुंजगभूषैः । अबोधमुद्रैरनपास्तनिद्रैरपूरकामैरमरैरलं नः ॥१४॥ दैवतानि कति सन्ति चावनौ नैव तानि मनसो मतानि मे । दीक्षितं जडधियामनुग्रहे दक्षिणाभिमुखमेव दैवतम् ॥१५॥ मुदिताय मुग्धशशिनावतंसिने भसितावलेपरमणीयमूर्तये । जगदिंद्रजालरचनापटीयसे महसे नमोऽस्तु वटमूलवासिने ॥१६॥ व्यालम्बिनीभिः परितो जटाभिः कलावशेषेण कलाधरेण । पश्यल्ललाटेन मुखेन्दुना च प्रकाशसे चेतसि निर्मलानाम् ॥१७॥ उपासकानां त्वमुमासहायः पूर्णेन्दुभावं प्रकटीकरोषि । यदद्य ते दर्शनमात्रतो मे द्रवत्यहो मानसचंद्रकांतः ॥१८॥ यस्ते प्रस-

न्नामनुसंदधानो मूर्तिं मुदा मुग्धशशांकमौलेः । ऐश्वर्यमायुर्लभते च विद्यामन्ते च वेदान्तमहारहस्यम् ॥१५॥

द्वादशज्योतिर्लिंगस्तोत्रम् ।

सौराष्ट्रदेशे विशदेऽतिरम्ये ज्योतिर्मयं चंद्रकलावतंसम् । भक्तिप्रदानाय कृपावतीर्णं तं सोमनाथं शरणं प्रपद्ये ॥१॥ श्रीशैलसंगे विबुधातिसंगे तुलाद्रितुंगेऽपि मुदा वसन्तम् । तमर्जुनं मल्लिकपूर्वमेकं नमामि संसारसमुद्रसेतुम् ॥२॥ अवंतिकायां विहितावतारं मुक्तिप्रदानाय च सज्जनानाम् । अकालमृत्योः परिरक्षणार्थं वन्दे महाकालमहासुरेशम्॥३॥ कावेरिकानर्मदयोः पवित्रे समागमे सज्जनतारणाय । सदैव मान्धातृपुरे वसन्तमोंकारमीशं शिवमेकमीडे ॥४॥ पूर्वोत्तरे प्रज्वलिकानिधाने सदा वसन्तं गिरिजासमेतम् । सुरासुराराधितपादपद्मं श्रीवैजनाथं तमहं नमामि ॥५॥ याम्ये सदंगे नगरेऽतिरम्ये विभूषितांगं विविधैश्च भोगैः । सद्भक्तिमुक्तिप्रदमीशमेकं श्रीनागनाथं शरणं प्रपद्ये ॥६॥ महाऽद्रिपार्श्वे च तटे रमन्तं संपूज्यमानं सततं मुनीन्द्रैः । सुरासुरैर्यक्षमहोरगाद्यैः केदारमीशं शिवमेकमीडे ॥७॥ सह्याद्रिशीर्षे विमले वसन्तं गोदावरीतीरपवित्रदेशे । यद्दर्शनात्पातकमाशु नाशं प्रयाति तं त्र्यंबकमीशमीडे ॥८॥ सुताम्रपर्णीजलराशियोगे निबध्य सेतुं विशिखैरसंख्यैः । श्रीरामचंद्रेण समर्पितं तं रामेश्वराख्यं नियतं नमामि ॥ ९ ॥ यं डाकिनीशाकिनिकासमाजे निषेव्यमाणं पिशिताशनैश्च । सदैव भीमादिपदप्रसिद्धं तं शंकरं भक्तहितं नमामि ॥ १० ॥ सानंदमानंदवने वसन्तमानंदकंदं हतपापवृन्दम् । वाराणसीनाथमनाथनाथं श्रीविश्वनाथं शरणं प्रपद्ये ॥ ११ ॥ इलापुरे रम्यविशालकेऽस्मिन्समुल्लसन्तं च जगद्वरेण्यम् । वन्दे महोदारतरस्वभावं घृष्णेश्वराख्यं शरणं प्रपद्ये ॥ १२ ॥ ज्योतिर्मयद्वादशलिंगकानां

शिवात्मनां प्रोक्तमिदं क्रमेण । स्तोत्रं पठित्वा मनुजोऽतिभक्त्या फलं तदालोक्य निजं भजेच्च ॥ १३ ॥

ललितापंचकम् ।

प्रातः स्मरामि ललितावदनारविंदं बिंबाधरं पृथुलमौक्तिकशोभिनासम् । आकर्णदीर्घनयनं मणिकुंडलाढ्यं मंदस्मितं मृगमदोज्ज्वलफालदेशम् ॥१॥ प्रातर्भजामि ललिताभुजकल्पवल्लीं रक्तांगुलीयलसदंगुलिपल्लवाढ्याम् । माणिक्यहेमवलयांगदशोभमानां पुण्ड्रेक्षुचापकुसुमेषुसृणीर्दधानाम् ॥२॥ प्रातर्नमामि ललिताचरणारविंदं भक्तेष्टदाननिरतं भवसिंधुपोतम् । पद्मासनादिसुरनायकपूजनीयं पद्मांकुशध्वजसुदर्शनलांछनाढ्यम् ॥३॥ प्रातः स्तुवे परशिवां ललितां भवानीं त्रय्यंतवेद्यविभवां करुणानवद्याम् । विश्वस्य सृष्टिविलयस्थितिहेतुभूतां विद्येश्वरीं निगमवाङ्मनसातिदूराम् ॥४॥ प्रातर्वदामि ललिते तव पुण्यनाम कामेश्वरीति कमलेति महेश्वरीति । श्रीशांभवीति जगतां जननी परेति वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥५॥ यः श्लोकपंचकमिदं ललितांबिकायाः सौभाग्यदं सुललितं पठति प्रभाते । तस्मै ददाति ललिता झटिति प्रसन्ना विद्यां श्रियं विमलसौख्यमनंतकीर्तिम् ॥ ६ ॥

भ्रमरांबाष्टकम् ।

चांचल्यारुणलोचनाञ्चितकृपाचंद्रार्कचूडामणिं चारुस्मेरमुखां चराचरजगत्संरक्षणीं तत्पदाम् । चंचच्चंपकनासिकाग्रविलसन्मुक्तामणीरंजितां श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥१॥ कस्तूरीतिलकांचितेंदुविलसत्प्रोद्भासिफालस्थलीं कर्पूरद्रवमिश्रचूर्णखदिरामोदोल्लसद्वीटिकाम् । लोलापांगतरंगितैरधिकृपासारैर्नतानंदिनीं श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥२॥ राजन्मत्तमरालमंदगमनां राजीवपत्रेक्षणां

राजीवप्रभवादिदेवमुकुटै राजत्पदांभोरुहाम् । राजीवायतमंदमंडितकुचां राजाधिराजेश्वरीं श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ३ ॥ षट्तारां गणदीपिकां शिवसतीं षड्वैरिवर्गापहां षट्चक्रान्तरसंस्थितां वरसुधां षड्योगिनीवेष्टिताम् । षट्चक्रांचितपादुकांचितपदां षड्भावगां षोडशीं श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥४॥ श्रीनाथादृतपालितत्रिभुवनां श्रीचक्रसंचारिणीं ज्ञानासक्तमनोजयौवनलसद्गंधर्वकन्यादृताम् । दीनानामतिवेलभाग्यजननीं दिव्यांबरालंकृतां श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥५॥ लावण्याधिकभूषितांगतिलकां लाक्षालसद्रागिणीं सेवायातसमस्तदेववनितां सीमन्तभूषान्विताम् । भावोल्लासवशीकृतप्रियतमां भंडासुरच्छेदिनीं श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥६॥ धन्यां सोमविभावनीयचरितां धाराधरश्यामलां मुन्याराधनमेधिनीं सुमवतां मुक्तिप्रदानव्रताम् । कन्यापूजनसुप्रसन्नहृदयां कांचीलसन्मध्यमां श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥७॥ कर्पूरागरुकुंकुमांकितकुचां कर्पूरवर्णस्थितां कृष्टोत्कृष्टसुकृष्टकर्मदहनां कामेश्वरीं कामिनीम् । कामाक्षीं करुणारसार्द्रहृदयां कल्पान्तरस्थायिनीं श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥८॥ गायत्रीं गरुडध्वजां गगनगां गन्धर्वगानप्रियां गंभीरां गजगामिनीं गिरिसुतां गंधाक्षतालंकृताम् । गंगागौतमगर्गसंनुतपदां गां गौतमीं गोमतीं श्रीशैलस्थलवासिनीं भगवतीं श्रीमातरं भावये ॥ ९ ॥

अनात्मश्रीविगर्हणम् ।

लब्धा विद्या राजमान्या ततः किं प्राप्ता संपत्प्राभवाढ्या ततः किम् ।
भुक्ता नारी सुंदरांगी ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१॥
केयूराद्यैर्भूषितो वा ततः किं कौशेयाद्यैरावृतो वा ततः किम् ।
तृप्तो मृष्टान्नादिना वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥२॥
दृष्टा नाना चारुदेशास्ततः किं पुष्टाश्चेष्टा बंधुवर्गास्ततः किम् ।
नष्टं दारिद्र्यादिदुःखं ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥ ३ ॥
स्नातं तीर्थे जह्नुजादौ ततः किं दानं दत्तं द्व्यष्टसंख्यं ततः किम् ।
जप्ता मंत्राः कोटिशो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥४॥
गोत्रं सम्यग्भूषितं वा ततः किं गात्रं भस्माच्छादितं वा ततः किम् ।
रुद्राक्षादिः सुधृतो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥५॥
अन्नैर्विप्रास्तर्पिता वा ततः किं यज्ञैर्देवास्तोषिता वा ततः किम् ।
कीर्त्या व्याप्ताः सर्वलोकास्ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥६॥
कायः क्लिष्टश्चोपवासैस्ततः किं लब्धाः पुत्राः स्वीयपत्न्यास्ततः किम् ।
प्राणायामः साधितो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥७॥
युद्धे शत्रुर्निर्जितो वा ततः किं भूयो मित्रैः पूरितो वा ततः किम् ।
योगैः प्राप्ताः सिद्धयो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥८॥
अब्धिः पद्भ्यां लंघितो वा ततः किं वायुः कुंभे स्थापितो वा ततः किम् ।
मेरुः पाणावुद्धृतो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥९॥
क्ष्वेलः पीतो दुग्धवद्वा ततः किं वह्निर्जग्धो लाजवद्वा ततः किम् ।
प्राप्तश्चारः पक्षिवत्खे ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१०॥
बद्धाः सम्यक्पावकाद्यास्ततः किं साक्षाद्विद्धा लोहवर्यास्ततः किम् ।
लब्धो निक्षेपोऽञ्जनाद्यैस्ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥११॥
भूपेंद्रत्वं प्राप्तमुर्व्यां ततः किं देवेंद्रत्वं संभृतं वा ततः किम् ।

मुंडीद्रव्यं चोपलब्धं ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१२॥
मंत्रैः सर्वं स्तंभितो वा ततः किं बाणैर्लक्ष्यो भेदितो वा ततः किम् ।
कालज्ञानं चापि लब्धं ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१३॥
कामातंकः खंडितो वा ततः किं कोपावेशः कुंठितो वा ततः किम् ।
लोभाश्लेषो वर्जितो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१४॥
मोहध्वांतः पेषितो वा ततः किं जातो भूमौ निर्मदो वा ततः किम् ।
मात्सर्यार्तिर्मीलिता वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१५॥
धातुर्लोकः साधितो वा ततः किं विष्णोर्लोको वीक्षितो वा ततः किम् ।
शंभोर्लोकः शासितो वा ततः किं येन स्वात्मा नैव साक्षात्कृतोऽभूत् ॥१६॥

यस्येदं हृदये सम्यगनात्मश्रीविगर्हणम् ।
सदोदेति स एवात्मसाक्षात्कारस्य भाजनम् ॥ १७ ॥
अन्ये तु मायिकजगद्भ्रांतिव्यामोहमोहिताः ।
न तेषां जायते क्वापि स्वात्मसाक्षात्कृतिर्भुवि ॥ १८ ॥

आत्मानात्मविवेकः ।

दृश्यं सर्वमनात्मा स्याद्दृगेवात्मा विवेकिनः ।
आत्मानात्मविवेकोऽयं कथितो ग्रंथकोटिभिः ॥ १ ॥

आत्मानात्मविवेकः कथ्यते ॥ २ ॥

आत्मनः किं निमित्तं दुःखम् ? शरीरपरिग्रहनिमित्तम् । नेह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेः ॥ ३ ॥

शरीरपरिग्रहः केन भवति ? कर्मणा ॥ ४ ॥

कर्म केन भवतीति चेत् ? रागादिभ्यः ॥ ५ ॥

रागादयः कस्मात् भवन्तीति चेत् ? अभिमानात् ॥ ६ ॥

अभिमानोऽपि कस्मात् भवति ? अविवेकात् ॥ ७ ॥

अविवेकः कस्मात् भवति ? अज्ञानात् । अज्ञानं केन भवतीति चेत् ? न केनापि । अज्ञानं नाम अनादि सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचिदिति वदन्ति, अहमज्ञ इत्याद्यनुभवात् । "देवात्मशक्तिं स्वगुणैर्निगूढां" इत्यादिश्रुतेः । तस्मादज्ञानादविवेकी जायते । अविवेकादभिमानो जायते । अभिमानाद्रागादयो जायन्ते । रागादिभ्यः कर्माणि जायन्ते । कर्मभ्यः शरीरपरिग्रहो जायते । शरीरपरिग्रहात् दुःखं जायते ॥ ८ ॥

दुःखस्य कदा निवृत्तिः ? सर्वात्मना शरीरपरिग्रहनाशे सति दुःखस्य निवृत्तिर्भवति । सर्वात्मपदं किमर्थम् ? सुषुप्त्यवस्थायां दुःखे निवृत्तेऽपि पुनरुत्थानसमये उत्पद्यमानत्वात् वासनात्मना स्थितं भवति ॥ ९ ॥

अतस्तन्निवृत्त्यर्थं सर्वात्मपदम् । शरीरपरिग्रहनिवृत्तिः कदा भवति ? सर्वात्मना कर्मणि निवृत्ते सति । कर्मनिवृत्तिः कदा भवति ? सर्वात्मना रागादौ निवृत्ते सति । रागादिनिवृत्तिः कदा भवति ? सर्वात्मना अभिमाने निवृत्ते सति । कदा अभिमाननिवृत्तिः ? सर्वात्मना अवि-

वेके निवृत्ते सति । कदा अविवेकनिवृत्तिः ? सर्वात्मना अज्ञाने निवृत्ते सति । कदा अज्ञाननिवृत्तिः ? ब्रह्मात्मैकत्वे जाते सति अविद्यानिवृत्तिः सर्वात्मना भवति ॥ १०॥

ननु नित्यानां कर्मणां विहितत्वात् नित्येभ्यः कर्मभ्यो अविद्यानिवृत्तिः स्यात् किमर्थं ज्ञानेन इत्याशंक्य न कर्मादिना अविद्यानिवृत्तिः । तत्कुत इति चेत् ? कर्मज्ञानयोर्विरोधो भवेत् ॥ ११ ॥

अतो ज्ञानेनैव अज्ञाननिवृत्तिः । तज्ज्ञानं कुत इति चेत् ? विचारादेव भवति । आत्मानात्मविवेकविषयविचाराद्भवति । तस्मिन् विचारे को वा को वा अधिकारी ? साधनचतुष्टयसंपन्नोऽधिकारी । साधनचतुष्टयं नाम — १ नित्यानित्यवस्तुविवेकः, २ इहामुत्रफलभोगविरागः, ३ शमादिषट्कसम्पत्तिः, ४ मुमुक्षुत्वं चेति ।

१ नित्यानित्यवस्तुविवेको नाम, ब्रह्म सत्यं, जगन्मिथ्यैवेति निश्चयः । २ इह अस्मिँल्लोके देहधारणव्यतिरिक्तविषये स्रक्चंदनवनितादिसंभोगे वान्ताशनमूत्रपुरीषादौ यथा इच्छा नास्ति, तथा इच्छाराहित्यमिति इहलोकविरागः । अमुत्र स्वर्गलोकादिब्रह्मलोकान्तर्वर्तिषु रंभोर्वश्यादिसंभोगादिविषयेषु तद्वत् । ३ शमादिषट्कं नाम, शम-दमोपरति-तितिक्षा-समाधानं श्रद्धा । शमो नाम अंतरिंद्रियनिग्रहः । अंतरिंद्रियं नाम मनः । तस्य निग्रहः श्रवणमनननिदिध्यासनव्यतिरिक्तविषयेभ्यो निवृत्तिः । श्रवणादौ वर्तमानत्वं वा शमः । श्रवणं नाम षड्विधलिंगैरशेषवेदान्तानामद्वितीयवस्तुनि तात्पर्यावधारणम् ॥ १२ ॥

षड्विधलिंगानि तु उपक्रमोपसंहाराभ्यास–फलापूर्वतार्थवादोपपत्त्याख्यानि । प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यंतयोरुपपादनमुपक्रमोपसंहारौ । यथा छांदोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः एकमेवाद्वितीयमित्यादौ ऐतदात्म्यमित्यंते च प्रतिपादनम् । प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः । यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्व-

मसीति नवकृत्वः प्रतिपादनम् । फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र श्रूयमाणं प्रयोजनम् । यथा तत्र तत्र 'आचार्यवान् पुरुषो वेद' 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' इति अद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं फलं श्रूयते । अपूर्वता तु प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणम् ॥ १३ ॥

यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम् । प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः । यथा तत्र उत तमादेशमप्राक्षो येन अश्रुतं श्रुतं भवति अमतं मतं अविज्ञातं विज्ञातमिति अद्वितीयवस्तुप्रशंसनम् ॥ १४ ॥

प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमाणा युक्तिरुपपत्तिः । यथा तत्र सौम्यैकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादौ अद्वितीयवस्तुसाधने विकारस्य वाचारंभणमात्रत्वे युक्तिः श्रूयते ॥ १५ ॥

मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिभिरनवरतमनुचिंतनम् । विजातीयदेहादिप्रत्ययरहिताद्विजातीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम् । अस्यार्थः । विजातीयदेहादिबुद्ध्यंतजडपदार्थनिराकरणेन सजातीयाद्वितीयवस्तुविषयप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः ॥ १६ ॥

दमो नाम बाह्येंद्रियनिग्रहः । बाह्येंद्रियाणि कानि ? कर्मेंद्रियाणि पंच ज्ञानेंद्रियाणि पंच । तेषां निग्रहः श्रवणादिव्यतिरिक्तविषयेभ्यो निवृत्तिर्दमः । उपरतिर्नाम विहितानां कर्मणां विधिना परित्यागः । श्रवणादिष्वेव वर्तमानस्य मनसः श्रवणादौ वर्तमानं वा उपरतिः । तितिक्षा नाम देहविच्छेदव्यतिरिक्तं शीतोष्णादिद्वंद्वसहनम् । निग्रहशक्तावपि परापराधसोढृत्वं वा तितिक्षा । समाधानं नाम, श्रवणादिषु वर्तमानं मनो वासनावशाद्विषयेषु यदा यदा गच्छति तदा दोषदृष्ट्या तेषु तेषु श्रवणादिषु समाधिः समाधानम् ॥ १७ ॥

श्रद्धा नाम, गुरुवेदान्तवाक्येषु अतीव विश्वासः ॥ १८ ॥

इदं तावत् शमादिषट्कमित्युक्तम् । ४ मुमुक्षुत्वं नाम, मोक्षेऽतितीव्रेच्छावत्त्वम् । एतत्साधनचतुष्टयसंपत्तिः, तद्वान् साधनचतुष्टयसंपन्नः । तस्य आत्मानात्मविचारेऽधिकारः । यथा ब्रह्मचारिणः कर्तव्यान्तरं नास्ति, तथास्यान्यत् कर्तव्यं नास्ति ॥ १८ ॥

साधनचतुष्टयसंपत्त्यभावेऽपि गृहस्थानामात्मविचारे क्रियमाणे सति तेन प्रत्यवायो नास्ति, किन्तु अतीव श्रेयो भवति । यथा

"दिने दिने च वेदान्तविचाराद्भक्तिसंयुतात् ।

गुरुशुश्रूषया लब्धात्कृच्छ्राशीतिफलं भवेत्" इत्युक्तम् । ॥ २० ॥

आत्मानात्मविचारः कर्तव्य इत्युक्तम् । आत्मा

नाम स्थूलसूक्ष्मकारणशरीरत्रयविलक्षणः पंचकोशव्यतिरिक्तः अवस्थात्रयसाक्षी सच्चिदानंदस्वरूपः ॥ २१ ॥

अनात्मा नाम अनृतजडदुःखात्मकं समष्टिव्यष्टयात्मकशरीरत्रयम् । शरीरत्रयं नाम स्थूलसूक्ष्मकारणशरीरत्रयम् । स्थूलशरीरं नाम पंचीकृतभूतकार्यं कर्मजन्यं जन्मादिषड्भावविकारम् । तथा चोक्तं—

पंचीकृतमहाभूत–संभवं कर्मसंचितम् ।

शरीरं सुखदुःखानां भोगायतनमुच्यते ॥ २२ ॥

पंचीकरणं तु–

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥

स्वस्वेतरद्वितीयांशैर्योजनात् पंच पंच ते ॥ इति ॥

शीर्यते वयोभिर्बाल्यकौमारयौवनवार्धक्यादिभिरिति शरीरम् । दह भस्मीकरणे इति व्युत्पत्त्या च देहः भस्मीभावं प्राप्नोति । ननु केचिद्देहा न भस्मीभावं प्राप्नुवन्ति, केचिद्देहाः खननादि प्राप्नुवन्ति, कथमुच्यते सर्वं स्थूलादिकं स्थूलदेहजातं भस्मीभावं प्राप्नोति । यद्यप्येवं तथापि केनाग्निना दाहत्वं संभवतीत्यत आह, सर्वेषां स्थूलदेहानां आध्यात्मिकाधिभौतिकाधिदैविकादितापत्रयाग्निना दाहत्वं संभवति । आध्यात्मिकं

नाम आत्मानं देहं अधिकृत्य वर्तेत इत्यध्यात्मम् । अध्यात्मं च तत् दुःखं आध्यात्मिकं वातपित्तकफजातं शिरोरोगज्वरादिना व्याधिरूपम् । आधिभौतिकं नाम भूतमधिकृत्य वर्तते इत्याधिभौतिकं व्याघ्रतस्करादिजन्यदुःखम् । आधिदैविकं नाम देवमधिकृत्य वर्तते इत्याधिदैविकं शीतातपवातवर्षवैद्युतादि दुःखम् ॥ २३ ॥

सूक्ष्मशरीरं नाम अपंचीकृतभूतकार्यं सप्तदशकं लिंगम् । सप्तदशकं नाम ज्ञानेंद्रियाणि पंच, कर्मेंद्रियाणि पंच, प्राणादिवायवः पंच, बुद्धिर्मनश्चेति । ज्ञानेंद्रियाणि कानि ? श्रोत्रत्वक्–चक्षुर्जिव्हा–घ्राणानि । श्रोत्रेंद्रियं नाम, कर्णव्यतिरिक्तं कर्णशष्कुल्यवच्छिन्ननभोदेशाश्रयं शब्दग्रहणशक्तिमदिंद्रियं श्रोत्रेंद्रियमिति । त्वगिंद्रियं नाम, त्वग्व्यतिरिक्तं त्वगाश्रयं आपादतलमस्तकव्यापि शीतोष्णादिस्पर्शग्रहणशक्तिमदिंद्रियं त्वगिंद्रियमिति । चक्षुरिंद्रियं नाम, गोलोकव्यतिरिक्तं गोलोकाश्रयं कृष्णतारकाग्रवर्ति रूपादिग्रहणशक्तिमदिंद्रियं चक्षुरिंद्रियमिति । जिह्वेंद्रियं नाम जिह्वाव्यतिरिक्तं जिह्वाश्रयं जिह्वाग्रवर्त्ति रसादिग्रहणशक्तिमदिंद्रियं जिह्वेंद्रियमिति । घ्राणेंद्रियं नाम, नासिकाव्यतिरिक्तं नासिकाश्रयं नासिकाग्रवर्ति गन्धादिग्रहणशक्तिमदिंद्रियं घ्राणेंद्रियमुच्यते ।

कर्मेंद्रियाणि कानि ? वाक्पाणिपादपायूपस्थानि । वागिंद्रियं नाम, वाग्व्यतिरिक्तं वागाश्रयं अष्टस्थानवर्ति शब्दोच्चारणशक्तिमदिंद्रियं वागिंद्रियमिति । अष्ट स्थानानि, उरःकंठशिरस्तालुजिह्वादंतौष्ठनासिकाः । पाणींद्रियं नाम, पाणिव्यतिरिक्तं करतलाश्रयं दानादानप्रतिग्रहशक्तिमदिंद्रियं पाणींद्रियमित्युच्यते । पादेंद्रियं नाम पादव्यतिरिक्तं पादाश्रयं पादतलवर्ति गमनागमनशक्तिमदिंद्रियं पादेंद्रियमिति । पाय्विंद्रियं नाम, गुदव्यतिरिक्तं गुदाश्रयं पुरीषोत्सर्गशक्तिमदिंद्रियं पाय्विंद्रियमिति । उपस्थेंद्रियं नाम, उपस्थव्यतिरिक्तं उपस्थाश्रयं मूत्रशुक्रोत्सर्गशक्तिमदिंद्रियं उपस्थेंद्रियमिति । एतानि कर्मेंद्रियाणि ।

अंतःकरणं नाम मनो बुद्धिश्चित्तमहंकारश्चेति । मनःस्थानं गलान्तम् । बुद्धेर्वदनम् । चित्तस्य नाभिः । अहंकारस्य हृदयम् । एतेषां विषयाः संशयनिश्चयधारणाभिमानाः । अनुसंधानात्मिकांतःकरणवृत्तिश्चित्तम् । अभिमानांतःकरणवृत्तिरहंकारः । चित्तस्य बुद्धावंतर्भावः, विषयपरिच्छित्तिरूपत्वाविशेषात् । अहंकारस्य मनस्यंतर्भावः, तस्यापि संकल्पात्मकत्वाविशेषात् । बुद्धेर्थपूर्वो विषयः । चित्तस्य पूर्वानुभवः । मनसो बाह्याभ्यंतरश्च । अहंकारस्य त्वनात्मोपरक्त आत्मैवेति । प्राणादिवायुपंचकं नाम प्राणापानसमानोदानव्यानरूपाः । तेषां स्थानविशेषा उच्यंते–

हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कंठदेशस्थो व्यानः सर्वशरीरगः ॥

एतेषां विषयाः । प्राणः प्रागननवान् । अपानः अवागननवान् । उदान ऊर्ध्वमननवान् । समानः समीकरणवान् । व्यानः विष्वगननवान् ॥ २४ ॥

एतेषामुपवायवः पंच । नागः कूर्मश्च कृकरो देवदत्तो धनंजय इति । एतेषां विषयाः–

नागादुद्गिरणं चापि कूर्मादुन्मीलनं तथा ।
धनंजयात् पोषणञ्च देवदत्ताच्च जृंभणम् ॥
कृकराच्च क्षुतं जातमिति योगविदो विदुः ॥

एतेषां ज्ञानेंद्रियादीनामधिपतयो दिगादयः ॥

दिग्वातार्कप्रचेतोऽश्विवह्नींद्रोपेन्द्रमित्रकाः ।
तथा चंद्रश्चतुर्वक्त्रो रुद्रः क्षेत्रज्ञ ईश्वरः ॥
विशिष्टो विश्वस्रष्टा च विश्वयोनिरयोनिजः ।
क्रमेण देवताः प्रोक्ताः श्रोत्रादीनां यथाक्रमात् ॥

एषु प्राणमयकोषः क्रियाशक्तिमान् कार्यरूपः । मनोमयः इच्छाशक्तिमान् करणरूपः । विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । एतत् सर्वं मिलितं

लिंगशरीरमित्युच्यते । कोषत्रयमुच्यते ॥ २४ ॥

तथा चोक्तं—

पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितम् ।
अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनम् ॥ २६ ॥

लीनमर्थं गमयतीति व्युत्पत्त्या लिंगं शरीरमित्युच्यते । कथं लीनं ? श्रवणमननादिना गमयति ज्ञापयति । शीर्यत इति व्युत्पत्त्या शरीरमित्युच्यते । कथं शीर्यते इति चेत् ? अहं ब्रह्मास्मीति ब्रह्मात्मैकत्वज्ञानेन शीर्यते ॥ २७ ॥

दह भस्मीकरण इति व्युत्पत्त्या लिंगदेहस्य पृथिवीपुरःसरं क्षय इत्युच्यते ॥ २८ ॥

कारणशरीरं नाम, शरीरद्वयहेतुः ॥ २९ ॥

अनाद्यनिर्वचनीयं साभासं, ब्रह्मात्मैकत्वज्ञाननिवर्त्यं अज्ञानं कारणशरीरमित्युच्यते ॥ ३० ॥

तथा चोक्तं—

अनाद्यविद्याऽनिर्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥

शीर्यते इति व्युत्पत्त्या शरीरमित्युच्यते । कथमिति चेत् ? ब्रह्मात्मैकत्वज्ञानेन शीर्यते । दह भस्मीकरण इति व्युत्पत्त्या कारणशरीरस्य पृथिवीपुरःसरं क्षय इत्युच्यते । अनृतजडदुःखात्मकमित्युक्तम् । अनृतं नाम कालत्रयेषु अविद्यमानवस्तु अनृतमुच्यते । जडं नाम स्वविषयपरविषयज्ञानरहितं वस्तु जडं इत्युच्यते । दुःखं नाम अप्रीतिरूपं वस्तु दुःखमित्युच्यते । समष्टिव्यष्ट्यात्मकमित्युक्तम् । किं समष्टिः ? किं व्यष्टिः ? यथा वनस्य समष्टिः यथा वृक्षस्य व्यष्टिः । यथा वा जलाशयस्य समष्टिः जलस्य व्यष्टिः । तद्वदनेकशरीरसमष्टिः । एकशरीरस्य व्यष्टिः । अवस्थात्रयं नाम जाग्रत्स्वप्नसुषुप्तयः । जागरणं नाम इंद्रियैरर्थोपलब्धिः

गरणम् । स्वप्नो नाम जागरितसंस्कारजप्रत्ययः सविषयः । सुषुप्तिर्नाम सर्वविषयज्ञानाभावः । जाग्रत्स्थूलशरीराभिमानी विश्वः । स्वप्नसूक्ष्मशरीराभिमानी तैजसः । सुषुप्ति–कारणशरीराभिमानी प्राज्ञः । कोशपंचकं नाम अन्नमय–प्राणमय–मनोमय–विज्ञानमय-आनंदमयाख्याः । अत्र मयट्प्रत्ययो विकारार्थः । तथा च—

पितृभुक्तान्नजाद्वीर्याज्जातोऽन्नेनैव वर्धते ।
देहः सोऽन्नमयो नात्मा प्राक् चोर्ध्वं तदभावतः ॥ ३१ ॥
पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्जनात् ॥ ३२ ॥
अहंतां ममतां देहे गेहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥ ३३ ॥
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥ ३४ ॥
काचिदंतर्मुखा वृत्तिरानंदप्रतिबिंबभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥ ३२ ॥
देहादभ्यंतरं प्राणः प्राणादभ्यंतरं पुनः ।
ततः कर्ता ततो भोक्ता गुहा सेयं परंपरा ॥ ३६ ॥

स्थूलशरीरं अन्नमयकोशः । मातृपितृभ्यामन्ने भुक्ते सति शुक्रशोणिताकारेण परिणतं तयोः संयोगादेव देहाकारेण परिणमते । कोशवदाच्छादकत्वात् कोश इत्युच्यते । अन्नविकारत्वे सति आत्मानमाच्छादयति । कथं ? अपरिच्छिन्नमात्मानं परिच्छिन्नमिव, जन्मादिषड्भावविकाररहित मात्मानं जन्मादिषड्भाववन्तमिव, तापत्रयादिरहितमात्मानं तापत्रयवन्तमिव आच्छादयति । यथा कोशः खड्गमाच्छादयति, यथा तुषस्तंडुलमाच्छादयति, यथा वा गर्भं [illegible], तथा प्राणमयकोशो नाम कर्मेंद्रियाणि पंच प्राणादिवायवः पंच, एतत् सर्वं मिलितं सत्

प्राणमयकोश इत्युच्यते । प्राणविकारे सति वक्तृत्वादिरहितमात्मानं वक्तारमिव, दानादिरहितमात्मानं दातारमिव, गमनादिरहितमात्मानं गन्तारमिव, क्षुत्पिपासादिरहितमात्मानं क्षुत्पिपासावतमिवावारयति । मनोमयकोशो नाम ज्ञानेंद्रियाणि पंच मनश्च एतत् सर्वं मिलित्वा मनोमयकोश इत्युच्यते । कथं, मनोविकारे सति संशयादिरहितमात्मानं संशयवन्तमिव, शोकमोहादिरहितमात्मानं शोकमोहादिवन्तमिव, दर्शनादिरहितमात्मानं दर्शनादिवन्तमिवावारयति । विज्ञानमयकोशो नाम ज्ञानेंद्रियाणि पंच बुद्धिश्च एतत् सर्वं मिलित्वा विज्ञानमयकोश इत्युच्यते । कर्तृत्वभोक्तृत्वाद्यभिमानेन इहलोकपरलोकगामी व्यावहारिक जीव इत्युच्यते ॥ ३७ ॥

विज्ञानविकारत्वे सति अकर्तारमात्मानं कर्तारमिव, अविज्ञातारमात्मानं विज्ञातारमिव, निश्चयरहितमात्मानं निश्चयवन्तमिव, जाड्यादिरहितमात्मानं जाड्यादिवन्तमिवावारयति । आनंदमयकोशो नाम प्रियमोदप्रमोदवृत्तिमत् अज्ञानप्रधानमंतःकरणं आनंदमयकोश इत्युच्यते । कथं प्रियमोदप्रमोदरहितमात्मानं प्रियमोदप्रमोदवन्तमिव, अभोक्तारमात्मानं भोक्तारमिव परिच्छिन्नसुखरहितमात्मानं परिच्छिन्नसुखवन्तमिव आच्छादयति । इष्टपुत्रादिदर्शनजं प्रियम् । प्रियलाभनिमित्तो हर्षो मोदः । स एव च प्रकृष्टो हर्षः प्रमोदः । एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः । मनोमय इच्छाशक्तिमान् करणरूपः । प्राणमयः क्रियाशक्तिमान् कार्यरूपः । तत्र हेतुमाह । योग्यत्वादेवमेतेषां विभाग इति वर्णयन्ति । एतत् कोशत्रयं मिलितं सूक्ष्मशरीरमित्युच्यते । समष्टिव्यष्टी शास्त्रान्तराद्विशेषतो ज्ञेये शरीरत्रयविलक्षणत्वमुच्यते ॥ ३८ ॥

कथम् ? सत्यस्वरूपः असत्यस्वरूपो न भवति । असत्यस्वरूपः सत्यस्वरूपो न भवति । ज्ञानस्वरूपः जडस्वरूपो न भवति । जडस्वरूपः ज्ञानस्वरूपो न भवति । एवं सुखस्वरूपो दुःखस्वरूपो न भवति ।

दुःखस्वरूपः सुखस्वरूपो न भवति । एवं शरीरत्रयविलक्षणमुक्त्वा अवस्थात्रयसाक्षित्वमुच्यते ॥ ३९ ॥

कथम् ? जाग्रदवस्था जाता, जाग्रदवस्था भवति, जाग्रदवस्था भविष्यति । स्वप्नावस्था जाता, स्वप्नावस्था भवति, स्वप्नावस्था भविष्यति । सुषुप्त्यवस्था जाता, सुषुप्त्यवस्था भवति, सुषुप्त्यवस्था भविष्यति । एवमवस्थात्रयमविकारतया जानाति । अत आत्मनः पंचकोशविलक्षणत्वं दृष्टान्तरूपेण प्रतिपादयति । ममेयं गौः, ममायं वत्सः, ममायं कुमारः, ममेयं कुमारी, ममेयं स्त्री, एवमादिपदार्थवान् पुरुषो न भवति । तेभ्यो विलक्षणः । तथा मम अन्नमयकोशः, मम प्राणमयकोशः, मम मनोमयकोशः, मम विज्ञानमयकोशः, मम आनंदमयकोशः । एवं पंचकोशवानात्मा न भवति । तेभ्यो विलक्षणः साक्षी ।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥

इत्यादिश्रुतेः ॥ ४० ॥

इदानीमात्मनः सच्चिदानंदस्वरूपत्वमुच्यते । सद्रूपत्वं नाम केनाप्यबाध्यमानत्वेन कालत्रयेऽप्येकरूपेण विद्यमानत्वमुच्यते । चिद्रूपत्वं नाम साधनान्तरनिरपेक्षतया स्वयं प्रकाशमानः सन् स्वस्मिन्नारोपितसर्वपदार्थावभासकवस्तुत्वं चिद्रूपत्वमित्युच्यते । आनंदस्वरूपं नाम परमप्रेमास्पदत्वं नित्यनिरतिशयत्वमानंदत्वमित्युच्यते । "नित्यविज्ञानमानंदं ब्रह्म रातिः दातुः परायणं" इति श्रुतेः । एवं नित्यशुद्धबुद्धमुक्तस्वभावम् । ब्रह्माहमस्मीति संशयासंभावनाविपरीतभावनाराहित्येन यस्तु जानाति स जीवन्मुक्तो भवतीति ॥ ४१ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीशंकराचार्यविरचितः आत्मानात्मविवेकः समाप्तः ।

जीवन्मुक्तानंदलहरी ।

पुरे पौरान्पश्यन्नरयुवतिनामाकृतिमयान्
सुवेषान्स्वर्णालंकरणकलितांश्चित्रसदृशान् ।
स्वयं साक्षी द्रष्टेत्यपि च कलयन् तैः सह रमन्
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १ ॥
वने वृक्षान्पश्यन्दलभरभरान्नम्रसुशिखान्
घनच्छायाच्छन्नान्बहुलकलकूजद्द्विजगणान् ।
भजन्घस्रे रात्राववनितलतल्पैकशयनो
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ २ ॥
कदाचित्प्रासादे क्वचिदपि च सौधे च धवले
कदाकाले शैले क्वचिदपि च कूलेषु सरिताम् ।
कुटीरे दान्तानां मुनिजनवराणामपि वसन्
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ३ ॥
क्वचिद्बालैः सार्धं करतलजतालैश्च हसितैः
क्वचिद्वै तारुण्यांकितचतुरनार्या सह रमन् ।
क्वचिद्वृद्धैश्चिंतां क्वचिदपि तदन्यैश्च विलपन्
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ४ ॥
कदाचिद्विद्वद्भिर्विविधसुपुरानंदरसिकैः
कदाचित्काव्यालंकृतरसरसालैः कविवरैः ।
वदन्वादांस्तर्कैरनुमितिपरैस्तार्किकवरै-
र्मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ५ ॥
कदा ध्यानाभ्यासैः क्वचिदपि सपर्यां विकसितैः
सुगंधैः सत्पुष्पैः क्वचिदपि दलैरेव विमलैः ।
प्रकुर्वन्देवस्य प्रमुदितमनाः संस्तुतिपरो

मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ६ ॥
शिवायाः शंभोर्वा क्वचिदपि च विष्णोरपि कदा
गणाध्यक्षस्यापि प्रकटतपनस्यापि च कदा ।
पठन्वै नामालिं नयनरचितानंदसलिलो
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ७ ॥
कदा गंगांभोभिः क्वचिदपि च कूपोत्थितजलैः
क्वचित्कासारोत्थैः क्वचिदपि सदुष्णैश्च शिशिरैः ।
भजन्स्नानैर्भूत्या क्वचिदपि च कर्पूरनिभया
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ८ ॥
कदाचिज्जागृत्यां विषयकरणैः संव्यवहरन्
कदाचित्स्वप्नस्थानपि च विषयानेव च भजन् ।
कदाचित्सौषुप्तं सुखमनुभवन्नेव सतत
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ९ ॥
कदाप्याशावासाः क्वचिदपि च दिव्यांबरधरः
क्वचित्पंचास्योत्थां त्वचमपि दधानः कटितटे ।
मनस्वी निःशंकः स्वजनहृदयानंदजनको
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १० ॥
कदाचित्सत्त्वस्थः क्वचिदपि रजोवृत्तियुगत-
स्तमोवृत्तिः क्वापि त्रितयरहितः क्वापि च पुनः ।
कदाचित्संसारी श्रुतिपथविहारी क्वचिदहो
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ ११ ॥
कदाचिन्मौनस्थः क्वचिदपि च वाग्वादनिरतः
कदाचित्स्वानंदे हसति रभसा त्यक्तवचसा ।
कदाचिल्लोकानां व्यवहृतिसमालोकनपरो
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १२ ॥

कदाचिच्छक्तीनां विकचमुखपद्मेषु कवलान्
क्षिपंस्तासां क्वापि स्वयमपि च गृह्णन्स्वमुखतः ।
तदद्वैतं रूपं निजपरविहीनं प्रकटयन्
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १३ ॥
क्वचिच्छैवैः सार्धं क्वचिदपि च शाक्तैः सह रमन्
कदा विष्णोर्भक्तैः क्वचिदपि च सौरैः सह वसन् ।
कदाचिद्गाणेशैर्गतसकलभेदोऽद्वयतया
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १४ ॥
निराकारं क्वापि क्वचिदपि च साकारममलं
निजं शैव रूपं विविधगुणभेदेन बहुधा ।
कदाश्चर्यं पश्यन्किमिदमिति हृष्यन्नपि कदा
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १५ ॥
कदा द्वैतं पश्यन्नखिलमपि सत्यं शिवमयं
महावाक्यार्थानामवगतसमभ्यासवशतः ।
गतद्वैताभावः शिवशिवशिवेत्येव विलपन्
मुनिर्न व्यामोहं भजति गुरुदीक्षाक्षततमाः ॥ १६ ॥
इमां मुक्तावस्थां परमशिवसंस्थागुरुकृपा-
सुधापांगावाप्यां सहजसुखवाप्यामनुदिनम् ।
मुहुर्मज्जन्मज्जन्भजति सुकृती चेन्नरवर-
स्तदा योगी त्यागी कविरिति वदन्तीह कवयः ॥ १७ ॥
मौने मौनी गुणिनि गुणवान्पंडिते पंडितश्च
दीने दीनः सुखिनि सुखवान्भोगिनि प्राप्तभोगः ।
मूर्खे मूर्खो युवतिषु युवा वाग्मिनि प्रौढवाग्मी
धन्यः कोऽपि त्रिभुवनजयी योऽवधूतेऽवधूतः ॥ १८ ॥

इति जीवन्मुक्तानंदलहरी संपूर्णा ॥

वाक्य-सुधा ।

रूपं दृश्यं लोचनं दृक्तद्दृश्यं दृक् तु मानसम् ।
दृश्या धीवृत्तयः साक्षी दृगेव तु न दृश्यते ॥ १ ॥
नीलपीतस्थूलसूक्ष्मह्रस्वदीर्घादिभेदतः ।
नानाविधानि रूपाणि पश्येल्लोचनमेकधा ॥ २ ॥
आंध्यमांद्यपटुत्वेषु नेत्रधर्मेषु चैकधा ।
संकल्पयेन्मनःश्रोत्रत्वगादौ योज्यतामिदम् ॥ ३ ॥
कामः संकल्पसंदेहौ श्रद्धाऽश्रद्धे धृतीतरे ।
ह्रीर्धीर्भीरित्येवमादीन्भासयत्येकधा चितिः ॥ ४ ॥
नोदेति नास्तमेत्येषा न वृद्धिं याति न क्षयम् ।
स्वयं विभात्यथान्यानि भासयेत्साधनं विना ॥ ५ ॥
चिच्छायाऽऽवेशतो बुद्धौ भानं धीस्तु द्विधा स्थिता ।
एकाहंकृतिरन्या स्यादंतःकरणरूपिणी ॥ ६ ॥
छायाहंकारयोरैक्यं तप्तायःपिंडवन्मतम् ।
तदहंकारतादात्म्याद्देहश्चेतनतामगात् ॥ ७ ॥
अहंकारस्य तादात्म्यं चिच्छायादेहसाक्षिभिः ।
सहजं कर्मजं भ्रान्तिजन्यं च त्रिविधं क्रमात् ॥ ८ ॥
संबंधिनोः सतोर्नास्ति निवृत्तिः सहजस्य तु ।
कर्मक्षयात्प्रबोधाच्च निवर्तेते क्रमादुभे ॥ ९ ॥
अहंकारलये सुप्तौ भवेद्देहोऽप्यचेतनः ।
अहंकारविकासोऽर्धः स्वप्नः सर्वस्तु जागरः ॥ १० ॥
अंतःकरणवृत्तिश्च चितिच्छायैक्यमागता ।
वासनाः कल्पयेत्स्वप्ने बोधेऽक्षैर्विषयान्बहिः ॥ ११ ॥
मनोऽहंकृत्युपादानं लिंगमेकं जडात्मकम् ।

अवस्थात्रयमन्वेति जायते म्रियते तथा ॥ १२ ॥
शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम् ।
विक्षेपशक्तिर्लिंगादि ब्रह्मांडान्तं जगत्सृजेत् ॥ १३ ॥
सृष्टिर्नाम ब्रह्मरूपे सच्चिदानंदवस्तुनि ।
अब्धौ फेनादिवत्सर्वनामरूपप्रसारणा ॥ १४ ॥
अंतर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपरा शक्तिः सा संसारस्य कारणम् ॥ १५ ॥
साक्षिणः पुरतो भातं लिंगं देहेन संयुतम् ।
चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ॥ १६ ॥
अस्य जीवत्वमारोपात्साक्षिण्यप्यवभासते ।
आवृतौ तु विनष्टायां भेदे भातेऽपयाति तत् ॥ १७ ॥
तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति ।
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ॥ १८ ॥
अत्राप्यावृतिनाशेन विभाति ब्रह्मसर्गयोः ।
भेदस्तयोर्विकारः स्यात्सर्गे न ब्रह्मणि क्वचित् ॥ १९ ॥
अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ २० ॥
खवाय्वग्निजलोर्वीषु देवतिर्यङ्नरादिषु ।
अभिन्नाः सच्चिदानंदा भिद्येते रूपनामनी ॥ २१ ॥
उपेक्ष्य नामरूपे द्वे सच्चिदानंदतत्परः ।
समाधिं सर्वदा कुर्यात् हृदये वाथवा बहिः ॥ २२ ॥
सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि ।
दृश्यशब्दानुवेधेन सविकल्पः पुनर्द्विधा ॥ २३ ॥
कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम् ।
ध्यायेद्दृश्यानुविद्धोऽयं समाधिः सविकल्पकः ॥ २४ ॥

असंगः सच्चिदानंदः स्वप्रभो द्वैतवर्जितः ।
अस्मीतिशब्दविद्धोऽयं समाधिः सविकल्पकः ॥ २५ ॥
स्वानुभूतिरसावेशाद्दृश्यशब्दानुपेक्षितुः ।
निर्विकल्पः समाधिः स्यान्निवातस्थितदीपवत् ॥ २६ ॥
हृदीव बाह्यदेशेऽपि यस्मिन्कस्मिंश्च वस्तुनि ।
समाधिराद्यः सन्मात्रान्नामरूपपृथक्कृतिः ॥ २७ ॥
अखंडैकरसं वस्तु सच्चिदानंदलक्षणम् ।
इत्यविच्छिन्नचिंतेयं समाधिर्मध्यमो भवेत् ॥ २८ ॥
स्तब्धीभावो रसास्वादात् तृतीयः पूर्ववन्मतः ।
एतैः समाधिभिः षड्भिर्नयेत्कालं निरंतरम् ॥ २९ ॥
देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ ३० ॥
भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ ३१ ॥
अवच्छिन्नश्चिदाभासस्तृतीयः स्वप्नकल्पितः ।
विज्ञेयस्त्रिविधो जीवस्तत्राद्यः पारमार्थिकः ॥ ३२ ॥
अवच्छेदः कल्पितः स्यादवच्छेद्यं तु वास्तवम् ।
तस्मिञ्जीवत्वमारोपाद् ब्रह्मत्वं तु स्वभावतः ॥ ३३ ॥
अवच्छिन्नस्य जीवस्य पूर्णेन ब्रह्मणैकताम् ।
तत्त्वमस्यादिवाक्यानि जगुर्नेतरजीवयोः ॥ ३४ ॥
ब्रह्मण्यवस्थिता माया विक्षेपावृतिरूपिणी ।
आवृत्या खंडतां तस्मिञ्जगज्जीवौ प्रकल्पयेत् ॥ ३५ ॥
जीवो धीस्थचिदाभासो भवेद्भोक्ता हि कर्मकृत् ।
भोज्यरूपमिदं सर्वं जगत्स्याद्भूतभौतिकम् ॥ ३६ ॥
अनादिकालमारभ्य मोक्षात्पूर्वमिदं द्वयम् ।

व्यवहारे स्थितं तस्मादुभयं व्यावहारिकम् ॥ ३७ ॥
चिदाभासस्थिता निद्रा विक्षेपावृतिरूपिणी।
आवृत्य जीवजगती पूर्वे नूत्नं तु कल्पयेत् ॥ ३८ ॥
प्रतीतिकाल एवैते स्थितत्वात्प्रातिभासिके।
नहि स्वप्नप्रबुद्धस्य पुनः स्वप्ने स्थितिस्तयोः ॥ ३९ ॥
प्रातिभासिकजीवो यस्तज्जगत्प्रातिभासिकम्।
वास्तवं मन्यतेऽन्यस्तु मिथ्येति व्यावहारिकः ॥ ४० ॥
व्यावहारिकजीवो यस्तज्जगद्व्यावहारिकम्।
सत्यं प्रत्येति मिथ्येति मन्यते पारमार्थिकः ॥ ४१ ॥
पारमार्थिकजीवस्तु ब्रह्मैक्यं पारमार्थिकम्।
प्रत्येति वीक्षते नान्यद्वीक्षते त्वनृतात्मना ॥ ४२ ॥
माधुर्यद्रवशैत्यानि नीरधर्मास्तरंगके।
अनुगम्याथ तन्निष्ठे फेनेऽप्यनुगता यथा ॥ ४३ ॥
साक्षिस्थाः सच्चिदानंदाः संबंधाद्व्यावहारिके।
तद्द्वारेणानुगच्छन्ति तथैव प्रातिभासिके ॥ ४४ ॥
लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरंगके।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ॥ ४५ ॥
प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके।
तल्लये सच्चिदानंदाः पर्यवस्यन्ति साक्षिणि ॥ ४६ ॥

अध्यात्मपटलविवरणम् ।

अथवा

आपस्तंबीयधर्मप्रथमप्रश्नाष्टमपटलं श्रीमच्छंकरभगवत्पादप्रणीतविवरणोपेतम् ।

आध्यात्मिकान् योगाननुतिष्ठेन्न्यायसंहितानैश्चारिकान् ॥ १ ॥

ॐ अथ 'आध्यात्मिकान् योगान्—' इत्यादि अध्यात्मपटलस्य संक्षेपतो विवरणं प्रस्तूयते । किमिह प्रायश्चित्तप्रकरणे समाम्नानस्य प्रयोजनमिति । उच्यते । कर्मक्षयहेतुत्वसामान्यात् । अनिष्टकर्मक्षयहेतूनि हि प्रायश्चित्तानि भवन्ति । सर्वं च कर्म वर्णाश्रमविहितमनिष्टमेव विवेकिनः, देहग्रहणहेतुत्वात् । तत्क्षयकारणं चात्मज्ञानं, प्रवृत्तिहेतुदोषनिवर्तकत्वात् । दोषाणां च निर्घात आत्मज्ञानवतः पंडितस्य धर्माधर्मक्षये क्षेमप्राप्तिरिह विवक्षितेत्यात्मज्ञानार्थमध्यात्मपटलमारभ्यते, कर्मक्षयहेतुत्वसामान्यात् ।

ननु वर्णाश्रमविहितानां कर्मणामफलहेतुत्वात् तत्क्षयो नेष्ट इति, न, 'सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्" (आप. ध. सू. २. २. २) इत्यादिश्रवणात् । अपरिमितवचनात् क्षेमप्राप्तिरेवेति चेन्न, 'तत्परिवृत्तौ कर्मफलशेषेण—' इत्यादिश्रवणात् ।

गौतमे च— "वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय—" इत्यादिना संसारगमनमेव दर्शयति कर्मणां फलम् । सर्वाश्रमाणां हि दोषनिर्घातलक्षणानि समयपदानि विधिनानुतिष्ठन् सार्वगामी भवति, न तु स्वधर्मानुष्ठानात् । वक्ष्यति च—'विधूय कविः—' (सू० ५) "सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्" (२. २१. १३) इत्यादि ।

" तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमान: क्षेमं गच्छति " (२. २१. २) इति वचनात् क्षेमशब्दस्य चापवर्गार्थत्वात् सर्वाश्रमकर्मणां ज्ञानरहितानामेव फलार्थत्वं, ज्ञानसंयुक्तानि तु क्षेमप्रापकाणि, यथा विषदध्यादीनि मंत्रशर्करादिसंयुक्तानि कार्यान्तरारंभकाणि, तद्वदिति चेन्न, अनारभ्यत्वात् क्षेमप्राप्तेः। यदि हि क्षेमप्राप्तिः कार्या स्यात् , तत इदं चिंत्यं—किं केवलैः कर्मभिरारभ्या ज्ञानसहितैर्वा ज्ञानकर्मभ्यां वा केवलेन ज्ञानेन कर्मासंयुक्तेन वेति। न त्वारभ्या केनचिदपि क्षेमप्राप्तिः नित्यत्वात् । अतोऽसदिदं ज्ञानसंयुक्तानि कर्माणि क्षेमप्राप्तिमारभन्त इति । ज्ञानसंयुक्तानां ज्ञानवदेव क्षेमप्राप्तिप्रतिबंधापनयकर्तृत्वमिति चेन्न, सकार्यकारणानामेव कर्मणां क्षेमप्राप्तिप्रतिबंधकत्वात् । अविद्यादोषहेतूनि हि सर्वकर्माणि सहफलैः कार्यभूतैः क्षेमप्रप्तिप्रतिबंधकानि । तदभावमात्रमेव हि क्षेमप्राप्तिः । न च तदभाव आत्मज्ञानादन्यतः कुतश्चिदुपलभ्यते । तथाह्युक्तं—" निर्हृत्य भूतदाहान् क्षेमं गच्छति पंडितः " (सू० ११) इति। पांडित्यं चेहात्मज्ञानं, प्रकृतत्वात् । श्रुतेश्च— " आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन " (तै. २. ९) इति। अभयं हि क्षेमप्राप्तिः। ' अभयं वै जनक ! प्राप्तोऽसि ' (बृ. ४. २. ४) इति श्रुत्यंतरात् ।

" तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति " (२. २१. २) इति आचार्यवचनमन्यार्थम् । कथं, यथोपदिष्टेष्वाश्रमधर्मेष्वव्यग्रो निष्कामः सन् प्रवर्तमानो ज्ञानेऽधिकृतो भवति, न यथेष्टं चेष्टन् कामकामी जायापुत्रवित्तादिकामापहृतव्यग्रचेताः । ज्ञानी च सन् सर्वसंन्यासक्रमेण क्षेमं गच्छतीत्येषोऽर्थः । नहि दोषनिर्घातः कदाचिदपि कर्मभ्य उपपद्यते । समिथ्याज्ञानानां हि दोषाणां प्रवृत्तौ सत्यां प्राबल्यमिहोपलभ्यते। ' संकल्पमूलः कामः ' इति च स्मृतेः । प्रवृत्तिमान्द्ये च दोषतनुत्वदर्शनात् । न चानिर्हृत्य समिथ्याज्ञानान् दोषान् क्षेमं प्राप्नोति कश्चित् ।

न च जन्मान्तरसंचितानां शुभकर्मणां विहितकर्मभ्यो निवृत्तिरुपपद्यते, शुद्धिसामान्ये विरोधाभावात् । सत्सु च तेषु तत्फलोपभोगाय शरीरग्रहणं, ततो धर्माधर्मप्रवृत्तरागद्वेषौ, पुनः शरीरग्रहणं चेति संसारः केन वार्यते । तस्मान्न कर्मभ्यः क्षेमप्राप्तिस्तत्प्रतिबंधनिवृत्तिर्वा । कर्मसहिताज्ज्ञानादविद्यानिवृत्तिरिति चेत् । यद्यपि ज्ञानकर्मणोर्भिन्नकार्यत्वात् विरोधः । तथापि तैलवर्त्यग्नीनामिव संहत्य कर्मणा ज्ञानमविद्यादि संसारकारणं निवर्तयतीति चेन्न । क्रियाकारकफलानुपमर्देनात्मलाभाभावात् ज्ञानस्य कर्मभिः संहतत्वानुपपत्तेः । तैलवर्त्यग्नीनां तु सहभावित्वोपपत्तेरितरेतरोपकार्योपकारकत्वोपपत्तेश्च संहतत्वं स्यात् । न तु ज्ञानकर्मणोस्तदुभयानुपपत्तेः संहतत्वं कदाचिदपि संभवति । केवलज्ञानपक्षे शास्त्रप्रतिषेधवचनादयुक्तमिति चेन्न । ज्ञानकार्यानिवर्तकत्वाच्छास्त्रप्रतिषेधवचनस्य । योऽयं कर्मविधिपरैः केवलज्ञानपक्षस्य सर्वसंन्यासस्य विप्रतिषेधो विरोधः, स नैव ज्ञानकार्यमविद्यादोषक्षयं वारयति ‘ भिद्यते हृदयग्रन्थिः ’ (मुं- २. २. ८) ‘ तस्य तावदेव चिरं ’ (छां. ६. १४. २) ‘ मृत्युमुखात् प्रमुच्यते ’ (कठ. ३. १५) इत्येवमादिश्रुतिस्मृतिशतसिद्धं, कर्मविधिपरत्वात् प्रवृत्तिशास्त्रस्य । न च तत् ज्ञानस्वरूपं ब्रह्मात्मैकत्वविषयं वारयति, सर्वोपनिषदामप्रामाण्यानर्थक्यप्रसंगात् , ‘ पूः प्राणिनः— ’ (सू. ४) ‘ आत्मा वै देवता ’ इत्यादिस्मृतीनां च । तस्माद्यपि बहुभिः प्रवृत्तिशास्त्रैर्विप्रतिषिद्धं केवलज्ञानशास्त्रमात्मैकत्वविषयमल्पं, तथापि सकार्यस्य ज्ञानस्य बलवत्तरत्वान्न केनचिद्वारयितुं शक्यम् । जीवतो दुःखानिवर्तकत्वाज्ज्ञानस्यानैकान्तिकं क्षेमप्रापकत्वमिति चेन्न, ‘ भिद्यते हृदयग्रंथिः ’ (मुं. २-२-८) ‘ ब्रह्मविदाप्नोति परं ’ (तै. २-१) ‘ निचाय्य तं मृत्युमुखात् प्रमुच्यते ’ (कठ ३-१-५) ‘ ब्रह्म वेद ब्रह्मैव भवति ’ (मुं. ३-२-९) इत्यादिश्रुतिस्मृतिन्यायेभ्यः । बहुभिर्विप्रतिषिद्धत्वात् सर्वत्यागशास्त्रस्य लोकवत् त्याज्यत्वमिति चेन्न, तुल्यप्रमाणत्वात्–मानसान्तानि सर्वाणि कर्माण्युक्त्वा “ तानि

वा एतान्यवराणि तपांसि न्यास एवात्यरेचयत् " (नारायण ७८) इति तपःशब्दवाच्यानां कर्मणामवरत्वेन संसारविषयत्वमुक्त्वा न्यासशब्दवाच्यस्य ज्ञानस्य केवलस्य 'न्यास एवात्यरेचयत्' 'त्यागेनैके अमृतत्वमानशुः " (ना. ३) इत्यमृतत्वं फलं दर्शयति शास्त्रम् । " तस्यैवं विदुषो यज्ञस्यात्मा यजमानः " (ना. ८०) इत्यादिना च विदुषः सर्वकर्माभावं दर्शयति । " द्वौ पंथानावनुनिष्क्रान्ततरौ कर्मपथश्चैवं पुरस्तात् संन्यासश्च, तयोः संन्यास एवातिरेचयति " इति च । विप्रतिषेधवचनस्य निन्दापरत्वादयुक्तमिति चेन्न । अविद्वद्विषयस्य कर्मणः स्तुत्यर्थत्वोपपत्तेः । मंदबुद्धयो हि लोके दृष्टप्रयोजनाः प्ररोचनेन प्रवर्तयितव्याः । कर्मसु न दृष्टप्रयोजना विद्वांसः । परनिंदा हि परस्तुतिरिति केवलज्ञाननिंदया कर्मस्तुतिपरमाचार्यवचनम् । यत्तु " बुद्धे चेत् क्षेमप्रापणं, इहैव न दुःखमुपलभेत " (२. २१. १६) इति ज्ञानस्य साधनत्वात् नैकांतिकवचनं, तत् 'ब्रह्मविदाप्नोति परम्' (तै. २. १) इत्यादिवाक्येभ्यः प्रत्युक्तम् । आचार्यान्तरवचनाच्च 'त्यज धर्ममधर्मं च' 'न तत्र क्रमते बुद्धिः' 'नैष्कर्म्यमाचरेत्' 'तस्मात् कर्म न कुर्वन्ति' इत्यादेः । तस्मात् केवलादेव ज्ञानात् क्षेमप्राप्तिः ॥

अथाध्यात्मिकान् योगानिति । अध्यात्मं भवन्तीत्यध्यात्मिकाः । छांदसं ह्रस्वत्वम् । के ते अध्यात्मिका योगाः । वक्ष्यमाणा अक्रोधादयः । ते हि चित्तसमाधानहेतुत्वात् योगाः । बाह्यनिमित्तनिरपेक्षत्वाच्चाध्यात्मिकाः । तानध्यात्मिकान् योगान् । न्यायसंहितान् उपपत्तिसमन्वितान् । ते हि क्रोधादिषु दोषनिर्घातं प्रति समर्था उपपद्यंते न्यायतः । अनैश्चारिकान् निश्चारयन्ति मनोऽन्तःस्थं बहिर्विषयेभ्य इति नैश्चारिकाः क्रोधादयो दोषाः, तत्प्रतिपक्षभूता ह्येते तेऽनैश्चारिकाः । अक्रोधादिषु हि सत्सु चित्तमनिश्चरणस्वरूपं प्रसन्नमात्मावलंबनं तिष्ठति । अतस्ताननुतिष्ठेत् सेवेत । अक्रोधादिलक्षणं चित्तसमाधानं कुर्यादित्यर्थः । तथा हि परः

स्व आत्मा लभ्यते । क्रोधादिदोषापहृतचेतस्तया हि स्वोऽपि पर आत्माऽविज्ञातोऽलब्ध इव सर्वस्य यतः, अतस्तल्लाभाय योगानुष्ठानं कुर्यात् ॥ १ ॥

पुत्रवित्तादिलाभो हि परो दृष्टो लोके । किमात्मलाभेनेत्यत आह—

आत्मलाभान्न परं विद्यते ॥ २ ॥

आत्मलाभात् आत्मनः परस्य स्वरूपप्रतिपत्तेः न परं लाभान्तरं विद्यते । तथा विचारितं बृहदारण्यके— 'तदेतत् प्रेयः पुत्रात्' (बृ. १. ४. ८) इत्यादिना ॥ २ ॥

तत्रात्मलाभीयांछ्लोकानुदाहरिष्यामः ॥ ३ ॥

सत्यं क्रोधादयो दोषा आत्मलाभप्रतिबन्धभूता अक्रोधादिभिर्निर्हन्यन्ते । तथापि न मूलोद्वर्तनेन निवृत्तिः क्रोधादीनां, सर्वदोषबीजभूतमज्ञानं न निवृत्तमिति । तस्य चानिवृत्तौ बीजस्यानिवर्तितत्वात् सकृन्निवृत्ता अपि क्रोधादयो दोषाः पुनरुद्भविष्यन्तीति संसारस्यात्यंतिकोच्छेदो न स्यात् । तद्दोषबीजभूतस्याज्ञानस्य ज्ञानादन्यतो न निवृत्तिरित्यात्मस्वरूपप्रकाशनायात्मज्ञानाय मतान्, शाखान्तरोपनिषद्भ्यः, तत्र तस्मिन् आत्मलाभप्रयोजने निमित्ते । आत्मानं करतलन्यस्तमिव लंभयितुं समर्थान् आत्मलाभीयान् श्लोकानुदाहरिष्यामः उद्धृत्याहरिष्यामः । ग्रंथीकृत्य दर्शयिष्याम इत्यर्थः ॥ ३ ॥

पूः प्राणिनः सर्व एव गुहाशयस्याहन्यमानस्य विकल्मषस्य ।
अचलं चलनिकेतं येऽनुतिष्ठन्ति तेऽमृताः ॥ ४ ॥

पूः पुरं शरीरम् । प्राणिनः प्राणवन्तः । सर्व एव ब्रह्मादीनि स्तंबपर्यंतानि । प्राणिनः पुरं पुरमिव राज्ञः उपलब्ध्यधिष्ठानम् । कस्य पुरं, गुहाशयस्यात्मनः । यथा स्वकीये पुरे राजा सचिवादिपरिवृत उपलभ्यते, एवं देहेष्वात्मा बुद्ध्यादिकरणसंयुक्त उपलभ्यते । उपलभते च बुद्ध्यादिकरणोपसंहृतान् भोगान् । अतोऽविद्यावरणात्मभूतायां बुद्धिगुहायां शेत इति गुहाशयः । तस्य पुरम् । तस्यां बुद्धावविद्यादिदोषमलापनये विद्व-

द्भिरस्त्यक्तैषणैरुपलभ्यते । इदमपरं विशेषणं गुहाशयस्य अहन्यमानस्य छेदनभेदनजरारोगादिभिर्हन्यमाने देहे न हन्यते । 'न वधेनास्य हन्यत (८-१०-४) इति छांदोग्ये । तस्य विकल्मषस्य, कल्मषं पापं तदस्य नास्तीति विकल्मषः । सर्वं ह्यविद्यादोषसहितं धर्माधर्माख्यं कर्म कल्मषं भवति विकल्मषस्येति विशेषणेन प्रतिषिध्यते; तत्कार्यं जरारोगादिदुःखरूपमह न्यमानस्येति । एवं हेतुफलसंबंधरहितस्यासंसारिण उपलब्ध्यधिष्ठानं पू सर्वे प्राणिनः । अतो न संसार्यन्योऽस्ति । 'एको देवः सर्वभूतेषु गूढः (६. ११) इति श्वेताश्वतरे । "एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते ' (३. १२) इति च काठके । 'नान्यदतोऽस्ति द्रष्टृ ' (३. ८. ११) इत्यादि वाजसनेयके । 'स आत्मा तत्त्वमसि ' (६. ८. ७) इति च छांदोग्ये । पूर्वार्धेन ब्रह्मणो याथात्म्यमुक्त्वोत्तरार्धेन तद्विज्ञानवतस्तद्विज्ञान फलमाह—यस्य सर्वे प्राणिनः पुरं अहन्यमानस्य विकल्मषस्य, तस्य सर्वप्राणि संबंधादर्थसिद्धमाकाशवत् सर्वगतत्वं, 'आकाशवत् सर्वगतश्च नित्यः इति च श्रुतेः । सर्वगतस्य चाचलत्वमर्थसिद्धमेव । तमचलं चलनिके चलायां हि प्राणिगुहायां स्वयं शेते तमचलं चलनिकेतम् । येऽनुतिष्ठन्ति ममात्मेति साक्षात् प्रतिपद्यन्ते; तेऽमृताः अमरणधर्माणो भवन्ति ॥ ४ ॥

कथं तदनुष्ठानमिति । उच्यते—

यदिदमिदिहेदिह लोके विषयमुच्यते ।
विधूय कविरेतदनुतिष्ठेद् गुहाशयम् ॥ ५ ॥

यदिदं प्रत्यक्षतोऽवगम्यमानं स्त्र्यन्नपानादिसंभोगलक्षणम् । इदिति किंचिदर्थे यत्किंचिदिदं प्रत्यक्षम् । इहास्मिन् लोके । विषयम् । इदंशब्द सामानाधिकरण्यान्नपुंसकलिंगप्रयोगो विषयमिति; लिंगव्यत्ययो व द्रष्टव्यः । छांदसो वा प्रयोगो विषयमिति । उभयलिंगो वा विषय शब्दः । द्वितीय इच्छब्द इहशब्दश्च । तयोः क्वचिन्नियोगः । इच्छब्द श्चार्थे । इहशब्दोऽमुष्मिन्नर्थे । लोकशब्दः काकाक्षिवदुभयत्र संबध्यते

इह लोके इह च लोकेऽमुष्मिंश्च यदिदं विषयमुच्यते, स्वर्गादिलोके पार्श्वस्थमध्यस्थो व्यपदिशति इह लोक इति च लोक इति, तत्सर्वं विधूय परित्यज्य । कविः क्रान्तदर्शी, मेधावीत्यर्थः । फलं साधनं च तद्विधूय एषणात्रयात् व्युत्थायेत्यर्थः । अनुतिष्ठेत् गुहाशयं यथोक्तलक्षणमात्मतत्त्वम् ॥ ५ ॥

तत् क्वानुष्ठातव्यमिति । उच्यते—

आत्मन्नेवाहमलब्ध्वैतद्धितं सेवस्व नाहितम् ।
अथान्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया ।
महान्तं तेजस्कायं सर्वत्र निहितं प्रभुम् ॥ ६ ॥

आत्मन्नेव आत्मन्येव । प्रत्यगात्मा हि परमात्मा । सर्वं ह्यत्रानुष्ठेयम् । यदि देहादन्यत्रानुष्ठीयेत, सोऽनात्मा कल्पितः स्यात् । तस्माद् देहादिसंघात आत्मन्येव विधूय बाह्यासंग गुहाशयमात्मतत्त्वमनुष्ठेयम् । किमन्येष्वननुष्ठेयमिति भगवतो मतम् । बाढम् । प्रथममेव नान्येष्वनुष्ठेयमात्मतत्त्वम् । कथं तर्हि; सर्वप्रयत्नेनापि स्वदेहादिसंघाते यथोक्तमात्मतत्त्वं न लभेत अथाहमन्येष्वादित्यादिषु प्रतीच्छामि अभिवांछामि । साधुष्ठानं साधोः परमात्मनः उपलब्धिस्थानं, यत्र गुहाशयं ब्रह्मतत्त्वमनुष्ठेयम् । अनपेक्षतयान्यत् पुत्रवित्तलोकादिसुखं छित्वा निःस्पृहतया । न ह्यात्मानुष्ठानं बाह्यार्थाकांक्षा च सह संभवतः । कस्मात् पुनरनेकान्यन्यानि हितप्रकाराण्यनपेक्ष्यात्मानुष्ठानमेव यत्नत आस्थीयत इत्यत आहाचार्यः— यथान्यान्यहितानि हितबुद्धया परिगृहीतानि, न तथैवमात्मसेवनम् । किं तर्हि एतत् हितमेव । तस्मात् सेवस्वेति । किंविशिष्टश्चात्मा सेवितव्य इत्याह—महान्तम् अमितान्तम्, अनन्तरत्वादबाह्यत्वाच्च महानात्मा, तं महान्तम् । गुणैर्वोपाधिसहचारिभिर्महान्तं, बृंहणमिति यद्वत् । तेजस्कायं तेजःशरीरमित्यर्थः । चैतन्यात्मज्योतिःस्वरूपम् । तद्धि तेजसां तेजः । 'येन सूर्यस्तपति तेजसेद्धः' 'तस्य भासा सर्वमिदं विभाति' [मुं. २.

२. १०] इति श्रुतेः । सर्वत्र सर्वदेहेषु ब्रह्मादिस्तंबपर्यंतेषु । निहितं स्थितं उपलब्धिस्वरूपेणाभिव्यक्तमित्यर्थः । न हि ब्रह्मणोऽभिव्यक्तिनिमित्तत्वव्यतिरेकेण कस्यचिदाधारत्वसंभवः । निराधारं हि ब्रह्म, सर्वगतत्वोपपत्तेः । प्रभुं प्रभवति सर्वानीश्वरान् प्रति । अचिंत्यशक्तित्वात् । एवमाद्यनंतगुणविशिष्टमात्मानं सेवस्वेति ॥ ६ ॥

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः ।
अनंगोऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्छुचिः ।
स सर्वं परमा काष्ठा स वैषुवतं स वैभाजनं पुरम् ॥ ७ ॥

विशिष्टमात्मानं सेवस्वेति क्रियापदमनुवर्तते । किं च सर्वभूतेषु ब्रह्मादिष्वनित्येषु यो नित्योऽविनाशी । विपश्चिन्मेधावी, सर्वज्ञ इत्यर्थः । अमृतोऽत एव, यो ह्यनित्योऽसर्वज्ञः स मर्त्यो दृष्टः; अयं तु तद्विपरीतत्वादमृतः । ध्रुवः अविचलः । निष्कंपस्वभाव इत्यर्थः । अनंगः स्थूलशरीररहित इत्यर्थः । स्थूले हि शरीरे शिरआद्यंगानि संभवन्ति । अशरीर इति लिंगशरीरवर्जित इत्येतत् । अशब्दः नास्य शब्दगुणः संभवति । शब्दविद्धि सन् अन्यथा शब्दात्मकः शब्दात्मकमेव विजानीयात् । न चैतदस्ति । अतोऽशब्दः । तथाऽस्पर्शः आकाशवायुभूतद्वयगुणप्रतिषेधेन शब्दादयो गंधावसानाः सर्वभूतगुणाः प्रतिषिद्धा वेदितव्याः । तत इदं सिद्धमाकाशादपि सूक्ष्मत्वम् । शब्दादिगुणबाहुल्याद्वाय्वादिषु स्थौल्यतारतम्यमुपलभ्यते । शब्दादिगुणाभावात् निरतिशयसूक्ष्मत्वं सर्वगतत्वादि चाप्रतिबंधेन धर्मजातं तर्केणापि शक्यं स्थापयितुम् । महान्, अत एव शुचिर्निरंजनः । अथवा शुचिः पावन इत्यर्थः । शुचि हि वस्तु पावनं दृष्टम् । यथा लोके वाय्वग्न्यादि । किंच य आत्मा प्रकृतः, स सर्वम् । 'इदं सर्वं यदयमात्मा' [बृ. ४. ५. ७.] इति हि वाजसनेयके । न ह्यात्मव्यतिरेकेण किंचिन्निरूप्यमाणमुपपद्यते । अत एव परमा प्रकृष्टा । काष्ठा अवसानम् । 'सा काष्ठा सा परा गतिः' [कठ. ३. ११]

इति काठके । संसारगतीनां अवसानं निष्ठा समाप्तिरित्यर्थः । स वैषुवत मध्यं सर्वस्य, सर्वान्तरश्रुतेः । विषुवत्सु वा दिवाकीर्त्येषु मंत्रेषु नित्यं प्रकाश्यं भवतीति वैषुवतः । स परमात्मा । ननु स सर्वं परमा काष्ठा स वैषुवतमित्युक्तम् । कस्मात् पुनस्तदात्मतत्त्वं विभक्तमुपलभ्यत इति । उच्यते । स परमात्मा वैभाजनं, विभक्तिर्विभजनं विवेकः आत्मनो यस्मिन् देहे क्रियते, तद्विभाजनमेव वैभाजनम् । आत्मनो विवेकोपलब्ध्यधिष्ठानं हि शरीरम् । तच्चानेकधा विभक्तम् । तदुपाध्यनुवर्तित्वात् वैभाजनं सर्वथा शुद्धमेव सर्वैर्नोपलभ्यते, किं तर्हि विभक्तो विपरीतश्चोपलभ्यते ॥ ७ ॥

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चास्य सदाचरेत् ।
दुर्दर्शं निपुणं युक्तो यः पश्येत् स मोदेत विष्टपे ॥ ८ ॥

अतस्तदुपाध्यनुवर्तिस्वभावदर्शनमविद्याख्यं हित्वा विद्यया शास्त्रजनितदर्शनेन तं यथोक्तलक्षणमात्मानमनुतिष्ठेत् । सर्वत्र सर्वस्मिन् काले । किंच न केवलमनुष्ठानमात्रमस्य । प्राध्वं बंधनं आत्मैकत्वरसप्रज्ञतां स्थिरां बाह्यैषणाव्यावृत्तरूपां सर्वसंन्यासलक्षणाम् । तद्धि बंधनं विदुषो ब्रह्मणि । एवं हि बद्धो ब्रह्मणि संसाराभिमुखो नावर्तते । तस्मात् बंधनं चास्य सदाचरेत् । तदनुष्ठानबंधने सदाचरतः किं स्यादित्युच्यते— दुर्दर्शं दुःखेन ह्येषणात्यागादिना स दृश्यत इति दुर्दर्शम् । निपुणं यस्माद्धि दुर्दर्शं तस्मान्निपुणम् । अत्यंतकौशलेन समाहितचेतसा युक्तो यः पश्येत् साक्षात् उपलभेत अहमात्मेति, स मोदेत । एवं दृष्ट्वा हर्षमानंदलक्षणं प्राप्नुयात् । विष्टपे विगतसंतापलक्षणेऽस्मिन् ब्रह्मणीत्यर्थः ॥ ८ ॥

आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिंतयन् कविः ।
आत्मानं चैव सर्वत्र यः पश्येत् ।
स वै ब्रह्मा नाकपृष्ठे विराजति ॥ ९ ॥

किंच आत्मन् पश्यन् आत्मनि पश्यन् उपलभमानः । सर्वभूतानि

सर्वाणि भूतानि । सर्वेषां भूतानां आत्मस्वरूपतामेव पश्यन्नित्यर्थः । सर्वत्रात्मानं च परम् । न मुह्येत् मोहं न गच्छेत् । न ह्यात्मैकत्वदर्शिनो मोहावतारः ; 'तत्र को मोहः' [ईश. १२] इति च मंत्रलिंगात् । कीदृग्विशिष्टमात्मदर्शनं मोहनिबर्हणमित्याह---चिंतयन् उपसंहृतकरणः कविः मेधावी सन् ध्यायमानः । न शब्दजनितदर्शनमात्रेण मोहापगमः । सर्वभूतेष्वनुप्रविष्टमेकं संव्यवहारकाले यो हि युक्तः पश्येत्, स वै ब्रह्मा ब्राह्मणः । नाकपृष्ठे सुखराशौ ब्रह्मणि । विराजति विविधं दीप्यते ॥ ९ ॥

निपुणोऽणीयान् बिसोर्णाया यः सर्वमावृत्य तिष्ठति ।
वर्षीयाँश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति ॥
स इंद्रियैर्जगतोऽस्य ज्ञाना-
दन्योऽनन्यस्य ज्ञेयात् परमेष्ठी विभाजः ।
तस्मात् कायाः प्रभवन्ति सर्वे
स मूलं शाश्वतिकः स नित्यः ॥ १० ॥

किंच निपुणः सर्ववित् अणीयान् अणुतरो बिसोर्णायाः बिसतंतोरपि । कोऽसौ, यः प्रकृत आत्मा सर्वं समस्तं जगत् आवृत्य संव्याप्य तिष्ठति । किंच वर्षीयान् वृद्धतरः स्थूलतरश्च पृथिव्याः । सर्वात्मको हि सः । ध्रुवः नित्यः सर्वं कृत्स्नमारभ्य संस्तंभनं कृत्वा । तिष्ठति वर्तते । 'येन द्यौरुग्रा पृथिवी च दृह्ला' (ऋ.) इति मंत्रलिंगात् । स सर्वेश्वरः सर्वज्ञः एको विज्ञेय इत्यर्थः । स परमात्मा इंद्रियैर्जन्यते यज्ज्ञानं जगतोऽस्य, तस्माज्ज्ञानादन्यो विलक्षणः, लौकिकज्ञानादन्य इति विशेषणाज्ज्ञानात्मक इत्येतत् सिद्धम् । 'सत्यं ज्ञानमनंतं (तैत्ति. २. ३) इति च श्रुतेः । अस्य जगत इंद्रियजन्यज्ञानादन्य इत्युक्तम् । अतश्च तद्व्यतिरिक्तं जगदिति प्राप्तम् । अतस्तन्मा भूदित्याह-- अनन्यस्य अपृथग्भूतस्य जगतः, ज्ञेयात् ज्ञातव्यात् परमार्थस्वरूपाद्वयात् परमेश्वरात् घटादेरिव मृदः । स च पर-

मेष्ठी परमे प्रकृष्टे स्वे महिम्नि हृद्याकाशेऽवस्थातुं शीलमस्येति परमेष्ठी । स्वयमेव विभाजः विभक्तो देवपितृमनुष्यादिना ज्ञातृज्ञेयज्ञानभेदेन च, यस्मात् स एव ज्ञेय आत्मा स्वतो विभजति जगदनेकधा । तस्मादेवात्मनः कायाः शरीराण्याकाशादिक्रमेण प्रभवन्ति सर्वे ब्रह्मादिलक्षणाः । अतो मूलं स जगतः "यतो वा इमानि भूतानि जायन्ते" (तैत्ति. ३–७) इति श्रुतेः । अत एव स शाश्वतिकः । यो हि पृथिव्यादिविकारः, सोऽब्रादिक्रमेण विनश्येत् , परं मूलकारणमापद्यते, सोऽशाश्वतिकोऽनित्यः । अयं चात्मा परं मूलम् । न तस्याप्यन्यन्मूलमस्ति । यतो जातो विनश्येत् , मूलमापद्यते, ततस्तद्विलक्षणत्वाच्छाश्वतिकः शश्वदेकरूपः । अतो नित्यः एकत्वमहत्त्वमूलत्वेभ्यश्च ॥ १० ॥

एवं यथोक्तमात्मानं विदितवत आध्यात्मिका योगा न्यायसहिता अप्रतिबंधेन भविष्यन्ति । मिथ्याप्रत्ययपूर्वका हि दोषाः । दोषनिमित्तश्च धर्माधर्मजनितः संसारः दोषनिवृत्तावत्यंतं विनिवर्तत इत्येतमर्थं दर्शयिष्यन्नाह——

दोषाणां तु निर्घातो योगमूल इह जीविते ।
निर्हृत्य भूतदाहान् क्षेमं गच्छति पंडितः ॥ ११ ॥

दोषाणां तु क्रोधादीनां निर्घातः विनाशः । योगा अक्रोधादयः, तन्मूलः तन्निमित्त इत्येतत् । अक्रोधादिषु हि सत्सु प्रतिद्वंद्विनो दोषा दुर्बलत्वान्निर्हन्यन्ते । इह जीवित इति दोषप्रभवकर्मनिमित्तत्वाज्जीवितस्य देहधारणावसानो दोषव्यापार इत्येतत् दर्शयति । तत्प्रतिपक्षेष्वक्रोधादिषु कथं नु नाम मुमुक्षवः प्रयत्नातिशयं कुर्युरिति योगदोषयोरितरेतरविरोधित्वे सति स्थितिगतिवत् योगेभ्यो दोषाणामेव निर्घातः, न पुनर्विपर्यय इत्येतत् कथमिति चेदुच्यते—— सम्यग्दर्शनसचिवत्वात् बलवन्तो योगाः । मिथ्याप्रत्ययसचिवत्वात् दुर्बलत्वान्निर्हन्यन्ते । निहन्तीत्येतदप्युक्तम् । बुद्धिबलवद्भ्यस्तद्धीनानां लोके निर्घातो दृष्टः ।

'अक्रोधनः' (१. १. २३) 'क्रोधादींश्च—' (१. ११. २५) इति लिंगात् । निर्हृत्य अपहृत्य । भूतदाहान् दोषेषु ह्युद्भूतेषु भूतानि दह्यन्त इव अग्निना परितप्यन्ते । अतो भूतदाहा दोषा उच्यन्ते, तान् निर्हृत्य । क्षेमं निर्भयं मोक्षं गच्छति । "आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" (तै. २-९) 'अभयं वै जनक ! प्राप्तोऽसि' (बृ. ४-२-४) 'न भवति विदुषां ततो भयम्' इत्यादिश्रुतिस्मृतिभ्यः । न दोषप्रशममात्रेणाब्रह्मविदः क्षेमप्राप्तिरित्याह—पंडित इति । ब्रह्मविदि ह्यत्र पंडितशब्दः प्रयुक्तो, न शास्त्रविदि । "तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य" [बृ. ३. ५. १] इति श्रुतेः, इहात्मविद्याधिकारात् ।

यदि तर्हि दोषनिर्हरणं पंडितोऽप्यपेक्षेत, तं प्रति न हि ब्रह्मविद्या क्षेमप्राप्तिनिमित्तम् । यदि ब्रह्मविद्यैव क्षेमप्राप्तिनिमित्तं, ब्रह्मविद्यानंतरमेव न दुःखमुपलभेत । नैष दोषः । उक्तो ह्यत्र परिहारः—सम्यग्ज्ञानबलावष्टम्भात् बलिनो योगा दुर्बलान् दोषान् मिथ्याप्रत्ययभवान् निहन्तुमलमिति । तस्मात् ब्रह्मविद्ययैव क्षेमप्राप्तिः । अन्यथा दोषनिर्हरणकर्मक्षययोरसंभावात् ।

विद्यया चेत् दोषनिर्हरणकर्मक्षयाववश्यं भवतः, तत इदमयत्नकार्यत्वात् दोषनिर्हरणस्य नित्यानुवादरूपमनर्थकं, निर्हृत्येति । न, प्रवृत्तकर्माक्षिप्तत्वात् दोषाणाम् । द्विविधानि ह्यनेकजन्मांतरकृतानि कर्माणि फलदानाय प्रवृत्तान्यप्रवृत्तानि च । यत्तु प्रवृत्तं कर्म, तेनाक्षिप्ता दोषाः कर्तुः सुखदुःखादिफलदानाय, दोषाभावे फलारंभकत्वानुपपत्तेः । न हि रागद्वेषादिशून्ये सुखदुःखे प्रवृत्तिलब्धिः कदाचित् कस्यचिदिह दृश्यते । तस्मात् फलदानाय प्रवृत्तेन कर्मणाक्षिप्ता दोषाः प्रसंगेन प्राप्तबला यत्नतो निर्हर्तव्याः । प्रवृत्त्याधिक्यहेतुत्वप्रसंगात् । अत एवेदमुक्तं— दोषाणां तु निर्घातो योगमूल इह जीविते इति । मन्दमध्यमोत्तमविद्यापेक्षत्वाच्च । ब्रह्मविदामपि न सर्वेषां समा ब्रह्मप्रतिपत्तिः, विवेकातिशयदर्शनात् कस्य-

चित् । 'एष ब्रह्मविदां वरिष्ठ' (मुं. ३. १. ४) इति च श्रुतेः । 'सम्यग्दर्शनसंपन्न' इति च स्मृतेः । मंदमध्यमब्रह्मविदपेक्षया त्यागवैराग्येंद्रियजयविधेरर्थवत्त्वं, उत्तमब्रह्मविदां त्वर्थप्राप्तमेतत् सर्वमित्यनुवादमात्रम् । 'रसोप्यस्य परं दृष्ट्वा निवर्तत' (गी. २. ५९) इति वचनात् गुणातीतलक्षणवचनेभ्यश्च । प्रवृत्तकर्माक्षिप्तदोषात् तज्जनितचेष्टाभ्यश्च भवति विदुषोऽपि देहान्तरोत्पत्तिरिति चेत्, मुक्तेषुवत् प्रवृत्तकर्माक्षिप्तत्वात् विद्वद्दोषचेष्टानां प्रवृत्तकर्मोपभोगेनैवोपक्षीणशक्तित्वात् प्रयोजनांतराभावाच्च न जन्मांतरारंभकत्वमुपपद्यते । यदप्रवृत्तं कर्म, ततः स्वावस्थमेव ब्रह्मविद्याहुताशनदग्धबीजशक्तित्वान्नालं जन्मांतरारंभाय, 'क्षीयन्ते चास्य कर्माणि' (मुं. २. २. ८) 'ज्ञानाग्निः सर्वकर्माणि' (गी. ४-३७) इत्यादिश्रुतिस्मृतिभ्यः । अतः सिद्धा पंडितस्य दोषनिर्हरणात् क्षेमप्राप्तिः ॥ ११ ॥

अथ भूतदाहीयान् दोषानुदाहरिष्यामः ॥ १२ ॥

क्रोधो हर्षो रोषो लोभो मोहो दंभो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥१३॥

तत्र क्रोधस्ताडनाक्रोशनादिहेतुरंतःकरणविक्षोभो गात्रस्वेदकंपनादिलिंगः । हर्षस्तद्विपरीतोऽभीष्टलाभजनितो बाष्परोमांचनादिलिंगः । रोषोऽनिष्टविषयो मानसो विक्रियाविशेषः । लोभः परद्रव्येप्सा स्वद्रव्याविनियोगस्तीर्थे । मोहः कार्याकार्याविवेकिता । दंभ आत्मनो धार्मिकत्वप्रकाशनम् । द्रोहः परानिष्टचिकीर्षा । मृषोद्यं अनृतवचनम् । अत्याशपरीवादौ अत्याशोऽतिमात्रमशनम् । परीवादोऽसमक्षं परदोषाभिधानम् । असूया परगुणेष्वक्षमा । काममन्यू । कामः स्त्रीव्यतिकराभिलाषः । मन्युस्तद्विघातकृत्सु द्वेषः । अनात्म्यं अनात्मवत्ता । एष क्रोधादिरयोगः, असमाधानलक्षणो ह्येष चेतसो विक्षेपप्रकारः । तेषां योगमूलो निर्घातः ॥ १२ ॥ ॥ १३ ॥

सनत्सुजातीयभाष्यम् ।

प्रथमोऽध्यायः ।

धृतराष्ट्र उवाच ॥ अनुक्तं यदि ते किंचिद्वाचा विदुर विद्यते ।
तन्मे शुश्रूषतो ब्रूहि विचित्राणि हि भाषसे ॥ १ ॥
विदुर उवाच ॥ धृतराष्ट्र कुमारो वै यः पुराणः सनातनः ।
सनत्सुजातः प्रोवाच मृत्युर्नास्तीति भारत ॥ २ ॥
स ते गुह्यान्प्रकाशांश्च सर्वान्हृदयसंश्रयान् ।
प्रवक्ष्यति महाराज सर्वबुद्धिमतां वरः ॥ ३ ॥
धृतराष्ट्र उवाच ॥ किं त्वं न वेद तद्भूयो यन्मे ब्रूयात्सनातनः ।
त्वमेव विदुर ब्रूहि प्रज्ञाशेषोऽस्ति चेत्तव ॥ ४ ॥
विदुर उवाच ॥ शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे ।
कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम् ॥ ५ ॥
ब्राह्मीं हि योनिमापन्नः सुगुह्यमपि यो वदेत् ।
न तेन गर्ह्यो देवानां तस्मादेतद्ब्रवीमि ते ॥ ६ ॥
धृतराष्ट्र उवाच ॥ ब्रवीहि विदुर त्वं मे पुराणं तं सनातनम् ।
कथमेतेन देहेन स्यादिहैव समागमः ॥ ७ ॥
वैशंपायन उवाच ॥ चिंतयामास विदुरस्तमृषिं शंसितव्रतम् ।
स च तच्चिंतितं ज्ञात्वा दर्शयामास भारत ॥ ८ ॥
स चैनं प्रतिजग्राह विधिदृष्टेन कर्मणा ।
सुखोपविष्टं विश्रान्तमथैनं विदुरोऽब्रवीत् ॥ ९ ॥
भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसः ।
यो न शक्यो मया वक्तुं त्वमस्मै वक्तुमर्हसि ॥ १० ॥
यं श्रुत्वायं मनुष्येंद्रः सर्वदुःखातिगो भवेत् ।
लाभालाभौ प्रियद्वेष्यौ यथैनं न जरान्तकौ ॥ ११ ॥
विषहेरन्भयामर्षौ क्षुत्पिपासे मदोद्भवौ ।
अरतिश्चैव तंद्री च कामक्रोधौ क्षयोदयौ ॥ १२ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि सनत्सुजातीयपर्वणि विदुरकृतसनत्सुजातप्रार्थने एकचत्वारिंशोध्यायः ॥ ४१ ॥

द्वितीयोऽध्यायः ।

वैशंपायन उवाच—

ततो राजा धृतराष्ट्रो मनीषी संपूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा पप्रच्छ बुद्धिं परमां बुभूषन् ॥ १ ॥

ॐनमः पुंसे पुराणाय पूर्णानंदाय विष्णवे । निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥ १ ॥ ॐ नमः आचार्येभ्यो ब्रह्मविद्भ्यः । सनत्सुजातविवरणं संक्षेपतो ब्रह्मजिज्ञासूनां सुखावबोधायारभ्यते । स्वतश्चिदानंदाद्वितीयब्रह्मात्मस्वरूपोप्यात्मा स्वाश्रयया स्वविषययाऽविद्यया स्वानुभवगम्यया स्वाभासया स्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मभावात्प्रच्युतोऽनात्मनि देहादावात्मभावमापन्नोऽप्राप्ताशेषपुरुषार्थः प्राप्ताशेषानर्थोऽविद्याकामकर्मपरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टपरिहृतिं चाकांक्षल्लँौकिकवैदिकसाधनैरनुष्ठितैरपि परमपुरुषार्थं स्वार्थं मोक्षाख्यमलभमानो मकरादिभिरिव रागद्वेषादिभिरितस्तत आकृष्यमाणः सुरनरतिर्यगादिप्रभेदभिन्नासु नानायोनिषु परिवर्तमानो मोमुह्यमानः संसरन्कथंचित्पुण्यवशाद्वेदोदितेनेश्वरार्थकर्मानुष्ठानेनापगतरागादिमलो नित्यादिदोषदर्शनेनोत्पन्नेहामुत्रफलभोगविरागो वेदान्तेभ्यः प्रतीयमानं ब्रह्मात्मभावं बुभुत्सुर्वेदोदितशमदमादिसाधनसंपन्नो ब्रह्मविदमाचार्यमुपेत्याचार्यानुसारेण वेदान्तश्रवणादिना ब्रह्मास्मीति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यो ब्रह्मरूपोवतिष्ठत इतीयं वेदान्तमर्यादा । एतत्सर्वं क्रमेण दर्शयति भगवान्सनत्सुजातः । धृतराष्ट्रः शोकमोहाभितप्तस्तरति शोकमात्मविदिति वेदान्तवादमुपश्रुत्य ब्रह्मविद्यया विना शोकापनयनमशक्यं मन्वानः “अनुक्तं यदि ते किंचिद्वाचा विदुर विद्यत” इति विदुरायोक्तवान् । अथोक्तश्रुतवाक्योपि परमकारुणिकः सर्वज्ञः सन्ब्रह्मविद्यां विशिष्टाधिकारिविषयां मन्वानः “शूद्रयोनावहं जातो नातोन्यद्वक्तुमुत्सह” इति शूद्रयोनिजत्वादौपनिषद्ब्र-

ह्यात्मतत्त्वज्ञाने नाहमधिकृत इत्युक्त्वा कथमेनं धृतराष्ट्रं ब्रह्मविद्यायाः परमे पदे परमात्मनि पूर्णानंदे स्वाराज्ये स्थापयिष्यामीति मन्वानश्छांदोग्योपनिषत्प्रसिद्धमितिहासं स्मृत्वा नान्यो भूमानं तमसः परं परमात्मानं दर्शयितुं शक्नुयादिति मत्वा तमेव भगवन्तं सनत्सुजातं योगबलेनाहूय प्रत्युत्थानादिभिर्भगवंतं पूजयित्वाह क्षत्ता "भगवन्संशयः कश्चित् धृतराष्ट्रस्य मानसे। यो न शक्यो मया वक्तुं त्वमस्मै वक्तुमर्हसि । यं श्रुत्वायं मनुष्येंद्रः सर्वदुःखातिगो भवेत् । लाभालाभौ प्रियद्वेष्यौ यथैनं न जरान्तकौ । विषहेत मदोन्मादौ क्षुत्पिपासे भयाभये । अरतिं चैव तंद्रीं च कामक्रोधौ क्षयोदयाविति" । भगवन्येनासौ सकलसंसारकारणधर्माधर्मविवर्जितः सर्वदुःखातिगो मुक्तो भवेत्तमस्मै धृतराष्ट्राय वक्तुमर्हसीत्युक्तवान् । तत इति । तत एतद्वाक्यसमनंतरम् । वैशंपायनो जनमेजयं प्रति कथयामास वक्ष्यमाणम् । विदुरेण सनत्सुजातं प्रतीरितमुक्तं यद्वाक्यं तत्संपूज्य संमान्य । सनत्सुजातं । सनदिति सनातनं ब्रह्मोच्यते हिरण्यगर्भाख्यम् । तस्मात्सनातनाद्ब्रह्मणो मानसाज्ज्ञानवैराग्यादिसमन्वितः सुष्ठु जात इति सनत्सुजात इत्युक्तो भगवान्सनत्कुमारः तम्। रहिते रहसि प्राकृतजनवर्जिते । महात्मा महाबुद्धिः । पप्रच्छ पृष्टवान् । बुद्धिं परमामुत्तमां पूर्णानन्दाद्वितीयविषयाम् । किमर्थं बुभूषन्भवितुमिच्छन्ब्रह्मात्मविद्ययाऽपहृतमात्मानं लब्धुमिच्छन्नित्यर्थः ॥ १ ॥

धृतराष्ट्र उवाच ॥

सनत्सुजात यदिदं शृणोमि न मृत्युरस्तीति तव प्रवादम् ।
देवासुरा ह्याचरन्ब्रह्मचर्यममृत्यवे तत्कतरन्नु सत्यम् ॥ २ ॥

तदेवाह । सनत्सुजातेति । हे सनत्सुजात यन्मृत्युर्हि नास्तीति शिष्यान्प्रत्युपदिष्टमिति विदुरः प्राह । देवासुराः पुनरमृत्यवे मृत्योरभावायामृतत्वप्राप्तये ब्रह्मचर्यमाचरन्तो गुरौ वासं कृतवन्तः । श्रूयते च छांदोग्ये । तद्धोभये देवा असुरा अनुबुबुधिरे इत्याद्यारभ्य तौ ह द्वात्रिं-

शतं वर्षाणि ब्रह्मचर्यमूषतुरित्यंतेनेंद्रविरोचनयोः प्रजापतौ ब्रह्मचर्याचरणं एकशतं ह वै वर्षाणि मघवा प्रजापतौ ब्रह्मचर्यमुवासेति च । यदि मृत्युर्नास्तीति तव पक्षस्तर्हि कथं देवासुराणाममृत्यवे ब्रह्मचर्याचरणं तत्तयोर्मृत्युसद्भावासद्भावपक्षयोः कतरन्नु सत्यं यत्सत्यं तद्वक्तुमर्हसीत्यभिप्रायः ॥ २ ॥

सनत्सुजात उवाच ॥ अमृत्युः कर्मणा केचिन्मृत्युर्नास्तीति चापरे ।
शृणु मे ब्रुवतो राजन्यथैतन्मा विशंकिथाः ॥ ३ ॥

एवं पृष्टः प्राह भगवान्सनत्सुजातः । अमृत्युरिति । केचित्पुनरविद्याधिरूढाः परमार्थतो मृत्युसद्भावं मन्यमाना वेदोक्तेन कर्मणाऽमत्युरमृतत्वं भवतीति मत्वाऽमृत्यवेऽमृतत्वप्राप्तये वेदोक्तं कर्माचरन्ति । तथाऽन्ये विषयविषान्धा विषयव्यतिरेकेण निर्विषयं मोक्षममन्यमानाः कर्मणैवामृत्युरमृतत्वं देवादिभावं वर्णयन्ति । तत्रैव च रागिगीतं श्लोकमुदाहरन्ति । अपि वृन्दावने शून्ये सृगालत्वं स इच्छति । न तु निर्विषय मोक्षं कदाचिदपि गौतमेति । तथैव परमात्मव्यतिरेकेण द्वितीयमपश्यन्तो ज्ञानकर्मभ्याममृतत्वं वर्णयन्ति । अपरे पुनरद्वितीयात्मदर्शिन आत्मव्यतिरेकेण द्वितीयमपश्यन्तो मृत्युर्नास्तीति वर्णयन्ति । हे राजन्यथैतत्पक्षयोरविरोधः संभवति तथा ब्रुवतो मे मम वाक्यं शृणु मा विशंकिथाः । मयोक्तेऽर्थे शंकां मा कृथाः ॥ ३ ॥

उभे सत्ये क्षत्रियाद्यप्रवृत्ते मोहो मृत्युः संमतो यः कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि तथाऽप्रमादममृतत्वं ब्रवीमि ॥ ४ ॥

कथमित्याह । उभे इति । ये पूर्वोक्ते मृत्योरस्तित्वनास्तित्वे उभे । हे क्षत्रियाऽऽद्यप्रवृत्ते । य आदिसर्गस्तमारभ्यप्रवृत्ते । अथवा क्षत्रियाद्य क्षत्रियप्रधान । प्रवृत्ते वर्तमाने । कथं पुनरुभयोः परस्परविरुद्धयोरस्तित्वनास्तित्वयोः सत्यत्वमिति तत्राह । मोहो मृत्युः संमतो यः कवीनामिति । भवेदयं विरोधोऽस्तित्वनास्तित्वयोर्यदि परमार्थरूपो मृत्युः स्यात्कः

तर्हि मृत्युः । यो मोहो मिथ्याज्ञानम् । अनात्मन्यात्माभिमानः स मृत्युः केषांचित्कवीनां मतः । अहं तु न तथा मृत्युं ब्रवीमि । कथं तर्हि । प्रमादं मृत्युमहं ब्रवीमि । प्रमादः प्रच्युतिः स्वाभाविकब्रह्मभावात् । तं प्रमादं मिथ्याज्ञानस्यापि कारणमात्मानवधारणमात्माज्ञानं मृत्युं जननमरणादिलक्षणं सर्वानर्थबीजमहं ब्रवीमि । तथा च सदाऽप्रमादं स्वाभाविकस्वरूपेणावस्थानममृतत्वं ब्रवीमि । तथा च श्रुतिः । स्वरूपावस्थानमेव मोक्षपदं दर्शयति । परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति । तथाऽनुगीतासु स्पष्टमाह––एको यज्ञो नास्ति ततो द्वितीयो यो हृच्छयस्तमहमनुब्रवीमीति । यतः स्वरूपावस्थानलक्षणो मोक्षः । अत एव चतुर्विधक्रियाफलविलक्षणत्वादेव न कर्मसाध्यममृतत्वं नापि समुच्चिताभ्यां ज्ञानकर्मभ्यामिति । अमृत्युः कर्मणा केचिदित्येतदनुपपन्नमेवेत्युक्तं भवति । वक्ष्यति चास्य पक्षस्य स्वयमेव निराकरणम्— “ कर्मोदये कर्मफलानुरागास्तत्रानु ते यान्ति न तरन्ति मृत्युम् । ज्ञानेन विद्वांस्तेज अभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पंथा ” इति ॥ ४ ॥

प्रमादाद्वै असुराः पराभवन्न प्रमादाद्ब्रह्मभूता भवंति ।
नैव मृत्युर्व्याघ्र इवात्ति जंतून्न ह्यस्य रूपमुपलभ्यते हि ॥ ५ ॥

कथमेतदवगम्यते प्रमादो मृत्युरप्रमादोऽमृतत्वमिति तत्राह । प्रमादादिति । प्रमादात्स्वाभाविकब्रह्मभावप्रच्यवनादनात्मनि देहादावात्मभावादसुरा विरोचनप्रभृतयः पराभवन्पराभूताः । तथा च श्रुतिः । अनुपलभ्यात्मानमित्यारभ्य देवा वा असुरा वा ते पराभविष्यन्तीत्यंतेन । तथाऽप्रमादात्स्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मज्ञानावस्थानाद्ब्रह्मभूताः सुराश्चेंद्रादयः । तथा च श्रुतिः । तं देवा आत्मानमुपासते तस्मात्तेषां च सर्वे लोका आप्ताः सर्वे च कामा इत्यादिना । अथवाऽसुषु प्राणेष्विंद्रियेष्वेव रमन्त इत्यसुराः । अनात्मविदो वैषयिकाः प्राणिनोऽसुराः । ते स्वाभाविकब्रह्मभावमतिक्रम्यानात्मनि देहादावात्मभावमापन्नाः पराभवन्ति तिर्य-

गादियोनिमापन्नाः । तथा च बह्वृचब्राह्मणोपनिषत् । तस्मान्न प्रमाद्ये-त्तन्नातीयादिति । तथा स्वस्मिन्नात्मन्येवोपरमन्त्यात्मविदः सुराः । तथा चोक्तम् । "आत्मन्येव रतिर्येषां स्वस्मिन्ब्रह्मणि चाचले । ते सुरा इति विख्याताः सूरयश्च सुरा मता" इति । अप्रमादात्ते स्वाभाविकब्रह्मात्मनावस्थानाद्ब्रह्मभूता निवृत्तमिथ्याज्ञानतत्कार्या ब्रह्मैव संबभूवुरित्यर्थः । नन्वन्य एव सर्वजंतूनामुपसंहारको मृत्युः प्रसिद्धः कथमुच्यते प्रमादं वै मृत्युमहं ब्रवीमीति तत्राह । नैव मृत्युरत्ति भक्षयति प्राणिनः । यदि भक्षयेत्तर्हि व्याघ्र इवास्य रूममुपलभ्येत न चोपलभ्यते तस्मान्नास्त्येव मृत्युः ॥ ५ ॥

यमं त्वेके मृत्युमतोन्यमाहुरात्मावासममृतं ब्रह्मचर्यम् ।
पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामशिवोऽशिवानाम् ॥

ननूपलभ्यते सावित्र्युपाख्याने अथ सत्यवतः कायादिति । कथमुच्यते नास्य रूपमुपलभ्यत इति तत्राह । यममिति । सत्यं उपलभ्यते तथापि न साक्षान्मृत्युः । कस्तर्हि । यः प्रमादाख्योऽज्ञानमृत्युः स एव साक्षाद्विनाशहेतुत्वात् । तथाऽज्ञानस्य विनाशहेतुत्वं श्रूयते । इह चेदवे-दीदथ सत्यमस्ति न चेदवेदीन्महती विनष्टिरिति । बृहदारण्यके प्रमादा-ख्यस्याज्ञानस्य साक्षान्मृत्युत्वं दर्शितम् । मृत्युर्वै तमो ज्योतिरमृतमिति । यस्मात्प्रमाद एव साक्षात्सर्वानर्थबीजं तस्मान्न प्रमाद्येत । चित्सदानन्दा-द्वितीयब्रह्मभावेनैवावतिष्ठेतेत्यर्थः । तथा चाज्ञानस्य बन्धहेतुत्वं विज्ञानस्य मोक्षहेतुत्वमुक्तं भगवता । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तव इति । यस्मात्प्रमाद एव मृत्युः प्रमादोऽमृतत्वमत एव न कर्मसाध्यममृतत्वम् । नापि कर्मप्राप्यं नित्यसिद्धत्वात् । नित्यप्राप्तत्वाच्च । तथा च श्रुतिः । एष नित्यो महिमा ब्राह्मणस्येति । तथा तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति ज्ञानस्यैव मोक्षसाधनत्वं दर्शितम् । तथा च ज्ञानं चक्षुषा गृह्यत

इति । वक्ष्यति च भगवाञ्ज्ञानस्यैव मोक्षसाधनत्वम् । अंतवन्तः क्षत्रियेति । एवं मृत्युं जायमानं विदित्वेति च । तथा च मोक्षधर्मे "कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिन इति" ॥ ज्ञानं विशिष्टं न हि यज्ञा इति च । तथा च ज्ञानस्यैव मोक्षसाधनत्वं मन्यमानः सर्वकर्मपरित्यागमाह भगवान्वेदाचार्यो मनुः । यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवानिति ॥ तथाह भगवान्परमेश्वरः । "ज्ञानं तु केवलं सम्यगपवर्गफलप्रदम् । तस्माद्भवद्भिर्विमलं ज्ञानं कैवल्यसाधनम् ॥ विज्ञातव्यं प्रयत्नेन श्रोतव्यं दृश्यमेव च । एकः सर्वत्रगो ह्यात्मा केवलश्चितिमात्रकः । आनंदो निर्मलो नित्यः स्यादेतत्सांख्यदर्शनम् । एतदेव परं ज्ञानमेतन्मोक्षोऽनुगीयते । एतत्कैवल्यममलं ब्रह्मभावश्च वर्णितः । आश्रित्यैतत्परं तत्त्वं तन्निष्ठास्तत्परायणाः ॥ गच्छन्ति मां महात्मानं यतन्तो विश्वमीश्वरमिति" । नन्वेवं चेत्तर्हि कर्माणि नानुष्ठेयानि । न नानुष्ठेयानि किं तु ज्ञानिना नानुष्ठेयानि । तथा चाह भगवान् । यस्त्वात्मरतिरेव स्यादिति । तथा च ब्रह्मपुराणे कावषेयः किमद्य नश्चाध्ययनेन कार्यमिति । तथा च बह्वृचब्राह्मणोपनिषत् । किमर्थं वयमध्येष्यामहे । तथा च बृहदारण्यके विदुषः कर्मसंन्यासं दर्शयति । एतद्ब्रह्म वैतदिति । तथा लैंगे । ज्ञानामृतेन तृप्तस्य कर्मणा प्रजया च किमिति । तथा चाथर्वणी श्रुतिः । नैतद्विद्वानिति । केन तर्ह्यनुष्ठेयानि । अज्ञानिनाऽऽरुरुक्षुणा सर्वकर्माणि सदाऽनुष्ठेयानि । न ज्ञानिना । तथा चाह भगवान् । लोकेऽस्मिन्द्विविधा निष्ठेति । आरुरुक्षोर्मुनेर्योगमिति । तथा चाह भगवान्सत्यवतीसुतः— "द्वाविमावथ पंथानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्त्यैव व्यवस्थितः" ॥ नन्वेवमारुरुक्षुणापि कर्माणि नानुष्ठेयानि कर्मणां बंधहेतुत्वात्तथा चोक्तं भगवता "कर्मणा बध्यते जंतुर्विद्यया च विमुच्यते' । इति । सत्यं तथापीश्वरार्थतया फलनिरपेक्षमनुष्ठीयमानानि न बंधुहेतूनि ।

तथा चोक्तं भगवता । यज्ञार्थात्कर्मण इति । किमर्थं तर्हि तेषामनुष्ठानं सत्त्वशुद्ध्यर्थमिति ब्रूमः । तथा चोक्तं भगवता । कायेन मनसा बुद्ध्येति । यज्ञो दानं तपश्चैव पावनानि मनीषिणामिति । गतसंगस्येति च । तथा च । " कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तत " इति । ननु कर्मणामपि विद्यासहितानां मोक्षहेतुत्वं श्रूयते । विद्यां चाविद्यां च यस्तद्वेदोभयमिति । तथा च मनुः " तपो विद्या च विप्रस्य निःश्रेयसकरे उभे " इति । नैतत् । पूर्वापराननुसंधाननिबंधनोऽयं भ्रमः । तथा हि विद्यां चाविद्यां च यस्तद्वेदोभयं सहेत्युक्त्वाऽविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति विद्याविद्ययोर्भिन्नविषयत्वेन समुच्चयाभावः श्रुत्यैव दर्शितः । इदमेव स्पष्टमाह भगवान्मनुः । " तपो विद्या च विप्रस्य निःश्रेयसकरावुभौ " इत्युक्ते समुच्चयाशंका मा भूदिति । " तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुत " इति तपसो नित्यनैमित्तिकलक्षणस्य कर्मणः श्रुतावेव विनियोगं दर्शितवान् । तथा ईशावास्यमिदं सर्वमिति सर्वस्य तावन्मात्रत्वमुक्त्वा तदात्मभूतस्य सर्वस्य तावन्मात्रत्वं पश्यतस्तद्दर्शनेनैव कृतार्थस्य साध्यान्तरमपश्यतस्त्यागेनैव भुंजीथेति त्यागेनैवात्मपरिपालनमुक्त्वाऽतदात्मवेदिनः केन तर्ह्यात्मपरिपालनमित्याशंक्याह " कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे " । एवं सर्वभूते त्वयि नरमात्राभिमानिन्यज्ञेऽविद्यानिमित्तोत्तरपूर्वाघयोरश्लेषविनाशाभावात्कुर्वन्नेव सदा यावज्जीवं कर्म जिजीविषेदित्यज्ञस्य नरमात्राभिमानिनः शुद्ध्यर्थं यावज्जीवं कर्माणि दर्शयति । अत एभिरपि वाक्यैः कर्मणां शुद्धिसाधनत्वमेवावगम्यते । न मोक्षसाधनत्वम् । यद्यप्युक्तं " तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च " इति चशब्दात्समुच्चयोऽवगम्यते तदपि प्रसिद्धश्रुतिविनियोगानुसारेण वेदितव्यम् । तथा चानुगीतासु स्पष्टमाह भगवान्कर्मणां शुद्धिद्वारेणैव मोक्षसाधनत्वं नित्यनैमित्तिकैरिति ॥ वक्ष्यति भगवान्सनत्सुजातः शुद्धिद्वारेणैव मोक्षसा-

धनत्वं तदर्थमुक्तं तप एतदिति । ननु कथं सत्त्वशुद्धिद्वारेणैव मोक्षसाधनत्वं विनापि सत्त्वशुद्धिं ज्ञानेनैव मोक्षः सिध्यत्येव । सत्यम् । ज्ञानेनैव मोक्षः सिध्यति किं तु तदेव ज्ञानं सत्त्वशुद्धिं विना नोत्पद्यत इति वयं ब्रूमः । तथा चोक्तम् । " ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः " इति । तथा चाह याज्ञवल्क्यः-- " तथाप्यपक्वकरण आत्मज्ञानस्य न क्षमः " इति । विशुद्धसत्त्वस्यैव नित्यानित्यवस्तुविवेकादिद्वारेण मोक्षसाधनज्ञाननिष्पत्तिरस्ति । तस्मात्सत्त्वशुद्ध्यर्थं सर्वेश्वरमुद्दिश्य सर्वाणि वाङ्मनःकायलक्षणानि श्रौतस्मार्तानि कर्माणि समाचरेत् । यावद्विशुद्धसत्त्व इहामुत्रफलभोगविरागो योगारूढो भवति तावत्कर्माणि कुर्वीत । तथा चाह भगवान्-- " आरुरुक्षोर्मुनेर्योगं " इति । " संन्यासस्तु महाबाहो दुःख माप्तुमयोगतः " इति ॥ तस्य लक्षणमुक्तं यदा हि नेन्द्रियार्थेष्विति । यस्तु पुनरेवं यज्ञदानादिना विशुद्धसत्त्व इहामुत्रफलभोगविरागो योगारूढो भवति तस्य शम एव कारणं न कर्मेति । तथा चोक्तं-- " योगारूढस्य तस्यैव शमः कारणमुच्यते " । तस्माच्छमदमादिसाधनसंपन्नः श्रवणादिसमन्वितो योगी युंजीत सततमात्मानं रहसि स्थित इति । कथं तर्हि योगानुष्ठानं कार्यम् । शृणु । समे देशे शर्करावह्निवालुकाशब्दजलाशयादिवर्जिते मनोनुकूले शुचौ नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं स्थिरमासनं प्रतिष्ठाप्य तत्रोपविश्यासनं स्वस्तिकादि बद्ध्वा समं कायशिरोग्रीवं धारयन्नचलं विश्वादीन्विश्वतैजसप्राज्ञाञ्जाग्रत्स्वप्नसुषुप्तिक्रमेण कार्यकारणविनिर्मुक्ते पूर्णात्मन्युपसंहृत्य पूर्णात्मना स्थित्वा । " ध्यायेत्पुरीशयं देवं पूर्णानंदं निरंजनम् । अपूर्वानपरं ब्रह्म नेति नेत्यादिलक्षणम् । अशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनावस्थितं परं परमात्मानं नमो नम इति । तथा चोक्तं ब्रह्मविद्भिः । विविक्तदेशमाश्रित्य ब्राह्मणः शुद्धचेतसा । भावयेत्पूर्णमेकाख्यं हृद्याकाशमयं विभुम् । तथा चोक्तं ब्राह्मे । " तस्माद्विमोक्षाय कुरु प्रयत्नमिति " । एवं युंजन्सदात्मानं परमात्मत्वेन

यदा साक्षाद्विजानाति तदा निरस्ताज्ञानतत्कार्यो वीतशोकः कृतकृत्यो भवति। तथा च बृहदारण्यके। आत्मानं चेद्विजानीयादिति। तथा ईशावास्ये। यस्मिन्सर्वाणि भूतानीति। तथा च कठवल्लीषु तं दुर्दर्शमिति। तथा च कावषेयगीतासु। आत्मज्ञः शोकसंतीर्णो न बिभेति कुतश्चनेति। तथा च मनुः। सर्वेषामपि चैतेषामात्मज्ञानं परं मतमिति। तथा चाह भगवान्। एतद्बुद्ध्वा बुद्धिमान्स्यात्। यस्मात्तद्विज्ञानादेव परमपुरुषार्थप्राप्तिस्तस्मात्तमेव परमानंदात्मानमात्मत्वेन जानीयादयमहमस्मीति। न किंचिदन्यच्चिंतयेत्। तथा च श्रुतिः। तमेव धीरो विज्ञायेति। तथा चाह भगवान्। संकल्पप्रभवान्कामानिति। एवं प्रसंगात्सर्वशास्त्रार्थः संक्षेपतो दर्शितः।

अथेदानीं प्रकृतमनुसरामः। यस्मात्प्रमाद एव सर्वानर्थबीजं तस्मात्प्रमादमेवाहं मृत्युं ब्रवीमि न यमम्। यमं तु पुनरेके विषयविषांधा अविद्याधिरूढाः स्वात्मव्यतिरेकेण द्वितीयं पश्यन्ति मृत्युम्। अतो मयोक्तान्मृत्योः प्रमादाख्यादन्यं परं वैवस्वतमाहुः। आत्मावासमात्मनि बुद्धौ वसतीत्यात्मावासस्तम्। तथा च मनुः "यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः। तेन चेदविवादस्ते मा गंगां मा कुरून्व्रज"। अमृतममरणधर्माणं ब्रह्मचर्यं ब्रह्मणि स्वात्मभूते चरमाणं ब्रह्मनिष्ठमित्यर्थः। श्रूयते कठवल्लीषु– कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हतीति। पितृलोके राज्यमनुशास्तीति। शिवः सुखप्रदः शिवानां पुण्यकर्मणामशिवोऽसुखप्रदः। अशिवानां पापकर्मणाम्॥ ६॥

आस्यादेष निःसरते नराणां क्रोधः प्रमादो लोभरूपश्च मृत्युः।
अहंगतेनैव चरन्विमार्गान्न चात्मनो योगमुपैति कश्चित्॥ ७॥

एवं तावत्प्रमाद एव मृत्युरिति मृत्युरूपं निर्धारितम्। इदानीं तस्यैव कार्यात्मनावस्थानं दर्शयति। आस्यादिति। यः प्रमादाख्यो मृत्युः स प्रथममास्यात्मना परिणमते। आस्योऽभिमानात्मकोऽहंकारः। तथा

चोक्तं– "सर्वार्थाक्षेपसंयोगादसुधातुसमन्वयात् । आस्य इत्युच्यते घोरो ह्यहंकारो गुणो महान्" । एवमहंकारात्मना स्थित्वा ततोऽहंकारान्निः-सरति निर्गच्छति कामात्मना ततः कामः स्वविषये वर्तमानः प्रतिहत-क्रोधः प्रमादो मोहरूपश्च भवति । ततोऽहंगतेनाहंस्वरूपमापन्नेनाहंका-राद्यात्मना स्थितेनाज्ञानेन तदात्मभावमापन्नो ब्राह्मणोऽहं क्षत्रियोऽहं वैश्योऽहं शूद्रोऽहं स्थूलोऽहं कृशोऽहममुष्य पुत्रोऽस्य नप्तेत्येवमात्मको रागद्वेषादि-समन्वितः चरन्विमार्गाञ्श्रौतस्मार्तविपरीतान्मार्गान्न चात्मनः परमात्मनो योगं समाधिलक्षणमुपैति कश्चिदपि । अथवाऽविद्याकामकर्माणि संसारस्य प्रयोजकभूतानि । पूर्वत्र मोहो मृत्युः संमत इत्यनेनान्यथाग्रहणात्मिकाऽ-विद्या दर्शिता । उत्तरत्र कर्मोदय इति कर्म वक्ष्यति । अथेदानीं कामोऽ-भिधीयते । अस्यन्ते शिष्यन्तेऽनेन संसारे प्राणिन इत्यास्यः कामः । अथवा आस्यवदास्यं सर्वजग्धृत्वात् । तथा चोक्तं भगवता "काम एष क्रोध एष" इति । एष मृत्युरास्यात्मना स्थित्वा ततः क्रोधात्मना विपरिणमते उक्तं च "कामात्क्रोधोऽभिजायत" इति । ततोऽहंगते-नाहंकारापन्नेनाज्ञानेनाहंकारफलकारूढेन चिदाभासेन चरन्विमार्गान्न वात्मनो योगमुपैति कश्चित् ॥ ७ ॥

ते मोहितास्तद्वशे वर्तमाना इतः प्रेतास्तत्र पुनः पतन्ति ।
ततस्तान्देवा अनु परिप्लवन्ते अतो मृत्युर्मरणादभ्युपैति ॥ ८ ॥

किं च । त इति । ते अहंकारादिरूपेण स्थितेनाज्ञानेन मोहिता देहा-द्यात्मभावमापादिताः । तद्वशे अहंकाराद्यात्मना परिणतप्रमादाख्यमृत्युवशे वर्तमानाः । अतोऽस्मात्प्रेता धूमादिमार्गेण गत्वा तत्र परलोके यावत्सं-पातमुषित्वा पुनराकाशादिक्रमेण देहग्रहणाय निष्पतन्ति । श्रूयते च । तस्मिन्यावत्संपातमुषित्वाऽथैनमेवाध्वानं पुनर्निवर्तन्ते । ततोऽनंतरं पुन-र्देहग्रहणावस्थायां तं देवा इद्रियाण्यनुसृत्य कर्माणि परि समंतात्प्लवन्ते समंततः परिवर्तन्त इत्यर्थः । अतोऽस्मात्कारणादिंद्रियगुणानुस्मरणान्मरणं

यान्ति । ततो मरणाज्जन्माभ्युपैति ततो मृत्युम् । एवं जन्ममरणप्रबंधारूढो न कदाचिन्मुच्यत इत्यर्थः । आत्माज्ञाननिमित्तत्वात्संसारस्य यावत्परमात्मानमात्मत्वेन साक्षान्न जानाति तावदयं तापत्रयाभिभूतो मकरादिभिरिव रागद्वेषादिभिरितस्ततः समाकृष्यमाणो मोमुह्यमानोऽवतिष्ठत इत्यर्थः । प्रत्यगज्ञानजननेषु सर्वद्वैताकाराज्ञानपरिणामेषु स्वस्याभासस्तस्मिन्फलके समारूढः साक्षित्वेश्वरत्वकारणत्वान्तर्यामित्वरूपतामात्मा गच्छति । स च प्रपंचस्थोऽपि वस्तुतो न तेन संबध्यते । असंगागमविरोधात् । तस्मादीश्वरत्वादिकं कल्पितम् । उक्तं हि " अविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवतीति " । तथा च तद्बोधादेव तद्धतिरित्यविरुद्धमित्यर्थः । उक्तं च सुरेश्वराचार्यैः " स्वाभासफलकारूढस्तदज्ञानजभूमिषु । तत्स्थोऽपि तदसंबद्ध ईश्वराद्यात्मतां गतः " ॥ ८ ॥

कर्मोदये कर्मफलानुरागास्तत्रानु ते यान्ति न तरन्ति मृत्युम् ।
सदर्थयोगानवगमात्समन्तात्प्रवर्तते भोगयोगेन देही ॥ ९ ॥

एवं तावदविद्याकामयोर्बंधहेतुत्वमभिहितम् । अथेदानीं कर्मणां बंधहेतुत्वमाह । कर्मेति । अमृत्युः कर्मणा केचिदिति । कर्मणाऽमृतत्वं भवतीति यन्मतान्तरन्यस्तं तन्निराकरोति । न केवलं कर्मणाऽमृतत्वं भवति । अपि तु कर्मोदये कर्मणामुत्पत्तौ कर्मफलानुरागाः सन्तस्तत्र तस्मिन्कर्मफलेऽनुयान्ति । यस्मात्तत्रैवानुयान्त्यतो न तरन्ति मृत्युम् । पुनः पुनर्ज- संसारे परिवर्तन्त इत्यर्थः । कस्मात्पुनः कर्मोदये कर्मफलानुरागास्तत्रैव परिवर्तन्ते । सदर्थयोगानवगमात् । सदर्थेन योगः सदर्थयोगः सदर्थेन परमात्मना योगस्तस्य सदर्थयोगस्य एकत्वस्यानवगमात् । स्वात्मनश्चित्सदानंदाद्वितीयब्रह्मतत्त्वभावानवगमादित्यर्थः । समंतात्समंततः प्रवर्तते भोगयोगेन विषयरसबुद्ध्या देही । यथाऽन्धो निम्नोन्नतकटकस्थलादिषु परिभ्रमत्येवमसावपि सर्वत्र विषयाकांक्षया परिभ्रमति ॥ ९ ॥

तद्वै महामोहनमिंद्रियाणां मिथ्यार्थयोगेऽस्य गतिर्हि नित्या ।
मिथ्यार्थयोगाभिहतांतरात्मा स्मरन्नुपास्ते विषयान्समंतात् ॥ १० ॥

किं च तदिति । यद्रागाभिभूतस्येंद्रियाणां विषयेषु प्रवर्तनं तन्महामोहनम् । एतदुक्तं भवति । यस्य विषयेषु न वास्तवबुद्धिस्तस्येंद्रियाणि विषयेषु न प्रवर्तन्ते । तस्य विषयेषु प्रवृत्त्यभावादात्मन्येव प्रवृत्तिः । ततश्च मोहनिवृत्तिः । यस्य विषयेषु वास्तवबुद्धिस्तस्येंद्रियाणां पराग्भूतेषु विषयेषु प्रवृत्तत्वान्न स इमं सदद्वितीयं प्रत्यग्भूतं परमात्मानमात्मत्वेन साक्षाज्जानाति । तथा चोक्तं — स्त्रीपिंडसंपर्ककलुषितचेतसो विषयविषांधा ब्रह्म न जानन्तीति । ततश्च महामोहेन पुनःपुनर्विषयेषु प्रवृत्तिः । तथा चाह मनुः— " न जातु कामः कामानामुपभोगेन शाम्यतीति " । ततश्च मिथ्यार्थैरविद्याकल्पितैः शब्दादिविषयैर्भोगो भवति तस्मिन्मिथ्यार्थयोगेऽस्य देहिनो गतिः संसारगतिर्नित्या नियता । प्रसिद्धं ह्येतत् । स्वात्मभूतं परमात्मानमनवगम्य विषयेषु प्रवर्तमानाः पराग्भूतास्तिर्यगादियोनिं प्राप्नुवन्तीति । तथा च बह्वृचब्राह्मणोपनिषदि । या वै ता इमाः प्रजाः प्रजायन्त इति । वक्ष्यति च कामानुसारी पुरुषः कामाननु विनश्यतीति । कस्मात्पुनर्मिथ्यार्थयुक्तस्य गतिर्हि नित्येति तत्राह—मिथ्यार्थयोगाभिहतान्तरात्मा मिथ्याभूतविषयसंयोगेनाभिहतान्तरात्मा यस्य सोऽभिहतस्वाभाविकब्रह्मभावः स्मरञ्शब्दादिविषयान्तानेवोपास्ते न परमात्मानं समंतात्समंततः ॥ १० ॥

अभिध्या वै प्रथमं हन्ति चैनं कामक्रोधौ गृह्य चैनं च पश्चात् ।
एतान्बालान्मृत्यवे प्रापयन्ति धीरास्तु धैर्येण तरन्ति मृत्युम् ॥ ११ ॥

तत्किमिति चेत्तत्र यद्भवति तच्छृणु । अभिध्येति । अभिध्या विषयध्यानं प्रथमं हन्ति विनाशयति स्वरूपात्प्रच्युतं करोति । ततो विषयध्यानाभिहतमेनं विषयरससंनिधौ शीघ्रं प्रतिगृह्य कामश्च हन्ति । ततः कामाभिहतमेनं प्रतिगृह्य क्रोधश्च हन्ति । तदेतेऽभिध्यादय एतानभिध्या-

कामक्रोधवशंगतान्बालानविवेकिनो मूढान्मृत्यवे प्रापयन्ति क्षिपन्ति । श्रूयते कठवल्लीषु 'परांचि खानीति' । धीरास्तु पुनर्धैर्येण विषयाञ्जित्वा परमात्मानमात्मत्वेनावगम्य तरन्ति मृत्युम् । श्रूयते च "निचाय्य तं मृत्युमुखादिति" ॥ ११ ॥

योऽभिध्यायन्नुत्पतिष्णून्निहन्यादनाचारेणाप्रतिबुध्यमानः ।
स वै मृत्युं मृत्युरिवात्ति भूत्वा ह्येवं विद्वान्योऽभिनिहन्तीति कामान् ॥ १२ ॥

कथं पुनर्धीरास्तु धैर्येण विषयाञ्जित्वा मृत्युं तरन्तीत्यत आह य इति । योऽभिध्यायन्ननित्याशुचिदुःखानुविद्धतया उत्पतिष्णूनुत्पत्योत्पत्य पतन्तीत्युत्पतिष्णवो विषयास्तान्निहन्यात्परित्यजेत् । अनाचारेणानादरेण । अमेध्यदर्शन इवाप्रतिबुध्यमानः पुनःपुनरचिंतयन्स वै पुरुषो मृत्योरेव मृत्युर्भूत्वा मृत्युरिवात्ति मृत्युम् । उक्तं च "विषयप्रतिसंहारं यः करोति विवेकतः । मृत्योर्मृत्युरिति ख्यातः स विद्वानात्मवित्कविः" इति ॥ १२ ॥

कामानुसारी पुरुषः कामाननु विनश्यति ।
कामान्व्युदस्य धुनुते यत्किंचित्पुरुषो रजः ॥ १३ ॥

एवमनित्यादिरूपेण विद्वान्सन्ननादरादिनाऽभिहन्ति कामान् । यः पुनरनादरादिना नाभिहन्ति स किं करोतीत्याह । कामेति । यस्तु पुनर्विषयाभिध्यानेन कामानुसारी भवति स कामाननु विनश्यतीति । कामविषये नष्टे कामाननु कामैः सह विनश्यति । अनित्याः कामगणाः । प्रतिक्षणं विनाशान्विताः । तद्वत्कामी विशीर्णो भवति । यस्तु पुनर्विषयदोषदर्शनेन कामान्परित्यजति स कामान्व्युदस्य परित्यज्य विवेकबुद्ध्या धुनुते ध्वंसयति । यत्किंचिदिह जन्मनि जन्मांतरे चोपार्जितं रजः पुण्यपापादिलक्षणं कर्म तत् ध्वंसयति ॥ १३ ॥

देहोऽप्रकाशो भूतानां नरकेऽयं प्रदृश्यते ।
गृह्यन्त इव धावन्ति गच्छन्तः श्वभ्रमुन्मुखाः ॥ १४ ॥

कथं पुनरस्य देहस्य काम्यमानस्य हेयत्वमित्यहि । देह इति । योऽयं भूतानां देहो दृश्यते सोऽप्रकाशोऽविद्याकल्प्यमानः केवलं नरकः श्लेष्मासृक्पूयविण्मूत्रकृमिपूर्णत्वात् । तथा चाह मनुः "अस्थिस्थूणं स्नायुबद्धं मांसक्षतजलेपनम् । चर्मावनद्धं दुर्गंधि पूर्णं मूत्रपुरीषयोः । जराशोकसमाविष्टं रोगायतनमातुरम् । रजस्वलमनित्यं च भूतावासमिमं त्यजेत्' इति । एवमत्यंतबीभत्सितं स्त्र्यादिदेहं कमनीयबुद्ध्या गृह्णन्तोऽभिकांक्षन्त एव धावन्त्यनुधावन्ति । गच्छन्तः श्वभ्रमुन्मुखाः । यथान्धाः कूपादिकं विवेक्तुमशक्ताः कूपादिषून्मुखाः पतन्त्येवं स्त्र्याद्यभिकांक्षन्तो विषयविषान्धा उन्मुखाः पतन्ति नरकेष्वित्यर्थः ॥ १४ ॥

अमन्यमानः क्षत्रिय किंचिदन्यन्नाधीयते तार्ण इवास्य व्याघ्रः ।
क्रोधाल्लोभान्मोहभयान्तरात्मा स वै मृत्युस्त्वच्छरीरे य एषः ॥ १५ ॥

य एवं गृह्णन्ति त एव धावन्ति तेषां देहो निरर्थक इत्याह । अमन्यमान इति । यः स्त्र्यादिकमभिकांक्षन्ननुधावति स विषयविषांधस्तद्व्यतिरिक्तं स्वात्मभूतं परमात्मानममन्यमानोऽप्रतिबुध्यमानो नाधीयते । तद्विषयमध्यात्मशास्त्रं नाधिगच्छति । तस्यास्य विषयविषांधस्य षडंगवेदविदुषोऽपि देहस्तृणनिर्मितव्याघ्र इव निरर्थको भवति । तथा चाह भगवान्वसिष्ठः—"चतुर्वेदोऽपि यो विप्रः सूक्ष्मं ब्रह्म न विंदति । वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः" । न केवलं देहो निरर्थकः । य एवंभूतः स एव मृत्युरित्याह—क्रोधाल्लोभान्मोहभयान्तरात्मा । क्रोधलोभाभ्यां मोहहेतुभ्यां मोहभयसमन्वितेऽन्तरात्मा त्वच्छरीरे य एष दृश्यते तवात्मा स एष तव मृत्युः । य पुनरजितेंद्रियः क्रोधलोभादिसमन्वितो विषयेषु प्रवर्तते स एष मृत्युः । विनाशहेतुत्वात् । उक्तं च "आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः" इति ॥ १५ ॥

एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः ।
विनश्यते विषये तस्य मृत्युर्मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥ १६ ॥

तर्हि केनोपायेन मृत्योर्विनाश इत्याह । एवमिति । एवं क्रोधादिरूपेण जायमानं प्रमादाख्यं मृत्युं जननमरणादितर्वानर्थबीजं विदित्वा क्रोधादीन्भूतदाहीयान्दोषान्परित्यज्याक्रोधादीन्संपाद्य ज्ञानेन चित्सदानंदाद्वितीयब्रह्मवर्त्मनाऽवतिष्ठन्न बिभेति मृत्योः । तथा च श्रुतिः । आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति । कस्मात्पुनर्ज्ञानेन तिष्ठन्न बिभेति मृत्योरित्याह । विनश्यते तस्य ज्ञानिनो विषये गोचरे परमात्मनि साक्षात्क्रियमाणे प्रमादाख्योऽज्ञानमृत्युः । यथा मृत्योर्विषयं संसारमागतो मृत्युनाभिभूतो नष्टो भवति मर्त्य एवमात्मवेदिनोऽपि विषयमागतोऽज्ञानमृत्युर्नष्टो भवति । उक्तं च ज्ञानमहोदधौ-- " ज्ञानसंस्थानसद्भावो ज्ञानाग्निर्ज्ञानवज्रभृत् । मृत्युं हन्तीति विख्यातः स वीरो वीतमत्सरः " इति ॥ १६ ॥

धृतराष्ट्र उवाच-

यानेवाहुरिज्यया साधुलोकान्द्विजातीनां पुण्यतमान्सनातनान् ।
तेषां परार्थं कथयन्तीह वेदा एतद्विद्वान्नैति कथं नु कर्म ॥ १७ ॥

एवं तावत्कर्मोदय इत्यादिना कर्मणां बंधहेतुत्वमुक्त्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योरिति ज्ञानस्यैव मोक्षसाधनत्वमभिहितम् । तत्र चोदयति धृतराष्ट्रः । यानिति । ननु कथं कर्मणां बंधहेतुत्वं यावता यानेवाहुरिज्यया ज्योतिष्टोमादिना साधुलोकान्साधुभिर्धार्मिकैरारूढान्पुण्यतमान्पवित्रान् । सनातनान्नित्यान् । तेषां ब्रह्मलोकपर्यंतानां परार्थं परमपुरुषार्थत्वं कथयन्ति । इहास्मिन्संसारमंडले वेदाः । एतल्लोकानां परमपुरुषार्थत्वं विद्वान्कथं नु कर्मसाधनं नैति न गच्छति नानुतिष्ठतीत्यर्थः ॥ १७ ॥

सनत्सुजात उवाच—

एवं ह्यविद्वानुपयाति तत्र तत्रार्थजातं च वदन्ति वेदाः ।
स नेह आयाति परं परात्मा प्रयाति मार्गेण निहन्त्यमार्गान् ॥ १८ ॥

अथ चैतद्ब्रह्मलोकपर्यंतानां साधनभूतं कर्म विद्वान्ब्रह्मवित्कथं नैति

नानुतिष्ठतीत्येवं पृष्टः प्राह भगवान्सनत्सुजातः एवमिति । सत्यमेव ब्रह्मलोकादिसाध्यं सुखं परमार्थं मन्यमानो विषयविषांधो ह्यविद्वानुपयाति । तस्मिन्ब्रह्मलोकादिसाधनभूते कर्मणि न विद्वानविद्यादिदोषदर्शी । तथा च बृहदारण्यके । अनंदा नाम ते लोका अंधेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधा जनाः ॥ तथार्थजातं च प्रयोजनजातं च तस्यैवाविदुषो वदन्ति वेदाः । यस्मादविदुष एव वदन्ति न विदुषः तस्मान्नेह स विद्वान्ब्रह्मलोकाद्यनित्यसुखे तत्साधने वा कर्मण्यायाति प्रवर्तते । किं तर्हि कुरुते तत्राह । परमात्मानमात्मत्वेनावगम्य परमात्मा सन्ब्रह्मैव सन्परं प्रयाति । मार्गेण ज्ञानेन निहन्ति । अमार्गानसंसार-हेतुभूतात्मनो विरुद्धमार्गान्धर्माधर्मोपासनारूपान् । अथवा एवं हि विद्वा-नुपयाति । तत्रेति पाठे । सगुणब्रह्मविद्वांस्तत्र ब्रह्मलोकादावुपासनामु-पयाति प्राप्नोति । तथार्थजातं चास्य वदन्ति वेदाः । कीदृशं वदन्ति स नेहायाति स विद्वानिहास्मिँल्लोके कर्मीव नायाति न जायते । किं तु मार्गेण ब्रह्मोपासनयाऽमार्गान्विरुद्धमार्गान्निहन्ति । एवं तत्र हत्वा स हेतून् संसारमार्गान्परमात्मा ब्रह्मात्मा सन्कालेन परं ब्रह्म यातीत्यर्थः ॥ १८ ॥

धृतराष्ट्र उवाच—

कोऽसौ नियुंक्ते तमजं पुराणं स चेदिदं सर्वमनुक्रमेण ।
किं वाऽस्य कार्यमथवा सुखं च तन्मे विद्वन्ब्रूहि सर्वं यथावत् ॥ १९ ॥

एवं तावत्प्रमादस्याज्ञानस्य मृत्युत्वमप्रमादस्य स्वरूपावस्थानलक्षणस्या-मृतत्वम् । प्रमादं वै मृत्युमहं ब्रवीमीत्यादिना दर्शयित्वाऽऽस्यादेष निःसरते नराणामित्यादिना स वै मृत्युस्त्वच्छरीरे य एष इत्यंतेन तस्यैव कार्या-त्मना परिणतस्य सर्वानर्थहेतुत्वं प्रदर्शयित्वा कथमस्य मृत्योर्विनाश इत्या-शंक्यैवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योरित्यात्म-ज्ञानेन मृत्युविनाशं दर्शयित्वा यानेवाहुरिज्ययेत्यादिना ब्रह्मलोकादेः पुरुषार्थत्वमाशंक्यैवं ह्यविद्वानित्यादिना तेषामविद्याविषयत्वेनापुरुषार्थ-

त्वमुक्त्वा परं परात्मा प्रयाति मार्गेणेति ज्ञानमार्गेण मोक्ष उपदिष्टः । तत्र परं परात्मा प्रयातीति जीवपरयोरेकत्वमुक्तम् । तदसहमानश्चोदयति धृतराष्ट्रः कोऽसाविति । ननु यदि स एवं सत्यादिलक्षणः परमात्मा क्रमेणाकाशादि धरित्र्यंतं सृष्ट्वा तदनुप्रविश्यान्नमयाद्यात्मना स्थितः संसरतीति चेत्कोऽसौ तं सत्यादिलक्षणमजं संसारे नियुंक्ते प्रेरयति । किमन्येन स्वयमेव चेत्किंवास्य नानायोनिषु प्रवर्तमानस्य कार्यं प्रयोजनम् । अथवा नानायोनिषु प्रवर्तमानस्य तूष्णींभूतस्य स्वे महिम्नि स्थितस्य संसारानुप्रवेशोऽसुखमनर्थजातं किं वा भवति हे विद्वन्ब्रूहि सर्वं यथावत् । तथा च ब्रह्मविदामेकः पुंडरीको भगवान्याज्ञवल्क्यः । तत एव सर्वस्य सृष्टिमुक्त्वा तस्यैव जीवात्मत्वमभ्युपगम्य यद्येवं स कथं ब्रह्मन्पापयोनिषु जायते, ईश्वरश्च कथं भावैरनिष्टैः संप्रयुज्यत इति कोऽसौ नियुंक्त इत्यनेन भगवतोक्तमेव ब्रह्मजीववादपक्षं वावदूकचोद्यं स्वयमेव स्पष्टमुक्तवान् ॥ १९ ॥

सनत्सुजात उवाच –

दोषो महानत्र विभेदयोगे ह्यनादियोगेन भवन्ति नित्याः ।
तथाऽस्य नाधिक्यमुपैति किंचिदनादियोगेन भवन्ति पुंसः ॥ २० ॥

एवं पृष्टः प्राह भगवान् । दोष इति । यद्येवं चोदयत एषोऽभिप्रायः । नियोज्यनियोक्तृत्वादिभेददर्शनादेकस्य कूटस्थस्य तदसंभवाद्भेदेन भवितव्यमिति । तत्र यदि ब्रह्मण एव नानात्वमभ्युपगम्यते चेत्तदा तस्मिन्भेदयोगे ब्रह्मणो नानात्वयोगे दोषो महान् । को दोषः । द्वैतिनो ह्यतथावादिनोऽवैदिका भवेयुः । वेदहृदयं परमार्थमद्वैतं च बाध्यं स्यात् । किं च । नानारूपेण परिणतत्वादनित्यादिदोषोऽस्थूलादिवाक्यविरोधश्च प्रसज्येत । अथोच्यते नास्माभिर्ब्रह्मणो नानात्वमभ्युपगम्यते अपि तु जीवपरयोर्भेदोऽभ्युपगम्यत इति । अत्र हि महान्दोषो यतो विनाशं प्राप्नोति । श्रूयते च " मृत्योः स मृत्युं " इत्यादि । " यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते

अथ तस्य भयं भवति " इति । अथ जीवपरयोर्भेदेऽभ्युपगम्यमाने तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म इत्येवमादिश्रुतिस्मृतीतिहासपुराणभाषितत्वादवैदिकत्वं नाम महान्दोषो भवति । कथं तर्हि त्वत्पक्षे जीवेश्वरादिव्यवहारभेदः कथं वा तेषां नित्यत्वमिति तत्राह—अनादियोगेन भवन्ति नित्याः । अनादिरविद्या माया । तथा चोक्तम् । " प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि " । " अनादिमायया सुप्तो यदा जीवः प्रबुध्यते " । " अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा " । " अनादिभावं यद्विज्ञानेनैव निवर्तते तज्ज्ञानमिति प्राज्ञा ईक्षणं संप्रचक्षते " । श्रुतयः " अनीशया शोचति मुह्यमानः " " देवात्मशक्तिं स्वगुणैर्निगूढाम् " । न तं विदाथ य इदं जजानानान्यद्युष्माकमंतरं भवति । नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति । नीहारं तमोऽज्ञानमित्यनर्थान्तरम् । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति । " इंद्रो मायाभिः पुरुरूप ईयते " । अजामेकां लोहित । अनृतेन हि प्रत्यूढा । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जंतवः इत्याद्याः स्मृतयोऽपि । यत्साक्षादपरोक्षाद्ब्रह्म । अयमात्मा सर्वान्तर इति वा । तद्योगेन मायायोगेन भवन्ति जीवादयो नित्याः । अद्वितीयस्यापि परमात्मनो मायया बहुरूपत्वमुपपद्यते इवेत्यर्थः । श्रूयते चैकस्यैव बहुरूपत्वम् । इंद्रो मायाभिः पुरुरूप ईयते । एको देवः सर्वभूतेषु गूढः । एकं सद्विप्राः । एकं सन्तं बहुधा । । एकः सन्बहुधा विचारः । त्वमेकोऽसि । अजायमानो बहुधा विजायते । तथा च मोक्षधर्मे । एक एव तु भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचंद्रवदिति । तथा च याज्ञवल्क्यः । आकाशमेकमिति च । तथा कावषेयगीतासु । न जायते म्रियते वेति । एकश्च सूर्य इति । तथा परमेश्वर आह । एक. सर्वगतो ह्यात्मेति । एकस्यैव मायाबहुरूपं तस्मात्स एव कारणात्मा परमेश्वरः कार्यात्मानं जीवात्मानं नियुंक्ते कृतप्रयत्नापेक्षो मायया न परमार्थतः । संसरति न संसारयति । तथा

चाह भगवान् । अहं प्रशास्ता सर्वस्येति । न चाप्ययं संसरति न च संसारयत्प्रभुरिति । किं च मायानिमित्ते भेदेऽभ्युपगम्यमानेऽस्य परमात्मनः कार्यकारणात्मनाऽवस्थितस्याधिक्यमाधिपत्यं नापैति किंचिदपि । मायात्मकत्वात्संसारस्य कूटस्थ एव भवतीत्यर्थः । यस्मादेवं तस्मादनादियोगेनानाद्यविद्यायोगेन भवन्ति । पुंसः पुमांसो जीवा बहवो भवन्ति । अथवा पुंसः पुरुषस्य पूर्णस्य परमात्मनो माया-ऽनादिसिद्धा तद्योगेन बहवो भवन्ति । तथा च सर्वमनुगीतासु स्पष्टमाह भगवान् । इदं जगदनेकमिति वेदानुशासनम् । तथा चाह भगवान्पराशरः । आत्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वम् । " ज्ञानस्वरूपमत्यंतं निर्मलं परमार्थतः " इति । तथा चैतत्स्पष्टमाह भगवान्सनत्सुजातः । ब्राह्मे पुराणे कावषेयगीतासु । असंगेन वेदान्पठध्वमिति ॥ २० ॥

य एतद्वा भगवान्स नित्यो विकारयोगेन करोति विश्वम् ।
तथा च तच्छक्तिरिति स्म मन्यते तथार्थयोगे च भवन्ति वेदाः ॥ २१ ॥

एवं तावदेकस्यैव परमात्मनोऽनादिमायायोगेन बहुरूपत्वमुक्तम् । इदानीं यदीश्वरस्य कारणत्वं तदपि मायोपाधिकमित्याह । य एतदिति । य एतद्वा परमार्थभूतो भगवानैश्वर्यादिसमन्वितः परमेश्वरो नित्यः स विकारयोगेनेक्षणादिपूर्वकं विश्वं करोतीति । तथा तत्सर्वं तच्छक्तिर्दैवात्मशक्तिर्मायैव करोति । न परमात्माऽपूर्वादिलक्षण इति स्म मन्यते । न स्वतश्चित्सदानंदाद्वितीयस्य कारणत्वम् । किं तु मायावेशवशादित्यर्थः । किं तद्वस्य तथाभूतशक्तियोगे प्रमाणमिति चेत्तत्राह तथार्थयोगे तस्य परमात्मनो जगदुपादानभूतमायार्थयोगे च भवन्ति वेदाः । तस्य मायासद्भावे वेदाः प्रमाणं भवन्तीत्यर्थः । तथा च श्रुतिः । इंद्रो मायाभिरिति । तथा चाह भगवान् । दैवी ह्येषा गुणमयी मम माया दुरत्ययेति ॥ २१ ॥

धृतराष्ट्र उवाच—

यस्माद्धर्मान्नाचरन्तीह केचित्तथा धर्मान्केचिदिहाचरन्ति ।
धर्मः पापेन प्रतिहन्यते वा उताहो धर्मः प्रतिहन्ति पापम् ॥ २२ ॥

एवं तावत्प्रमादं वै मृत्युमहं ब्रवीमीत्यादिना मृत्योः स्वरूपं तस्य कार्यात्मनाऽवस्थानं तन्निमित्तं चानेकार्थं दर्शयित्वा केन तद्वास्य विनाश इत्याशंक्यैवं मृत्युं जायमानमित्यादिना ज्ञानादेवाभयप्राप्तिं दर्शितां श्रुत्वा प्रासंगिके चोद्यद्वये परिहृते कर्मस्वभावपरिज्ञानाय प्राह धृतराष्ट्रः यस्मादिति । यस्माद्धर्मानग्निष्टोमादीनाचरन्तीह लोके । केचित्तथा धर्मानिहाचरन्ति । किं तेषां धर्मः पापेन प्रतिहन्यत उताहोस्विद्धर्मः प्रतिहन्ति पापम् । अथवा तुल्यबलेनान्यतरेणान्यन्य विनाश इति । अविदुष उभयोरनुभव एव । नान्यतरेणान्यतरस्य विनाशः । विदुषः पुनरनयोरपि ज्ञानाग्निना विनाश इत्याह ॥ २२ ॥

सनत्सुजात उवाच—

तस्मिन्स्थितौ वाऽप्युभयं हि नित्यं ज्ञानेन विद्वान्प्रतिहन्ति सिद्धम् ।
यथाऽन्यथा पुण्यमुपैति देही तथागतं पापमुपैति सिद्धम ॥ २३ ॥

एवं पृष्टः प्राह भगवान्सनत्सुजातः । तस्मिन्निति । तस्मिन्पुण्यापुण्यात्मके कर्मणि स्थितोऽपि कुर्वन्नप्युभयं पुण्यापुण्यलक्षणं कर्म नित्यं नियमेन विद्वाञ्ज्ञानेन प्रतिहन्ति विनाशयति । कथमेतदवगम्यते ज्ञानेन विद्वान्प्रतिहन्ति तत्राह । सिद्धं प्रसिद्धं ह्येतच्छ्रुतिस्मृतीतिहासपुराणेषु । तथा च श्रुतिः “ भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ” इति ॥ यथा पुष्करपलाश इति । यथैषीकातूलमग्नाविति च । यथैधांसि समिद्धोऽग्निरिति च । क्षणमात्मानुसंधानात्पापं दहति कोटिशः । अन्यथा पापविध्वंसो न भवेत्कोटिपुण्यतः । अन्यथा ज्ञानहीनश्चेत्पुण्यमुपैति तथागतं पापमुपैति तत्फलं चोपभुंक्ते कथमवगम्यत इति चेत् । एतदपि श्रुतिस्मृतीतिहासपुराणादिषु प्रसिद्धम् । तथा च श्रुतिः “ इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो ह्यभि-

नन्दंति मूढाः । नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्तीति " । " अनंदा नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः " । " त्रैविद्या मामिति " च ॥ २३ ॥

गत्वोभयं कर्मणा भुज्यतेऽस्थिरं शुभस्य पापस्य स चापि कर्मणा ।
धर्मेण पापं प्रणुदतीह विद्वान्धर्मो बलीयानिति तस्य विद्धि ॥ २४ ॥

किमविदुषोऽनुभव एवोभयोरुतान्यतरेणान्यतरस्य विनाश इति तत्राह । गत्वेति । गत्वा परलोकं प्राप्योभयं पुण्यापुण्यसाध्यं फलं कर्मणा पुण्यापुण्यलक्षणेन भुज्यतेऽस्थिरम् । तथा च श्रुतिः " तद्यथेह कर्मचितो लोकः क्षीयत " इति । श्रूयते च बृहदारण्यके यो वा एतदक्षरमिति । अथ येऽन्यथातो विदुरिति च च्छांदोग्ये । स चापि सोऽपि विद्वान्धर्मेण कर्मणा पापं प्रणुदति विनाशयति । तथा च श्रुतिः । धर्मेण पापमपनुदतीति । इह लोके विद्वान्वक्ष्यमाणलक्षण ईश्वरार्पणबुद्ध्या कर्मानुष्ठाता तस्य धर्मो बलीयानिति विद्धि जानीहि । इश्वरेऽर्पितत्वात् । तथा च वक्ष्यति । तदर्थमुक्तं तप एतदिज्या ताभ्यामसौ पुण्यमुपैति विद्वान् । पुण्येन पापं विनिहत्य पश्चात्स जायते ज्ञानविदीपितात्मा । ज्ञानेन चात्मानमुपैति विद्वानथान्यथा वर्गफलानुकांक्षी । अस्मिन्कृतं तत्परिगृह्य सर्वममुत्र भुंक्ते पुनरेति मार्गमिति ॥ २४ ॥

येषां धर्मेषु विस्पर्धा बले बलवतामिव ।
ते ब्राह्मणा इतः प्रेत्य स्वर्गे यान्ति प्रकाशताम् ॥ २५ ॥

येषां धर्मे न च स्पर्धा तेषां तज्ज्ञानसाधनमित्याह श्लोकद्वयेन । येषामिति । येषां विषयपराणां स्वर्गादावुर्वश्यादिभोगश्रवणात्तत्साधनभूतज्योतिष्टोमादिधर्मेषु विस्पर्धा संघर्षो वर्ततेऽस्मादहमुत्कृष्टतरं धर्मं कृत्वाऽस्मादपि सुखी भूयासमिति । बले बलवतामिव । यथा बलवतो राज्ञो बलवन्तं राजानं दृष्ट्वाऽहमस्मादपि बलवत्तां संपाद्यैनं जित्वाऽस्मादपि सुखी भूयासमिति संघर्षो वर्तते तद्वदतिफलसंगसहितास्ते ब्राह्मणा यज्ञा-

यथैकान्ते जनरहिते स्थान आजीव्ये वने स्वस्थस्तिष्ठति तद्वत्सोऽपि चोरादिपीडारहितेऽन्नपानादि भूयिष्ठं बहुलं वर्तत इति मन्येत प्रावृषीव तृणोदकं बहुलं भवति तद्वत् । तृणोलपमिति केचित् । तृणोलपमिति ख्यातं मुनिभोज्यान्नादिष्विति । दूर्वाविशेष इति केचित् । तत्र स्थित्वा तदन्नपानादिनोपजीवेत् । नानुसंज्वरेत्संततो न भवेत् । अन्यथान्नपानादिरहिते देशे कथं नाम देहयात्रा सिध्येदिति संततो भवति । ततश्च न योगसिद्धिः ॥ २८ ॥

यत्राकथयमानस्य प्रयच्छत्यशिवं भयम् ।
अतिरिक्तमिवाकुर्वन्स श्रेयान्नेतरो जनः ॥ २९ ॥

तत्राप्येवंविधजनसमीपे वास इत्याह । यत्रेति । यत्र यस्मिन्देशेऽकथयमानस्य तूष्णींभूतस्य स्वमाहात्म्यं प्रच्छादयतो येनकेनचिदाच्छन्नस्य येन केनचिदाशितस्य यत्रक्वचन शायिन आत्मानमिव लोकं पश्यतो जडवल्लोकमाचरतः प्रयच्छत्यशिवं जडं भव इति मत्वाऽशिवमकल्याणमवमानादिकं प्रयच्छति । तथारिक्तमिवाकुर्वन्यथा कश्चित्स्थितप्रज्ञलक्षणज्ञो ब्रह्मविदिति ज्ञात्वा प्रणिपातादिपूर्वकमीश्वरबुद्ध्या संपूजयति तद्वत् । अज्ञाततयातिरिक्तं ब्राह्मणजातिमात्रप्रयुक्तपूजातिरिक्तं पूजान्तरं ब्रह्मविदनुरूपमकुर्वन्नवमानादिकमेव कुर्वन्यो जनः सोऽस्य विदुषः श्रेयान् । नेतरो यः प्रणिपातादिपूर्वकमीश्वरबुद्ध्या पूजयति । तथाह मनुः । संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव । तथा चाह पराशरः । संमाननात्परा हानिर्नान्या विद्वज्जने मतेति । जनेनावमतो योगी योगसिद्धिं च विंदतीति ॥ २९ ॥

यो वाऽकथयमानस्य ह्यात्मानं नानुसंज्वरेत् ।
ब्रह्मस्वं नोपहन्याद्वा तदन्नं संमतं सताम् ॥ ३० ॥

कीदृशस्य तर्ह्यन्नं भोज्यमित्याह । यो वा इति । अकथयमानस्य तूष्णींभूतस्य सर्वोपसंहारं कृत्वा पूर्णात्मनाऽवस्थितस्यात्मानं नानुसंज्वरेन्न

तापयेत् । ब्रह्मस्वं नोपहन्याद्वा । ब्रह्मनिष्ठासाधनभूतं चैलाजिनपुस्तकादिकं नोपहन्याद्वा । तथा चोक्तम् । रत्नहेमादिकं नास्य योगिन. स्वं प्रचक्षते । कुशवल्कलचैलादि ब्रह्मस्वं योगिनो विदुः । अन्यदपि । ब्रह्मस्वं ब्राह्मणस्वं नोपहन्याद्वा । वा समुच्चये । तदन्नं तस्यान्नं संमतं सतां भोज्यत्वेन ॥ ३० ॥

नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ।
ज्ञातीनां तु वसन्मध्ये नैव विद्येत किंचन ॥ ३१ ॥

पुनरपि तस्यैव समाचारमाह । नित्यमिति । नित्यं नियमेनाज्ञातचर्या गूढचर्या मे मम कर्तव्येति मन्येत । ब्राह्मणो ब्रह्मवित् । ज्ञातीनां ज्ञातिपुत्रादिप्रभृतीनां मध्ये संनिधौ वसन्नैव विद्येत प्रतिपद्येत किंचन किंचिदपि । कश्चिदिति केचित् । योगी नैव विद्येत । पुत्रकलत्रादिकं परित्यज्य केवलं स्वात्मनिष्ठो गूढचार्येव भवेदित्यर्थः । तथा च श्रुतिः । कुटुंबं पुत्रदारांश्च वेदांगानि च सर्वशः । यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः । तथा चाह वसिष्ठः । यन्न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम् । जानन्नपि हि मेधावी जडवल्लोकमाचरेदिति । अथवा नित्यमज्ञातचर्या । अज्ञाते चक्षुराद्यविषयभूते वाचामगोचरेऽनुदितानस्तमितज्ञानात्मनावस्थितेऽशनायाद्यसंस्पृष्टे पूर्णानंदस्वरूपे सर्वान्तरे प्रत्यग्भूते ब्रह्मणि चर्या निष्ठा समाधिलक्षणा मे मम कर्तव्या । न पराग्भूतदेहेंद्रियपुत्रमित्रकलत्रादौ स्थूलोऽहं कृशोऽहं ब्राह्मणोऽहं क्षत्रियोऽहमित्येवमात्मिका कर्तव्येति मन्येत । ब्राह्मणो ब्रह्मवित् । तथा च श्रुतिः । यश्चक्षुषा न पश्यतीति । यस्मादेवं तस्मादज्ञात एव ब्रह्मणि निष्ठा कर्तव्या । तस्मात्क्रोधमानादयोऽनित्या विषयाश्चेंद्रियाणि च । ज्ञातयश्च देहिनस्तत्त्वदर्शिन इतींद्रियादीनां ज्ञातिशब्देनोक्तत्वात् । ज्ञातीनामिंद्रियादीनां मध्ये वसन्पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्निति मन्यमानो विजानन्नपि नैवमात्मादिरूपेण विद्येत प्रतिपद्येत । तत्साक्षित्वादात्मनः । तथा च श्रुतिः । अथ यो वेदेदं

जिघ्राणीति स आत्मेति । देहद्वयतद्धर्मानात्मत्वेन न गृह्णीयादित्यर्थः ॥ ३१ ॥

को ह्येनमन्तरात्मानं ब्राह्मणो मन्तुमर्हति ।
निर्लिंगमचलं शुद्धं सर्वद्वंद्वविवर्जितम् ॥ ३२ ॥

कस्मात्पुनरेवं गृह्यतेऽत आह । को ह्येनमिति । को हि ब्राह्मणो ब्रह्मविद्विषयासक्त्या ज्ञातीनां संनिधौ वसन्निर्लिंगं सूक्ष्ममचलं क्रियाकर्त्रादिशून्यं शुद्धमविद्यादिदोषरहितं सर्वद्वंद्वविवर्जितमशनायापिपासादिधर्मविवर्जितमंतरात्मानं प्रमात्रादिसाक्षिणं मानांतराविषयीभूतं मंतुमर्हति ज्ञातुं योग्यो भवति, न कोऽपीत्यर्थः । किं च विपरीततया जानात्यनात्मविषयीभूतम् । एवमुक्तेन प्रकारेण देहद्वयतद्धर्मतया स्थूलोऽहं कृशोऽहं न गच्छामि न पश्यामि मूको बधिरः काणः सुख्यहं दुःख्यहमिति ब्राह्मणः सन्मंतुमर्हति । तथा च सति ब्राह्मण्यमेव हीयत इत्यर्थः । वक्ष्यति च । य एवं सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वयेति ॥ ३२ ॥

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणात्मापहारिणा । ३३ ॥

यस्त्वेवं मनुते स पापीयानित्याह । योऽन्यथेति । योऽन्यथाऽज्ञानान्निर्लिंगमचलं शुद्धं सर्वद्वंद्वविवर्जितं चित्सदानंदं ब्रह्मात्मना सन्तं स्वात्मानमन्यथा देहद्वयतद्धर्मात्मतया कर्ता भोक्ता सुखी दुःखी कृशः स्थूलोऽमुष्य पुत्रोऽस्य नप्ता ब्राह्मणोऽहमित्येवमात्मानं प्रतिपद्यते किं तेन मूर्खेणानात्मविदाऽऽत्मचौरेणात्मापहारिणा न कृतं पापम् । महापातकादि सर्वं कृतं तेनेत्यर्थः । तथा च श्रुतिः । असुर्या इति । ब्राह्मण्यं प्राप्य लोकेऽस्मिन्न मूकबधिरो भवेदिति स्मृतिः । तस्माद्विषयभूतदेहेंद्रियादिष्वात्मभावं परित्यज्याज्ञात एव वागाद्यगोचरे परमात्मनि निष्ठा कर्तव्येत्यर्थः ॥ ३३ ॥

अश्रान्तः स्यादनादानात्संमतो निरुपद्रवः ।
शिष्टो न शिष्टवत्स स्याद्ब्राह्मणो ब्रह्मवित्कविः ॥ ३४ ॥

अन्यथा देहद्वयमिंद्रियादितद्धर्माननुपपादयतः किं भवतीत्यत आह अश्रान्त इति । योऽनात्मभूतदेहेन्द्रियतद्धर्मानात्मत्वेन नोपादत्ते स पुरुषोऽश्रान्तः स्यात्संसारश्रमयुक्तो न भवेत् । अशनायापिपासादेर्देहादिधर्मत्वात् । तथा च श्रुतिः । अशनायापिपासे प्राणस्येति । देहद्वयाध्यासेन तद्धर्माध्यासो भवति । तस्याप्यविद्यैव मूलम् । इदानीं ज्ञानादज्ञाननिवृत्तौ तन्मूलः सोपि निवर्तत इत्यर्थः । य एवमश्रान्ततया निरुपद्रवो भवति क्रोधलोभभयहर्षादयो भूतदाहीया योगान्तराया उपद्रवास्तद्धीनो निरुपद्रवः संमतो विद्वद्भिः शिष्टत्वेन संमतः । शिष्टवन्न स्यान्नाचरेत् । जडवच्चरेद्ब्राह्मणो ब्रह्मवित्कविः ॥ ३४ ॥

ये यथा वान्तमश्नन्ति श्वाला नित्यमभूतये ।
एवं ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात् ॥ ३५ ॥

इदानीमगूढचारिणं कुत्सयन्नाह । ये यथेति । मूढाः श्वाला इति प्रोक्ताः । श्वालाः श्वाना इति दर्शनात् । यथा श्वालाः श्वानो मूढा वा वान्तमुद्गीर्णमश्नन्त्येवं ये शिष्टा ब्रह्मविदः स्वमाहात्म्यं ख्यापयन्तोऽगूढचारिणो वर्तन्ते ते वान्तमुद्गीर्णमश्नन्ति स्ववीर्यस्योपभोजनाद्यदिदं वान्ताशनं तदभूतयेऽनर्थायैवेत्यर्थः । तस्माद्गूढः सन्नशिष्टवदेव समाचरेदिति ॥ ३५ ॥

अनाढ्या मानुषे वित्ते आढ्या वेदेषु ये द्विजाः ।
ते दुर्धर्षा दुष्प्रकंप्या विद्यात्तान्ब्रह्मणस्तनुम् ॥ ३६ ॥

इदानीं योगिनं प्रशंसयन्नाह । अनाढ्या इति । अनाढ्या अबहुमता असक्तात्मानो मानुषे वित्ते जायापुत्रवित्तादिषु । आढ्या वेदेषु वेदप्रतिपाद्याहिंसासत्यास्तेयब्रह्मचर्यशमादिसाधनेषु ये द्विजास्ते दुर्धर्षा दुष्प्रकंप्याश्च विद्यात्तान्ब्रह्मणस्तनुं ब्रह्मस्वरूपभूतानित्यर्थः ॥ ३६ ॥

सर्वान्स्विष्टकृतो देवान्विद्याद्य इह कश्चन ।
न समानो ब्राह्मणस्य यस्मिन्प्रयतते स्वयम् ॥ ३७ ॥

किं च ब्रह्मविन्महिमैषः । सर्वानिति । सर्वानग्न्यादीन्स्विष्टकृतः सुष्ठु इष्टं कुर्वन्तीति । तथा च श्रुतिः । स्विष्टं कुर्वन्स्विष्टकृदिति । देवान्प्रत्येकमुद्दिश्य त्यागार्थं विद्यात् । य इह कश्चन सर्वदेवतायाज्यपि ब्राह्मणस्य न समानो ब्राह्मणेन ब्रह्मविदा न समान इत्यर्थः । नैतदाश्चर्यम् । यस्मिन्देवताविशेषे हविष उद्देशत्यागेन फलार्थं प्रयतते स्वयं यजमान इदमग्नय इदमिंद्रायेति सोऽपि हविष्प्रतियोगी देवताविशेषो न समानो ब्रह्मविदा किमुत वक्तव्यं देवपशुर्यजमानो न समान इति । तथा च मोक्षधर्मे । ब्राह्मणस्य न सादृश्ये वर्तते सोऽपि किं पुनः । इज्यते येन मंत्रेण यजमानो द्विजोत्तम इति । तथा च मनुः । ब्रह्मविद्भ्यः परं भूतं न किंचिदिति ॥ ३७ ॥

यमप्रयतमानं तु मानयन्ति स मानितः ।
न मान्यमानो मन्येत नावमानेन संज्वरेत् ॥ ३८ ॥

पुनरपि तस्यैव समाचारमाह । यमिति । यं ब्रह्मविदमप्रयतमानं तूष्णींभूतं सर्वोपसंहारं कृत्वा स्वे महिम्नि व्यवस्थितं गूढचारिणं केचिद्विद्वांसः स्थितप्रज्ञलक्षणज्ञा ब्रह्मविदिति ज्ञात्वा मानयन्ति पूजयन्ति चेत्स तैर्मानितः पूजितोऽपि विद्वान्न मान्यमानोऽहमिति मन्येत । तथा स्थितप्रज्ञलक्षणानभिज्ञा अज्ञ इति मत्वाऽवमानं कुर्वन्ति चेत्तस्मिन्नवमाने निमित्ते नानुसंज्वरेन्नानुतप्येत् ॥ ३८ ॥

लोकस्वभाववृत्तिर्हि निमेषोन्मेषवत्सदा ।
विद्वांसो मानयन्तीह इति मन्येत मानितः ॥ ३९ ॥

किं तर्हि मानितेनावमानितेन वा मंतव्यमित्याह श्लोकद्वयेन लोकेति । यदिदं विद्वांसो ब्रह्मविदं मानयन्तीति तत्तेषां निमेषोन्मेषवत्स्वभाववृत्तिः स्वाभाविकी वृत्तिरिति मन्येत ॥ ३९ ॥

अधर्मविदुषो मूढा लोकाः शास्त्रविवर्जिताः ।
न मान्यं मानयिष्यन्ति एवं मन्येदमानितः ॥ ४० ॥

तथावमानितो जनैरवज्ञातो विद्वानेवं मन्येत । अधर्मविदुषो मूढा विवेकहीना लोकाः शास्त्रविवर्जिताः । न मान्यं मानार्हं मानयिष्यन्त्यमान्यमपि मानयिष्यन्तीत्येतदविदुषां स्वभाव इति मन्येत । अमानितोऽपूजितो विद्वान् ॥ ४० ॥

न वै मानं च मौनं च सहितौ वसतः सदा ।
अयं हि लोको मानस्य असौ मौनस्य तद्विदुः ॥ ४१ ॥

इदानीं मानमौनयोर्भिन्नविषयत्वमाह । न वा इति । न वै मानं च मौनं च सहितौ एकत्र वसतः सदा । अयं प्रत्यक्षादिगोचरो लोको लोक्यत इति प्रपंचो मानस्य विषयः । असौ परलोको मौनस्य । कोऽसौ तद्विदुः । तथा चाह भगवान् । ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति । तथा चानुगीतासु । ओं तत्सद्विष्णवे चेति सायुज्यानि पदानि वै । इति तच्छब्दवाच्यं ब्रह्म मौनस्य विषय इत्यर्थः ॥ एतदुक्तं भवति । मानात्संसारप्राप्तिर्मौनेन ब्रह्मप्राप्तिरिति । उक्तं च हिरण्यगर्भे । अन्नांगनादिभोगेषु भावो मान इति स्मृतः । ब्रह्मानंदसुखप्राप्तिहेतुर्मौन इति स्मृत इति ॥ ४१ ॥

श्रीर्हि मानार्थसंवासात्सा चापि परिपंथिनी ।
ब्राह्मी सुदुर्लभा श्रीर्हि प्रज्ञाहीनेन क्षत्रिय ॥ ४२ ॥

इदानीं मानार्थसंवासेऽपवर्गाभावं दर्शयति । श्रीरिति । हे क्षत्रिय श्रीर्हि मानार्थसंवासान्मानविषयसंवासान्मानगोचरे प्रपचे वर्तमानस्य स्वर्गपश्वन्नादिसाधनभूतं कर्मानुतिष्ठतः श्रीर्हि भवति । सा चापि श्रीः परिपंथिनी श्रेयोमार्गविरोधिनी । तथा च मोक्षधर्मे निबंधिनी रज्जुरेषेति । य एवं श्रियाभिभूतो मूढः सन्विषयेषु प्रवर्तते तेन प्रज्ञाहीनेन ब्राह्मी ब्रह्मानंदलक्षणा श्रीः । तथा च हिरण्यगर्भे । या नित्या चिद्घनानंता गुणरूपविवर्जिता । आनंदाख्या परा शुद्धा ब्राह्मी श्रीरिति कथ्यते । सा [illegible]र्लभा श्रवणायापि न शक्या । तथा च श्रुतिः । श्रवणायापि बहुभि[illegible]र्ते ॥ ४२ ॥

द्वाराणि सम्यक्प्रवदन्ति सन्तो बहुप्रकाराणि दुराचराणि ।
सत्यार्जवे ह्रीर्दमशौचविद्याः षण्मानमोहप्रतिबंधकानि ॥ ४३ ॥

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि सनत्सुजातपर्वणि द्विचत्वारिंशोऽध्यायः ॥

इदानीं ब्रह्मलक्ष्मीप्रवेशद्वाराणि दर्शयति । द्वाराणीति । द्वाराणि ब्रह्मलक्ष्मीप्रवेशद्वाराणि सन्तः सम्यक्प्रवदन्ति । बहुप्रकाराणि दुराचरणानि दुःखाचरणानि कानि तानि । सत्यं यथार्थभाषणं भूतहितं च । आर्जवमकौटिल्यम् । ह्रीरकार्यकरणे लज्जा । दमोऽन्तःकरणोपरतिः । बहिः करणोपरतिः इति केचित् । शौचं मलकल्मषप्रक्षालनम् । विद्या ब्रह्मविद्या । षडेतानि मानमोहप्रतिबंधकानि । ४३ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीशंकरभगवतः कृतौ सनत्सुजातभाष्ये द्वितीयोऽध्यायः ॥१ ॥

तृतीयोऽध्यायः ।

धृतराष्ट्र उवाच—

कस्यैष मौनः कतरन्नु मौनं प्रब्रूहि विद्वन्निह मौनभावम् ।
मौनेन विद्वानुत याति मौनं कथं मुने मौनमिहाचरन्ति ॥ १ ॥

अयं हि लोको मानस्येत्यादिना मौनमाहात्म्यं प्रदर्शितं श्रुत्वा प्राह धृतराष्ट्रः । कस्येति । कस्य कीदृशस्यैष पूर्वोक्तो वागाद्युपरमलक्षणो मौनो भवति कतरन्नु एतयोरसंभाषणात्मस्वरूपयोर्मौनं प्रब्रूहि । हे विद्वन्निह मौनभावं मौनस्वभावं मौनेन तूष्णींभावेन विद्वानुत याति मौनं ब्रह्म । आहोस्विदन्येन । कथं मौनमिहाचरन्ति ॥ १ ॥

सनत्सुजात उवाच—

यतो न वेदा मनसा सहैनमनुप्रविशन्ति ततोऽथ मौनम् ।
यत्रोत्थितो वेदशब्दस्तथायं स तन्मयत्वेन विभाति राजन् ॥ २ ॥

एवं पृष्टः प्राह भगवान् । यत इति । यतो यस्माद्वेदा मनसा सहैनं

परमात्मानं नानुप्रविशन्ति । तथा च श्रुतिः । यतो वाचो निवर्तन्त इति । ततस्तस्मादेव कारणात्स एव वाचामगोचरः परमात्मा मौनम् । यद्येवं किं लक्षणस्तर्हि परमात्मा तत्राह । यत्रोत्थितो वेदशब्दः । यस्मिन्नर्थे निमित्तभूते समुत्थितो वेदशब्दः शास्त्रादिकारणं ब्रह्मेत्यर्थः । अथवा यस्मिन्संवेदिताख्य उत्थितो वाचकत्वेन प्रयुक्तो वेदशब्द इत्यर्थः । तथा वेदशब्दप्रतिपाद्यः संविद्रूपोऽयं परमात्मा यदि वाचामगोचरः परमात्मा कथमेतदवगम्यते संविद्रूपः परमात्मेति तत्राह । स परमात्मा तन्मयत्वेन ज्योतिर्मयत्वेनैवास्माकं विभाति राजन्नेवमेवास्मदनुभवो नात्राविश्वासः कर्तव्य इत्यर्थः । अथवा । श्रुतिस्मृतीतिहासपुराणादिषु ज्योतिर्मयत्वेन प्रतीयते । तथा च श्रुतिः तद्देवा ज्योतिषां ज्योतिरायुरिति ॥ २ ॥

धृतराष्ट्र उवाच—

ऋचो यजूंष्यधीते यः सामवेदं च यो द्विजः ।
पापानि कुर्वन्पापेन लिप्यते किं न लिप्यते ॥ ३ ॥

इदानीं वेदस्वभावपरिज्ञानाय प्राह धृतराष्ट्रः । ऋच इति । यः पापानि कुर्वन्नृग्वेदादीनधीते स तेन वेदाध्ययनेन पूयते न वैतद्वक्तुमर्हसीत्यभिप्रायः ॥ ३ ॥

सनत्सुजात उवाच—

नैनं सामान्यृचो वाऽपि यजूंषि चाविचक्षणम् ।
त्रायन्ते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहम् ॥ ४ ॥

एवं पृष्टः प्राह भगवान् । नैनमिति । यः पापानि कुर्वन्नृग्वेदादीनधीते नैनं प्रतिषिद्धचारिणमृग्वेदादयो वेदाः पापात्कर्मणस्त्रायन्ते न रक्षन्ति । न ते मिथ्या ब्रवीम्यहम् । एवमेतन्नात्राविश्वासः कर्तव्य इत्यर्थः ॥ ४ ॥

न च्छंदांसि वृजिनं तारयन्ति मायाविनं मायया वर्तमानम् ।
छंदांस्येनं प्रजहत्यंतकाले नीडं शकुंता इव जातपक्षाः ॥ ५ ॥

किं कुर्वन्ति चेत्तत्राह । न च्छंदांसीति । छंदांसि ऋगादयो वेदा एनं

वृजिनं धर्मनास्तिकं पापकारिणम्। अधीतवेदमधीतवेदार्थं मायाविनं धर्मध्वजं मायया वर्तमानं मिथ्याचारिणं तं न तारयन्ति न रक्षन्ति। किं करिष्यन्ति चेत्। यथा शकुंताः पक्षिणो जातपक्षाः सन्तो नीडं स्वाश्रयं त्यजन्ति एवं छंदांसि अंतकाल एनं स्वाश्रयभूतं प्रजहति परित्यजन्ति ॥ ५ ॥

धृतराष्ट्र उवाच—

न चेद्वेदा वेदविदं त्रातुं शक्ता विचक्षण।
अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातनः ॥ ६ ॥

एवमुक्ते प्राह धृतराष्ट्रः। न चेदिति। कर्मोदय इत्यादिना नित्यानां काम्यानां च पितृलोकादिप्राप्तिहेतुत्वेन संसारानर्थहेतुत्वस्य दर्शितत्वात्। प्रतिषिद्धस्य कर्मणो नरकहेतुत्वेन संसारानर्थहेतुत्वस्य च दर्शितत्वात्। न वेदा वेदविदं त्रातुं शक्ताश्चेदयं वेदाध्ययनादिरूपः प्रलापः कस्माद्धेतोः। अनर्थहेतुत्वेन वेदाध्ययनतदर्थविचारतदनुष्ठानानि न कर्तव्यानीत्यर्थः ॥ ६ ॥

सनत्सुजात उवाच--

तस्यैव नामादिविशेषरूपैरिदं जगद्भाति महानुभाव।
निर्दिश्य सम्यक्प्रवदन्ति वेदास्तद्विश्ववैरूप्यमुदाहरन्ति ॥ ७ ॥

भवेदेवं यद्येष एव वेदार्थः स्यादन्य एव स्वर्गादेः परमपुरुषार्थो मोक्षाख्यो वेदार्थः। इतरस्य च कर्मराशेरुपासनायाश्च तत्प्राप्तिसाधनज्ञानसाधनांतःकरणशुद्धिसाधनत्वेन पारंपर्येण पुरुषार्थत्वादेव वेदप्रतिपाद्यत्वम्। तथा हि तमेव परमात्मानं परमपुरुषार्थं दर्शयति वेदः— "अनंदा नाम ते लोका अंधेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधा जनाः"। स्वर्गादिलोकानामपुरुषार्थत्वमनानंदात्मकत्वमविद्यावद्विषयत्वेन दर्शयित्वा आत्मानं चेद्विजानीयादयमस्मीति पूरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्" इत्यात्मविदः कृतार्थत्वं दर्शयित्वेह चेदवेदीदथ सत्यमस्ति न चेदवेदीन्महती विनष्टिः, य एतद्विदुरमृतास्ते भवन्ति, अथेतरे दुःखमेवापियन्तीत्यात्मविदोऽमृतत्वप्राप्तिमनात्मविद आत्मविनाशमनर्थप्राप्तिं च

दिकारिण इतः प्रेत्य धूमादिमार्गेण गत्वा स्वर्गे नक्षत्रादिरूपेण यान्ति प्राप्नुवन्ति प्रकाशतां प्रकाशम् । श्रूयते च–अथ य इमे ग्राम इष्टापूर्ते दत्तमिति ॥ २५ ॥

येषां धर्मे न च स्पर्धा तेषां तज्ज्ञानसाधनम् ।
ते ब्राह्मणा इतो मुक्ताः स्वर्गं यान्ति त्रिविष्टपम् ॥ २६ ॥

येषां विषयानाकृष्टचेतसामनित्यफलसाधनज्योतिष्टोमादौ धर्मे न च स्पर्धा न च संघर्षो विद्यते न वर्तते तेषां फलनिरपेक्षमीश्वरार्थं कर्मानुष्ठानवतां तद्यज्ञादिकं कर्म चित्तशुद्धिद्वारेण ज्ञानसाधनम् । तथा च श्रुतिः । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति । वक्ष्यति च भगवान्स्वयमेव शुद्धिद्वारेणैव ज्ञानसाधनत्वं पुण्येन पाप विनिहत्य पश्चात्स जायते ज्ञानविदीपितात्मेति । ये यज्ञादिभिर्विशुद्धसत्त्वाः परमात्मानमात्मत्वेनावगच्छन्ति ते ब्राह्मणा इतोऽस्मात्कार्यकारणलक्षणाल्लोकात्प्रेत्य मुक्ताः स्वर्गं सुखं पूर्णानंदं ब्रह्म यान्ति । इतरतः स्वर्गादस्य वैलक्षण्यमाह । त्रिविष्टपमिति । त्रिभिराध्यात्मिकादिभिस्तापैः सत्त्वादिभिर्जाग्रदादिभिर्वा मुक्तं त्रिविष्टपम् । अथवा तैर्विष्टं प्रविष्टमधिकारिणं पातीति त्रिविष्टपमिति ॥ २६ ॥

तस्य सम्यक्समाचारमाहुर्वेदविदो जनाः ।
नैनं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनम् ॥ २७ ॥

इदानीं विदुषः समाचारमाह । तस्येति । तस्य विदुषः सम्यक्समाचारं वेदविदो जना विद्वांस आहुः । नैनं योगिनं मन्येत चिंतयेत् । भूयिष्ठं बहु । बाह्यमाभ्यंतरं जनम् । पुत्रकलत्राद्याभ्यंतरं जनम् । इतरद्बाह्यम् । तथा पुत्रमित्रादयो न गृह्णन्ति तेषामगोचर एव वर्तेतेत्यर्थः ॥ २७ ॥

यत्र मन्येत भूयिष्ठं प्रावृषीव तृणोदकम् ।
अन्नपानं च विप्रेन्द्रस्तज्जीवेन्नानुसंज्वरेत् ॥ २८ ।

कीदृशे देशे वास इत्याह । यत्रेति । यत्र यस्मिन्देशे मृग इह मृगो

के पुनस्ते योगा उच्यते——

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदंभोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमाः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि । तान्यनुतिष्ठन् विधिना सार्वगामी भवति ॥ ॥ १४ ॥

अक्रोधोऽहर्षः इत्येवमाद्या अयोगविपरीताः । अतस्ते समाधिलक्षणत्वात् योगाः । संविभागः आत्मनो यात्रासाधनस्यार्थिभ्यः संविभजनम् । त्यागः दृष्टादृष्टेष्टभोगानां शक्तितः परित्यजनं, तत्साधनानां च । आर्जवम् ऋजुता, अदुष्टाकलनपूर्विका वाङ्मनःकायानां प्रवृत्तिः । मार्दवं मृदुत्वम् । शमोऽन्तःकरणोपशमः । दमो बाह्यकरणोपशमः । इदमन्यत् योगलक्षणं संक्षेपत उच्यते——सर्वभूतैरविरोधो योगः, विरोधे हि भूतानां पीडा । तदभावेऽपीडा । स एव सर्वभूतापीडालक्षणो योगः । आर्यं आर्याणां भावः अक्षुद्रता । आनृशंसं आनृशंस्यं अक्रौर्यम् । तुष्टिः लब्धव्यस्यालाभेऽपि चेतसः प्रसन्नतयावस्थानं लाभ इव । सर्वभूताविरोधलक्षणाहिंसा परिव्राजकस्यैव संभवतीत्यार्यादीनां त्रयाणां अन्येषां चाविरुद्धानां सर्वाश्रमान् प्रति प्राप्तिरितीतिशब्दसामर्थ्यात्, इतिशब्दस्य च प्रकारवचनत्वादार्यादीनीत्थंप्रकाराणि सर्वाश्रमान् प्रति गमयति सर्वाश्रमाणां समयपदानीति । समयस्थानानीत्येतत् । अवश्यानुष्ठेयानीत्यर्थः । तान्येतानि यथोक्तान्यनुतिष्ठन् विधिना सर्वगामी सर्वगमनशीलः, ज्ञानाभिव्यक्तिक्रमेण । भवति मुच्यत इत्यर्थः ॥ १४ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ आपस्तम्बीये धर्मशास्त्रे अध्यात्मपटलविवरणं समाप्तम् ।

दर्शयित्वा 'यदेतदनुपश्यतीत्यात्मानं देवमंजसा । ईशानं भूतभव्यस्य ततो विजुगुप्सत' इत्यादिभिर्वाक्यैस्तत्स्वरूपतदर्थदर्शनतत्फलानि भूयो दर्शयित्वा कथमेनं रागादिभिरितस्ततः समाकृष्यमाणं विषया मोक्षयित्वा परमे पदे परमात्मनि पूर्णानंदे स्वराज्ये मोक्षाख्ये स्थाप मीति मत्वा तत्प्राप्तिसाधनज्ञानसाधनविविदिषासाधनत्वेन य दीनि दर्शयति वेदः । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति दानेन तपसानाशकेनेति । तस्मात्तदर्थत्वेनैव यज्ञादीनां पुरुषार्थः इतरत्र तु स्वर्गादौ श्येनयागादीनामिवापुरुषार्थहेतुत्वात् । तथा च प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो नंदन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति । यस्मादेवं मोक्षसा पादकत्वेन संसारानर्थनिवृत्तिहेतुत्वं वेदानां तस्माद्वेदा वेदविदं त्रातु एवेत्येतत्सर्वमभिप्रेत्याह श्लोकत्रयेण । तत्र प्रथमेन परमपुरुषार्थत्वं त्मानं दर्शयति । तस्यैवेति । तस्यैव परमात्मनो मायाकल्पितैर्नाग शेषरूपैरिदं जगद्भाति । हे महानुभाव । कथमेतदवगम्यते तस्यैव दिविशेषरूपैरिदं जगद्भातीति । इंद्रो मायाभिः पुरुरूप ईयत इति निमित्तं बहुरूपं निर्दिश्य तस्यैव सम्यग्रूपं तदेतद्ब्रह्मापूर्वमनपरम ब्राह्यमित्यादिना प्रवदन्ति वेदाः । द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्त दिना तस्यैव मूर्तात्मकमात्मवज्जगत्स्वरूपं निर्दिश्य तस्यैव सम्यग्रू नेतीत्यादिना प्रवदन्ति वेदाः । तथाऽऽत्मन आकाशः संभूत इति दादिभिरित्यंतं तस्यैव कार्यं निर्दिश्य कोशोपन्यासमुखेन तस्यैव "यतो वाचो निवर्तन्त" इत्यादिना प्रवदन्ति वेदाः । तथा हि भगवन्नित्यादिना नामादिप्राणान्तं जगन्निर्दिश्य यत्र नान्यत्पश्यती तस्यैव सम्यग्रूपं भूमानं तमसः परं स्वे महिम्नि स्थितं प्रवदन्ति न केवलं वेदा एवापि तु मुनयोऽपि तद्ब्रह्म विश्ववैरूप्यं विश्वरू रूपमुदाहरन्ति । तथा चाह भगवान्पराशरः— " प्रत्यस्त

यत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितमिति " । "तच्च विष्णोः परं रूपमरूपाख्यमनुत्तमम् । विश्वस्वरूपवैरूप्यलक्षणं परमात्मन " इति ॥ ७ ॥

तदर्थमुक्तं तप एतदिज्या ताभ्यामसौ पुण्यमुपैति विद्वान् ।

पुण्येन पापं विनिहत्य पश्चात्स जायते ज्ञानविदीपितात्मा ॥ ८ ॥

इदानीमीश्वरार्थमनुष्ठीयमानानां कर्मणां तत्प्राप्तिसाधनापेक्षितशुद्धिद्वारेण पारंपर्येण पुरुषार्थत्वमन्येषां संसारानर्थहेतुत्वेनापुरुषार्थत्वं दर्शयति श्लोकद्वयेन तदर्थमिति । यद्विश्वरूपविपरीतरूपं ब्रह्म तदर्थमुक्तं वेदेन । किं तपः कृच्छ्रचांद्रायणादि । इज्या ज्योतिष्टोमादि । किं ततो भवतीति चेत् । ताभ्यामिज्यातपोभ्यामसौ पूर्वोक्तविनियोगत ईश्वरार्थं कर्मानुतिष्ठन्पुण्यमुपैति प्राप्नोति । कर्मजन्यापूर्वसंयुक्तो भवति । तेन पुण्येन पापं विनिहत्य क्षपयित्वा पश्चादुत्तरकालं स क्षपिताशेषकल्मषो जायते । ज्ञानविदीपितात्मा ज्ञानप्रकाशितचित्सदानंदाद्वितीयब्रह्मरूपो भवति ॥ ८ ॥

ज्ञानेन चात्मानमुपैति विद्वानथान्यथा वर्गफलानुकांक्षी ।

अस्मिन्कृतं तत्परिगृह्य सर्वममुत्र भुंक्ते पुनरेति मार्गम् ॥ ९ ॥

अथ ज्ञानेन चात्मानं परमात्मानमुपैति विद्वानात्मवित् । अथ चेत् । अन्यथा पुनरीश्वरार्थं क्षपिताशेषकल्मषो ज्ञानी न भवति तदा वर्गफलानुकांक्षीन्द्रियफलानुकांक्षी स्वर्गादिफलानुकांक्षी सन्नस्मिँल्लोके कृतं तद्यज्ञादिकं परिगृह्य सर्वममुत्र परलोके तत्फलमुपभुंक्ते । ततः कर्मशेषेण पुनरेति मार्गं संसारमार्गम् । तथा च श्रुतिः । तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्त इति ॥ ९ ॥

अस्मिँल्लोके तपस्तप्तं फलमन्यत्र भुज्यते ।

ब्राह्मणानां तपस्त्वृद्धमन्येषां तावदेव तत् ॥ १० ॥

इदानीं विद्वदविद्वदपेक्षया कर्मणां फलवैषम्यमाह । अस्मिन्निति । अस्मिँल्लोके यत्तपस्तप्तं तस्य फलममुत्रामुष्मिल्लँोके भुज्यते । इति सर्वेषां

समानम् । ब्राह्मणानां ब्रह्मविदां पुनरयं विशेषः । तपस्त्वृद्धमतीव समृद्धं फलवृद्धिर्भवतीत्यर्थः । तथा च श्रुतिः । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति । अन्येषामनात्मविदां वैषयिकाणां तावदेतन्न समृद्धं भवति । यस्य कर्मणो यत्फलं श्रुतं तावन्मात्रफलसाधनं न फलसमृद्धिहेतुर्भवतीत्यर्थः ॥ १० ॥

धृतराष्ट्र उवाच—

कथं समृद्धमप्यृद्धं तपो भवति केवलम् ।
सनत्सुजात तद्ब्रूहि कथं विद्याम तद्वयम् ॥ ११ ॥

श्रुत्वैवमाह धृतराष्ट्रः । कथमिति । श्लोकोऽयं स्पष्टोऽर्थः ॥ ११ ॥

सनत्सुजात उवाच—

निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते ।
एतत्समृद्धमप्यृद्धं तपो भवति नान्यथा ॥ १२ ॥

एवं पृष्टः प्राह भगवान्सनत्सुजातः । निष्कल्मषमिति । यदेतन्निष्कल्मषं तपस्तत्केवलं परिचक्षते । केवलं बीजमित्युक्तः सर्वस्यास्य प्रपंचस्य बीजं निमित्तं यत्तत्केवलमित्युक्तम् । आहोशना गुणसाम्ये स्थितं तत्त्वं केवलं त्विति कथ्यते । केवलादेतदुद्भूतं जगत्सदसदात्मकमिति । तदेव केवलं तपः समृद्धमप्यृद्धं भवति नान्यथा । यदा निष्कल्मषं न भवति सकल्मषं स्यात्तदा समृद्धमप्यसमृद्धं भवति ॥ १२ ॥

तपोमूलमिदं सर्वं यन्मां पृच्छसि क्षत्रिय ।
तपसा वेदविद्वांसः परेत्यामृतमाप्नुयुः ॥ १३ ॥

तदेव प्रशंसति । तपोमूलमिति । स्पष्टोऽर्थः ॥ १३ ॥

धृतराष्ट्र उवाच—

कल्मषं तपसो ब्रूहि श्रुतं निष्कल्मषं तपः ।
सनत्सुजात येनेदं विद्यां गुह्यं सनातनम् ॥ १४ ॥

श्रुत्वैवमाह राजा । कल्मषमिति । अस्यार्थः । निष्कल्मषं तपश्चैतत्परिचक्षत इति श्रुतस्य तपसः कल्मषं ब्रूहि । हे सनत्सुजात ।

येन निष्कल्मषेण तपसेदं गुह्यं सनातनं ब्रह्माहं विद्यामिति ॥ १४ ॥

सनत्सुजात उवाच--

क्रोधादयो द्वादश यस्य दोषास्तथा नृशंसानि च सप्त राजन् ।
ज्ञानादयो द्वादश चातताना: शास्त्रे गुणा ये विदिता द्विजानाम् ॥ १५ ॥

एवं पृष्टः प्राह भगवान् । क्रोधादय इति । क्रोधादयो यस्य तपसो द्वादश दोषाः कल्मषाः । तथा नृशंसानि च सप्त हे राजन्यस्य तपसो दोषाः । तथा ज्ञानादयो द्वादश चातताना विस्तीर्यमाणाः शास्त्रे वेदशास्त्रे ये विदिता गुणा द्विजानां तान्गुणान्दोषांश्च वक्ष्यामीत्यभिप्रायः ॥ १५ ॥

क्रोधः कामो लोभमोहौ विवित्साऽकृपाऽसूया मानशोकौ स्पृहा च ।
ईर्ष्या जुगुप्सा च महागुणेन सदा वर्ज्या द्वादशैते नरेण ॥ १६ ॥

क्रोधादीन्दर्शयति क्रोध इति । क्रोधो नाम कामप्रतिघातादुत्पद्यमानस्ताडनाक्रोशनादिहेतुः कामहानिहेतुकश्चान्तःकरणविक्षेपो गात्रस्वेदकंपनादिलिंगः । काम स्त्र्याद्यभिलापः । लोभः परद्रव्येच्छा न्यायार्जितस्य स्वकीयस्य च द्रव्यस्य तीर्थविनियोगासामर्थ्यं वा । मोहः कृत्याकृत्यविवेकशून्यता । विवित्सा विषयरसान्वेत्तुमिच्छा । अकृपा निष्ठुरता । असूया गुणेषु दोषाविष्करणं परगुणादिष्वक्षमा वा । मान आत्मबहुमानत्वम् । शोक इष्टार्थवियोगजोऽन्तःकरणविक्षेपो रोदनचिंतनादिलिंगोऽप्रतीकारविषयः । स्पृहा विषयभोगेच्छा । ईर्ष्या परश्रियामसहिष्णुता । जुगुप्सा परगुणानपह्नोतुमिच्छा बीभत्सा वा । एते क्रोधादयो द्वादश दोषाः तपसः कल्मषरूपाः सदा वर्ज्याः । महागुणेन ब्राह्मणेन । महागुणो ब्रह्मप्राप्तिगुणः । तेन ब्रह्मप्राप्तिलक्षणेन महागुणसमन्वितेन वर्जनीया इत्यर्थः । उक्तं च नाममहोदधौ । "महद्ब्रह्म इति प्रोक्तं महत्त्वान्महतामपि । तत्प्राप्तिगुणसंयुक्तो महागुण इति स्मृत" इति । अथवा ब्राह्मणानामुत्कृष्टगुणयोगः स्वभावसिद्धः । तथा चोक्तं भगवता "शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्रह्म-

कर्मस्वभावजम् ” ॥ १६ ॥

एकैकमेते राजेंद्र मनुष्यं पर्युपासते ।
लिप्समानोन्तरं तेषां मृगाणामिव लुब्धकः ॥ १७ ॥

एतेषां सदा वर्ज्यत्वे हेतुमाह । एकैकमिति । यथा मृगाणामंतरं छिद्रं लिप्समानो रंध्रान्वेषणपरो लुब्धको मृगयुरनुवर्तते यथा च छिद्रं लब्ध्वा तान्हन्ति तथा तेषां मनुष्याणां रंध्रान्वेषणपरा एते क्रोधादय एकैकं मनुष्यं पर्युपासते । अथवा मनुष्यान्पर्युपासत इत्यपि पाठः । तस्मिन्नेकैकं मनुष्यान्पृथक्पृथक्पर्युपासत इति योजना । तथा छिद्रं लब्ध्वा तान्हन्ति । तस्मादेतेष्वेकोऽपि दोषो विनाशकारणम् । यस्मादेवं तस्मात्सदा वर्ज्या इत्यर्थः । उक्तं च हिरण्यगर्भे । यथा पांथस्य कान्तारे सिंहव्याघ्रमृगादयः । उपद्रवकरास्तद्वत्क्रोधाद्या दुर्गमा नृणामिति ॥ १७ ॥

संभोगसंविद्विषमेधमानो दत्तानुतापी कृपणोऽबलीयान् ।
वर्गप्रशंसी वनितां च द्वेष्टा एते परे सप्त नृशंसरूपाः ॥ १८ ॥

इदानीं नृशंससप्तकमाह संभोगेति । संभोगे विषयसंभोगे संविद्यस्य बुद्धिर्वर्तते स संभोगसंवित् । विषमिव परेषामुपद्रवं कृत्वैधमानो वर्धमानः । अथवा द्विषमेधमान इति पाठान्तरे द्विषं द्वेष्यं कर्म कृत्वा प्राणिनां तद्द्वारेणैधमान इति । दानं दत्त्वानुतापं करोतीति दत्तानुतापी । यत्किंचिदर्थलवलाभमात्रलोभात्सर्वावमानं सहते यः स कृपणः । अबलीयाञ्ज्ञानबलवर्जितः । वर्गप्रशंसी । इंद्रियवर्गप्रशंसी । वनितां च द्वेष्टाऽनन्यशरणां भार्यां यो द्वेष्टि । एते परे पूर्वोक्तेभ्यः क्रोधादिभ्यः सप्त नृशंसरूपाः । ॥ १८ ॥

ज्ञानं च सत्यं च दमः श्रुतं च अमात्सर्यं ह्रीस्तितिक्षाऽनसूया ।
यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्य ॥ १९ ॥

इदानीं ज्ञानादयो द्वादशोच्यन्ते । ज्ञानं चेति । ज्ञानं तत्त्वार्थसंवेदनम् । ं यथार्थभाषणं भूतहितं च । दमो मनसो दमः । श्रुतमध्यात्मशास्त्र-

श्रवणम् । मात्सर्यं सर्वभूतेष्वसहमानता तदभावोऽमात्सर्यम् । ह्रीरकार्यकरणे लज्जा । तितिक्षा द्वंद्वसहिष्णुता । अनसूया परदोषानाविष्करणम् । यज्ञोऽग्निष्टोमादिर्महायज्ञश्च । दानं ब्राह्मणादिभ्यो धनादिपरित्यागः । धृतिर्विषयसंनिधाविंद्रियनिग्रहः । शमोऽन्तःकरणोपरतिर्बहिःकरणोपरतिरिति केचित् । एते ज्ञानादयो महाव्रताः परमपुरुषार्थसाधनभूता ब्राह्मणस्य वर्णिताः । ये ज्ञानादयो द्वादश चातताना इति पूर्वं प्रस्तुतास्ते वर्णिताः ॥ १९ ॥

यस्त्वेतेभ्योऽप्रवसेद्द्वादशेभ्यः सर्वामिमां पृथिवीं स प्रशिष्यात् ।
त्रि [illegible] वाऽविमुक्ताः क्रमाद्विमुक्ता मौनभूता भवन्ति ॥ २० ॥

इदानीं गुणस्तुतिं करोति । यस्त्विति । यस्त्वेतेभ्यः पूर्वोक्तेभ्योऽप्रवसेत् । प्रवासं न करोति तैरेव समन्वितो भवेत् । स सर्वामिमां पृथिवीं प्रशिष्यात्प्रशास्ति । आत्मवशं करोति । य एतेषां मध्ये त्रिभिर्द्वाभ्यामेकत एकस्माद्वाऽविमुक्ता एतेषामन्यतमेनापि समन्विताः । त एते क्रमेण विमुक्ता विशिष्टज्ञानिनो भूत्वा मौनभूता भवन्ति ब्रह्मविदो भवन्ति ॥ २० ॥

दमोऽष्टादशदोषः स्यात्प्रातिकूल्यं कृते भवेत् ।
अनृतं पैशुनं तृष्णा प्रातिकूल्यं तमोऽरतिः ॥ २१ ॥
लोकद्वेषोऽभिमानश्च विवादः प्राणिपीडनम् ।
परिवादोऽतिवादः स्यात्परितापोऽक्षमाऽधृतिः ॥ २२ ॥
असिद्धिः पापकृत्यं च हिंसा चेति प्रकीर्तिताः ।
एतैर्दोषैर्विमुक्तो यः स दमः सद्भिरुच्यते ॥ २३ ॥

इदानीं दमदोषानाह श्लोकत्रयेण । दम इत्यादिना । दमोऽष्टादशदोषसमन्वितो भवति । किमिति तेषां दोषत्वमिति चेत्प्रातिकूल्यं कृते भवेत् । एतेषामन्यतमे कृते दमस्य प्रतिकूलं भवेत् । अनृतमयथार्थवचनम् । पैशुनं परदूषणवचनम् । तृष्णा विषयाशा । प्रातिकूल्यं सर्वेषां प्रतिकूलता । तमोऽज्ञानम् । अरतिर्यथालाभेनासंतुष्टिरथवा रतिः स्त्रीसंभोगे-

ष्वभिरतिः ॥ लोकद्वेषो लोकान.मुद्वेगाचरणम् । अभिमानः सर्वत्राप्रणतिभावः । विवादो जनकलहाचरणम् । प्राणिपीडनं स्वदेहसंपूरणाय प्राणिहिंसा । परिवादः समक्षे परदूषणाभिधानम् । अतिवादो निरर्थकोऽतिप्रलापः । परितापो वृथा दुःखचिंतनम् । अक्षमा द्वंद्वासहिष्णुता । अधृतिरिंद्रियार्थेषु चपलता । असिद्धिर्धर्मज्ञानवैराग्याणाम् । पापकृत्यं प्रतिषिद्धाचरणम् । हिंसाऽविहितहिंसा । इति दमदोषाः प्रकीर्तिताः । एतैः अनृतादिभिर्दोषैर्विमुक्तो यो गुणः स दम इति सद्भिरुच्यते ॥ २१–२३ ॥

मदोऽष्टादशदोषः स्यात्त्यागो भवति षड्विधः ।
विपर्ययाः स्मृता एते मददोषा उदाहृताः ॥ २४ ॥

इदानीं मददोषानाह । मद इति । एतेऽनृतादिहिंसान्ता ये दमदोषत्वेन स्थिताः स्मृताः । त एते विपर्ययाः स्मृताः सत्यादिरूपत्वेन स्मृता मददोषा मदनाशकरा उदाहृताः । त एते सत्यापैशुनातृष्णाप्रातिकूल्यातमोरतिलोकाद्वेषानभिमानाविवादाप्राणिहिंसापरिवादानतिवादापरितापक्षमाधृतिसिद्धयपापकृत्याहिंसा इत्येते मदनाशकरा उदाहृताः ॥ २४ ॥

श्रेयांस्तु षड्विधस्त्यागस्तृतीयो दुष्करो भवेत् ।
तेन दुःखं तरन्त्येव भिन्नं तस्मिञ्जितं कृते ॥ २५ ॥

त्यागो भवति षड्विध इत्युक्तं तत्राह । श्रेयानिति । श्रेयांस्तु षड्विधेषु त्यागेषु तृतीयत्यागो दुष्करो दुःखसंपाद्यः । तृतीयेन त्यागेन दुःखमाध्यात्मिकादिभेदभिन्नं तरन्त्येव । तस्मिंस्त्यागे कृते सर्वं जितं भवत्येव ॥ २५ ॥

अर्हते याचमानाय पुत्रान्वित्तं ददाति यत् ।
इष्टापूर्तं द्वितीयं स्यान्नित्यं वैराग्ययोगतः ॥ २६ ॥
कामत्स्यागश्च राजेंद्र स तृतीय इति स्मृतः ।
अप्रमादी भवेदेतैः स चाप्यष्टगुणो महान् ॥ २७ ॥

[त्या]गषट्कं दर्शयति । अर्हत इति सार्धेन । अर्हते दानयोग्याय । याच-

मानाय पुत्रान्वित्तं ददाति यत् । तदेव त्यागद्वयं षण्णां मध्ये प्रथमम् । इष्टापूर्ते द्वितीयं स्यात् । इष्टं श्रौतैककर्मणि यद्दानम् । पूर्तं स्मार्तैककर्मणि । इष्टं देवेभ्यो दत्तं पूर्तं पितृभ्य इति केचित् । नित्यं वैराग्ययोगतो विशुद्धसत्त्वस्था नित्यत्वादिदोषदर्शिनो विरक्ततया साधनादिपरित्यागः कामस्त्यागश्चेति तृतीयः । षण्णां यत् द्विकत्रयं तेषु तृतीयं द्विकरूपत्याग इत्यभिप्रायः । किमेभिर्भवतीत्याह । अप्रमादीति । य एतैः षड्भिस्त्यागैः समन्वितः सोऽप्रमादी भवेत् । सोऽप्रमादोऽष्टगुणोऽष्टभिर्गुणैः समन्वितो भवति ॥ २६॥२७॥

सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च ।
अस्तेयं ब्रह्मचर्यं च तथाऽसंग्रहमेव च ॥ २८ ॥

के ते तान्दर्शयति । सत्यमिति । सत्यं यथार्थभाषणम् । ध्यानं चेतसः कस्मिंश्चिच्छुभाश्रये मंडलपुरुषादौ तैलधारावत्संतताविच्छेदिनी प्रवृत्तिः । समाधानं प्रणवेन विश्वाद्युपसंहारं कृत्वा स्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मनावस्थानम् । चोद्यं कोऽहं कस्य कुतो वेति । वैराग्यं दृष्टानुश्रविकविषयवितृष्णता । अस्तेयमचौर्यमात्मनो द्रव्यं वा । आत्मचौर्यमुक्तम् । " योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणेत्यादि " । ब्रह्मचर्यमष्टांगमैथुनत्यागः । तथा चोक्तम् । " दर्शनं स्पर्शनं केलिः कीर्तनं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति " । असंग्रहोऽपरिग्रहः पुत्रदारक्षेत्रगृहादीनाम् । एतत्परिपालयेत् ॥ २८ ॥

एवं दोषा दमस्योक्तास्तान्दोषान्परिवर्जयेत् ।
दोषत्यागोऽप्रमादः स्यात्स चाप्यष्टगुणो मतः ॥ २९ ॥

। एवमिति । दमोऽष्टादशदोषः स्यादिति ये दोषा उक्तास्तान्वर्जयेदिति । कस्मादित्यत्राह । दोषत्यागोऽप्रमादः स्यात्तेषु दोषेषु

त्यक्तेषु प्रमादादि न स्यादित्यर्थः । सोऽप्यप्रमादोऽष्टगुणो मतः सत्यं ध्यानमित्यादीनां पूर्वमेवोपदिष्टमित्यर्थः ॥ २९ ॥

सत्यात्मा भव राजेंद्र सत्ये लोकाः प्रतिष्ठिता ।
तांस्तु सत्यमुखानाहु सत्ये ह्यमृतमाहितम ३० ॥

इदानीं सत्यस्तुतिः क्रियते । सत्यात्मेति सत्यात्मा सत्यरूपो भवेति । हे राजेंद्र सत्ये लोकाः प्रतिष्ठिताः । अमृत मोक्षः ॥ ३० ॥

निवृत्तेनैव दोषेण तपोव्रतमिहाचरेत् ।
एतद्धातृकृतं वृत्तं सत्यमेव सतां व्रतम् ॥ ३१ ॥

निवृत्तेनेति । निवृत्तेनैव दोषेण क्रोधादय इत्यादिना पूर्वोक्तदोषरहितस्तपोव्रतमिहाचरेत् । एतद्धात्रा परमेश्वरेण कृतं वृत्तं सत्यमेव सतां परं व्रतम् ॥ ३१ ॥

दोषैरेतैर्विमुक्तं तु गुणैरेतैः समन्वितम ।
एतत्समृद्धमप्यृद्धं तपो भवति केवलम ॥ ३२ ॥

इदानीं कथं समृद्धमित्यादिनोपक्रान्तं प्रकरणार्थमुपसंहरति । दोषैरिति । दोषैरेतैः क्रोधादय इत्यादिना पूर्वोक्तैर्विमुक्तं गुणैरेतैर्ज्ञानादिभिः समन्वितं यदेतत्समृद्धमप्यृद्धं तपो भवति केवलम् ॥ ३२ ॥

यन्मां पृच्छसि राजेंद्र संक्षेपात्प्रब्रवीमि ते ।
एतत्पापहरं शुद्धं जन्ममृत्युजरापहम ३३ ॥

किं बहुना । यन्मामिति । हे राजन्यन्मां पृच्छसि तत्संक्षेपात्समासतो ब्रवीमि ते । एतत्पापहरं शुद्धं फलाभिकांक्षारहितं तपोव्रतं जन्ममृत्युजरापहं वक्ष्यमाणम् ॥ ३३ ॥

इंद्रियेभ्यश्च पंचभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्तश्चेत्स सुखी भवेत ॥ ३४ ॥

एतत्पापहरं शुद्धमित्युक्तम् । किं तदिति चेत्तत्राह । इंद्रियेभ्य इति हे भारत सविषयेभ्यः पंचभ्य इंद्रियेभ्यो वर्तमानेभ्यो मनसश्च तथातीते

भ्योऽनागतेभ्यश्च मुक्तश्चेत्स सुखी भवेन्मुक्त एव भवतीत्यर्थः ॥ ३४ ॥

धृतराष्ट्र उवाच--

आख्यानपंचमैर्वेदैर्भूयिष्ठं कथ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथाऽपरे ॥ ३५ ॥

एवमुक्ते प्राह धृतराष्ट्रः । आख्यानेति । आख्यानं पुराणं पंचमं येषां वेदानां ते आख्यानपंचमाः । श्रूयते च च्छांदोग्ये । इतिहासपुराणं च पंचमो वेद इति । तैराख्यानपंचमैर्वेदैर्भूयिष्ठमत्यर्थं कथ्यते श्लाघ्यते बहुमन्यते । सर्वस्मादधिकोऽहमिति कथ्यत इति केचित्पठन्ति । आख्यानपंचमैर्वेदैः कश्चिज्जनः पंचवेदी कथ्यते । तथा चान्ये चतुर्वेदास्त्रिवेदाः ॥ ३५ ॥

द्विवेदाश्चैकवेदाश्च अनृचश्च तथाऽपरे ।
एतेषु मेऽधिकं ब्रूहि यमहं वेद ब्राह्मणम् ॥ ३६ ॥

अपरे द्विवेदा एकवेदाश्च । अनृचश्च तथापरे । एतेषु मनुष्येष्वधिकं श्रेष्ठं ब्रूहि यमहं ब्राह्मणं वेद विद्याम् ॥ ३६ ॥

सनत्सुजात उवाच —

एकवेदस्य चाज्ञानाद्वेदास्ते बहवोऽभवन् ।
सत्यस्यैकस्य राजेंद्र सत्ये कश्चिदवस्थितः ॥ ३७ ॥

एवं स्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मनावस्थितः स एव ब्राह्मण इति दर्शयिष्यंस्तद्व्यतिरिक्तस्य सर्वस्य तदज्ञानमूलत्वं दर्शयति । एकवेदस्येति । एकस्य वेदस्य वेद्यमिदं रूपमनिदं वेदरूपं वेदनं वेदो ज्ञानम् । एकस्याद्वितीयस्य संविद्रूपस्येत्यर्थः । तस्यैकवेदस्य ब्रह्मणोऽनवगमात् । ऋगादयो वेदा बहवोऽभवन् । अत्र ऋगादिवेदास्तत्प्रतिपत्त्यर्थं विचारं कुर्वन्तीति वेदाख्यामवाप्नुयुः । अथवा सद्भावं साधयन्तीति वेदाः । विदन्ति वेदनहेतुभूता इति वा वेदाः । अथ वा ब्रह्माधीनं परमात्मानं लभन्त इति वेदाः । अथ वा ब्रह्मादीनामात्मानं लभन्त इति वेदाः ।

ब्रह्मण आवृतस्य लाभहेतव इति वा वेदाः । ब्रह्मण आत्मतया लाभ हेतव इति वा वेदाः । विद विचारणे । विद सत्तायाम् विद ज्ञाने । विद लाभे । एतेषां धातूनां विषये वर्तन्ते यस्मा त्ततो वेदा इत्युक्ताः । स एको वेदः । क इति चेत् । सत्यं ज्ञानमनं ब्रह्म । एकमेवाद्वितीयमित्यस्य श्रुतिप्रतिपाद्यस्यैकस्य ब्रह्मणः सिद्धत्वान्न चाशंकेत्यर्थः । तत्सत्यस्य वेदस्वरूपस्य ब्रह्मणोऽनवगमाद्वेदा बहवः ख्याता सर्वे वेदास्तदर्थदर्शनहेतवः । हे राजेंद्र त्वं पुनः कश्चित्सत्ये स्थित इति ॥ ३७ ।

सत्यात्प्रच्यवमानानां संकल्पा वितथाऽभवन् ।
ततः कर्म प्रतायेत सत्यस्यानवधारणात् ॥ ३८ ॥

भूयो मे शृणु । सत्यादिति । सत्यादिलक्षणाद्ब्रह्मणः प्रच्यवमानान संकल्पा वितथा अभवन् । व्यर्था भवन्ति । स्वाभाविकसत्यसंकल्पादयो सिध्यन्तीत्यर्थः । ततः कर्म यज्ञादि प्रतायेत विस्तृतं भवेदित्यर्थः । तदेत त्सर्वं सत्यस्य सत्यादिलक्षणस्य ब्रह्मणोऽनवधारणादनवगमात् । आत्म ज्ञाननिमित्तत्वात्संसारस्य । यावत्परमात्मानमात्मत्वेन साक्षान्न जानाति तावद तापत्रयाभिभूतो मकरादिभिरिव रागादिभिरितस्ततः समाकृष्यमाण इतस्तत मुह्यमानोऽसत्यसंकल्पः स्वर्गपश्वान्नादिहेयसाधनेषु वर्तत इत्यर्थः ॥ ३८ ॥

विद्याद्बहुपठन्तं तु बहुवागिति ब्राह्मणम् ।
य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ॥ ३९ ॥

इदानीं ब्राह्मणलक्षणमाह । विद्यादिति । बहुपठन्तमाख्यानपंचमवेद ध्यायिनम् । बहुवागिति विन्द्यान्न साक्षाद्ब्राह्मणमिति । कस्तर्हि मुख्य ब्राह्मण इति चेत् । य एतत्सत्यादिलक्षणान्नापैति न क्षरति चित्सदा दाद्वितीयब्रह्मरूपेणावतिष्ठते स एव ब्राह्मणस्त्वया ज्ञेयः । नेतरो यः सत्य च्च्युतोऽकृतार्थः सन्कर्मणि प्रवर्तते । तथा च ब्रह्मविदमेव ब्राह्मणं द

यति श्रुतिः । मौनं चामौनं च निर्विद्याथ ब्राह्मण इति विपापो विज्वरो विचिकित्सो ब्राह्मणो भवतीति च ॥ ३९ ॥

छंदांसि नाम द्विपदां वरिष्ठ स्वच्छंदयोगेन भवन्ति तत्र ।
छंदोविदस्तेन च तानधीत्य गता हि वेदस्य न वेद्यमार्याः ॥ ४० ॥

भवेदेतदेवं यदि तदेव ब्रह्म सिध्येत् । न च सिध्यत्यन्यपरत्वाद्वेदस्येति तत्राह छंदांसीति । हे द्विपदां वरिष्ठ छंदांसि वेदाः स्वच्छंदयोगेन स्वच्छंदता स्वाधीनता यथाकाममित्यर्थः । तत्रैव परमात्मनि प्रमाणं भवति । श्रूयते च सर्वे वेदा यत्पदमामनन्ति । वेदैश्च सर्वैरहमेव वेद्य इति च । पुरुषार्थपर्यवसायित्वाद्वेदस्य तद्व्यतिरिक्तस्यानित्याशुचिदुःखानुविद्धत्वेन पुरुषार्थत्वाभावात्तत्स्वरूपत्वतत्साधकत्वतत्प्रतिपादकत्वेन वेदानां प्रमाणत्वमित्यर्थः । यस्माद्वेदाः स्वच्छंदयोगेन तत्रैव परमात्मनि प्रमाणं भवन्ति तेन च हेतुना तान्वेदानधीत्यावगम्य वेदान्तश्रवणादि कारणं कृत्वा गताः प्राप्ता वेदस्य संविद्रूपस्य परमात्मनः स्वरूपं न वेद्यं प्रपंचमार्याः पंडिता ब्रह्मविदः ॥ ४० ॥

न वेदानां वेदिता कश्चिदस्ति वेद्येन वेदं न विदुर्न वेद्यम् ।
यो वेद वेदं स च वेद वेद्यं यो वेद वेद्यं न स वेद सत्यम् ॥ ४१ ॥

एवं तर्हि वेदवेद्यत्वे अन्यदेव तद्विदितादथो अविदितादधि । यतो वाचो निवर्तन्ते इत्यादि विरोधः प्रसज्येतेत्यत्राह । न वेदानामिति । न वेदानामृगादीनां मध्ये कश्चिदपि वेदः परमात्मनो वाचामगोचरस्य संविद्रूपस्य वेदितास्ति । कस्माद्यस्माद्वेद्येन जडरूपेण वेदं संविद्रूपं न विदुः । न वेद्यं प्रपंचमपि न विदुः । संविदधीनत्वात्सर्वसिद्धेः । यस्मात्संविदधीना सर्वसिद्धिस्तस्माद्यो वेदं संविद्रूपं परमात्मानं वेद जानाति स च वेद वेद्यमिदं सर्वम् । तथा च श्रुतिः । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः । आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति । एकविज्ञानेन सर्वं विज्ञातमिति च । यो वेद्यमिदं रूपं

वेद जानाति स सत्यं सत्यादिलक्षणं परमात्मानं न वेद ॥ ४१ ॥

यो वेद वेदान्स च वेद वेद्यं न तं विदुर्वेदविदो न वेदाः ।
तथापि वेदेन विदन्ति वेदं ये ब्राह्मणा वेदविदो भवन्ति ॥ ४२ ॥

नन्वेवं तर्हि वेद्येन वेदं न विदुर्न वेद्यमिति वदतोऽनात्मविदः प्रपंचासिद्धिरेवेत्युक्तं भवतीत्याशंक्याह । यो वेदेति । यो वेद जानाति ऋगादीन्वेदान्स च वेद वेद्यं सोऽप्यनात्मविदविच्छिन्नेन संवेदनेन वेद्यं प्रपंचं वेद । नन्वेवं चेत्तर्हि वेदवित्परमात्मानं विजानीयादित्याशंक्याह । न तं परमात्मानं वाचामगोचरं विदुर्वेदविदः । न वेदा वेदा अपि न तं विदुः । न तं विषयीकुर्वन्तीत्यर्थः । कथंचिल्लक्षणया बोधयन्तीति भावः । नन्वेवं तर्हि कथमौपनिषदं ब्रह्म स्यान्नेत्याह । तथापि वेदेन विदन्ति वेदं यद्यपि वागाद्यविषयं ब्रह्म तथापि वेदेन ऋगादिना विदन्ति जानन्ति वेदं संविद्रूपं परमात्मानम् । के ते ये ब्राह्मणा वेदविदो भवन्ति । वेदानामुपनिषद्वाक्यानामुपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्तिरूपषड्विधलिंगेन जहदजहल्लक्षणया तत्त्वमस्यहं ब्रह्मास्म्ययमात्मा ब्रह्मेत्यादिना संवेदस्य संविद्रूपस्य परमात्मनः प्रतिपादनप्रकारं जानन्तीत्यर्थः ॥ ४२ ॥

धामांशभागस्य तथा हि वेदा यथा च शाखा हि महीरुहस्य ।
संवेदने चैव यथामनन्ति तस्मिन्हि नित्ये परमात्मनोऽर्थे ॥ ४३ ॥

कथं तर्ह्यविषयमेव ब्रह्म वेदाः प्रतिपादयन्तीत्याशंक्याह । धामेति । धामांशभागस्य । रात्रिधामश्चंद्र इति श्रुतेः । चंद्रांशभागस्य प्रतिपच्चंद्रकलादर्शने यथा महीरुहस्य वृक्षस्य शाखा हेतुर्भवति तथा वेदास्तस्यैव परमात्मनः स्वरूपभूतसंवेदने नित्येऽविनाशिन्यर्थे परमपुरुषार्थरूपे परमानंदस्वरूपे हेतवो भवन्ति । मुनयो न पुनः साक्षाद्वाचामगोचरं परमात्मानं प्रतिपादयन्त्येवमामनन्ति ॥ ४३ ॥

अभिजानामि ब्राह्मणमाख्यातारं विचक्षणम् ।
परं हि तत्परं ब्रह्म जानात्येव च ब्राह्मणः ॥ ४४ ॥

य एवं वेदानां वेदरूपात्मप्रतिपादनप्रकारमवगम्य व्याचष्टे सोऽपि ब्राह्मण इत्याह । अभीति । एवं वेदप्रतिपादनप्रकारं यो व्याचष्टे तमाख्यातारं विचक्षणं ब्राह्मणमभिजानामि । यस्तु बाल्यपांडित्यादिकं निर्विद्यावस्थितस्तमेव ब्राह्मणं ब्रुवे इति श्रुतिः । तथा हि " ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं मौनं च निर्विद्याथ ब्राह्मण " इति । ननु कथमुच्यते ब्रह्माभिजानामि ब्राह्मणमाख्यातारं विचक्षणमिति तत्राह—वेदानां वेदप्रतिपादनं यथोक्तं यो विजानाति परं हि तत्परं ब्रह्म जानात्येव । अतः स ब्राह्मणो भवति । यो हि पांडित्यं निर्विद्य स्थितः स क्षिप्रं बाल्यादिकं निर्विद्य ब्राह्मणो भवतीत्यभिप्रायः ॥ ४४ ॥

नास्य पर्येषणं गच्छेत्प्रत्यर्थिषु कथंचन ।
अविचिन्वन्निमं वेदे ततः पश्यति तं प्रभुम् ॥ ४५ ॥

यस्मात्सत्यनिष्ठस्यैव ब्राह्मणस्य प्रसिद्धिस्तस्माद्विषयपरो न भवेदित्याह नास्येति । नास्य जगतः पर्येषणं गच्छेद्विषयान्वेषणपरो न भवेदित्यर्थः । प्रत्यर्थिषु प्रतिपक्षभूतदेहेंद्रियादिनिमित्तमविचिन्वन्विषयसंचयमकुर्वन्निमं प्रत्यगात्मानं वेदेषूपनिषत्सु तत्त्वमस्यादिवाक्येषु ततः पश्चात्पश्यति तं प्रभुं परमात्मानमात्मत्वेन जानातीत्यर्थः । अथवा नास्यात्मनः पर्येषणमन्वेषणं गच्छेत् । प्रत्यर्थिषु प्रतिपक्षभूतदेहेंद्रियादिषु । देहेंद्रियतद्धर्मानात्मत्वेन न गृह्णीयादित्यर्थः । अविचिन्वन्देहेंद्रियतद्धर्मानात्मत्वेनासंचिन्वन् । तत्साक्षिणमात्मानमेव प्रतिपद्यमानस्त्वंपदार्थशोधनानंतरमिमं प्रमात्रादिसाक्षिणं परमात्मानं पश्यति । देहेंद्रियादिष्वात्मत्वेनाप्रतिपद्यमानस्तत्त्वमस्यादिवाक्यैः परमात्मानमात्मत्वेन पश्यतीत्यर्थः ॥ ४५ ॥

तूष्णींभूत उपासीत न चेच्छेन्मनसा अपि ।
अभ्यावर्तेत ब्रह्मास्मै बह्वनंतरमाप्नुयात् ॥ ४६ ॥

यस्मादेवं तस्मात् । तूष्णीमिति । यस्मात्सर्वविषयपरित्याग एवात्मदर्शन-

सिद्धिस्तस्मात्तूष्णींभूतः स्वात्मव्यतिरिक्तं सर्वं परित्यज्य केवलो भूत्वा स्वा
नमेव लोकमुपासीत । न चेच्छेन्मनसा अपि विषयेंद्रियेच्छां न कुर्यात् । :
ष्णींभूतो विषयोपसंहारं कृत्वा स्वात्मानमेव लोकमुपास्ते । अस्मै तूष्णींभ
ब्राह्मणाय ब्रह्मापूर्वादिलक्षणमभ्यावर्तेत । अभिमुखीभवेदित्यर्थः । श्रूयते च
" यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वामिति " । अः
माविर्भूतस्वरूपः सन्बहु भूमानं तमसः परं परमात्मानमाप्नुयात् ॥ ४६ ॥

मौनाद्धि स मुनिर्भवति नारण्यवसनान्मुनिः ।
अक्षरं तत्तु यो वेद स मुनिः श्रेष्ठ उच्यते ॥ ४५ ॥

मुनिरप्येष एवेत्याह मौनाद्धीति । मौनात्पूर्वोक्तात् तूष्णींभावादेव मुा
वति न पुनररण्यवासमात्रान्मुनिर्भवति । तेषामपि तूष्णींभूतानां मध्ये
पुनरक्षरमविनाशिनं परमात्मानं वेद अयमहमस्मीति साक्षाज्जानाति स मु
श्रेष्ठ उच्यते । श्रूयते च । एतमेव विदित्वा मुनिर्भवतीति ॥ ४७ ॥

सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते ।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ॥ ४८ ॥

वैयाकरणोऽप्येष एवेत्याह सर्वेति । सर्वार्थानां व्याकरणाद्वैयाकरण उच्य
न पुनः शब्दैकदेशव्याकरणाद्वैयाकरणो भवति । भवतु सर्वार्थानां व्याकर
द्वैयाकरणत्वम् । ततः किमिति चेत्तत्राह । तन्मूलतो व्याकरणम् । पूर्वोक्तादक्षर
सर्वस्य नामरूपप्रपंचस्य व्याकरणम् । श्रूयते च । अनेन जीवेनात्मनानुप्रवि
नामरूपे व्याकरवाणीति । तस्माद्ब्रह्मण एव साक्षाद्वैयाकरणत्वं व्याकरोत
तत्तथा विद्वानपि तत् ब्रह्म तथैव व्याकरोतीति वैयाकरणः ॥ ४८ ॥

प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ।
सत्ये वै ब्राह्मणस्तिष्ठंस्तद्विद्वान्सर्वविद्भवेत् ॥ ४९ ॥

सर्वज्ञोऽप्येष एवेत्याह । प्रत्यक्षेति । प्रत्यक्षदर्शी लोकानां यः प्रत्यः
भूरादींल्लोकान्पश्यति स सर्वदर्शनो भवेत् । सर्वरूपं परमात्मानं पश्यति

ऽसौ पुनः सत्ये सत्यादिलक्षणे ब्रह्मणि तिष्ठन्मनः समादधाति । तद्विद्वान् ब्रह्म विद्वानात्मत्वेन सर्वं जानन्सर्वं जानातीत्यर्थः । तस्मा-देष एव सर्वज्ञो नानात्ममात्रदर्शी ॥ ४९ ॥

ज्ञानादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति ।
वेदानां चारपूर्वेण चैतद्विद्वन्ब्रवीमि ते ॥ ५० ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि सनत्सुजातपर्वणि सनत्सुजातवाक्ये त्रिचत्वारिंशोऽध्यायः ।

यस्त्वेतेभ्य इत्यादिनोक्तमेवार्थं पुनरपि दर्शयत्यवश्यकर्तव्यत्वदर्शना-र्थम् । ज्ञानेति । ज्ञानादिषु ज्ञानं चेत्यादिना पूर्वोक्तेषु स्थितोऽपि एवं यथा सत्ये तिष्ठन्ब्रह्म पश्यति । वेदानां चारपूर्वेण वेदान्तश्रवणादिकेनेत्यर्थः । अथवा गुणान्तरविधानमेतत् । ज्ञानादिषु स्थितोऽपि न केवलं तन्मात्रेण पश्यति । अपि तु एवमेव । वक्ष्यमाणप्रकारेण वेदान्तविचारपूर्वेण वेदान्त-श्रवणपूर्वकमेव पश्यति ब्रह्म । एतद्वेदानां चारं प्रकारं हे विद्वन्ब्रवीमि वक्ष्यामीत्यभिप्रायः ॥ ५० ॥ इति भाष्ये द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः ।

धृतराष्ट्र उवाच—

सनत्सुजात यदि मां परार्थां ब्राह्मीं वाचं वदसि हि विश्वरूपाम् ।
परां हि कार्येषु सुदुर्लभां कथां प्रब्रूहि मे वाक्यमिदं कुमार ॥ १ ॥

इदानीं ब्रह्मचर्यादिसाधनप्रतिपादनानंतरं तत्प्राप्यं च ब्रह्म प्रतिपाद-यितुं तृतीयचतुर्थावध्यायावारभ्येते । तत्र तावद्ब्रह्मचर्यादिसाधनं श्रुत्वा तद्वेदनाकांक्षी प्राह धृतराष्ट्रः । सनत्सुजातेति । हे सनत्कुमार । यद्य-मादिमां परार्थामुत्कृष्टार्थां ब्राह्मीं ब्रह्मसंबंधिनीं वाचं वदसि हि । विश्व-रूपां नानारूपां परामुत्तमाम् । कार्येषु कार्यरूपेषु प्रपंचेषु । सुदुर्लभां

श्रवणायाप्यशक्यां कथां प्रब्रूहि । मे वाक्यं एवंभूतम् । कुमार । यस्मात्त्वं ब्राह्मीं वाचं परमपुरुषार्थसाधनभूतां सुदुर्लभां वदसि । तस्मात्त्वं वक्तुमर्हसीत्यभिप्रायः ॥ १ ॥

सनत्सुजात उवाच--

नैतद्ब्रह्म त्वरमाणेन लभ्यं यन्मां पृच्छस्यभिषंगेण राजन् ।
बुद्धौ प्रलीने मनसि प्रचिंत्या विद्या हि सा ब्रह्मचर्येण लभ्या ॥ २ ॥

एवं पृष्टः प्राह भगवान् नैतदिति । नैतद्ब्रह्म त्वरमाणेन पुरुषेण लभ्यं यद्ब्रह्म मां पृच्छसि । अभिषंगेण राजन् । कथं तर्हि लभ्यमित्याह । बुद्धौ अध्यवसायात्मिकायां प्रलीने मनसि प्रचिंत्या विद्या हि सा यदा पुनः संकल्पविकल्पात्मकं मनो विषयेभ्यः परावृत्य स्वात्मन्येव निश्चलं भवतीत्यर्थः । येयं बुद्धौ प्रलीने मनसि प्रचिंत्या सा विद्या ब्रह्मचर्येण वक्ष्यमाणेन लभ्या ॥ २ ॥

आद्यां विद्यां वदसि हि सत्यरूपां या प्राप्यते ब्रह्मचर्येण सद्भिः ।
यां प्राप्यैनं मर्त्यलोकं त्यजन्ति या वै विद्या गुरुवृद्धेषु नित्या ॥ ३ ॥

किं च । आद्यामिति । आद्यां सर्वादिभूतब्रह्मविषयां विद्यां वदसि हि सत्यरूपां परमार्थरूपां मे ब्रूहीति । यद्वा आद्यामकार्यभूतां असत्यप्रपंचाविषयां विद्यां वदसि तस्मात्त्वरमाणेन ब्रह्मचर्यादिसाधनोपेतेन उपसंहृतां तत्करणेनैव लभ्यामित्यर्थः । या प्राप्यते ब्रह्मचर्येण सद्भिः । यां प्राप्य एवं मर्त्यलोकं त्यजन्ति । या वै विद्या गुरुवृद्धेषु । गुरुणा विद्याप्रदानादिना वृद्धेषु वर्धितेषु शिष्येषु नित्या नियता ॥ ३ ॥

धृतराष्ट्र उवाच--

ब्रह्मचर्येण या विद्या शक्या वेदितुमंजसा ।
तत्कथं ब्रह्मचर्यं स्यादेतद्ब्रह्मन्ब्रवीहि मे ॥ ४ ॥

एवमुक्ते ब्रह्मचर्यविज्ञानायाह धृतराष्ट्रः । ब्रह्मचर्येणेति । या विद्या ब्रह्मचर्येण वेदितुं शक्या तत्साधनभूतं ब्रह्मचर्यं कथं स्यादेतद्ब्रह्मचर्यं ब्रह्मन्

ब्रवीहि मे ॥ ४ ॥

सनत्सुजात उवाच--

आचार्ययोनिमिह ये प्रविश्य भूत्वा गर्भं ब्रह्मचर्यं चरन्ति ।
इहैव ते शास्त्रकारा भवन्ति विहाय देहं परमं यान्ति सत्यम् ॥ ५ ॥

एवं पृष्टः प्राह भगवान्सनत्सुजातः । आचार्येति । आचार्ययोनिमिह ये प्रविश्य आचार्यसमीपं गत्वेत्यर्थः । भूत्वा गर्भमुपसदनादिना शिष्यो भूत्वा ब्रह्मचर्यं गुरुशुश्रूषादिकं कुर्वन्ति । इहैवास्मिँल्लोके शास्त्रकाराः शास्त्रकर्तारः पंडिता भवन्ति । ततो बाल्यादिकं निर्विद्य ब्राह्मणत्वारब्धकर्मक्षये विहाय देहं परमं यान्ति । सत्यं सत्यादिलक्षणं परमात्मानं प्राप्नुवन्ति ॥ ५ ॥

अस्मिँल्लोके वै जयन्तीह कामान्ब्राह्मीं स्थितिमनुतितिक्षमाणाः ।
त आत्मानं निर्हरन्तीह देहान्मुंजादिषीकामिव धीरभावात् ॥ ६ ॥

किं च । अस्मिन्निति । अस्मिँल्लोके वै जयन्तीह कामान्ब्राह्मीमेव स्थितिं ब्रह्मण्येव स्थितिम् । अनुतितिक्षमाणा अनुदिनं क्षममाणाः । ते आत्मानं देहेंद्रियादिभ्यो निष्क्रम्य तत्साक्षिणं चिन्मात्रं निर्हरन्ति पृथक्कुर्वन्ति । निर्वहन्तीति पाठे निवासयन्तीत्यर्थः । किमिवेति । मुंजादिषीकामिव । यथा मुंजादिषीकामंतस्थां निर्हरन्ति । एवं कोशपंचकेभ्यो निष्क्रम्य सर्वात्मानं प्रतिपद्यन्ते इत्यर्थः । श्रूयते च कठवल्लीषु । अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । तं ह स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतमिति । धीरभावाद्धैर्येण ॥ ६ ॥

शरीरमेतौ कुरुतः पिता माता च भारत ।
आचार्यतश्च यज्जन्म तत्सत्यं वै यथामृतम् ॥ ७ ॥

आचार्ययोनिमिहेति आचार्यस्य योनित्वं दर्शितं तत्कथं मातापितृव्यतिरेकेणाचार्यस्य योनित्वमित्याशंक्य स एव साक्षाज्जनयितेत्याह । शरीरमेताविति ।

शरीरमेवास्यैतौ मातापितरौ कुरुतः । नात्मानं स्वरूपेण जनयतः । यदिदं देहद्वयात्मना जन्म तदसत्यम् । आचार्यतस्तु यदिदं चित्सदानंदाद्वितीयब्रह्मात्मना जन्म जननं तत्सत्यं परमार्थभूतम् । यथैवामृतं विनाशवर्जितं तस्मात्स एव जनयितेत्यर्थः । श्रूयते च प्रश्नोपनिषदि । त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति । तथा चाहापस्तंबः स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयत इति ॥ ७ ॥

स आवृणोत्यमृतं संप्रयच्छंस्तस्मै न द्रुह्येत्कृतमस्य जानन् ।
गुरुं शिष्यो नित्यमभिवादयीत स्वाध्यायमिच्छेच्च सदाऽप्रमत्तः ॥ ८ ॥

यस्मादाचार्याधीना परमपुरुषार्थसिद्धिस्तस्मात्स इति । स आवृणोत्यापूरयति । अमृतं पूर्णानंदं ब्रह्मात्मत्वेन संप्रयच्छन् । तस्मा आचार्याय न द्रुह्येत् द्रोहं नाचरेत् । तथा च श्रुतिः । " यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाश्यन्ते महात्मनः " इति । तथा चापस्तंबः । तस्मै न द्रुह्येत्कदाचन स हि विद्यातस्तं जनयतीति । कृतमस्य जानन् । अस्येति तृतीयार्थे षष्ठी । अनेनात्मनः कृतमुपकारं जानन् । कथं तर्हि कर्तव्यमित्याह । गुरुं शिष्यो नित्यमभिवादयीत देवमिवाचार्यमुपासीत । तथा च श्रुतिः । यस्य देव इति । तथा स्वाध्यायमिच्छेच्छ्रवणादिपरो भवेच्च । सदाऽप्रमत्तः । अप्रमादी सन् ॥ ८ ॥

शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः ।
ब्रह्मचर्यव्रतस्यास्य प्रथमः पाद उच्यते ॥ ९ ॥

इदानीं चतुष्पाद्ब्रह्मचर्यं श्लोकचतुष्टयेनाह । शिष्येति । आचार्ययोनिमिहेत्यादिनोक्तक्रमेण शुचिर्विद्यामाप्नोति ब्रह्मचर्यस्यास्य प्रथमः पाद उच्यते ॥९॥

यथा नित्यं गुरौ वृत्तिर्गुरुपत्न्यां तथा चरेत् ।
तत्पुत्रे च तथा कुर्वन्द्वितीयः पाद उच्यते ॥ १० ॥

यथेति स्पष्टार्थः श्लोकः । तथा चोक्तमाचार्यवदाचार्यदारेषु वृत्तिराचार्यपुत्रे च तथा वृत्तिश्चेति ॥ १०

आचार्येणात्मकृतं विजानञ्ज्ञात्वा चार्थं भावितोऽस्मीत्यनेन।
यन्मन्यते तं प्रति हृष्टबुद्धिः स वै तृतीयो ब्रह्मचर्यस्य पादः ॥११॥

आचार्येणेति । आचार्येणात्मनः कृतमुपकारं जानञ्ज्ञानाच्चार्थं वेदार्थं परमपुरुषार्थं ज्ञात्वाऽवगम्य भावितोऽस्मीत्यनेन स्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मना यथावदुत्पादितोऽस्मीति चिन्तयन्तमाचार्यं प्रति हृष्टबुद्धिः सन्यदात्मनः कृतार्थत्वं मन्यते स वै तृतीयो ब्रह्मचर्यस्य पादः ॥ ११ ॥

आचार्याय प्रियं कुर्यात्प्राणैरपि धनैरपि ।
कर्मणा मनसा वाचा चतुर्थः पाद उच्यते ॥ १२ ॥

आचार्यायेति । स्पष्टोऽर्थः ॥ १२ ॥

कालेन पादं लभते तथार्थं ततश्च पादं गुरुयोगतश्च ।
उत्साहयोगेन च पादमृच्छेच्छास्त्रेण पादं च ततोऽभियाति ॥ १३ ॥

इदानीं चतुष्पदीं विद्यां दर्शयति । कालेनेति । अत्र क्रमो न विवक्षितः । प्रथमं गुरुयोगतः । तत उत्साहयोगेन बुद्धिविशेषप्रादुर्भावेन । ततः कालेन बुद्धिपरिपाकेन तथार्थमिति पादविशेषणम् । ततः शास्त्रेण सहाध्यायिभिस्तत्त्वविचारेण । तथा चोक्तम् । आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया । कालेन पादमादत्ते पादं सब्रह्मचारिभिरिति ॥ १३ ॥

ज्ञानादयो द्वादश यस्य रूपमन्यानि चांगानि तथा बलं च ।
आचार्ययोगे फलतीति चाहुर्ब्रह्मार्थयोगेन च ब्रह्मचर्यम् ॥ १४ ॥

ज्ञानादीनामाचार्यसंनिधाने फलमाह ज्ञानेति । ज्ञानादयो ज्ञानं चेत्यादिना पूर्वोक्ता द्वादशगुणा यस्य पुरुषस्य रूपम् । अन्यानि चांगानि श्रेयांस्तु षड्विधस्त्यागः सत्यं ध्यानमिति श्लोकद्वयेन चोक्तानि । तथा बलं च तद्धर्मपरिपालनसामर्थ्यं सर्वमाचार्ययोग एव फलति । नाचार्ययोगं विना फलति । श्रूयते च । आचार्याद्धैव विद्या विदितेति । आचार्यवान्पुरुषो वेदेति च ब्रह्मार्थयोगेन

च ब्रह्मचर्यम् । यदिदं गुरुसन्निधौ शुश्रूषाद्याचरणं तद्ब्रह्मचर्यं ब्रह्मार्थयोगेन फलति । स्वात्मनश्चित्सदानंदाद्वितीयब्रह्मात्मैकत्वसंपादनद्वारेण फलतीत्यर्थः ॥१४॥

एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ।

ऋषयश्च महाभागा ब्रह्मचर्येण चाभवन् ॥ १५ ॥

ब्रह्मचर्यस्तुतिं करोति । एतेनेति द्वाभ्याम् । पादसप्तकस्य स्पष्टोऽर्थः ॥ १५ ॥

एतेनैव सगंधर्वा रूपमप्सरसोऽजयन् ।

एतेन ब्रह्मचर्येण सूर्य अह्नाय जायते ॥ १६ ॥

अह्नो दीप्तिसमूहः । अह्नाय जगतां द्योतनाय सूर्यश्च जायते । उक्तं च । अह्नो दीप्तिश्च कथ्यत इति ॥ १६ ॥

आकांक्षार्थस्य संयोगाद्रसभेदार्थिनामिव ।

एवं ह्येतत्समाज्ञाय तादृग्भावं गता इमे ॥ १७ ॥

कथमेकस्य ब्रह्मचर्यस्यानेकफलसाधनत्वमित्याह । आकांक्षेति । यथा चिंतामण्यादयो रसभेदार्थिनामाकांक्षार्थस्य संयोगात्तत्तदाकांक्षितमर्थं प्रयच्छन्ति । एवमेवैतद्ब्रह्मचर्यमाकांक्षार्थस्य संयोगात्तत्तदाकांक्षितं प्रयच्छतीति ज्ञात्वा तत्तत्फलार्थं ब्रह्मचर्यं चरित्वा तादृग्भावं गता इमे देवादयः । यस्मादाचार्यसांनिध्यानुष्ठिताद्ब्रह्मचर्यात्पुरुषार्थप्राप्तिस्तस्मादाचार्ययोनिं प्रविश्य गर्भो भूत्वा ब्रह्मचर्यं चरेदित्यर्थः ॥ १७ ॥

अंतवन्तः क्षत्रिय ते जयन्ति नानंतं स्वात्मभूतं जयन्ति ।
ज्ञानेन विद्वांस्तेज अभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पंथाः ॥ १८ ॥

नन्वेवं ज्ञाननिष्ठता यदि ज्ञानस्यैव पुरुषार्थत्वं भवेदपि तु कर्मणैवेत्याशंक्याह अंतवन्त इति । हे क्षत्रिय ते अंतवंतः अंतवतो लोकान्पितृलोकान्देवलोकादीञ्जयन्ति प्राप्नुवन्ति । नानंतं स्वात्मभूतं परमात्मभूतं लोकं जयन्ति । केन तर्ह्यनंतलोकप्राप्तिरित्याशंक्याह । ज्ञानेन विद्वांस्तेज अभ्येति

नित्यमिति । नित्यमविनाश्यात्मभूतमेवाभ्येति तेजो ज्योतिर्न कर्मणा । कस्मात्पुनर्ज्ञानेनैवाभ्येति । न विद्यते ह्यन्यथा तस्य पंथाः । तस्य पूर्णानंदज्योतिषो ज्ञानमेकं मुक्त्वाऽन्यः पंथा मार्गो नास्त्येव । श्रूयते । तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति ॥ ८ ॥

धृतराष्ट्र उवाच—

आभाति शुक्लमिव लोहितमिवाथो कृष्णमथांजनं काद्रवं वा ।
तद्ब्रह्मणः पश्यति यत्र विद्वान्कथं रूपं तदमृतमक्षरं परम् ॥ १९ ॥

ज्ञानेन यद्विद्वान्पश्यति ब्रह्म तत्किमिति पृच्छति धृतराष्ट्रः । आभातीति । ब्रह्मणः अक्षरं परं ब्रह्म पश्यति तत्कथं रूपं कीदृग्रूपमिति रूपप्रश्नः । यत्र पश्यति तदित्यधिकरणप्रश्नश्च ॥ १९ ॥

सनत्सुजात उवाच—

नाभाति शुक्लमिव लोहितमिवाथो कृष्णमथांजनं काद्रवं वा ।
न पृथिव्यां तिष्ठति नांतरिक्षे नैतत्समुद्रे सलिलं बिभर्ति ॥ २० ॥
न तारकासु न च विद्युदाश्रितं न चाभ्रेषु दृश्यते रूपमस्य ।
न चापि वायौ न देवतासु नैतच्चंद्रे दृश्यते नोत सूर्ये ॥ २१ ॥

एवं पृष्टः प्राह भगवान् । नेति द्वाभ्याम् । नैतद्ब्रह्म शुक्लादिरूपत्वेनावभासतेऽरूपत्वाद्ब्रह्मणः । श्रूयते च । ततो यदन्तरं तदन्तररूपमनामयमिति । अशब्दमस्पर्शमरूपमव्ययमिति च । तथा न पृथिव्यां तिष्ठति नान्तरिक्षे । तथा च श्रुतिः । अन्यत्रानवस्थानं दर्शयति । स भगवान्कस्मिन्प्रतिष्ठित इति । स्वे महिम्नीति । कस्मात्पुनः कारणात्पृथिव्यादिषु न तिष्ठति तत्राह । नैतत्समुद्रे सलिलं पंचभूतात्मकं देहं बिभर्ति । सलिलशब्दो भूतपंचकोपलक्षणार्थः । यथा अप एव ससर्जादौ तासु बीजमवासृजदित्यत्राप्यप्शब्दो भूतपंचकोपलक्षणार्थः । श्रूयते च पंचाग्निविद्यायाम् । पंचम्यामाहुतावापः पुरुषवचसो भवन्तीत्यपामेव पुरुषशब्दवाच्यत्वम् । एतदुक्तं भवति । यदि ब्रह्मणः संसारांतर्वर्तित्वं भवेत्तदा संसारानुप्रविष्टत्वा-

द्रुटादिवदीदृग्रूपादिमत्त्वमन्यस्मिंश्चावस्थानं भवेत् । इदं तु पुनरपूर्वादिलक्षणत्वात्संसारानुप्रविष्टमेव ब्रह्म तस्माद्रूपादिरहितमिति ॥ २० ॥ २१ ॥

नैवर्क्षु नैतद्यजुष्षु नाप्यथर्वसु न दृश्यते वै विमलेषु सामसु ।
रथंतरे बृहद्रथे वापि राजन्महाव्रतस्यात्मनि दृश्यते तत् ॥ २२ ॥

कस्य कुत्राप्युपलभ्यत इत्याह । नैवेति । ज्ञानं च सत्यं चेत्युपक्रम्य महाव्रता द्वादश ब्राह्मणस्येति ये गुणा उक्तास्तत्संयुक्तस्यात्मनि दृश्यते तत्परं ब्रह्म न घटादिवदियत्तया सिध्यति । अपि त्वात्मन्येवात्मतया सिध्यतीत्यर्थः ॥ २२ ॥

अवारणीयं तमसः परस्तात्तदन्ततोऽभ्येति विनाशकाले ।
अणीयरूपं च तथाऽप्यणीयसां महत्स्वरूपं त्वपि पर्वतेभ्यः ॥२३॥

इदानीं तत्स्वरूपं तद्दर्शनं तत्फलं च श्लोकद्वयेन निर्दिशति । अवारणीयमिति । यदिदं महाव्रतस्यात्मनि दृश्यते तदवारणीयं ब्रह्म सर्वगतत्वात् । तमसोऽज्ञानात्परस्तात्तद्ब्रह्म कर्मभूतं अंततोऽभ्येति प्रविशति । विनाशकाले प्रलयकाले । जगदिति शेषः । तथाऽणीयसामप्यणीयरूपम् । पर्वतेभ्योऽपि महत्स्वरूपम् । श्रूयते च । अणोरणीयान्महतो महीयानिति ॥ २३ ॥

तदेतदह्ना संस्थितं भाति सर्वं तदात्मवित्पश्यति ज्ञानयोगात् ।
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं य एतद्विदुरमृतास्ते भवन्ति ॥ २४ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि सनत्सुजातपर्वणि सनत्सुजातवाक्ये चतुश्चत्वारिंशोऽध्यायः ॥

दृश्यन्ते च येऽणुत्वमहत्त्वादयो लोके तदेतत्सर्वं जगदह्नो रूपेण प्रकाशरूपेण ब्रह्मणि संस्थितं तदात्मत्वेनैवावभाति । श्रूयते च । तस्य भासा सर्वमिदं विभातीति । येन सूर्यस्तपति तेजसेद्ध इति च । तद्ब्रह्मात्मवित्पश्यति ज्ञानयोगान्न कर्मयोगेण । तस्मिन्नेव परमात्मनि जगत्सर्वं प्रतिष्ठितं य एतद्विदुरमृतास्ते भवन्ति ॥ २४ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीशंकरभगवतः कृतौ सनत्सुजातभाष्ये तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ।

सनत्सुजात उवाच—

यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः ।
यद्वै देवा उपासन्ते यस्मादर्को विराजते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १ ॥

अवारणीयं तमसः परस्तादित्यादिना ब्रह्मणो रूपं निर्धार्य तदात्मवित्पश्यति ज्ञानयोगादिति ज्ञानयोगेनात्मदर्शनमुक्तम् । पुनरपि तस्य स्वरूपं दर्शयित्वा योगिनस्तद्रूपं पश्यन्तीत्याह । यत्तदिति । यद्ब्रह्मात्मवित्पश्यति ज्ञानयोगाद्यज्ज्ञात्वाऽमृता भवन्ति तच्छुक्रं शुद्धमविद्यादिदोषरहितम् । महज्ज्योतिः सर्वावभासकत्वात् । श्रूयते च । तस्य भासा सर्वमिदं विभातीति । दीप्यमानं भ्राजमानं महद्यशः । श्रूयते च । तस्य नाम महद्यश इत्यादि । यद्वै ब्रह्म देवा इंद्रादय उपासते । श्रूयते च । तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति । यस्मात्परं ज्योतिषो ब्रह्मणोऽर्कादिर्ज्योतिर्विराजते येन सूर्यस्तपति तेजसेद्ध इति श्रुतेः । एवंभूतं परमात्मानं सनातनं भगवन्तं योगिन एव पश्यन्ति । न पुनर्ज्ञानयोगरहिताः ॥ १ ॥

शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेन वर्धते ।
तच्छुक्रं ज्योतिषां मध्येऽतप्तं तपति तापनम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ २ ॥

इदानीं परस्मादेव ब्रह्मणो हिरण्यगर्भाद्युत्पत्तिं दर्शयति । शुक्रादिति । शुक्राच्छुद्धात्पूर्वोक्ताद्ब्रह्मणो हिरण्यगर्भाख्यं ब्रह्म प्रभवत्युत्पद्यते । अथोत्पन्नं ब्रह्म शुक्रेन वर्धते विराडात्मना । तच्छुक्रं शुद्धं ब्रह्म ज्योतिषामादित्यानां मध्ये तैरतप्तमप्रकाशितं सत्तपति स्वयमेव प्रकाशते तेषामपि तापकं प्रकाशकं सत् । योऽन्यानवभास्यः स सर्वावभासकः स्वयमेव भासते । तं भगवन्तं योगिन एव पश्यन्ति ॥ २ ॥

पूर्णात्पूर्णमुद्धरन्ति पूर्णात्पूर्णं प्रचक्षते ।
हरन्ति पूर्णात्पूर्णं च पूर्णेनैवावशिष्यते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ३ ॥

इदानीं पूर्णवाक्यार्थं कथयति । पूर्णादिति । पूर्णाद्देशतः कालतो वस्तुतश्चापरिच्छिन्नात्परमात्मनः पूर्णमेवोद्धरन्ति । जीवरूपेण यत्पूर्णात्पूर्णमुद्धृतं जीवात्मनाऽतः पूर्णादेव समुद्धृतत्वादिदमपि जीवस्वरूपं पूर्णमेव प्रचक्षते विद्वांसः । तथा हरन्ति पूर्णाज्जीवात्मनाऽवस्थितात्पूर्णमात्मस्वरूपमात्रं देहेंद्रियाद्यनुप्रविष्टं देहेंद्रियादिभ्यो निष्क्रम्य तत्साक्षिणं सर्वान्तरं देहद्वयादुद्धरन्तीत्यर्थः । अत उद्धृतं तेनैव मूलभूतेन पूर्णानंदेनावशिष्यते । तेनैव पूर्णानंदेन ब्रह्मणा संयुज्यते । चित्सदानंदाद्वितीयब्रह्मात्मनाऽवशिष्यत इत्यर्थः । पूर्णमेवावशिष्यत इति वा पाठः । यदा देहेंद्रियादिभ्यो निष्क्रम्य तत्साक्षिणं सर्वान्तरं देहद्वयादुद्धरन्ति तदा पूर्णमेवावशिष्यत इत्यर्थः । तथा च श्रुतिः । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । अस्यायमर्थः । पूर्णमदस्तच्छब्दवाच्यं जगत्कारणं ब्रह्म पूर्णमिदं त्वंशब्दनिर्दिष्टं प्रत्यगात्मस्वरूपं कथमनयोस्तत्त्वंपदार्थयोः पूर्णत्वमिति चेत्तत्राह । पूर्णादनवच्छिन्नात्पूर्णमेव उदच्यते जीवेश्वररूपेण यस्मात्तस्मादनयोः पूर्णत्वमित्यर्थः । पूर्णस्य तत्त्वात्मनावस्थितस्य पूर्णरूपमादाय तत्त्वंपदार्थयोः शोधनं कृत्वा शोधितपदार्थः सन्नित्यर्थः । पूर्णमेव ब्रह्मावशिष्यते ब्रह्मैव भवतीत्यर्थः । यः पूर्णस्वरूपस्तं परमात्मानं योगिन एव पश्यन्ति ॥ ३ ॥

यथाकाशेऽवकाशोऽस्ति गंगायां वीचयो यथा ।
तद्वच्चराचरं सर्वं ब्रह्मण्युत्पद्य लीयते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ४ ॥

स्पष्टार्थः श्लोकः ॥ ४ ॥

आपोऽथाद्भ्यः सलिलं तस्य मध्ये उभौ देवौ शिश्रियातेऽन्तरिक्षे ॥

आदध्रीचीः सविषूचीर्वसानावुभौ बिभर्ति पृथिवीं दिवं च ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५ ॥

इदानीं द्वा सुपर्णाविति मंत्रार्थं कथयति । आप इति । यस्मात्परमात्मन आपः प्रथमं सृष्टाः । तथा चाह मनुः । अप एव ससर्जादाविति । भूतपंचकोपलक्षणार्थोऽप्शब्दः । अनेन सूक्ष्मसृष्टिरभिहिता । अथानंतरमद्भ्यः पूर्वमेव सृष्टाभ्यः सलिलं भूतपंचकं भूतपंचकात्मकं स्थूलदेहादिकं सृष्टम् । तस्य सलिलस्य देहात्मनावस्थितस्य मध्येऽन्तरिक्षे हृदयाकाश उभौ जीवपरमात्मानौ देवौ द्योतनस्वभावौ शिश्रियाते वर्तेते । न केवलमंतरिक्षे शिश्रियाते । आदध्रीचीः सविषूचीर्वसानौ । आभिमुख्येन ध्रियमाणा अवस्थितास्ता अंचन्तीत्यादध्रीच्यो दिशः प्राच्याद्याः सविषूचीरुपदिशो विष्वग्गमनात्ताभिः सह वर्तन्त इति सविषूच्यः प्राच्याद्याः सर्वा दिशो वसानावाच्छादयन्तौ । उभौ बिभर्ति पृथिवीं दिवं च । एको जीव आत्मनः स्वाभाविकचित्सदानंदाद्वितीयं ब्रह्मात्मत्वमनवगम्यानात्मनि देहादौ आत्मभावमापन्नः पृथिवीं भूतभौतिकलक्षणं कर्मफलानुरूपं सुखदुःखात्मकं देहादिकं बिभर्ति । अपरो दिवं द्योतनात्मकं स्वात्मरूपं बिभर्ति । श्रूयते च । द्वा सुपर्णाविति । यः स्वात्ममायया स्वात्मानं प्राणाद्यनंतरं कृत्वान्तरमनुप्रविश्याभिपश्यन्नास्ते तं भगवन्तं योगिन एव पश्यन्ति ॥५॥

चक्रे रथस्य तिष्ठन्तं ध्रुवस्याव्ययकर्मणः ।
केतुमन्तं वहन्त्यश्वास्तं दिव्यमजरं दिवि ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ६ ॥

इदानीं ज्ञानिनः स्वात्मावस्थानं दर्शयति । चक्र इति । ध्रुवस्याव्ययकर्मणः परमेश्वरस्य चेश्वरात्मनावस्थितस्य रथस्य शरीरस्य त्रैलोक्यात्मनावस्थितस्य चक्रे चंक्रमणात्मके देहे तिष्ठन्तं केतुमन्तं प्रज्ञावन्तमत एव दिव्यमप्राकृतमजरं जरामरणादिधर्मविवर्जितम् । दिवि द्योतनात्मकेऽनुदितानस्तमितज्ञानात्मनावस्थिते

पूर्णानंदे ब्रह्मणि वहन्त्यश्वा इंद्रियाणि । एतदुक्तं भवति । यद्यपींद्रियाणि स्वभावतो विषयेष्वेव वर्तन्ते तथापि विज्ञानसारथिना समाकृष्यमाणानि केतुमन्तं पुरुषं दिवि वहन्ति न पराग्विषय इति । तदुक्तं कठवल्लीषु–" आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इत्यादिना । यत्र परमात्मनि वहन्ति तं भगवन्तं योगिन एव पश्यन्ति ॥६॥

न साहश्ये तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चिदेनम् ।
मनीषयाथो मनसा हृदा च य एनं विदुरमृतास्ते भवन्ति ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ७ ॥

नानेन सदृशं किंचिद्विद्यत इत्याह । साहश्य इति । अस्य परमात्मनो रूपं न साहश्ये तिष्ठति । नान्येन साहश्यं वर्तते नानेन सदृशं किंचिद्विद्यत इत्यर्थः । श्रूयते च । न तस्य प्रतिमा अस्ति यस्य नाम महद्यश इति । अत एवोपमाद्यविषयत्वम् । तथा च न चक्षुषा पश्यति कश्चिदप्येनं सर्वान्तरं परमात्मानम् । कथं तर्हि पश्यन्ति । मनीषयाऽध्यवसायात्मिकया बुद्ध्या । मनसा संकल्पविकल्पात्मकेन । हृदा च हृदयेन च साधनभूतेन । हृदयं विना नान्यत्र परमात्मन उपलब्धिः संभवतीति मत्वा हृदा चेत्युक्तम् । अथवा न केवलं मनोबुद्धिमात्रेणापि च हृदा हृदयस्थेन च परमेश्वरेणानुगृहीताः सन्तो य एनं परमात्मानं विदुरयमहमस्मीति तेऽमृता अमरधर्माणो भवन्ति । अथवा हृदा हृदयेन परमात्मना । तथा च हृत्स्थे परमात्मनि हृदयशब्दं निर्वक्ति स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमिति तस्मात् हृदयमिति । अहरहर्वा एवंवित्स्वर्गं लोकमेतीति श्रुतिः । तथा तदधीनामात्मसिद्धिं दर्शयति यस्य देव इति । एवं यं विदित्वाऽमृता भवन्ति तं योगिन एव पश्यन्ति ॥ ७ ॥

द्वादशपूगाः सरितो देवरक्षिताः ।

मध्वीशते तदनुविधायिनस्तदा संचरन्ति घोरम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ८ ॥

इदानीमिंद्रियाणां विषयेषु प्रवृत्तिरनर्थायेत्याह । द्वादशेति । ये द्वादशपूगाः कर्मज्ञानेंद्रियाण्येकादशं मनो द्वादशी बुद्धिस्तेषामनेकपुरुषापेक्षयैकैकस्य पूगत्वमुच्यते । सरितः सरणशीलाः । देवरक्षिता देवेन परमात्मना रक्षिताः । मधु विषयं मधु । ईशते नियमयन्ति । असांकर्येण स्वं स्वं विषयमनुभवन्तीत्यर्थः । यदैवमनुभवन्ति तदापि तदनुविधायिनो विषयपराः संचरन्ति घोरं संसारम् । तस्मादिंद्रियाणि विषयेभ्य उपसंहृत्य स्वात्मन्येव वशं नयेदित्यर्थः । येन रक्षिता मध्वीशते तं देवं योगिन एव पश्यन्ति ॥ ८ ॥

तदर्धमासं पिबति संचितं भ्रमरो मधु ।
ईशानः सर्वभूतेषु हविर्भूतमकल्पयत् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ९ ॥

किं च दृष्टान्तदार्ष्टान्तिकयोस्तत्राभिधानं तदर्धेति । यथा मधुकरो भ्रमरोऽर्धमासोपार्जितं मध्वर्धमासं पिबत्येवमसावपि भ्रमरो भ्रमणविषयत्वात्संसारी तद्विषयमध्वर्धमाससंचितमर्धमासं पिबति । पूर्वजन्मसंचितं कर्म अन्यस्मिञ्जन्मनि भुंक्ते इति यावत् । भवेदप्यैहिकफलात्कर्मणः फलसिद्धिः कर्मानन्तरभावित्वात्कथं पुनरामुष्मिकफलात्कर्मणः फलसिद्धिः । कर्मणो विनाशित्वादित्याशंक्याह । ईशान इति । भवेदयं दोषो यदि केवलात्कर्मणः फलसिद्धिः स्यादीशानः परमेश्वरः कृतप्रयत्नापेक्षः सन्सर्वेषु प्राणिषु प्राणाग्निहोत्रस्येतरस्य च तत्कर्मानुसारेण हविर्भूतमन्नादिकमकल्पयत् । य ईशानः सर्वभूतेषु हविर्भूतमकल्पयत्तं योगिन एव पश्यन्ति ॥ ९ ॥

हिरण्यपर्णमश्वत्थमभिपद्य ह्यपक्षकाः ।
तत्रैव पक्षिणो भूत्वा प्रपतन्ति यथासुखम् ।

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १० ॥

किंच । किमेते मध्वाशिनो बंभ्रम्यमाणाः परिवर्तन्त एव सर्वदा किंवा ज्ञानं लब्ध्वा मुक्ता भवन्तीत्याशंक्याह हिरण्यपर्णमिति । हितं च रमणीयं च भवति तेन हिरण्यमित्याचक्षते । येऽपक्षका ज्ञानपक्षरहिता मध्वाशिनः परिवर्तन्ते हिरण्यपर्णमश्वत्थमभिपद्य । हितं च रमणीयं चेति हितं च रमणीयं च पर्णं यस्याश्वत्थस्य । तथा चाह भगवान्वासुदेवः । छंदांसि यस्य पर्णानीति । हिरण्यपर्णमश्वत्थमभिपद्यारुह्य च वेदसंयोगिब्राह्मणादिदेहं प्राप्येत्यर्थः । तत्रैव ब्राह्मणादिदेहे पक्षिणो ज्ञानिनो भूत्वा तथा च ब्राह्मणाः । ये वै विद्वांसस्ते पक्षिणो येऽविद्वांसस्तेऽपक्षा इति । प्रपतन्ति यथासुखम् । प्रयत्नं कृत्वा मुक्ता भवन्तीत्यर्थः । यं ज्ञात्वा प्रपतन्ति तं योगिन एव पश्यन्ति ॥ १० ॥

अपानं गिरति प्राणं प्राणं गिरति चंद्रमाः ।
आदित्यो गिरते चंद्रमादित्यं गिरते परः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ११ ॥

इदानीं योगं दर्शयति । अपानमिति । अपानं गिरति प्राण उपसंहरति । प्राणं गिरति चंद्रमा मन उपसंहरति । मनसश्चंद्रमा अधिदैवतं यस्माच्चंद्रशब्देन मन उच्यते । तं चंद्रं मन आदित्यो बुद्धिर्गिरति । बुद्धेश्चाधिदैवतमादित्यः । तमादित्यं बुद्धिं गिरते परः परं ब्रह्म । एतदुक्तं भवति । समाधिवेलायामपानं प्राण उपसंहृत्य प्राणं मनसि मनश्च बुद्धौ बुद्धिं परमात्मन्युपसंहृत्य स्वाभाविकचित्सदानंदाद्वितीयब्रह्मात्मनैवावतिष्ठत इत्यर्थः ॥ ११ ॥

एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् ।
तं चेत्सततमृत्विजं न मृत्युर्नामृतं भवेत् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १२ ॥

इदानीं परस्य जीवात्मनाऽवस्थानं दर्शयति । एकमिति । हन्त्यविद्यां

तत्कार्यमिति हंसः परमात्मा । भूतभौतिकलक्षणात्संसारात्सलिलादुच्चरन्नूर्ध्वं चरन्संसाराद्बहिरेव वर्तमान एकं जीवाख्यं पादं सततं नोत्क्षिपति नोद्धरति नोपसंहरति । रूपं रूपं प्रतिरूपोऽवतिष्ठत इत्यर्थः । श्रूयते कठवल्लीषु । एकस्तथा सर्वभूतान्तरात्मेति । कस्मात्पुनरेकं पादं नोत्क्षिपतीत्यत्राह—जीवाख्यं पादं सततमृत्विजं सततयाजिनं यद्युत्क्षिपेत्स्वमायया स्वमात्मानं प्राणाद्यनंतभेदं कृत्वा । अनुप्रविश्य जीवात्मना यदि नानुतिष्ठेत्तदा न मृत्युर्जननमरणादिलक्षणः संसारो भवेत् । संसारिणो जीवस्याभावात् । तथाऽमृतममृतत्वं मोक्षो न भवेत् । अननुप्रविष्टस्य दर्शनासंभवात् । तथा च तदर्थमेवानुप्रवेशं दर्शयति । रूपं रूपमिति । तथा चाथर्वणी श्रुतिः—एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् । स चेदुत्क्षिपत्यानंदे न मृत्युर्नामृतं भवेदिति । एकं रूपं बहुधा यः करोतीति च । यः पादरूपेण जीवात्मना त्रिपादरूपेण चित्सदानंदाद्वितीयब्रह्मात्मनावस्थितस्तं परमात्मानं योगिन एव पश्यन्ति ॥ १२ ॥

अंगुष्ठमात्रः पुरुषोऽन्तरात्मा लिंगस्य योगेन संयाति नित्यम् ।
तमीशमीड्यमनुकल्पमाद्यं पश्यन्ति मूढा न विराजमानम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १३ ॥

केन ह्युपाधिना परः पादात्मनाऽवतिष्ठत इत्याशंक्य परस्यैव लिंगोपाधिकं जीवात्मानं दर्शयति । अंगुष्ठमात्रमिति । स एव चित्सदानंदाद्वितीयान्तरात्मा सर्वभूतान्तरात्मा पूर्णः पुरुषः पूर्णः परमात्मा लिंगयोगेन अंगुष्ठपरिमाणः परिच्छिन्नः संयाति संसरति नित्यम् । कस्मात्पुनः कारणाल्लिंगयोगेनांगुष्ठमात्रः संसरति तत्राह । यो लिंगस्य योगेनांगुष्ठमात्रः संसरति तमीशं सर्वस्येशितारम् । ईड्यं स्तुत्यम् । अनुकल्पं सर्वमनुप्रवि...नाऽनुकल्पयतीत्यनुकल्पम् । आद्यमादौ भवम् । विराजमानं दीप्य... अविवेकिनो देहद्वयात्माभिमानिनो न पश्यन्ति तस्मा... ब्रह्मभावानवगमात्संसरति । यं महात्मानमपश्यन्तः संसरन्ति तं

योगिन एव पश्यन्ति ॥ १३ ॥

गूहन्ति सर्पा इव गह्वरेषु क्षयं नीत्वा स्वेन वृत्तेन मर्त्यान् ।
ते विप्रमुह्यन्ति जना विमूढास्तैर्दत्ता भोगा मोहयन्ते भवाय ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १४ ॥

इदानीमिन्द्रियाणां विषयाणां चानर्थहेतुत्वं दर्शयति । गूहन्तीति । यथा सर्पा गह्वरेभ्यो निष्क्रम्य स्वेन वृत्तेन विषप्रदानेन मर्त्यान्क्षयं नीत्वा गह्वरेषु गूहन्ति स्वात्मानं प्रच्छादयन्त्येवमिन्द्रियसर्पाः श्रोत्रादिषु शयनाच्छ्रोत्रादिभ्यो निर्गत्य स्वेन वृत्तेन विषयप्रदानेन मर्त्यान्क्षयं नीत्वा गह्वरेषु गूहन्ति स्वात्मानं प्रच्छादयन्ति । ते विप्रमुह्यन्ति । विषयविषाभिभूता विशेषेण मुह्यन्ति तद्व्यतिरिक्तं न किंचिज्जानन्तीत्यर्थः । तथा च श्रुतिः । यथा प्रियया संपरिष्वक्त इति । तैरिन्द्रियैर्दत्ता विषकल्पा भोगा विषया मर्त्यान्मोहयन्ते पुनः पुनर्मोहहेतवो भवन्ति । यदिदं विषयैर्विमोहनं तद्भवाय गर्भजन्मजरामरणसंसाराय भवति । यमीड्यमनुकल्पमाद्यमदृष्ट्वा विषयविषान्धा मुह्यन्ति तं योगिनः एव पश्यन्ति ॥१४॥

नात्मानमात्मस्थमवेति मूढः संसारकूपे परिवर्तते यः ।
त्यक्त्वात्मरूपं विषयांश्च भुंक्ते स वै जनो गर्दभ एव साक्षात् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १५ ॥

संमतिमाह । नात्मानमिति । मूढ आत्मानात्मविवेकशून्यः पुमानात्मस्थमात्मनि तिष्ठन्तं न जानाति स एवाहमिति । अतः कारणात्संसारकूपे संसार एव कूपस्तस्मिन्परिवर्तते श्वसूकरादियोनिं प्राप्नोति । अपरोक्षात्मचैतन्यं देहादिदोषरहितं सर्वावभासकं येन सूर्यस्तपति य एव तत्स्वरूपं परित्यज्यानित्यान्विषयान्भोगान्भुंक्ते स जनो न, तर्हि किं साक्षाद्गर्दभ एव । एवंविधं पूर्वोक्तमात्मानं योगिन एव पश्यन्ति ॥ १५ ॥

असाधना वापि ससाधना वा समानमेतद्दृश्यते मानुषेषु ।
समानमेतदमृतस्येतरस्य मुक्तास्तत्र मध्व उत्सं समापुः ॥ न्त्यविद्यां

योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १६ ॥

ज्ञानिनां मोक्षस्वरूपमाह । असाधना वेति । येऽसाधनाः शमदमादिसाधनरहिता ये च शमदमादिसाधनयुक्ताः ससाधनास्तेषु समानं साधारणमात्मस्वरूपं दृश्यते मानुषेषु । तथा समानममृतस्य मोक्षस्येतरस्य संसारस्य सति वाऽसति तेषां मध्ये ये मुक्ताः शमदमादिसाधनास्ते तस्मिन्विष्णोः परमे पदे मध्वो मधुन उत्सं समापुः पूर्णानंदं ब्रह्म प्राप्नुवन्तीत्यर्थः । यमुत्सं संपूर्णानंदं मुक्ताः प्राप्नुवन्ति तं योगिन एव पश्यन्ति ॥१६॥

उभौ लोकौ विद्यया व्याप्य याति तदाहुतं चाहुतमग्निहोत्रम् ।
मा ते ब्राह्मी लघुतामादधीत प्रज्ञानं स्यान्नाम धीरा लभन्ते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १७ ॥

किं चोभाविति । उभौ लोकाविहपरौ विद्यया ब्रह्मात्मत्वविषयया व्याप्य याति तत्पूर्णानंदं ब्रह्म । यस्मादुभौ लोकौ विद्यया व्याप्य याति तस्मादनाहुतं चाग्निहोत्रमनेनात्मज्ञानेनाभिमुख्येन हुतं भवति । सर्वमग्निहोत्रादिकं कर्म फलं चानेनैव संपादितं भवतीत्यर्थः । यस्मादुभौ लोकौ विद्यया व्याप्य याति यस्मादनाहुतमग्निहोत्रं चाहुतं भवति तस्मान्मा ते तव ब्राह्मी ब्रह्मविषया विद्या लघुतां मर्त्यभावं कर्मवदादधीत न करोतु । अपि तु प्रज्ञानं तमसः परं परमात्मानमात्मत्वेन संपादयतु । यदा ब्रह्मविद्याव्यापृतस्य परमात्मानमात्मत्वेनावगच्छतः प्रज्ञानमिति नाम स्यात् । ब्रह्मेति नाम भवतीत्यर्थः । तथा च श्रुतिः प्रज्ञानं ब्रह्मेति । तत्प्रज्ञानं ब्रह्म धीरा धीमंतो लभन्ते तं योगिन एव पश्यन्ति ॥१७॥

एवंरूपो महानात्मा पावकं पुरुषो गिरन् ।
यो वै तं पुरुषं वेद तस्येहात्मा न रिष्यते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १८ ॥

किंच । एवमिति । य एवंरूपः प्रज्ञानैकरसो ब्रह्मरूपः सन्नास्ते स

आत्मा महान्संपद्यते ब्रह्मैव संपद्यत इत्यर्थः । पावकमग्निं सर्वोपसंहृतिरूपं कारणं सकारणं कार्यं गिरन्स्वात्मन्युपसंहरन्यो वै तं पुरुषं ज्ञानैकरसं पुरुषं पूर्णं पुरिशयं वेदायमहमस्मीति साक्षाज्जानाति तस्य प्रज्ञानरूपं परमात्मानमात्मत्वेनावगच्छत इहास्मिन्नेव देह आत्मा न रिष्यते न विनश्यति ! विदुष उत्क्रान्तेरसंभवात् । उत्क्रान्तिनिमित्तत्वाद्विनाशस्य । तथा च श्रुतिः प्रश्नपूर्वकमुत्क्रान्त्यभावं दर्शयति । उदस्मात्प्राणा उत्क्रामन्तीत्याहोस्विन्नेति होवाच याज्ञवल्क्यः । अत्रैव समवलीयन्ते न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति य एवं वेदेति । यं विदित्वा न रिष्यति तं योगिन एव पश्यन्ति ॥ १८ ॥

सदा सदा सत्कृतः स्यान्न मृत्युरमृतं कुतः ।
सत्यानृते सत्यसमानबंधिनी सतश्च योनिरसतश्चैकमेव ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ १९ ॥

यस्मात्तद्विज्ञानादेव नात्मनो विनाशस्तस्मात् । सदा सदेति । सदा सदा सर्वदाऽहर्निशं सत्कृतः स्यात् । सच्चिदानंदाद्वितीयब्रह्मात्मनाऽभिमन्यते यः स सदा सत्कृतो भवति । तस्य न मृत्युर्जननमरणलक्षणः संसारो न भवेत् । अमृतं कुतः । मृत्युसापेक्षत्वादमृतस्य तदभावे कुतः प्रसक्तिः । तथा च श्रुतिः मृत्युर्नास्त्यमृतं कुत इति । सत्यानृते च वर्तेते सत्यसमानबंधिनी परमार्थसत्यमेकमधिष्ठानमनुबध्य वर्तेते रज्ज्वामिव सर्पः । कथमेतदवगम्यते सत्यानृते सत्यसमानबंधिनी इति तत्राह । असतश्च लौकिकस्य योनिः कारणं सतश्चैकमेव कारणमेकमेवाद्वितीयं सद्ब्रह्म यस्मात्प्रवदन्ति तस्मात् सत्यानृते स्वकारणभूते सत्यसमानबंधिनी इति । यदात्मतत्त्वज्ञानकारणान्मृत्योर्विनाशो यमनुबध्य सत्यानृते वर्तेते तं योगिन एव पश्यन्ति ॥ १९ ॥

अंगुष्ठमात्रः पुरुषोऽन्तरात्मा न दृश्यतेऽसौ हृदये निविष्टः ।
अजश्चरो दिवारात्रमतंद्रितश्च स तं मत्वा कविरास्ते प्रसन्नः ॥ २० ॥

अंगुष्ठमात्र इति । आकाशादि देहान्तं जगत्सृष्ट्वा हृदये निविष्टोऽजश्चराचरात्मा सन्न दृश्यते स्वेनात्मना चित्सदानंदाद्वितीयेन । तमहोरात्रमतंद्रितो भूत्वान्नादिकोशपंचकेभ्यो निष्क्रम्य सर्वान्तरात्मानं मत्वा कविरास्ते प्रसन्नः कृतार्थः सन्नित्यर्थः ॥ २० ॥

तस्माच्च वायुरायातस्तस्मिंश्च प्रलयस्तथा ।
तस्मादग्निश्च सोमश्च तस्माच्च प्राण आगतः ॥ २१ ॥
सर्वमेव ततो विद्यात्तत्तद्वक्तुं न शक्नुमः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ २२ ॥

ब्रह्मणो विश्वोपादानत्वमाह । तस्माच्चेति द्वाभ्याम् । श्लोकौ स्पष्टौ ॥ २१ ॥ २२ ॥

तत्प्रतिष्ठास्तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र च ॥ २३ ॥

स्पष्टोऽर्थः ॥ २३ ॥

उभौ च देवौ पृथिवीं दिवं च दिशश्च शुक्रं भुवनं बिभर्ति ।
यस्माद्दिशः सरितश्च स्रवन्ति यस्मात्समुद्रा विहिता महान्तः ॥२४॥

सर्वमिदं ब्रह्मणः सकाशादुद्भूतं तत्रैव लीयत इत्युक्तं तदेव विवृणोति । उभाविति । देवौ जीवेश्वरौ शुक्लं ब्रह्म कर्तृ बिभर्ति । यस्माद्ब्रह्मणः सकाशाद्दिश उत्पद्यन्ते । एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति श्रुतेरर्थः प्रतिपादितः ॥ २४ ॥

यः सहस्रं सहस्राणां पक्षानाहृत्य संपतेत् ।
नान्तं गच्छेत्कारणस्य यद्यपि स्यान्मनोजवः ॥ २५ ॥

इदानीं ब्रह्मणोऽनंतत्वं कथयति यः सहस्रमिति । यः पुरुषः सहस्राणां सहस्रं पक्षानाहृत्यात्मनः पक्षान्कृत्वा संपतेत् । अनेकशः कोटिकल्पं स पुरुषो नान्तं गच्छेत्सर्वकारणस्य परमात्मनः । यद्यप्यसौ मनोजवस्तथापि तस्यान्तं न गच्छेत् । यस्मादंतं न गच्छन्ति तस्मादनंतः परमात्मेत्यर्थः । योऽनंतः परमात्मा तं योगिन एव पश्यन्ति ॥ २५ ॥

अदर्शने तिष्ठति रूपमस्य पश्यन्ति चैनं सुसमिद्धसत्त्वाः ॥
हीनो मनीषी मनसाऽपि पश्येद्य एनं विदुरमृतास्ते भवन्ति ॥२६॥

किं च । अदर्शन इति । अदर्शने दर्शनायोग्यविषये तिष्ठति रूपमस्य परमात्मनः । तथा च श्रुतिः । न संदृशे तिष्ठति रूपमस्येति । पश्यन्ति चैनं सुसमिद्धसत्त्वाः । यद्यपि दर्शनायोग्ये तिष्ठति तथापि परमात्मानं पश्यन्ति । के ते सुसमिद्धसत्त्वाः सुष्ठु समिद्धं सम्यग्दीप्तं सत्त्वमंतःकरणं यज्ञादिभिर्विमलीकरणसंस्कारेण येषां ते सुसमिद्धसत्त्वाः । यस्मादेवं तस्माद्धीनो रागद्वेषादिमलरहितो विशुद्धसत्त्वो मनीषी मनसाऽभिपश्येत् । य एनं परमात्मानं विदुरयमहमस्मीत्यमृता अमरणधर्माणस्ते भवन्ति ॥ २६ ॥

इमं यः सर्वभूतेषु आत्मानमनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु स किं शोचेत्ततः परम् ॥ २७ ॥

इयमिति । इमं सर्वान्तरं सर्वभूतेषु सर्वप्राणिष्वात्मानं योऽनुपश्यति । अन्यत्रान्यत्र देहेंद्रियादियुक्तेषु शरीराद्यभिमानिषु । स किं शोचेत्ततः परं सर्वभूतेषु स्वात्मानं पश्यंस्ततः परं किमनुशोचति । सर्वभूतस्थमात्मानमनुपश्यन्कृतार्थत्वान्नानुशोचतीत्यर्थः । तथा च श्रुतिः तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ २७ ॥

यथोदपाने महति सर्वतः संप्लुतोदके ।
एवं सर्वेषु भूतेषु ब्राह्मणस्य विजानतः ॥ २८ ॥

तदेवाह । यथेति । यथा सर्वतः संप्लुतोदके महति कृतकृत्यस्य पुंसोऽल्प उदपानेऽर्थो नास्त्येवं सर्वेषु भूतेष्वात्मानं पश्यतो ब्राह्मणस्य विजानतः सर्ववेदोदिते कर्मादौ किंचिदपि प्रयोजनं न विद्यत इत्यर्थः । आत्मदर्शनेनैव कृतार्थत्वादिति भावः । तथा चाह भगवान्वासुदेवः । न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय इति ॥ २८ ॥

अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः ।
आत्माहमस्य सर्वस्य यच्च नास्ति यदस्ति च ॥ २९ ॥

इदानीमुक्तस्यार्थस्य द्रढिम्ने वामदेवादिवत्स्वानुभवं दर्शयति । अहमेवास्मीति सार्धैस्त्रिभिः । हे धृतराष्ट्राहमेवास्मि वो युष्माक माता जनयित्री पिताऽप्यहमेव । युष्माकं पुत्रो दुर्योधनादिरहमस्मि । किं बहुना आत्माऽहमस्य सर्वस्य प्राणिजातस्य यच्च नास्ति यदस्ति च तदस्म्यहमेवात्मा ॥ २९ ॥

पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत ।
ममैव यूयमात्मस्था न मे यूयं न चाप्यहम् ॥ ३० ॥

एवं तावदाधिभौतिकं पित्रादिकं दर्शितम् । अथेदानीमाधिदैविकं पित्रादिभावं दर्शयति । पितामह इति । पितामहोऽस्मि स्थविरो वृद्ध इंद्रादेः पितामहोऽस्मि । अनादिसिद्धः परमात्मा सोऽप्यहमेव । यः पिता इंद्रादेर्हिरण्यगर्भः सोऽप्यहमेव । तथा मम यूयमात्मस्था एव । यूयं सर्वे परमार्थतो न म आत्मनि व्यवस्थिता न चाप्यहं युष्मासु स्थितः । तथा चाह भगवान् । मत्स्थानि सर्वभूतानीति ॥ ३० ॥

आत्मैव स्थानं मम जन्म चात्मा ओतप्रोतोऽहमजरप्रतिष्ठः ।
अजश्चरो दिवारात्रमतंद्रितोऽहं मां विज्ञाय कविरास्ते प्रसन्नः ॥ ३१

आत्मैवेति । यद्यपि न ममात्मनि यूयं व्यवस्थिता न चाप्यहं युष्मासु स्थितस्तथाप्यात्मैव स्थानमात्मैवाश्रयो जन्म चात्माऽस्मादेवात्मनः सर्वमुत्पन्नम् । तथा च श्रुतिः । आत्मन एवेदं सर्वमिति । ओतप्रोतः । अहमेव ओतप्रोतरूपेण व्यवस्थितः । जगदात्मा युष्माकं जनयिता । अजरप्रतिष्ठः । अजरे जरामरणवर्जिते स्वे महिम्नि तिष्ठतीत्यजरप्रतिष्ठः । तथा च श्रुतिः स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति ॥ ३१ ॥

अणोरणीयान्सुमनाः सर्वभूतेष्ववस्थितः ॥
पितरं सर्वभूतानां पुष्करे निहितं विदुः ॥ ३२ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामुद्योगपर्वणि धृतराष्ट्रसनत्कुमारसंवादे श्रीसनत्सुजातीये षष्ठोऽध्यायः ॥

अणोरिति । अणोः सूक्ष्मादणीयान्सूक्ष्मतरः । सुमनाः शोभनं मनो रागद्वेषादिमात्सर्यशोकमोहादिधर्मवर्जितं केवलं चित्सदानंदाद्वितीयब्रह्मात्माकारं मनो यस्य स सुमनाः । सर्वभूतेषु सर्वप्राणिषु हृदयकमलमध्येऽहमेवावस्थितः सर्वभूतात्मतया । एवं तावत्स्वानुभवो दर्शितः । इदानीं न केवलमस्मदनुभव एवात्र प्रमाणमन्येप्येवमेवावगच्छन्तीत्याह पितरमित्यर्धेन । येऽन्ये सनकसनंदनसनातनवामदेवादयो ब्रह्मविदस्तेऽपि पितरं सर्वभूतानां सर्वप्राणिनां पिता जनयिता परमेश्वरो यस्तं पुष्करे हृत्पुंडरीकमध्ये निहितं विदुः परमात्मानमात्मत्वेनावगच्छन्तीत्यर्थः । तथा च श्रुतिस्तेषामनुभवं दर्शयति । तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति । इति बृहदारण्यके । एतत्साम गायन्नास्त इति तैत्तिरीयके । सामगानेन स्वानुभवो दर्शित आत्मनः कृतार्थत्वद्योतनार्थम् । तथा छांदोग्येपि तद्धास्य विजज्ञाविति । तलवकारे चाहमन्नमित्यादिना विदुषोऽनुभवो दर्शितः ॥ तत्रैते श्लोका भवन्ति । “ नित्यशुद्धबुद्धमुक्तस्वभावमीशमात्मनो भावयन्षडिंद्रियाणि संनियम्य निश्चलः । अस्तिवस्तुचिद्घनं जगत्प्रसूतिकारणमनश्वरं च तद्भवं जगत्तमोनुदं च यत् । तत्पदैकवाचकं सदामृतं निरंजनं चित्तवृत्तिदृक्सुखं तदस्म्यहं तदस्म्यहमिति ” ॥ ३२ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपादशिष्यश्रीशंकरभगवतः कृतौ सनत्सुजातभाष्ये चतुर्थोऽध्यायः ॥ ४ ॥

विष्णुसहस्रनामभाष्यम् ।

सच्चिदानंदरूपाय कृष्णायाक्लिष्टकारिणे ॥
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥
यस्य स्मरणमात्रेण जन्मसंसारबंधनात् ॥
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ २ ॥
कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतम् ॥
वेदाब्जभास्करं वन्दे शमादिनिलयं मुनिम् ॥ ३
सहस्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः ॥
सहस्रनाम्नां स्तवनं प्रशस्तं निरुच्यते जन्मजरादिशान्त्यै ॥ ४ ॥

वैशंपायन उवाच—

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ १ ॥

वैशंपायनो जनमेजयमुवाच श्रुत्वेति । धर्मानभ्युदयनिःश्रेयसोत्पत्तिहेतुभूतान्वेदलक्षणान् । अशेषेण कात्स्न्र्येन । पावनानि पापक्षयकराणि । च सर्वशः सर्वप्रकारैः । श्रुत्वा । युधिष्ठिरो धर्मपुत्रः शांतनवं शंतनुसुतं भीष्मं । सकलपुरुषार्थसाधनं अल्पप्रयासं अनल्पफलं अनुक्तमिति कृत्वा पुनर्भूय एवाभ्यभाषत प्रश्नं कृतवान् ॥ १ ॥

युधिष्ठिर उवाच--

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ॥ २ ॥

किमिति । किमेकं दैवतं देव इत्यर्थः स्वार्थे तद्धितविधानात् लोके लोकनहेतुभूते समस्तविद्यास्थाने उक्तं ‘ यदाज्ञया प्रवर्तन्ते सर्वे ’ इति प्रथमः प्रश्नः । किं वाप्येकं परायणं अस्मिँल्लोके एकं परायणं किं परमयनं प्राप्तव्यं स्थानं यस्मिन्निरीक्षिते ‘ भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसं-

शया: । क्षीयन्ते चास्य कर्माणि यस्मिन् दृष्टे परावरे । यस्य विज्ञानमात्रेणानंदलक्षणो मोक्षः प्राप्यते । यद्विद्वान्न बिभेति कुतश्चनेति । यत्प्रविष्टस्य न विद्यते पुनर्भव: । यस्य च वेदनात्तदेव भवति । यद्विहायापरं पंथा नृणां नास्ति ' तदुक्तमेकं परायणं लोके यत्तत् किमिति द्वितीयः प्रश्नः । कं कतमं देवं स्तुवन्तो गुणसंकीर्तनं कुर्वन्तः कं कतमं देवमर्चन्तः बाह्यमाभ्यंतरं चार्चनं बहुविधं कुर्वन्तो मानवा मनुसुताः शुभं कल्याणं स्वर्गादिफलं प्राप्नुयुर्लभेयुरिति पुनः प्रश्नद्वयम् ॥ २ ॥

को धर्म: सर्वधर्माणां भवत: परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबंधनात् ॥ ३ ॥

को धर्मः पूर्वोक्तलक्षण: सर्वेषां धर्माणां मध्ये भवतः परम: प्रकृष्टो मतोऽभिप्रेत इति पंचमः प्रश्नः । किं जपन्नित्यादि किं जप्यं जपन् उच्चोपांशुमानसलक्षणं जपं कुर्वन् जंतुर्जननधर्मा । अनेन जंतुशब्देन च जपार्चनस्तवनादिषु यथायोग्यं सर्वप्राणिनामधिकारं सूचयति । जन्मसंसारबंधनात् जन्माज्ञानविजृंभितानामविद्याकार्याणामुपलक्षणं संसारोऽविद्या ताभ्यां जन्मसंसाराभ्यां यद्बंधनं तस्मान्मुच्यते मुक्तो भवतीति षष्ठः प्रश्नः । जन्मसंसारबंधनादितीदमुपलक्षणं इतरेषां फलानामप्येतद्ग्रहणं मोक्षस्य प्राधान्यख्यापनार्थम् ॥ ३ ॥

भीष्म उवाच--

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ४ ॥

भीष्म उत्तरमुवाच । सर्वेषां शत्रूणां भयहेतुर्भीष्मः मोक्षधर्मादीनां प्रवक्ता सर्वज्ञः । किमेकमिति षट्प्रश्नाः तत्र पाश्चात्योऽनंतरो जप्यविशेषः षष्ठ: प्रश्नोऽनेन श्लोकेन परिहीयते जगत्प्रभुमिति । जगत् स्थावरजंगमात्मकं तस्य प्रभुं स्वामिनं । देवदेवं देवानां देवं । अनंतं देशतः कालतो वस्तुतश्चापरिच्छिन्नं । पुरुषोत्तमं क्षराक्षराभ्यां कार्यकारणाभ्यां उत्कृष्टं ।

नामसहस्रेण नाम्नां सहस्रेण । स्तुवन् गुणान्संकीर्तयन् । सततोत्थितो निरतरमुद्युक्तः पूर्णत्वात् पुरिशयनाद्वा पुरुषः स च सर्वदुःखातिगो भवेत् इति सर्वत्र सबध्यते ॥ ४ ॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ५ ॥

उत्तरेण श्लोकेन चतुर्थः प्रश्नः समाधीयते । तमेव चार्चयन् बाह्यार्चनं कुर्वन् । नित्यं सर्वेषु कालेषु । भक्तिर्भजनं तात्पर्येण तया भक्त्या । पुरुषमव्ययं विनाशक्रियारहितं । ध्यायन्नाभ्यंतरार्चनं कुर्वन् । स्तुवन् पूर्वोक्तेन । नमस्यन्नमस्कारं कुर्वन् पूजाशेषभूतमुभयं स्तुतिनमस्कारलक्षणं कुर्वन् । यजमानः पूजकः फलभोक्ता । अथवाऽर्चयन्नित्यनेनोभयविधमर्चनमुच्यते । ध्यायंस्तुवन्नमस्यन्निति मानसं वाचिकं कायिकं चोच्यते ॥ ५ ॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥ ६ ॥

तृतीयं प्रश्नं परिहरति उत्तरैस्त्रिभिः पादैः । अनादिनिधनं षड्भावविकारवर्जितं । विष्णुं व्यापनशीलं । सर्वं लोक्यते इति लोको दृश्यवर्गः तस्य नियंतॄणां ब्रह्मादीनामपीश्वरत्वात् सर्वलोकमहेश्वरः तं । लोकं दृश्यवर्गं स्वाभाविकेन बोधेन साक्षात्पश्यतीति लोकाध्यक्षं । तं नित्यं निरंतरं स्तुवन् सर्वदुःखातिगो भवेदिति त्रयाणां स्तवनार्चनजपानां साधारणं फलवचनं । सर्वाण्याध्यात्मिकादीनि दुःखान्यतीत्य गच्छतीति सर्वदुःखातिगः । भवेत् स्यात् ॥ ६ ॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ७ ॥

तमेव स्तुत्यं विशिनष्टि । ब्रह्मण्यं ब्रह्मणे स्रष्ट्रे ब्राह्मणाय तपसे श्रुतये हितं । सर्वान् धर्मान् जानातीति सर्वधर्मज्ञः तं । लोकानां प्राणिनां । कीर्तिर्यशांसि स्वशक्त्याऽनुप्रवेशेन वर्धयतीति तम् । लोकैर्नाथ्यते

लोकानुपतापयते शास्ते लोकानामीष्ट इति वा लोकनाथः तं । महत् ब्रह्म विश्वोत्कर्षेण वर्तमानत्वात् महद्भूतं परमार्थसत्यं । सर्वभूतानां भवः संसारो यत्सकाशादुद्भवतीति सर्वभूतभवोद्भवस्तम् ॥ ७ ॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८ ॥

पंचमं प्रश्नं परिहीयते एष इति । सर्वेषां वेदलक्षणानां धर्माणामेष वक्ष्यमाणो धर्मोऽधिकतम इति मे मम मतोऽभिप्रेतः । यद्भक्त्या तात्पर्येण पुंडरीकाक्षं हृदयपुंडरीके प्रकाशमानं वासुदेवं स्तवैर्गुणसंकीर्तनलक्षणैः स्तुतिभिः सदाऽर्चेत् सत्कारपूर्वकमर्चनं करोति नरो मनुष्य इति यत् एष धर्म इति संबंधः । अस्य स्तुतिलक्षणस्यार्चनस्याधिक्ये किं कारणमुच्यते हिंसादिपुरुषान्तरद्रव्यदेशकालादिनियमानपेक्षत्वाच्चाधिक्ये कारणम् ' ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ' इति विष्णुपुराणे । ' जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ' इति मानवं वचनम् । एतत्सर्वमभिप्रेत्य ' एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ' इति उक्तम् ॥ ८ ॥

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९ ॥

द्वितीयं प्रश्नं समाधत्ते परममिति । परमं प्रकृष्टं महद्बृहत्तेजश्चैतन्यलक्षणं सर्वावभासकं श्रुतिश्च ' येन सूर्यस्तपति तेजसेद्धस्तद्देवा ज्योतिषां ज्योतिर्न तत्र सूर्यो भाति न चंद्रतारकम् ' इत्यादिश्रुतेः ' यदादित्यगतं तेजः ' इत्यादिस्मृतेश्च । परमं तपत इत्याज्ञापयतीति तपः ' य इमं लोकं परमं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति ' इत्यंतर्यामिब्राह्मणे सर्वनियन्तृत्वं श्रूयते ' भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचमः ' इत्यादि तैत्तिरीयके । तपतीष्ट

इति वा तपः तस्यैश्वर्यमनवच्छिन्नमति महत्त्वं एष सर्वेश्वरः ' इत्यादिश्रुतेः । परमं सत्यादिलक्षणं ब्रह्म महनीयतया महत् । परमं प्रकृष्टं परायणं पुनरावृत्तिशंकारहितम् । परमग्रहणात् सर्वत्र परं तेज आदित्यादिकं व्यावर्त्यते सर्वत्र यो देव इति विशेष्यते च । यो देवः परमं तेजः परमं तपः परमं ब्रह्म परमं परायणं स एकं सर्वभूतानां परायणमिति वाक्यार्थः ॥ ९ ॥

पवित्राणां पवित्रं यो मंगलानां च मंगलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥ १० ॥

इदानीं प्रथमप्रश्नस्योत्तरमाह । पवित्राणां पवित्रं पावनानां तीर्थादीनां परमं पवित्रं । ' परमस्तु पुमान् ध्यातो दृष्टः कीर्तितश्च स्तुतः संपूजितः स्मृतः ॥ प्रणतः पाप्मनः सर्वानुन्मूलयति' इति संसारबंधहेतुभूतं पुण्यापुण्यात्मकं कर्म तत्कारणं चाज्ञानं सर्वं नाशयन् स्वयाथात्म्यज्ञानेनेति वा पवित्राणां पवित्रं । 'रूपमारोग्यमर्थांश्च भोगांश्चैवानुषंगिकान् । ददाति ध्यायतो नित्यमपवर्गप्रदो हरिः । चिंत्यमानः समस्तानां क्लेशानां हानिदो हरिः । समुत्सृज्याखिलं चान्यं सोऽच्युतः किं न चिंत्यते । ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः । अतिपातकयुक्तोऽपि ध्यायन्निमिषमच्युतम् । भूयस्तपस्वी भवति पंक्तिपावनपावनः । आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः । इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा । हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः । ओमित्येवं सदा विप्राः पठत ध्यात केशवम् । भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे । यन्नामकीर्तनं भक्त्या विलापनमनुत्तमम् । मैत्रेयाशेषपापानां धातूनामिव पावकः । अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव । ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् । हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः । अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ।

ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् । तत्सर्वं विलयं याति तोयस्थं लवणं यथा । यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिंतने विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः । मुक्तिं चेतसि यस्स्थितोऽमलधियां पुंसां ददात्यव्ययः । किं चित्रं तदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥ शमायालं जलं वह्नेस्तमसो भास्करोदयः । शान्तिकाले ह्यघौघस्य नामसंकीर्तनं हरेः । हरेर्नामैव नामैव नामैव मम जीवनम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ स्तुत्वा विष्णुं वासुदेवं विपापो जायते नरः । विष्णोः संपूजनान्नित्यं सर्वपापं प्रणश्यति ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममंगलम् । येषां हृदिस्थो भगवान् मंगलायतनं हरिः । गंगास्नानसहस्रेषु पुष्करस्नानकोटिषु । यत्पापं विलयं याति स्मृते नश्यति तद्धरौ ॥ प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै । यानि तेषामशेषाणां कृष्णानुस्मरणं परम् । कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् । प्रयाति विलयं सद्यः सकृद्यत्रापि संस्मृते । सकृत्स्मृतोऽपि गोविंदो नृणां जन्मशतैः कृतम् । पापराशिं दहत्याशु तूलराशिमिवानलः । यथाग्निरुद्धतशिखः कक्षं दहति सानिलः । तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् । ईश्वरो देवीं प्रत्याह मुक्तिकारणं "यावज्जीवं प्रणवमथवा वर्तयेद्रौद्रियं वा याजुर्वेद्यं वसतिमथवा वारणस्यां विदध्यात् । हित्वा लज्जां कलिमलकुलच्छेदनानीरयेद्वा विष्णोर्नामान्यनिशमथवा मुक्तिरेषा चतुर्धा । जनार्दनं भूतपतिं जगद्गुरुं स्मरन्मनुष्यः सततं महामुने । दुःखानि सर्वाण्यपहन्ति साधयत्यशेषकार्याणि च यान्यभीप्सते । कलावत्रापि दोषाढ्ये विषयासक्तमानसः । कृत्वापि सकलं पापं गोविंदं संस्मरञ्छुचिः । वासुदेवे मनो यस्य जपहोमार्चनादिषु । तस्यान्तरायो मैत्रेय देवेंद्रत्वादिकं फलम् । लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रणम्य शिरसा प्रभविष्णुमीशम् । जन्मान्तरप्रलयकल्पसहस्रजातमाशु प्रणाशमुपयाति नरस्य पापम् ॥ एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी

पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥ अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविंदं न तेषां विद्यते भयम् । शाठ्येनापि नमस्कारः प्रयुक्तश्चक्रपाणये । संसारस्थूलबंधानामुद्वेजनकरो हि सः । इत्यादिश्रुतिस्मृतीतिहासपुराणेभ्यः मंगलं सुखं तत्साधनं तत्र ज्ञापकं च तेषामपि परमानंदलक्षणं परं मंगलमिति मंगलानां च मंगलं ॥ दैवतं देवतानां च देवानां देवः द्योतनादिभिः समुत्कर्षेण वर्तमानत्वात् । भूतानां योऽव्ययः व्ययरहितः पिता जनको यो देवः स एकं दैवतं लोक इति वाक्यार्थः ॥ 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च । यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये " इति श्वेताश्वेतराणा मन्त्रोपनिषदि । " सोऽयं देवत ऐक्षत एकमेवाद्वितीयं " इति छांदोग्ये । हिरण्यगर्भ इत्यष्टौ मंत्राः । कस्मै देवायेत्यत्र एकारलोपेनैकदैवतप्रतिपादकस्तैत्तिरीयके ' अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बहिश्च । वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव । एकस्तथा सर्वं भूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च । एकोत्तरः सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुख शाश्वतं नेतरेषाम् । सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते सर्वदुःखेन बाह्यः । नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ' इति काठके । ' ब्रह्म वा इदमग्र आसीदेकमेव नान्यदतोऽस्ति द्रष्टा ' इत्यादिबृहदारण्यके । ' अनेजदेकं मनसो जवीयः तत्र को मोहः कः शोकः एकत्वमनुपश्यतः ' इति ईशावास्ये । ' आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् । सर्वेषां भूतानामंतरः पुरुषः स म आत्मेति विद्यात् । एकं सद्विप्रा बहुधा वदन्ति एकं सन्तं बहुधा

कल्पयन्ति । द्यावाभूमी जनयन्देव एकः एको दधार भुवनानि विश्वा ' इति ऋग्वेदे । ' सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ' ' विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ' ' अहमात्मा गुडाकेश सर्वभूताशयस्थितः ' ' यदा भूतपृथग्भावमेकस्थमनुपश्यति ' ' यथा प्रकाशयत्येकः ' ' सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ' इति गीतोपनिषत्सु । भवति मनोर्माहात्म्यख्यापनी श्रुतिः ' एतद्वै किंच मनुरवदत्तद्भेषजं ' इति । मनुना चोक्तं ' सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति ' इति । ' सृष्टिस्थित्यंतकरणीं ब्रह्मविष्णुशिवात्मिकाम् । स संज्ञां याति भगवानेक एव जनार्दनः । तस्मान्न विज्ञानमृतेऽस्ति किंचित्कचित्कदाचिद्द्विज वस्तुजातम् । विज्ञानमेकं निजकर्मभेदाद्विभिन्नचित्तैर्बहुधाभ्युपेतम् । ज्ञानं विशुद्धं विमलं विशोकमशेषलोभादिनिरस्तसंगम् । एकं सदेकः परमः परेशः स वासुदेवो न यतोस्ति किंचित् । यदा समस्तदेहेषु पुमानेको व्यवस्थितः । तदा हि को भवान्कोऽहमित्येतद्विफलं वचः । सितनीलादिभेदेन यथार्को दृश्यते नभः । भ्रान्तदृष्टिभिरात्मापि तथैकः सन्पृथक् पृथक् । एकः समस्तं यदिहास्ति किंचित्तदुच्यते नास्ति परं ततोऽन्यत् । सोऽहं स च त्वं स च सर्वमेतदात्मस्वरूपं त्यज भेदमोहम् । इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः ' । यमेनोक्तं— ' सकलमिदमहं च वासुदेवः परमपुमान् परमेश्वरः स एकः । इति मतिरचला भवत्यनंते हृदयगते व्रज तान् विहाय दूरात् । यथाह वसुधा सर्वे सत्यमेव दिवौकसः । अहं भवो भवन्तश्च सर्वं नारायणात्मकं । विभूतयस्तु यास्तस्य तासामेव परस्परम् । आधिक्यं न्यूनता बाध्याबाधत्कवेन वर्तते । भवानहं च विश्वात्मन्नेक एव हि कारणम् । जगतोऽस्य जगत्यर्थेऽभेदेनावां व्यवस्थितौ । त्वया यदभयं दत्तं तद्दत्तमखिलं मया । मत्तो विभिन्नमात्मानं द्रष्टुं नार्हसि शंकर । योहं स त्वं जगच्चेदं सदेवासुरमानुषम् । अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः ' । इति विष्णुपुराणे । ' विष्णोरन्यं तु पश्यन्ति येऽमी ब्रह्माणमेव

च । कुतर्कमतयो मूढाः पच्यन्ते नरकेऽशुचौ । ये च मूढा दुरात्मानो भिन्नं पश्यन्ति मां हरेः । ब्रह्माणं च तथा तेषां भ्रूणहत्यासमं त्वघम्' इति भविष्योत्तरपुराणे महेश्वरवचनम् । हरिवंशे च कैलासयात्रायां महेश्वरवचनम् ।। "आदिस्त्वं सर्वभावानां मध्यमंतस्तथा भवान् । त्वत्तः सर्वमभूद्विश्वं त्वयि सर्वं प्रलीयते । अहं त्वं सर्वगो देवस्त्वमेवाहं जनार्दन । आवयोरंतरं नास्ति शब्दैरर्थैर्जगत्त्रये । नामानि तव गोविंद यानि लोके महान्ति च । तान्येव मम नामानि नात्र कार्या विचारणा । त्वदुपासा जगन्नाथ सैवास्तु मम गोपते । यश्च त्वां द्विषते देव स मां द्वेष्टि न संशयः । त्वद्विस्तारो यतो देवा अहं भूतपतिस्ततः । न तदस्ति विभो देव यत्ते विरहितं क्वचित् । यदासीद्वर्तते यच्च यच्च भावि जगत्पते । सर्वं त्वं देव देवेश विना किंचित्त्वया नहि' इत्यादिवाक्यान्येकत्वप्रतिपादकानि ॥ १० ॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११ ॥

यदेकं दैवतं प्रस्तुतं तस्योपलक्षणमुच्यते । यतो यस्मात्सर्वाणि भूतानि संभवन्ति उद्भवन्ति च आदियुगागमे कल्पादौ । यस्मिंश्च प्रलयं विलयं यान्ति विनाशं गच्छन्ति पुनर्भूय एवेत्यवधारणार्थः नान्यस्मिन्नित्यर्थः । युगक्षये महाप्रलये । चकारान्मध्येऽपि यस्मिंस्तिष्ठन्ति "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इति श्रुतेः ॥ ११ ॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥ १२ ॥

तस्यैवंलक्षितस्यैकदैवतस्य लोकप्रधानस्य लोकहेतुभिः प्रतिपाद्यस्य जगन्नाथस्य । भूपते महीपाल । विष्णोर्व्यापनशीलस्य नाम्नां सहस्रं । अशुभकर्मकृतं पापं संसारलक्षणभयं चापहन्तीति पापभयापहं मे मत्तः शृणु एकाग्रमना भूत्वाऽवधारयेत्यर्थः ॥ १२ ॥

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १३ ॥

'एकस्यैव समस्तस्य ब्रह्मणो द्विजसत्तम । नाम्नां बहुत्वं लोकानामुपकारकरं शृणु । निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् । विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम । यच्छक्तिमन्नाम यस्य तत्तस्मिन्नेव वस्तुनि । साधकं पुरुषव्याघ्र सौम्ये क्रूरेषु वस्तुषु' इति विष्णुधर्मवचनाद्यद्यपि परस्य ब्रह्मणः षष्ठी गुणक्रियाजातिरूढानां शब्दप्रवृत्तिहेतूनां निमित्तशक्त्यादीनां चासंभवस्तथापि सगुणे ब्रह्मणि सर्वकारणे च सर्वात्मत्वात्तेषां शब्दप्रवृत्तिहेतूनां संभवात् सर्वे शब्दाः परस्मिन्पुंसि वर्तन्ते । यत्र यानि नामानि गौणानि गुणयोगात्प्रवृत्तानि तेषु यानि विख्यातानि प्रसिद्धानि ऋषिभिर्मंत्रदृग्भिश्च परिगीतानि तानि भूतये पुरुषार्थचतुष्टयसिद्ध्यै । महांश्चासावात्मेति महात्मा "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्ति संततो भावस्तस्मादात्मेति कीर्त्यते' इति वचनादयमेव महानात्मा तस्याचिन्त्यप्रभावस्य तानि वक्ष्यामि । भूतये पुरुषार्थचतुष्टयार्थिनामिति ॥ १३ ॥

ॐ ॥ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १४ ॥

अत्र नामसहस्रे आदित्यादिशब्दानामर्थान्तरे प्रसिद्धानामादित्याद्यर्थानां तद्विभूतित्वेन तदभेदात् तस्यैव स्तुतिरिति प्रसिद्धार्थग्रहणेऽपि स्तुतित्वं "भूतात्मा चेंद्रियात्मा च प्रधानात्मा तथा भवान् । आत्मा च परमात्मा च त्वमेकः पंचधा स्थितः । ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च । स एव सर्वो भुवनैकरूपो यदस्ति यन्नास्ति च विप्रवर्य' इति विष्णुपुराणे । 'आदित्यानामहं विष्णुः' इत्यारभ्य 'अथवा बहुनैतेन किं ज्ञातेन तवार्जुन । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्'

इति श्रीगीतोपनिषत्सु भगवतैवोक्तम् । 'ब्रह्मैवेदं विश्वमिदं वरिष्ठं' 'पुरुष एवेदं सर्वम्' इति श्रुतिभ्यः विष्ण्वादिशब्दानां पुनरुक्तानामपि वृत्तिभेदादपौनरुक्त्यम् । श्रीपतिर्माधव इत्यादीनां वृत्त्यैकत्वेपि शब्दभेदान्न पौनरुक्त्यम् । विशेष्यैक्ये अर्थैक्ये पौनरुक्त्यं तु न दोषाय नाम्नां सहस्रस्य किमेकं दैवतमिति पृष्टैकदैवतविषयत्वात् । यत्र पुंलिंगशब्दप्रयोगस्तत्र विष्णुर्विशेष्यो यत्र स्त्रीलिंगशब्दप्रयोगस्तत्र देवता विशिष्यते यत्र नपुंसकप्रयोगस्तत्र ब्रह्म विशेषणीयम् । यतः सर्वाणि भूतानीत्यारभ्य जगदुत्पत्तिस्थितिलयकारणस्य ब्रह्मण एकदैवतत्वेनाभिहितत्वादादावुभयविधं ब्रह्म विश्वशब्देनोच्यते विश्वमिति । विश्वस्य जगतः कारणत्वेन विश्वमित्युच्यते ब्रह्म आदौ तु विश्वमिति कार्यशब्देन कारणग्रहणम् । कार्यभूतं विरिंच्यादिनामभिरुपपन्ना स्तुतिर्विष्णोरिति दर्शयितुम् । यद्वा परस्मात्पुरुषान्न भिन्नमिदं विश्वं परमार्थतस्तेन विश्वमित्यभिधीयते ब्रह्म । 'ब्रह्मैवेदं विश्वमिदं वरिष्ठम् । पुरुष एवेदं विश्वं' इति श्रुतेः । न तद्भिन्नं किंचित्परमार्थतः सदस्ति । अथवा विशतीति विश्वं ब्रह्म 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेः । किंच संहृतौ विशन्ति सर्वाणि भूतान्यस्मिन्निति विश्व ब्रह्म 'यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतेः । तथाहि सकलं जगत्कार्यभूतमेष विशत्यत्र चाखिलं विशतीत्युभयथापि विश्वं ब्रह्म 'तपो ब्रह्म परं मत' इति श्रुतेः । नचिकेतसा पृष्टे मृत्युरुवाच । अन्यत्र धर्मादन्यत्राधर्मादित्यारभ्य 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि । ॐमित्येतत् । एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् । ॐमिति ब्रह्म ॐमितीदं सर्वं । तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णानि एवमोंकारेण सर्वा वाक् संतृण्णा एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेण ॐमित्येतेन च अक्षरेण परं पुरुषमभिध्यायति ॐकार एवेदं सर्वं ॐमित्ये-

तदक्षरमिदं सर्वम् ' इत्युपक्रम्य ' प्रणवो ह्यपरं ब्रह्म प्रणवश्च परं स्मृतम् । अपूर्वोऽनंतरोऽबाह्यो न परः प्रणवोऽव्ययः । सर्वस्य प्रणवो ह्यादिर्मध्यमंतस्तथैव च । एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनंतरम् । प्रणवं हीश्वरं विद्यात् सर्वस्य हृदये स्थितम् । सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति । अमात्रोऽनंतमात्रश्च द्वैतस्योपशमः शिवः । ॐकारो विदितो येन स मुनिर्नेतरो जनः ' इत्यंता मांडूक्योपनिषत् । ' ॐतद्ब्रह्म ॐतद्वायुः ॐतदात्मा ॐतत्सत्यं ॐतत्सर्वं ॐतत्पुरोर्नमः ' इत्यादिश्रुतिभिः । ' ओमित्येकाक्षरं ब्रह्म ' ' रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः । प्रणवः सर्ववेदेषु ' ' गिरामस्म्येकमक्षरम् ' । आद्यं च त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता । एकाक्षरं परं ब्रह्म प्राणायामः परं तपः । प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः । वाङ्मयं प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत् ' इत्यादिस्मृतेश्च विश्वशब्देनोंकारो ऽभिधीयते । वाच्यवाचकयोरत्यंतभेदाभावात् विश्वमित्योंकार एव ब्रह्मेत्यर्थः । ' सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत ' इति । एतदुक्तं भवति । यस्मात्सर्वमिदं विकारजातं ब्रह्म तज्जत्वात्तल्लत्वात्तदनत्वाच्च । न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति । ' तस्माच्छान्त उपासीत ' इति श्रुतेः । ' श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् । आत्मनः प्रतिकूलानि परेषां न समाचरेत् । आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन । सुखं वा यदि वा दुःखं स योगी परमो मतः । निर्गुणः परमात्मात्र देहं व्याप्य व्यवस्थितः ॥ तमहं ज्ञानविज्ञेयं नावमन्ये न लंघये । यद्यागमैर्न विन्देयं तमहं भूतभावनम् । क्रमेयं त्वां गिरिं चेमं हनूमानिव सागरम् । बद्धवैराणि भूतानि द्वेषं कुर्वन्ति चेत्ततः । शोच्यान्यहोऽतिमोहेन व्याप्तानीति मनीषिणाम् ॥ एते भिन्नदृशां दैत्या विकल्पाः कथिता मया ॥ कृत्वाऽभ्युपगमं तत्र संक्षेपः श्रूयतां मम । विस्तारः सर्वभूतस्य विष्णोः सर्वमिदं जगत् । द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः । समुत्सृज्यासुरं भावं तस्माद्यूयं तथा वयम् । तथा यत्नं

करिष्यामो यथा प्राप्स्याम निर्वृतिम् । सर्वत्र दैत्याः समतामुपेताः समत्वमाराधनमच्युतस्य । न मंत्रादिकृतस्तात न च नैसर्गिको मम । प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि । अन्येषां यो न पापानि चिंतयत्यात्मनो यथा । तस्य पापागमस्तात हेत्वभावान्न विद्यते । कर्मणा मनसा वाचा परपीडां करोति यः । यद्बीजं जन्म फलति प्रभूतं तस्य चाशुभम् । सोऽहं न पापमिच्छामि न करोमि वदामि वा । चिंतयन्सर्वभूतस्थमात्मन्यपि च केशवम् ॥ शारीरं मानसं वाग्जं दैवं भूतभवं तथा । सर्वत्र समचित्तस्य तस्य मे जायते कुतः ॥ एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी । कर्तव्या पंडितैर्ज्ञात्वा सर्वभूतमयो हरिः ॥ सामं चोपप्रदानं च भेददंडौ तथा परौ ॥ उपायाः कथिता ह्येते मित्रादीनां च साधने ॥ तानेवाहं न पश्यामि मित्रादींस्तात मा क्रुधः ॥ साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥ सर्वभूतात्मके तात जगन्नाथे जगन्मये ॥ परमात्मनि गोविंदे मित्रामित्रकथा कुतः ॥ जडानामविवेकानामशूराणामपि प्रभो ॥ भाग्यभोग्यानि राज्यानि सन्त्यनीतिमतामपि ॥ तस्माद्यतेत पुण्येषु य इच्छेन्महतीं श्रियम् ॥ यतितव्यं समत्वे च निर्वाणमपि चेच्छता ॥ देवा मनुष्याः पशवः पक्षिकीटसरीसृपाः ॥ रूपमेतदनंतस्य विष्णोर्भिन्नमिव स्थितम् ॥ एतद्विजानता सर्वं जगत्स्थावरजंगमम् ॥ द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं विश्वरूपधृक् ॥ एवं ज्ञाते स भगवाननादिपरमेश्वरः ॥ प्रसीदत्यच्युतस्तस्मिन्प्रसन्ने क्लेशसंक्षयः ॥ शंकरहिरण्यगर्भौ हरेर्भिन्नाविति न मन्तव्यम् ॥ विष्णोरन्यं तु पश्यन्ति ये मामित्यादि पूर्ववत् । बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ' इत्यादिवचनैश्च । हिंसादिरहितेन स्तुतिनमस्कारादि कर्तव्यमिति दर्शयितुं विश्वशब्देन ब्रह्माभिधीयत इति वा ' मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः । निर्वैरः सर्वभूतेषु यः स मामेति पांडव ' इति ॥ न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे ॥ न हरति न च हन्ति

किंचिदुच्चैः शुद्धमनसं तमवेहि विष्णुभक्तम् ॥ विमलमतिरमत्सरः प्रशान्तः शुचि चरतोऽखिलसत्त्वमित्रभूतः ॥ प्रियहितवचनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः ॥ सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः ॥ इति मतिरचला भवत्यनंते हृदयगते व्रज तान्विहाय दूरात् ॥ यमनियमविधूनकल्मषाणामनुदिनमच्युतसक्तमानसानाम् ॥ अपगतमदमानमत्सराणां व्रज भट दूरतरेण मानवानाम् ' इत्यादिवचनैर्वैष्णवलक्षणस्यैवंप्रकारत्वाच्च हिंसादिरहितेन विष्णोः स्तुतिनमस्कारादि कर्तव्यमिति ॥ 'श्रद्धया देयं अश्रद्धयाऽदेयं श्रद्धयाग्निः समिध्यते ' इत्यादिश्रुतेः । 'श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ' ॥ 'इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ' ॥ 'अश्रोत्रियं श्राद्धमधीतमव्रतमदक्षिणं यज्ञमनृत्विजाहुतम् ॥ अश्रद्धया दत्तमसंस्कृतं हविर्भागाः षडेते तव दैत्यसत्तम ॥ पुण्यं मद्द्वेषिणां यच्च मद्भक्तद्वेषिणां तथा ॥ क्रयविक्रयसक्तानां पुण्यं यच्चाग्निहोत्रिणाम् । अश्रद्धया च यद्दानं यजतां ददतां तथा ॥ तत्सर्वं तव दैत्येंद्र मत्प्रसादाद्भविष्यति ॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ' इत्यादिस्मृतिभिश्च श्रद्धया स्तुतिनमस्कारादि कर्तव्यमश्रद्धया न कर्तव्यम् ॥ 'ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ' इतिभगवद्वचनात् स्तुतिनमस्कारादिकं कर्म सात्त्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं सात्त्विकं संपादितं भवति । आत्मानं विष्णुं ध्यात्वाऽर्चनस्तुतिनमस्कारादि कर्तव्यम् । 'नाऽविष्णुः कीर्तयेद्विष्णुं नाविष्णुर्विष्णुमर्चयेत् ॥ नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयात् ' इति महाभारते कर्मकांडे । 'सर्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ ॥ सर्वकामानवाप्नोति समाराध्य जगद्गुरुम् ॥ तन्मयत्वेन गोविंदमित्येतदद्दाल्भ्य नान्यथा ॥ तन्मयो वांछितान्कामान्यदवाप्नोति मानवः ' इति विष्णुधर्मे । 'सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ' इति भगवद्गीतासु ॥

'अहं हरिः सर्वमिदं जनार्दनो नान्यत्ततः कारणकार्यजातम् ॥ ईदृङ्मनो यस्य न तस्य भूयो भवोद्भवा द्वंद्वगदा भवन्ति' इति विष्णुपुराणे। 'गुरोर्यत्र परीवादो निंदा वापि प्रवर्तते ॥ कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥ तस्माद्ब्रह्मैवाचार्यस्वरूपेणावतिष्ठति' इति व्यासस्मृतेः। "वरं हुतवहज्वालापुंजस्यान्तर्व्यवस्थितिः ॥ न शौरिचिंताविमुखजनसंवासवैशसम्" इति कात्यायनवचनात् यत्र देशे, वासुदेवनिंदा तत्र वासो न कर्तव्यः। एतदुक्तं भवति। 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।' इति श्वेताश्वतरोपनिषन्मंत्रवर्णात् हरौ गुरौ च परा भक्तिः कार्येति। अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ॥ पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥ ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् ॥ तत्सर्वं विलयं याति तोयस्थं लवणं यथा ॥ कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् ॥ प्रयाति विलयं सद्यः सकृत् कृष्णस्य संस्मृतेः ॥ सकृत्स्मृतोऽपि गोविंदो नृणां जन्मशतैः कृतम् ॥ पापराशिं दहत्याशु तूलराशिमिवानलः ॥ सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥ बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ॥ दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय'। एवमादिवचनैः श्रद्धाभक्त्योरभावेऽपि नामसंकीर्तनं समस्तदुरितं नाशयतीति मन्तव्यं किमुत सहस्रनामसंकीर्तनं नाशयतीति। 'मनसा अग्रे संकल्पयत्यथ वाचा व्याहरति। यद्वै मनसा ध्यायति तद्वाचा वदति' इति श्रुतिभ्यां स्मरणं ध्यानं च नामसंकीर्तनेऽन्तर्भूतम्। नामशक्तितात्पर्यावधारणम्। 'यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोपि यच्चिंतने विघ्नो यत्र निवेशिते च मनसि ब्राह्मोऽपि लोकोऽल्पकः ॥ मुक्तिं चेतसि यः स्थितोऽमलधियां पुसां ददात्यव्ययः किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते' इति विष्णुपुराणान्ते श्रीपाराशरेणोपसंहृतम्। 'आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ॥ इदमेकं सुनिष्पन्नं ध्येयो नारायणः

सदा ' इति श्रीमहाभारतान्ते भगवता श्रीवेदव्यासेनोपसंहृतम् ॥ हरिरे
सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः ॥ ओमित्येवं सदा विप्राः पठध्वं ध्य
केशवम् ' इति हरिवंशे कैलासयात्रायां हरिरेको ध्यातव्य इत्युक्तं महेश्व
णापि । एतत्सर्वमभिप्रेत्यैव " एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः
इत्याधिक्यमुक्तम् । " किमेकं दैवतं लोके किंवाप्येकं परायणं " " ट
सर्वाणि " इत्यादिना यद्ब्रह्मोक्तं तद्विश्वशब्देनोक्तमिति व्याख्यातम् । त
मित्याकांक्षायामाह विष्णुरिति । तथाच ऋग्वेदे " तमु स्तोतारः पूर्व्यं य
विद ऋतस्य गर्भं जनुषा पिपर्तन । आस्य जानन्तो नाम चिद्विवक्त
महस्ते विष्णो सुमतिं भजामहे " इत्यादिश्रुतिभिः विष्णोः नामसंकी
सम्यग्ज्ञानप्राप्तये विहितम् । तमेव स्तोतारः पुराणं यथाज्ञ
न सत्यस्य गर्भं जन्मसमाप्तिं कुरुत । जानन्तः आ उ
विष्णोः नामापि आवदत अन्ये वदन्तु मा वा हे वि
वयं ते सुमतिं शोभनं महः भजामहे इति श्रुतेरभिप्रायः ॥ वे
व्याप्नोतीति विष्णुः त्रिषेर्व्याप्यभिधायिनो कुप्रत्ययान्तस्य रूपं विष्णु
देशकालवस्तुपरिच्छेदशब्दशून्य इत्यर्थः । ' व्याप्ता मे रोदसी पार्थ का
श्चाभ्यधिका स्थिता ॥ क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः '
महाभारते ॥ ' यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ अन्तर्बं
तत्सर्वं व्याप्य नारायणः स्थितः ' इत्यादि श्रुतेर्बृहन्नारायणे । '
भूतस्थमेकं नारायणं कारकरूपमेकाकारं परं ब्रह्म शोकमोहविनिर्मुक्तं ि
ध्यायन्नासीदति ' इत्यात्मबोधोपनिषदि । विशतेर्वा क्नुप्रत्ययान्तस्य
विष्णुरिति ' यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः । तस्मादेवो
विष्णुर्विशेर्धातोः प्रवेशनात् ' इति विष्णुपुराणे । यदुद्देशेन वषट्क्रिया
वषट्कारः यस्मिन्यज्ञे वा वषट्क्रिया स वषट्कारः । ' यज्ञो वै विष
इति श्रुतेर्यज्ञो वषट्कारः वषट्कारादिमंत्रात्मना देवान्प्रीणयतीति वा
पतिश्च वषट्कारश्चेति श्रुतेः देवता वा । भूतं च भव्यं च भवच्च भूतः

भवन्ति तेषां प्रभुर्भूतभव्यभवत्प्रभुः कालभेदमनादृत्य सन्मात्रप्रतियौगिकमैश्वर्यमस्येति प्रभुत्वम् । रजोगुणं समाश्रित्य विरिंचिरूपेण भूतानि करोतीति वा भूतकृत् । सत्त्वगुणमधिष्ठाय भूतानि बिभर्ति पालयति धारयति पोषयतीति वा भूतभृत् । प्रपंचरूपेण भवतीति केवलं भवत्येवेति भावः भवनं भावः सत्तात्मको वा। भूतात्मा भूतानामात्मान्तर्यामीति भूतात्मा 'एष त आत्मान्तर्यामी' इति श्रुतेः। भूतानि भावयति जनयति वर्धयतीति वा भूतभावनः ॥ १४ ॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ १५ ॥

भूतकृदादिभिर्गुणतंत्रत्वं प्राप्तं प्रतिषिध्यते पूतात्मेति पूत आत्मा यस्य स पूतात्मा कर्मधारयो वा 'केवलो निर्गुणश्चेति' श्रुतेः । 'गुणोपरागः स्वेच्छातः पुरुषस्येति कल्प्यते' । परमश्चासावात्मा चेति परमात्मा कार्यकारणविलक्षणो नित्यशुद्धमुक्तस्वभावः । मुक्तानां परमा प्रकृष्टा गतिर्गन्तव्या देवता पुनरावृत्त्यसंभवात्तद्गतस्येति मुक्तानां परमा गतिः 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति भगवद्वचनम् । न व्येति नास्य व्ययो विनाशो विकारो वा विद्यत इत्यव्ययः 'अजरोऽमर' इति श्रुतेः। पुरं शरीरं तस्मिन् शेते पुरुषः। 'नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम् ॥ व्याप्य शेते महात्मा यत्तस्मात्पुरुष उच्यते' इति महाभारते। यद्वा अस्तेर्व्यस्ताक्षरयोगात् आसीत्पुरा पूर्वमेवेति विग्रहं कृत्वा व्युत्पादितः पुरुषः। 'पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वं' इति श्रुतेः पुरुषः भूरिषु उत्कर्षशालिषु सत्त्वेषु सीदतीति वा पुरुषः भुवनानि संहारसमयेऽस्यति अन्तं करोति वा । पूर्णत्वात्पूरणाद्वा सदनाद्वा पुरुषः 'पूरणात्सदनाच्चैव ततोऽसौ पुरुषोत्तमः' इति पंचमवेदे । साक्षादव्यवधानेन पश्यति सर्वमिति साक्षी 'साक्षात् द्रष्टरि संज्ञायाम्' इति पाणिनिवचनादिनिप्रत्ययः । क्षेत्रं शरीरं

जानातीति क्षेत्रज्ञः 'आतोऽनुपसर्गे कः' इति कप्रत्ययः 'क्षेत्रज्ञं चापि मां विद्धि' इति भगवद्वचनात् । 'क्षेत्राख्यानि शरीराणि तेषां चैव यथासुखम् । तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते' इति ब्रह्मपुराणे । स एवा न क्षरतीत्यक्षरः परमात्मा च अश्नातेरश्नोतेर्वा सरप्रत्ययान्तस्य रूपमक्षरमिति स एवकारात् क्षेत्रज्ञाक्षरयोरभेदः परमार्थतस्तत्त्वमस्येति श्रुतेश्चकाराद्व्यावहारिको भेदः प्रसिद्धेरपरमार्थत्वात् ॥ १५ ॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥ १६ ॥

योगो 'नानेंद्रियाणि सर्वाणि निरुध्य मनसा सह । एकत्वभावनायोगः क्षेत्रज्ञपरमात्मनोः' तदव्याप्यतया योगः । योगं विचारयन्ति जानन्ति लभन्त इति वा योगविदस्तेषां नेता ज्ञानिनां योगक्षेमवहनादिनेति योगविदां नेता । प्रधानं प्रकृतिर्माया पुरुषो जीवस्तयोरीश्वरः प्रधानपुरुषेश्वरः । नरस्य सिंहस्य चावयवा यस्मिन् लक्ष्यन्ते तद्वपुर्यस्य स नारसिंहवपुः । यस्य वक्षसि नित्यं वसति श्रीः स श्रीमान् । अभिरूपाः केशाः यस्य स केशवः 'केशाद्वोऽन्यतरस्यां' इति वप्रत्ययः प्रशंसायां यद्वा कश्च अश्च ईशश्च त्रिमूर्तयः केशास्ते यद्वशेन वर्तन्ते स केशवः । केशिवधाद्वा 'यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन । तस्मात्केशवनाम्ना त्वं लोके गोपो भविष्यसि' इति विष्णुपुराणे श्रीकृष्णं प्रति नारदवचनम् । पृषोदरादित्वाच्छब्दसाधुत्वकल्पना । पुरुषाणामुत्तमः पुरुषोत्तमः । अत्र 'न निर्धारणे' इति षष्ठीसमासप्रतिषेधो न भवति जात्याद्यनपेक्षयाऽसमर्थत्वात् यत्र पुनर्जातिगुणक्रियापेक्षया पृथक् क्रिया तत्र समर्थत्वान्निषेधः प्रवर्तते मनुष्याणां क्षत्रियः शूरतमः गवां कृष्णा गौः संपन्नक्षीरतमा अध्वगानां धावन् शीघ्रतम इति । अथवा पंचमीसमासः तथा च भगवद्वचनं "यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि

वत्प्रतिभासते एवमनेकेषु शरीरेषु एक एवात्माऽनेकवत्प्रतिभासत इति आदित्यसाधर्म्याद्वा आदित्यः । पुष्करेणोपमिते अक्षिणी यस्येति पुष्कराक्षः महानूर्जितः स्वनो नादो वा श्रुतिलक्षणो यस्येति महास्वनः 'सन्महत्' इत्यादिना समासे कृते 'आन्महतः समानाधिकरणजातीययोः' इत्यात्वं 'अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः' इति श्रुतेः आदिर्जन्म निधनं विनाशः तत् द्वयं यस्य न विद्यते सोऽनादिनिधनः । अनंतादिरूपेण विश्वं बिभर्तीति धाता कर्मणां तत्फलानां च कर्ता । विधाता अनंतादीनामपि धारकत्वाद्विशेषेण दधातीति वा ॥ धातुरुत्तम इति नामैकं सविशेषणं सामानाधिकरण्येन सर्वधातुभ्यः पृथिव्यादिभ्य उत्कृष्टश्चिद्धातुरित्यर्थः धातुर्विरिंचेरुत्कृष्ट इति वा नामद्वय वा कार्यकारणप्रपंचाधारणाच्चिदेव धातुरुक्तः सर्वेषामुत्कृष्टानामतिशयेनोद्भवत्वादुत्तमः ॥ १८ ॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ॥
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ १९ ॥

शब्दादिरहितत्वान्न प्रत्यक्षगम्यः । नाप्यनुमानविषयः तद्व्याप्तलिंगाभावात् । नाप्युपमानसिद्धो निर्धर्मत्वेन सादृश्याभावात् नाप्यर्थापत्तिग्राह्यः तद्विनानुपपद्यमानत्वासंभवात् । नाप्यभावगोचरो भावत्वेन संमतात् । अभावसाक्षित्वाच्च न षष्ठप्रमाणस्य । नापि शास्त्रप्रमाणवेद्यः प्रमाणजन्यातिशयाभावात् । यद्येवं शास्त्रयोनित्वं कथमुच्यते प्रमाणादिसाक्षित्वेन प्रकाशस्वरूपस्य प्रमाणाविषयत्वे अध्यस्तात्तद्रूपत्वेन शास्त्रप्रमाणत्वमित्यप्रमेयः । साक्षित्वात् हृषीकाणींद्रियाणि तेषामीशः क्षेत्रज्ञरूपभाक् यद्वेंद्रियाणि यस्य वशे वर्तन्ते स परमात्मा । यस्य वा सूर्यरूपस्य जगत्प्रीतिकरा हृष्टाः केशा रश्मयः स हृषीकेशः पृषोदरादित्वं । तथोक्तं मोक्षधर्मे 'सूर्याचंद्रमसोः शश्वदंशुभिः केशसंज्ञितैः । बोधयन् स्वापयंश्चैव जगदुत्तिष्ठते पृथक् । बोधनात्स्वापनाच्चैव जगतो हर्षण भवेत् । अग्नीषोमकृतैरेव

कर्मभिः पांडुनंदन । हृषीकेशो महीशानो वरदो लोकभावनः ' इति । जगत्कारणं पद्मं नाभौ यस्येति पद्मनाभः ' अजस्य नाभावध्येकमर्पितम् ' इति श्रुतेः । पृषोदरादित्वात्साधुत्वं । अमराणां प्रभुरमरप्रभुः । विश्वं कर्मक्रिया क्रियत इति जगत्कर्म विश्वं कर्म यस्य विश्वकर्मा । विचित्रनिर्माणशक्तिमत्त्वाद्विश्वकर्मा त्वष्टा तत्सादृश्याद्वा मननान्मनुः । 'नान्योऽतोऽस्ति मन्ता ' इति श्रुतेः मंत्रो वा प्रजापतिर्वा । संहारसमये सर्वभूततनूकरणत्वात् त्वष्टा त्वक्षतेस्तनूकरणत्वार्थे तृच्प्रत्ययः । अतिशयेन स्थूलः स्थविष्ठः । पुराणः स्थविरः ' एकं ह्यस्य स्थविरस्य नाम ' इति श्रुतेः । वयोवचने वा स्थिरत्वात् ध्रुवः स्थविरो ध्रुव इत्येकमिदं नाम सविशेषणम् ॥ १९ ॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मंगलं परम् ॥ २० ॥

कर्मेन्द्रियैर्न गृह्यते इत्यग्राह्यः ' यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ' इति श्रुतेः । शश्वत् सर्वेषु कालेषु भवतीति शाश्वतः ' शाश्वतं शिवमच्युतम् ' इति श्रुतेः । कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः ' इति व्यासवचनात् सच्चिदानंदात्मकः कृष्णः । कृषामि पृथिवीं पार्थ भूत्वा कार्ष्णायसो हलः । कृष्णो वर्णश्च मे यस्मात्तस्मात्कृष्णोऽहमर्जुन ' इति महाभारते । लोहिते अक्षिणी यस्येति लोहिताक्षः ' असावृषभो लोहिताक्षः ' इति श्रुतेः । प्रलये भूतानि तर्दयतीति प्रतर्दनः । ज्ञानैश्वर्यादिसंपन्नः प्रभूतः ऊर्ध्वाधोमध्यभेदेन तिसृणां ककुभामपि धामेति त्रिककुब्धामेत्येकमिदं नाम । येन पुनाति यो वा पुनाति ऋषिर्देवता वा तत्पवित्रम् । ' पुवः संज्ञायां कर्तरि चर्षिदेवतयोः ' इति भगवत्पाणिनिस्मरणात् इत्रप्रत्ययः । ' अशुभानि निराचष्टे तनोति शुभसंततिम् । स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मंगलं विदुः ' इति ... कल्याणरूपत्वान्मंगलं सर्वभूतेभ्यः उत्कर्षतरं परं

[illegible] नाम [illegible] ॥ २० ॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ २१ ॥

[illegible] । प्राणान् ददाति चेष्टयतीति वा प्राणदः 'को ह्येवान्यात्कः प्राण्यात्' इति श्रुतेः । यद्वा प्राणान् कालात्मना द्यति खंडयतीति वा प्राणदः प्राणान्दापयति शोधयतीति ददाति लुनातीति वा प्राणदः । [illegible] प्राणः क्षेत्रज्ञः परमात्मा वा 'प्राणस्य प्राणम्' इति [illegible] वा । वृद्धतमो ज्येष्ठः 'ज्य च इत्यधिकारे' वृद्धस्य च इति 'वृद्धशब्दस्य' ज्यादेशविधानात् । प्रशस्यतमः श्रेष्ठः 'प्रशस्यस्य श्रः' इति श्रादेशविधानात् 'प्राणो वा ज्येष्ठश्च श्रेष्ठश्च' इति श्रुतेः । मुख्यप्राणो वा [illegible] सर्वकारणत्वाद्वा ज्येष्ठः [illegible] श्रेष्ठः । ईश्वरत्वेन सर्वासां प्रजानां पतिः प्रजापतिः । हिर- [illegible] विरिंच्यात्मना वा हिरण्यगर्भः । 'हिरण्यगर्भः समवर्तताग्रे' इति श्रुते. । भूर्गर्भो यस्य सः भूगर्भः । मायाः श्रियः धवः पतिः माधवः । मधुविद्याच्च माधवः बोध्यत्वाद्वा । 'मौनाद्ध्यानाच्च योगाच्च विद्धि भारत माधवम्' इति व्यासवचनाद्वा माधवः । [illegible] सूदितवान् इति मधुसूदनः । 'कर्णमिश्राद्भवं चापि मधुं नाम महासुरम् । ब्रह्मणोपचितिं कुर्वन् जघान पुरुषोत्तमः । तस्य तात वधादेव देवदानवमानवाः । मधुसूदन इत्याहुर्ऋषयश्च जनार्दनम्' इति महाभारते ॥ २१ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ २२ ॥

सर्वशक्तिमत्तया ईश्वरः । विक्रमः शौर्यं तद्योगाद्विक्रमी । धनुरस्यास्तीति धन्वी व्रीह्यादिन्वादिनिप्रत्ययः । 'रामः शस्त्रभृतामहम्' इति भगवद्वचनात् । मेधा बहुग्रन्थधारणसामर्थ्यं सा यस्यास्तीति मेधावी 'अस्मा-

यामेधास्रजो विनिः ' इति पाणिनिवचनाद्विनिप्रत्ययः सलोपश्च । विचक्रमे जगद्विश्वं तेन विक्रमः विना गरुडेन पक्षिणा क्रमणाद्वा विक्रमः । ' क्रमणात् क्रमहेतुत्वाद्वा क्रमो विष्णुः ' इति मनुवचनात् । अविद्यमान उत्तमो यस्मात्सोऽनुत्तमः । ' यस्मात्परं नापरमस्ति किंचित् ' इति श्रुतेः ' न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ' इति स्मृतेश्च । दैत्यादिभिर्धर्षयितुं न शक्यत इति दुराधर्षः । प्राणिनां पुण्यापुण्यात्मकं कर्म कृतं जानातीति कृतज्ञः, पत्रपुष्पाद्यल्पमपि प्रयच्छतां मोक्षं ददातीति वा कृतज्ञः । पुरुषप्रयत्नः कृतिः क्रिया वा हिंसा वा सर्वात्मकत्वात्तदाधारतया लक्ष्यत इति वा कृतिः कृतेति वा कृतिः । स्वमहिम्नि प्रतिष्ठितत्वादात्मवान् ' स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि ' इति श्रुतेः ॥ २२ ॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ २३ ॥

सुराणां देवानां शोभनदातॄणां वा ईशः सुरेशः । आर्तानामार्तिहरणत्वाच्छरणम् । परमानन्दरूपत्वाच्छर्म । विश्वस्य कारणत्वाद्विश्वरेताः । सर्वाः प्रजा यत्सकाशादुद्भवन्तीति स प्रजाभवः । प्रकाशरूपत्वादहः । कालात्मना स्थितो विष्णुः संवत्सर इत्युक्तः । व्यालवद्ग्रहीतुमशक्यत्वाद्व्यालः । प्रतीतिः प्रज्ञा तद्रूपत्वात्प्रत्ययः ' प्रज्ञानं ब्रह्म ' इति श्रुतेः । सर्वाणि दर्शनानि प्रत्यक्षाणि यस्य स सर्वदर्शनः सर्वात्मकत्वात् ' विश्वतश्चक्षुर्विश्वाक्षम् ' इति श्रुतेः ॥ २३ ॥

अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ २४ ॥

न जायत इत्यजः ' न जातो न जनिष्यते ' इति श्रुतेः । ' नहि जातो न जायेऽहं न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः ' इति महाभारते । सर्वेषामीश्वराणामपीश्वरत्वात्सर्वेश्वरः ' एष सर्वेश्वरः ' इति श्रुतेः । नित्यं निष्पन्नरूपत्वात् सिद्धः । सर्ववस्तुषु

संविद्रूपत्वान्निरतिशयत्वात्फलरूपत्वात् सिद्धिः । स्वर्गादीनां विनाशित्वादफलत्वम् । सर्वभूतानामादिकारणत्वात्सर्वादिः । स्वरूपसामर्थ्यान्न च्युतो न च्यवते न च्यविष्यते इत्यच्युतः । ' शाश्वतं शिवमच्युतम् ' इति श्रुतेः । तथा च भगवद्वचनं ' यस्मान्न च्युतः पूर्वोऽहमच्युतस्तेन कर्मणा ' इति ॥ इति नाम्नां शतमाद्यं विवृतम् । विश्वं । परमात्मा । नारसिंहवपुः । संभवो । महास्वनो । मनुः । त्रिककुब्धाम । भूगर्भो । दुराधर्षः । संवत्सरः ॥ वर्षणात् सर्वकामानां धर्मो वृषः कात् तोयात् भूमिमपादिति कपिर्वराहः वृषरूपत्वात्कपिरूपत्वाच्च वृषाकपिः । ' कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते । तस्माद्वृषाकपिं प्राह कश्यपो मां प्रजापतिः ' इति व्यासवचनम् ॥ इयानिति मातुं परिच्छेत्तुं न शक्यत आत्मा यस्येत्यमेयात्मा । सर्वसंबंधविनिर्गतः सर्वयोगविनिःसृतः । ' असंगो ह्ययं पुरुषः ' इति श्रुतेः । नानाशास्त्रोक्ताद्योगादवगतत्वाद्वा सर्वयोगविनिःसृतः ॥ २४ ॥

वसुर्वसुमनाः सत्यः समात्मा संमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ २५ ॥

वसन्ति सर्वभूतान्यत्र तेष्वयमपि वसतीति वसुः ' वसूनामस्मि पावकः ' इत्युक्तो वा वसुः । वसुशब्देन धनवाचिना प्राशस्त्यं लक्ष्यते प्रशस्तं च मनो यस्य स वसुमनाः रागद्वेषादिभिः क्लेशैः उपक्लेशैश्च यतोऽकलुषितं ततस्तन्मनः प्रशस्तम् । अवितथरूपत्वात्परमात्मा सत्यः ' सत्यं ज्ञानमनंतं ब्रह्म ' इति श्रुतेः । मूर्तामूर्तात्मकत्वाद्वा ' सच्च त्यच्चाभवत् ' इति श्रुतेः । सदितिप्राणस्तीत्यन्नं यमितिदिवाकरस्तेन प्राणान्नादित्यरूपत्वाद्वा ' सदिति प्राणस्तीत्यन्नं यमित्यसावादित्यः ' इति श्रुतेः । सत्यः सत्सुसाधुत्वाद्वा सत्यः । सम आत्मा मनो यस्य रागद्वेषादिभिरदूषितः स समात्मा सर्वभूतेषु सम एक आत्मा वा समात्मा ' सम आत्मेति विद्यात् ' इति श्रुतेः । सर्वैरप्यर्थजातैः परिच्छिन्नो मितः संमितः सर्वै-

रपरिच्छिन्नोऽमित इत्यसंमितो वा । सर्वकालेषु सर्वविकाररहितत्वात्समः मया लक्ष्म्या सह वर्तत इति वा समः । पूजितः स्तुतः संस्मृतो वा सर्वं फलं ददाति न वृथा करोतीत्यमोघः अवितथसंकल्पाद्वा । सत्यसंकल्प इति श्रुतेः । हृदयस्थं पुंडरीकमश्नुते व्याप्नोति तत्रोपलक्षित इति पुंडरीकाक्षः । 'यत्पुंडरीक पुरमध्यसंस्थम्' इति श्रुतेः । पुंडरीकाकारे उभे अक्षिणी अस्येति वा । धर्मलक्षणं कर्म यस्येति वृषकर्मा । धर्मार्थमाकृतिः शरीरं यस्येति स वृषाकृतिः । 'धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति भगवद्वचनात् ॥ २५ ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ २६ ॥

संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः, रुतं राति ददातीति वा रुद्रः, रुद्दुःखं कारणं वा द्रावयतीति वा रुद्रः । रोदनाद्द्रावणाद्वापि 'रुद्र इत्युच्यते तस्माच्छिवः परमकारणम्' इति लिंगपुराणवचनात् । बहूनि शिरांसि यस्येति बहुशिराः । 'सहस्रशीर्षा' इति श्रुतेः । बिभर्ति लोकानिति बभ्रुः । विश्वस्य कारणत्वाद्विश्वयोनिः । शुचीनि श्रेयांसि नामानि श्रवणीयान्यस्येति शुचिश्रवाः । न विद्यते मृत मरणमस्येति अमृतः । 'अजरोऽमर' इति श्रुतेः । शाश्वतश्चासौ स्थाणुश्चेति शाश्वतस्थाणुः । वर आरोहोऽङ्कोऽस्येति वरारोहः । वरमारोहणं यस्मिन्निति वा आरूढानां पुनरावृत्त्यसंभवात् 'न स पुनरावर्तते' इति श्रुतेः 'यं प्राप्य न निवर्तन्ते तद्धाम परमं मम' इति भगवद्वचनात् । महत्सृज्यविषयं तपो ज्ञानमस्येति महातपाः 'यस्य ज्ञानमयं तपः' इति मंत्रवर्णात् । ऐश्वर्यं प्रतापो वा तपो महदस्येति वा महातपाः ॥ २६ ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यंगो वेदांगो वेदवित्कविः ॥ २७ ॥

सर्वत्र गच्छतीति सर्वगः कारणत्वेन व्याप्तत्वात् । सर्वत्र सर्वं वेत्ति

विंदतीति वा सर्ववित् । भातीति भानुः ' तमेव भान्तमनुभाति सर्वं ' इति श्रुतेः । ' यदादित्यगतं तेजो जगद्भासयतेऽखिल ' इति स्मृतेश्च । सर्वविच्चासौ भानुश्च सर्वविद्भानुः । विष्णु अव्ययं सर्वं इत्यर्थे विष्वगंचति पलायते दैत्यसेना यस्य रणोद्योगमात्रेणेति विष्वक्सेनः । जनान् अर्दयति हिनस्ति नरकादीन् गमयतीति वा, जनैः पुरुषार्थमभ्युदयनिःश्रेयसलक्षणं याच्यते इति जनार्दनः । वेदरूपत्वाद्वेदः वेदयतीति वा वेदः । ' तेषामेवानुकंपार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ' इति भगवद्वचनात् । यथावद्वेदं वेदार्थं च विंदत इति वा वेदवित् ' वेदान्तकृद्वेदविदेव चाहम् ' इति भगवद्वचनात् । ' सर्वे वेदाः सर्ववेद्याः सशास्त्राः सर्वे यज्ञाः सर्व ईज्यश्च कृष्णः । विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये तेषां राजन् सर्वयज्ञाः समाप्ताः' इति महाभारते । अव्यंगः ज्ञानादिभिः परिपूर्णोऽविकल इत्युच्यते व्यंगो व्यक्तिर्न विद्यत इत्यव्यंगो वा 'अव्यक्तोऽयं' इति भगवद्वचनात् । वेदा अंगभूता यस्य स वेदांगः वेदान् विचारयतीति वेदवित् । कविः क्रान्तदर्शी सर्वदृक् नान्यदतोऽस्ति द्रष्टा इत्यादिश्रुतेः ' कविर्मनीषी ' इत्यादिमन्त्रवर्णात् ॥ २७ ॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ २८ ॥

लोकानध्यक्षयतीति लोकाध्यक्षः सर्वेषां लोकानां प्राधान्येनोपद्रष्टा । लोकपालादिसुराणामध्यक्षः सुराध्यक्षः । धर्माधर्मौ साक्षादीक्षतेऽनुरूप फलं दातुं तस्माद्धर्माध्यक्षः । कृतश्च कार्यरूपेण अकृतश्च कारणरूपेणेति कृताकृतः । सर्गादिषु पृथग्विभूतयश्चतस्रः आत्मनो मूर्तयो यस्य स चतुरात्मा । ' ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः । विभूतयो हरेरेता जगतः सृष्टिहेतवः । विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज । स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः । रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः । चतुर्धा प्रलयायैता जनार्दनविभूतयः ' इति वैष्णवपुराणे । ' व्यूह्या-

त्मानं चतुर्धा वै वासुदेवादिमूर्तिभिः । सृष्ट्यादीन्प्रकरोत्येष विश्रुतात्मा जनार्दनः ' इति व्यासवचनात् चतुर्व्यूहः । दंष्ट्राश्चतस्रो यस्येति चतुर्दंष्ट्रो नृसिंहविग्रहः यद्वा सादृश्याच्छृंगं दंष्ट्रेत्युच्यते । ' चत्वारि शृंगा ' इति श्रुतेः । चत्वारो भुजा अस्येति चतुर्भुजः ॥ २८ ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ २९ ॥

प्रकाशैकरसत्वात् भ्राजिष्णुः । भोज्यरूपतया प्रकृतिर्माया भोजनमुच्यते पुरुषरूपेण तां भुनक्तीति भोक्ता । हिरण्याक्षादीन् सहते अभिभवतीति सहिष्णुः । हिरण्यगर्भरूपेण जगदादावुत्पद्यते स्वयमिति जगदादिजः । अघं न विद्यतेऽस्येत्यनघः । अपहतपाप्मा इति श्रुतेः । विजयते ज्ञान-वैराग्यैश्वर्यादिभिर्गुणैर्विश्वमिति विजयः । यतो जयत्यतिशयेन सर्वभूतानि स्वभावतोऽतो जेता । विश्वं योनिर्यस्य विश्वश्चासौ योनिश्चेति वा विश्व-योनिः । पुनः पुनः शरीरेषु वसति क्षेत्रज्ञरूपेणेति पुनर्वसुः ॥ २९ ॥

उपेंद्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ ३० ॥

इंद्रमुपगतोऽनुजत्वेनेत्युपेंद्रः यद्वा उपरि इंद्रः उपेंद्रः । ' ममोपरि यथेंद्र-स्त्वं स्थापितो गोभिरीश्वरः । उपेंद्र इति कृष्ण त्वां गास्यन्ति भुवि देवताः ' इति हरिवंशवचनात् । बलिं वामनरूपेण याचितवानिति वामनः । संभजनीय इति वा वामनः ' मध्ये वामनमासीनं विश्वे देवा उपासते ' इति मंत्रवर्णात् । स एव जगत्त्रयं क्रममाणः प्रांशुरभवदिति प्रांशुः । ' तोये तु पतिते हस्ते वामनोऽभूदवामनः । सर्वदेवमयं रूपं दर्शयामास वै प्रभुः । भूः पादौ द्यौः शिरश्चास्य चंद्रादित्यौ च चक्षुषी ' इत्यादि विश्व-रूपं दर्शयित्वा ' तस्य विक्रमतो भूमिं चंद्रादित्यौ स्तनांतरे । नभः प्रक्र-ममाणस्य नाभ्यां तौ समवस्थितौ । दिवमाक्रममाणस्य जानुमूले व्यवस्थितौ ' इति प्रांशुत्वं दर्शितं हरिवंशे । न मोघं चेष्टितं यस्य सोऽमोघः ।

स्मरतां स्तुवतामर्चयतां पावनत्वाच्छुचिः ' अस्पर्शश्च महान् शुचिः ' इति मंत्रवर्णात् । बलप्रकर्षशालित्वादूर्जितः अतीत्येंद्रं स्थितो ज्ञानैश्वर्यादिभिः स्वभावसिद्धैरित्यतींद्रः । सर्वेषां प्रतिसंहृतौ प्रतिसंग्रहात्संग्रहः । सृज्यरूपतया सर्गहेतुत्वाद्वा सर्गः । एकरूपेण जन्मादिरहिततया धृत आत्मा येन स धृतात्मा । स्वेषु स्वेष्वधिकारेषु प्रजा नियमयतीति नियमः अंतर्यमयतीति यमः ॥ ३० ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतींद्रियो महामायो महोत्साहो महाबलः ॥ ३१ ॥

निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यः । सर्वविद्यानां वेदितृत्वाद्वैद्यः । सदा आविर्भूतस्वरूपत्वात्सदायोगी । धर्मत्राणाय वीरान् असुरभटान् हन्तीति वीरहा । माया विद्यायाः पतिर्माधवः । ' मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामासि धवः स्वामीति शब्दितः ' इति हरिवंशे । यथा मधु परां प्रीतिमुत्पादयति अयमपि तथेति मधुः । शब्दादिरहितत्वादिंद्रियाणामविषयः इत्यतींद्रियः । ' अशब्दमस्पर्शम् ' इति श्रुतिः । मायाविनामपि मायाकारित्वान्महामायः ' मम माया दुरत्यया ' इति भगवद्वचनात् । जगदुत्पत्तिस्थितिलयार्थमुद्युक्तत्वान्महोत्साहः । बलिनामपि बलवत्वान्महाबलः ॥ ३१ ॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ ३२ ॥

बुद्धिमतामपि बुद्धिमत्त्वान्महाबुद्धिः । महदुत्पत्तिकारणमविद्यालक्षणं वीर्यमस्येति महावीर्यः । महती शक्तिः सामर्थ्यमस्येति महाशक्तिः । महती द्युतिर्बाह्याभ्यंतरा वाऽस्येति महाद्युतिः ' स्वयंज्योतिश्च ' इति श्रुतेः । ' ज्योतिषां ज्योतिः ' इत्यादेश्च । इदं तदिति निर्दिष्टुं यन्न शक्यते परस्मै असंवेद्यत्वात्तदनिर्देश्यं वपुरस्येति अनिर्देश्यवपुः । ऐश्वर्यलक्षणा समग्रा श्रीर्यस्य स श्रीमान् । सर्वैः प्राणिभिरमेया बुद्धिरात्मा यस्य सोऽमेयात्मा ।

महान्तमद्रिं गिरिं मंदरं गोवर्धनं च अमृतमथने गोरक्षणे च धृतवानिति महाद्रिधृक् षान्तोयम् ॥ ३२ ॥

महेष्वासो महीभर्ता श्रीनिवासः सतांगतिः ।
अनिरुद्धः सुरानंदो गोविंदो गोविदांपतिः ॥ ३३ ॥

महानिष्वास इषुक्षेपो यस्य स महेष्वासः । एकार्णवां प्लुतां महीं च बभारेति महीभर्ता । यस्य वक्षस्यनपायिनी श्रीर्वसति स श्रीनिवासः । सतां वैदिकानां साधूनां पुरुषार्थसाधनहेतुः प्राप्तिहेतुः सतांगतिः । न केनापि प्रादुर्भावेषु निरुद्ध इत्यनिरुद्धः । सुरान् आनंदयतीति सुरानंदः । ' नष्टां वै धरणीं पूर्वमविंदं यद्गुहागताम् । गोविंद इति तेनाहं देवैर्वाग्भिरभिष्टुतः ' इति मोक्षधर्मवचनाद्गोविंदः ' अहं किलेंद्रो देवानां त्वं गवामिंद्रतां गतः । गोविंद इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम् ' इति । ' गौरेषा भवतो वाणी तां च विंदयते भवान् । गोविंदस्तु ततो देव मुनिभिः कथ्यते भवान् ' इति च हरिवंशे । गौर्वाणी तां विदन्तीति गोविदः तेषां पतिर्विशेषेणेति गोविदांपतिः ॥ ३३ ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ ३४ ॥

तेजस्विनामपि तेजस्त्वान्मरीचिः ' तेजस्तेजस्विनामहं ' इति भगवद्वचनात् । स्वाधिकारात्प्रमाद्यन्तीः प्रजा दमयितुं शीलमस्य वैवस्वतादिरूपेणेति दमनः । अहं स इति तादात्म्यभाविनः संसारभयं हन्तीति हंसः पृषोदरादित्वाच्छब्दसाधुत्वम् । हन्ति गच्छति सर्वशरीरेष्विति वा हंसः ' हंसः शुचिषत् ' इति मंत्रवर्णात् । शोभनधर्माधर्मरूपपर्णत्वात्सुपर्णः ' द्वा सुपर्णा ' इति मंत्रवर्णात् । शोभनं पर्णं यस्येति वा सुपर्णः ' सुपर्णः पततामस्मि ' इति ईश्वरवचनात् । भुजेन गच्छतामुत्तमो भुजगोत्तमः। हिरण्यमेव कल्याणा नाभिरस्येति रमणीयनाभित्वात् हिरण्मयत्वाद्वा हिरण्यनाभः । बदरिकाश्रमे नरनारायणरूपेण शोभनं तपश्चरतीति सुतपाः ।

' मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तपः ' इति स्मृतेः । पद्ममिव वर्तुला नाभिरस्येति हृदयपद्मस्य नाभौ मध्ये प्रकाशनाद्वा पद्मनाभः पृषो दित्वात्साधुत्वकल्पना । प्रजानां पतिः पिता प्रजापतिः ॥ ३४ ॥

अमृत्युः सर्वदृक् सिंहः संधाता संधिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ ३५ ॥

मृत्युर्विनाशस्तद्धेतुर्वास्य न विद्यते इत्यमृत्युः । प्राणिनां कृताकृतं पश्यति स्वाभाविकेन बोधेनेति सर्वदृक् । हिनस्तीति सिंहः पृषोदर त्वात्साधुत्वम् ॥ इति नाम्नां द्वितीयं शतं विवृतम् ॥ वृषाकपिः । पुं काक्षो । वरारोहो । वेदवित् । भ्राजिष्णुः । उपेंद्रः । नियमो । महोत्सा महेष्वासो । हंसः ॥ कर्मफलैः पुरुषान् संधत्त इति संधाता । फलभ च स एवेति संधिमान् । सदैकरूपत्वात् स्थिरः । अजति गच क्षिपति इति वा अजः । मर्षितुं सोढुं दानवादिभिर्न शक्यते इति दुर्मर्ष श्रुतिस्मृत्यादिभिः सर्वेषामनुशिष्टिं करोतीति शास्ता । विशेषेण सत्यज्ञानादिलक्षणः आत्माऽतो विश्रुतात्मा । सुरारीणां निहन्तृत्वात्सुरारिहा ॥३

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ ३६ ॥

सर्वविद्यानामुपदेष्टृत्वात्सर्वेषां जनकत्वाद्वा गुरुः विरिंच्यादीनामपि विद्यासंप्रदायकत्वाद्गुरुतमः ' यो ब्रह्माणं विदधाति पूर्वम् ' इति मंत्रवर्णा धाम ज्योतिः ' नारायणः परो ज्योतिः ' इति मंत्रवर्णात् सर्वकामान स्पदत्वाद्वा धाम ' परं ब्रह्म परं धाम ' इति श्रुतेः । सत्यवचनलक्षण रूपत्वात्सत्यः ' तस्मात् सत्यं परमं वदन्ति ' इति श्रुतेः । स सत्यमिति वा सत्यः । ' प्राणा वै सत्यं तेषामेष सत्यम् ' इति श्रुते सत्यः अवितथः पराक्रमो यस्य स सत्यपराक्रमः । निमीलिते यतो योगनिद्रयाऽतो निमिषः । नित्यप्रबुद्धस्वरूपत्वादनिमिषः मत्स्यरूप

वा आत्मरूपतया वा अनिमिषः । भूततन्मात्ररूपां वैजयन्त्याख्यां स्रजं नित्यं बिभर्तीति स्रग्वी । वाचो विद्यायाः पतिर्वाचस्पतिः सर्वार्थविषया धीर्बुद्धिरस्येत्युदारधीरिति पदद्वयमेकं नाम ॥ ३६ ॥

अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ ३७ ॥

अग्रं प्रकृष्टं पद नयति मुमुक्षुमित्यग्रणीः । भूतग्रामस्य नेतृत्वात् ग्रामणीः । श्रीः कान्तिः सर्वातिशायिन्यस्येति श्रीमान् । प्रमाणानुग्राहको भेदकरस्तर्को न्यायः । जगद्यन्त्रनिर्वाहको नेता । श्वसनरूपेण भूतानि चेष्टयतीति समीरणः । सहस्राणि मूर्धानोऽस्येति सहस्रमूर्धा । विश्वस्यात्मा विश्वात्मा सहस्राण्यक्षीण्यक्षाणि वा यस्य स सहस्राक्षः । सहस्राणि पादा अस्येति सहस्रपात् ‘ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ’ इति श्रुतेः ॥ ३७ ॥

आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ॥
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ ३८ ॥

आवर्तयितुं संसारचक्रं शीलमस्येत्यावर्तनः । संसारबंधान्निवृत्त आत्मा स्वरूपमस्येति निवृत्तात्मा । आच्छादिकया अविद्यया संवृतत्वात्संवृतः सम्यक् प्रमर्दयतीति रुद्रकालाद्याभिर्विभूतिभिरिति संप्रमर्दनः । सम्यगह्नां प्रवर्तमानात्सूर्यादहः । संवर्तकः महाप्रलयरूपः । हविर्वहनाद्वह्निः । अनादानादनिलः अननाद्वा अनिलः । शेषदिग्गजादिरूपेण वा धत्त इति धरणीधरः ॥ ३८ ॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ ३९ ॥

शोभनः प्रसादो यस्यापकारवतामपि शिशुपालादीनां मोक्षप्रदातृत्वादिति सुप्रसादः । रजस्तमोभ्यामकलुषित आत्मान्तःकरणमस्येति प्रसन्नात्मा करुणार्द्रस्वभावत्वाद्वा यद्वा प्रसन्नस्वभावः कारुणिक इत्यर्थः अवाप्तसर्वकामत्वाद्वा । विश्वं धृतवानिति विश्वधृक् ‘ ञिधृषा प्रागल्भ्ये ’ । विश्वं

भुङ्क्ते भुनक्ति पालयतीति वा विश्वभुक् । हिरण्यगर्भादिरूपेण विविधं भवतीति विभुः । 'नित्यं विभुम्' इति मन्त्रवर्णात् । सत्करोति पूजयतीति सत्कर्ता । पूजितैरपि पूजितः सत्कृतः । न्यायप्रवृत्ततया साधुः । साधयति साध्यभेदानुपादानात् साध्यमात्रसाधको वा । जनान् संहारसमये अपह्नुते अपनयतीति जह्नुः । जहात्यविदुषोऽभक्तान्नयति परं पदमिति वा । नर आत्मा ततो जातान्याकाशादीनि नाराणि कार्याणि तानि कारणात्मना व्याप्नोतीत्यतश्च तान्ययनमस्येति नारायणः 'यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति मंत्रवर्णात् । 'नराज्जातानि सत्त्वानि नाराणीति ततो विदुः । तान्येव चायनं तस्य तेन नारायणः स्मृतः' इति महाभारते । नाराणां जीवानामयनत्वात्प्रलय इति वा नारायणः 'यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतेः । 'नाराणामयनं यस्मात्तस्मान्नारायणः स्मृतः' इति ब्रह्मवैवर्तात् । 'आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः' इति मनुवचनाद्वा नारायणः । 'नारायणाय नम इत्यमुमेव सत्यं संसारघोरविषसंहरणाय मंत्रम् । शृण्वन्तु भव्यमतयो यतयोऽनुरागा उच्चैस्तरामपदिशाम्यहमूर्ध्वबाहुः' इति श्रीनारसिंहपुराणे । 'नयतीति नरः प्रोक्तः परमात्मा सनातनः' इति व्यासवचनम् ॥ ३९ ॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ ४० ॥

यस्मिन्संख्याभेदादि न विद्यत इत्यसंख्येयः । अप्रमेय आत्मा स्वरूपमस्येत्यप्रमेयात्मा । अतिशेते सर्वमतो विशिष्टः 'विश्वतः यस्मान्नित्यम्' इति श्रुतेः । शिष्टं शासनं तत् करोतीति शिष्टकृत् । शिष्टान् करोति पालयतीति वा । सामान्यवचनो धातुर्विशेषवचनो दृष्टः कुरु काष्ठानीत्याहरणे यथा तद्वद्विशिष्टकृत् । निरंजनः शुचिः । सिद्धो निर्वृत्त अर्थ्यमानोर्थोऽस्येति सिद्धार्थः । 'सत्यकाम' इति श्रुतेः । सिद्धो निष्पन्नः संकल्पोऽ-

स्येति सिद्धसंकल्प । 'सत्यसंकल्प' इति श्रुतेः । सिद्धिं फलं कर्तृभ्यः स्वाधिकारानुरूपतो ददातीति सिद्धिदः । सिद्धेः क्रियायाः साधकत्वात्सिद्धिसाधनः ॥ ४० ॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ ४१ ॥

वृषो धर्मः पुण्यं अहेवाहः प्रकाशसाधर्म्यात् द्वादशाहप्रभृतिर्वृषाहः सोऽस्यास्तीति वृषाही वृषाह इत्यत्र 'राजाहःसखिभ्यष्टच्' इति टच्प्रत्ययः । वर्षत्येष भक्तेः कामानिति वृषभः । यास्केनोक्तं 'विष्णुर्विचक्रमणात्' इति विष्णुः । वृषरूपाणि सोपानपर्वाण्याहुः परं धामारुरुक्षोरित्यतो वृषपर्वा । प्रजा वर्षन्ति चोदरं तस्येति वृषोदरः । वर्धयतीति वर्धनः । प्रपंचरूपेण वर्धत इति वर्धमानः । इत्थं वर्धमानोऽपि पृथगेवावतिष्ठतीति विविक्तः । श्रुतयः सागर इवात्र निधीयन्ते इति श्रुतिसागरः ॥ ४१ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ ४२ ॥

शोभना भुजा जगद्रक्षाकरा यस्येति सुभुजः । पृथिव्यादीन्यपि धारकाण्यन्यैर्धारयितुं अशक्यानि तानि धारयन् न केनचिद्धारयितुं शक्य इति दुर्धरः दुःखेन ध्यानसमये मुमुक्षुभिर्हृदये धार्यत इति वा दुर्धरः । यतो निःसृता ब्रह्ममयी वाक् तस्माद्वाग्मी । महांश्चासाविंद्रश्चेति महेंद्रः ईश्वराणामपीश्वरः । वसुः धनं ददातीति वसुदः 'अन्नादो वसुदानः' इति श्रुतेः । दीयमानं तद्वस्वपि स एवेति वा वसुः आच्छादयत्यात्ममाययेति वा वसुः । अंतरिक्ष एव वसति नान्यत्रेत्यसाधारणेन वसनेन वा वसुः 'वसुरंतरिक्षसत्' इति श्रुतेः । एकं रूपं न विद्यत इति नैकरूप इत्यर्थः । 'इंद्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः । ज्योतींषि रूप इत्यादिस्मृतेश्च । बृहद्वराहादिरूपमस्य बृहद्रूपः । शिपयः पशवः तेषु प्रतितिष्ठति यज्ञरूपेणेति शिपिविष्टो यज्ञमूर्तिः 'यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति' इति श्रुतेः । शिपयो रश्मयस्तेषु

निविष्ट इति वा ' शैत्याच्छयनयोगाच्च शीति वारि प्रचक्षते । तत्पानादुक्षणाच्चैव शिपयो रश्मयो मताः । तेषु प्रवेशाद्विश्वशः शिपिविष्ट इहोच्यते । सर्वेषां प्रकाशनशीलत्वात्प्रकाशनः ॥ ४२ ॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ४३ ॥

ओजः प्राणबलं तेजः शौर्यादयो गुणा द्युतिर्दीप्तिः ता धारयतीत्योजस्तेजोद्युतिधरः अथवा ओजस्तेज इति नामद्वयं वा । " बलं बलवतां चाहं तेजस्तेजस्विनामहं " इति भगवद्वचनात् । ज्ञानलक्षणां दीप्तिं धारयतीति द्युतिधरः । प्रकाशस्वरूपः आत्मा यस्य स प्रकाशात्मा । सवित्रादिविभूतिभिः विश्वं प्रतापयतीति प्रतापनः । धर्मज्ञानवैराग्यादिभिरुपेतत्वादृद्धः । स्पष्टमुदात्तमोंकारलक्षणमस्येति स्पष्टाक्षरः । ऋग्यजुःसामलक्षणो मंत्रः मंत्रवाच्यत्वाद्वा मंत्रः । संसारतापतिग्मांशुतापतापितचेतसां चंद्रांशुरिवाह्लादकरत्वाच्चंद्रांशुः । भास्करद्युतिसाधर्म्याद्भास्करद्युतिः ॥ ४३ ॥

अमृतांशूद्भवो भानुः शशबिंदुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ४४ ॥

अमृते मथ्यमाने पयोनिधावमृतांशोश्चंद्रस्योद्भवो यस्मात्सोऽमृतांशूद्भवः । भातीति भानुः " तमेव भान्तमनुभाति सर्वम् " इति श्रुतेः । शश इव बिंदुर्लांछनमस्येति शशबिंदुश्चंद्रः तद्वत्प्रजाः पुष्णातीति शशबिंदुः " पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः " इति भगवद्वचनम् । सुराणां देवानां शोभनदातॄणां चेश्वरः सुरेश्वरः । संसाररोगभेषजत्वादौषधम् । जगतां समुत्तारणहेतुत्वादसंभेदकारणाद्वा सेतुवद्वर्णाश्रमादीनामिति जगतः सेतुः " स एव सेतुर्विधरण एषां लोकानामसंभेदाय " इति श्रुतेः । सत्या अवितथा धर्मज्ञानादयो गुणाः पराक्रमश्च यस्य स सत्यधर्मपराक्रमः ॥ ४४ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।

कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ४५ ॥

भूतभव्यभवतां भूतग्रामाणां नाथस्तैर्याच्यते तानुपतपति तेषामीष्टे शास्तीति वा भूतभव्यभवन्नाथः। इति नाम्नां तृतीयं शतं विवृतम् ॥ पवत इति पवनः "पवनः पवतामस्मि" इति भगवद्वचनात्। पावयतीति पावनः। "भीषास्माद्वातः पवते इति" इति श्रुतेः। अनान् प्राणान् आत्मत्वेन लातीति जीवोऽनलः अनान् लातीति वा णलतेर्गंधवाचिनो नञ्पूर्वाद्वा "अगंधमरसम्" इति श्रुतेः। नालं पर्याप्तमस्य विद्यत इति वाऽनलः अनित्यनेन लोके वाऽनलः। कामान् हन्ति मुमुक्षूणां भक्तानां हिंसकानां वेति कामहा। सत्त्वानां कामिनां कामान् करोतीति कामकृत् कामः प्रद्युम्नः तस्य जनकत्वाद्वा कामकृत्। अभिरूपतमः कान्तः। काम्यते पुरुषार्थाभिकांक्षिभिरिति कामः। भक्तेभ्यः कामान् प्रकर्षेण ददातीति कामप्रदः। प्रकर्षेण भवनात्प्रभुः ॥ ४५ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनंतजित् ॥ ४६ ॥

युगादेः कालभेदस्य कर्तृत्वाद्युगादिकृत् युगादीनामारंभं करोतीति वा युगादिकृत्। युगानि कृतादीन्यावर्तयतीति कालात्मना तस्माद्युगावर्तः। नैका माया विद्यते बह्वीर्माया वहतीति नैकमायः। 'नलोपो नञः' इति नकारलोपो न भवति ञकारानुबंधस्यापि नकारस्य प्रतिषेधवाचिनो विद्यमानत्वात्। महदशनमस्येति महाशनः कल्पांते सर्वग्रसनात्। सर्वेषां बुद्धींद्रियाणामगम्यः अदृश्यः। स्थूलरूपेण व्यक्तं स्वरूपमस्येति व्यक्तरूपः स्वयंप्रकाशत्वाद्योगिनां व्यक्तरूपत्वादिति वा व्यक्तरूपः। सुरारीणां सहस्राणि युद्धे जयतीति सहस्रजित्। सर्वाणि भूतानि युद्धक्रीडादिषु सर्वत्राचिंत्यशक्तितया जयतीत्यनंतजित् ॥ ४६ ॥

इष्टो विशिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ४७ ॥

परमानंदकत्वेन प्रिय इष्टः यज्ञेन पूजित इति वा इष्टः । सर्वेषामंतर्यामित्वेन विशिष्टः । शिष्टानां विदुषामिष्टः शिष्टेष्टः, शिष्टा इष्टा अस्येति वा शिष्टेष्टः " प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः " इति भगवद्वचनात् । शिष्टैरिष्टः पूजित इति वा शिष्टेष्टः । शिखंडः कलापोऽलंकारोऽस्येति शिखंडी गोपवेषधरः । यतः नह्यति भूतानि माययाऽतो नहुषः णह् बंधने । कामानां वर्षणात् वृषो धर्मः । " वृषो हि भगवान् धर्मः स्मृतो लोकेषु भारत । नैघंटुकपदाख्यानैर्विद्धि मां वृषमित्युत " इति महाभारते । साधूनां क्रोधं हन्तीति क्रोधहा । असाधुषु क्रोधं करोतीति क्रोधकृत् । क्रियत इति कर्म जगत् तस्य कर्ता ' एषां पुरुषाणां यः कर्ता यस्य वा एतत्कर्म स वै वेदितव्यः ' इति श्रुतेः । क्रोधकृतां दैत्यादीनां कर्ता छेदक इत्येकं वा नाम । विश्वेषामालंबनत्वेन विश्वे बाहवोऽस्येति विश्वतो बाहवोऽस्येति वा विश्वबाहुः । ' विश्वतो बाहुः ' इति श्रुतेः । महीं पूजां धरणीं वा धत्ते इति महीधरः ॥ ४७ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ४८ ॥

षड्भावविकाररहितत्वादच्युतः शाश्वतं शिवमच्युतं " इति श्रुतेः । जगदुत्पत्त्यादिकर्मभिः प्रख्यातः प्रथितः । सूत्रात्मना प्रजाः प्राणयतीति प्राणः " प्राणो वा अहमस्मि " इति बह्वृचाः " वायुर्वै गौतम तत्सूत्रम् " इति श्रुतेः । सुराणामसुराणां च यथासंख्यं प्राणं बलं च ददाति द्यति वेति प्राणदः । अदित्यां कश्यपाद्वासवस्यानुजो जात इति वासवानुजः । आपो यत्र निधीयन्ते सोऽपांनिधिः " सरसामस्मि सागरः " इति भगवद्वचनम् । अधितिष्ठन्ति भूतानि उपादानकारणत्वेन ब्रह्मेत्यधिष्ठानम् । " मत्स्थानि सर्वभूतानि " इति भगवद्वचनात् । अधिकारिभ्यः कर्मानुरूपं फलं प्रयच्छन्न प्रमाद्यतीति अप्रमत्तः । स्वे महिम्नि स्थितः प्रतिष्ठितः " स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि " इति श्रुतेः ॥ ४८ ॥

स्कंदः स्कंदधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ४९ ॥

स्कंदत्यमृतरूपेण गच्छति वायुरूपेण शोषयतीति वा स्कंदः । स्कंदं धर्मपथं धारयतीति स्कंदधरः । धुरं वहति समस्तभूतजन्मादिलक्षणामिति धुर्यः । अभिमतान् वरान् ददातीति वरदः । वरां गां दक्षिणां ददाति यजमानरूपेणेति वा वरदः "गौर्वै धरा" इति श्रुतेः । मरुतः सप्ताव-हादीन् वाहयतीति वायुवाहनः । वसति वासयतीत्याच्छादयतीति वा स्वयमिति वासुः दीव्यति क्रीडते विजिगीषते व्यवहरति द्योतते स्तूयते गच्छतीति वा देवः वासुश्चासौ देवश्च वासुदेवः "छादयामि जगत्सर्वं भूत्वा सूर्य इवांशुभिः । सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः । वसना-त्सर्वभूतानां वसुत्वाद्देवयोनितः । वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः" इत्युद्योगपर्वणि । "सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः । ततः स वासुदेवेति विद्वद्भिः परिपठ्यते । सर्वाणि तत्र भूतानि वसन्ति परमात्मनि । भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः" इति च विष्णुपुराणे । बृहन्तो भानवो यस्य चंद्रसूर्यादिगामिनः । विश्वं जगद्भासयति स बृहद्भा-नुरुच्यते । आदिः कारणं स चासौ देवश्चेत्यादिदेवः द्योतनादिगुणवान् वा देवः । सुरशत्रूणां पुराणां दारणात्स पुरंदरः । "वाचंयमपुरंदरौ च" इति भगवता पाणिनिना निपातनात् ॥ ४९ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ५० ॥

शोकादिषड्डूर्मिवर्जितोऽशोकः । संसारसागरात्तारयतीति तारणः । गर्भजन्मजरामृत्युलक्षणाद्भयात् तारयतीति तारः । शूरो विक्र-मवत्तया । शूरस्यापत्यं वासुदेवरूपः यद्वा शूरकलोद्भवाच्छौरिः । जनानां जंतूनामीश्वरो जनेश्वरः । आत्मत्वेन हि सर्वेषामनुकूलः न हि स्वस्मिन्प्रातिकूल्यं स्वयमाचरतीत्यनुकूलः । धर्मत्राणाय शतमावर्तनानि

प्रादुर्भावा अस्येति शतावर्तः यद्वा नाडीशते प्राणरूपेणावर्तत इति वा । पद्म हस्ते विद्यते इति प्रद्मी । पद्मनिभे ईक्षणे दृशावस्येति पद्मनिभेक्षणः ॥ ५० ॥

पद्मनाभोऽरविंदाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ५१ ॥

पद्मस्य नाभौ मध्ये कर्णिकायां स्थित इति पद्मनाभः । अरविंदसदृशे अक्षिणी अस्येति अरविंदाक्षः । पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात्पद्मगर्भः । पोषयन्नन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयच्छरीरभृत्, स्वया मायया शरीराणि बिभर्तीति वा शरीरभृत् । महती ऋद्धिर्विभूतिरस्येति महर्द्धिः । प्रपंचरूपेण ऋद्धः । वृद्धः पुरातन आत्मा यस्येति वृद्धात्मा । महती अक्षिणी महान्त्यक्षीणि वास्येति महाक्षः । गरुडांको ध्वजो यस्येति गरुडध्वजः ॥ ५१ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिंजयः ॥ ५२ ॥

तुला उपमानमस्य न विद्यते इत्यतुलः "न तस्य प्रतिमास्ति यस्य नाम महद्यशः" इति श्रुतेः । 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" इति स्मृतेश्च । शरीराणि शीर्यमाणत्वात्तेषु प्रत्यगात्मतया भातीति शरभः । बिभेत्यस्मात्सर्वमिति भीमः 'भीमादयोऽपादाने' इति पंचमी । समयं मरणयोगं जानाति 'सृष्टिस्थित्यंतकालवित्' षट्समयान् जानातीति वा समयज्ञः सर्वभूतेषु समत्वं यजनं साध्वस्येति वा । "समत्वमाराधनमच्युतस्य" इति प्रह्लादवचनम् । यज्ञेषु हविर्भागं हरतीति हविर्हरिः "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति भगवद्वचनात् । अथवा हूयते हविषेति हविः "अबध्नन् पुरुषं पशुं" इति हविष्ट्वं श्रूयते । स्मृतिमात्रेण पुंसां पापं हरिद्वर्णत्वाद्वा हरिः "हराम्यघं च स्मर्तॄणां हविर्भागं क्रतुष्वहम् । वर्णश्च मे हरिर्वेति तस्माद्धरिरहं स्मृतः" इति

भगवद्वचनात् । सर्वलक्षणैः प्रमाणैः लक्षणं ज्ञानं जायते यत्तद्विनिर्दिष्टं सर्वलक्षणलक्षणं, तत्र साधुः सर्वलक्षणलक्षण्यः तस्यैव परमार्थत्वात् । लक्ष्मीः अस्य वक्षसि नित्यं वसतीति लक्ष्मीवान् । समितिं युद्धं जयतीति समितिंजयः ॥ ५२ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ५३ ॥

विगतः क्षरो नाशो यस्यासौ विक्षरः । स्वच्छंदतया रोहितां मूर्तिं मत्स्यमूर्तिं वा वहन् रोहितः । मुमुक्षवः तं देवं मार्गयन्ति इति मार्गः । परमानंदो येन प्राप्यते स मार्गः इति वा । उपादानं निमित्तं च कारणं स एवेति हेतुः । दमादिसाधनेन उदरः उत्कृष्टा मतिर्या तया गम्यते इति दामोदरः । " दमाद्दामोदरं विदुः " इति महाभारते । यशोदया दाम्नोदरे बद्ध इति वा । " तयोर्मध्यगतं बद्धं दाम्ना गाढं तयोदरे । ततश्च दामोदरतां स ययौ दामबंधनात् " इति ब्रह्मपुराणे । " दामानि लोकनामानि तानि यस्योदरांतरे । तेन दामोदरो देवः " इति व्यासवचनाद्वा दामोदरः । सर्वानभिभवति क्षमते इति वा सहः । महीं गिरिरूपेण धरत इति महीधरः । " वनानि विष्णुर्गिरयो दिशश्च " इति विष्णुपुराणे । स्वेच्छया धारयन्देहं महान्ति उत्कृष्टानि भोजनानि भोगजन्यानि भुंक्ते इति महाभागः । महान् भागः भाग्यं अस्य अवतारेष्विति वा महाभागः । वेगो जवः तद्वान् वेगवान् । " अनेजदेकं मनसो जवीयः " इति श्रुतेः । संहारसमये विश्वमश्नातीति अमिताशनः ॥ ५३ ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ५४ ॥

प्रपञ्चोत्पत्त्युपादानकारणत्वादुद्भवः उद्भूतो भवति संसारादिति वा । सर्गकाले प्रकृतिं पुरुषं च प्रविश्य क्षोभयामासेति क्षोभणः । " प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास भगवान् सर्गकाले व्यया-

व्ययौ " इति विष्णुपुराणे । यतो दीव्यति क्रीडति सर्गादिभिर्जिगीषतेऽसुरादीन् व्यवहरति सर्वभूतेषु आत्मतया द्योतते स्तूयते स्तुत्यैः सर्वत्र गच्छति तस्माद्देवः । " एको देवः " इति मंत्रवर्णात् । श्रीर्विभूतिर्यस्योदरान्तरे जगद्रूपा स्थिता स श्रीगर्भः । परमश्चासौ ईशनशीलश्चेति परमेश्वरः । " समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् " इति भगवद्वचनात् । जगदुत्पत्तौ साधकतमं करणं उपादानकारणं निमित्तकारणं चेति कारणम् । कर्ता स्वतंत्रः । विचित्रं भुवनं कृतवानिति विकर्ता । स्वरूपं सामर्थ्यं चेष्टितं वा तस्य ज्ञातुं न शक्यत इति गहनः । गूहते संवृणोति स्वरूपादीनि माययेति गुहः । ' नाहं प्रकाशः सर्वस्य योगमायासमावृतः " इति भगवद्वचनात् ॥ ५४ ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ५५ ॥

संविन्मात्रस्वरूपत्वाद्व्यवसायः । यस्मिन्व्यवस्थितिः सर्वस्येति व्यवस्थानः । लोकपालाद्यधिकारजरायुजाण्डजस्वेदजोद्भिज्जब्राह्मणक्षत्रियवैश्यशूद्रावान्तरवर्णब्रह्मचारिगृहस्थवानप्रस्थसंन्यासलक्षणाश्रमतद्धर्मादिकान् विभज्य करोतीति वा व्यवस्थानः ' कृत्यल्युटो बहुलं ' इति बहुलग्रहणात्कर्तरि ल्युट्प्रत्ययः । यत्र भूतानां संस्थितिः प्रलयात्मिका समीचीनं स्थानमस्येति वा संस्थानः । ध्रुवादीनां कर्मानुरूपं स्थानं ददातीति स्थानदः । अविनाशित्वात् ध्रुवः । परा ऋद्धिर्विभूतिरस्येति परर्द्धिः परा मा लक्ष्मीः शोभाऽस्येति परमः सर्वोत्कृष्टो वा अनन्याधीनसंसिद्धित्वात्संविदात्मतया परमस्पष्टः । परमानंदैकरूपत्वात्तुष्टः । सर्वसंपूर्णत्वात्पुष्टः । ईक्षणं दर्शनं यस्य सर्वं शुभं शुभकरं–नराणां मुमुक्षूणां मोक्षदं, भोगार्थिनां भोगदं सन्देहविच्छेदकारणं, पावनं, हृदयग्रन्थेर्विच्छेदकरं सर्वकर्मणां क्षपणं , अविद्यानिवर्तकं, स शुभेक्षणः । " भिद्यते हृदयग्रन्थिः " इत्यादिस्मृतेः ॥ ५५ ॥

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ५६ ॥

नित्यानंदेऽस्मिन्योगिनो रमन्त इति रामः । " रमन्ते योगिनो यस्मिन्नित्यानंदे चिदात्मनि । इति रामपदेनैतत्परं ब्रह्माभिधीयते " इति पद्मपुराणे । स्वेच्छया वपुर्वहन् वा दाशरथी रामः । विरामः अवसानं प्राणिनां यस्मिन्निति विरामः । विगतं रजो यस्य विषयसेवायामिति विरजः ' विरजः पर आकाशात् " इति श्रुतेः । यं विदित्वामृतत्वाय कल्पन्ते मुमुक्षवः स एव पंथा मार्गः " नान्यः पंथा विद्यतेऽयनाय " इति श्रुतेः । मार्गेण सम्यक्ज्ञानेन जीवः परमात्मतया नीयत इति नेयः । नयतीति नयो नेता इति त्रिरूपः परिकल्प्यते । नास्य नेता विद्यते इत्यनयः । इति नाम्नां चतुर्थं शतं विवृतम् । विक्रमशालित्वाद्वीरः । शक्तिमतां विरिंच्यादीनामपि शक्तिमत्त्वाच्छक्तिमतां श्रेष्ठः । सर्वभूतानां धारणाद्धर्मः " अणुरेष धर्मः " इति श्रुतेः । धर्मैराराध्यत इति वा धर्मः । श्रुतयः स्मृतयश्च यस्याज्ञाभूताः स एव सर्वधर्मविदामुत्तमः इति धर्मविदुत्तमः ॥ ५६ ॥

वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ५७ ॥

विविधा कुंठा गतेः प्रतिहतिर्विकुंठा विकुंठायाः इति वैकुंठः जगदारंभे विश्लिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रत्यबध्नादिति । "मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना । वायुश्च तेजसा सार्धं वैकुंठत्वं ततो मम " इति शान्तिपर्वणि । सर्वस्मात्पुरा सदनात्सर्वपापस्य सादनाद्वा पुरुषः । " स यत्पूर्वोऽस्मात्सर्वस्मात् सर्वान् पाप्मन औषत्तस्मात्पुरुषः " । " स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः " इति श्रुतेः । प्राणिति क्षेत्रज्ञरूपेण प्राणात्मना चेष्टयन्वा प्राणः । चेष्टां करोति श्वसनरूपेणेति विष्णुपुराणे । द्यति खंडयति प्राणिनां प्राणान्प्रलयादिष्विति प्राणदः । प्रणौति प्रणयतीति वा प्रणवः " तस्मादोमिति प्रणौति "

इति श्रुतेः । प्रणम्यते इति वा प्रणवः । " प्रणमन्तीह यं वेदास्तस्मात्प्रणव उच्यते " इति सनत्कुमारवचनात् । प्रपंचरूपेण विस्तृतत्वात्पृथुः । हिरण्यगर्भसंभूतिकारणं हिरण्मयमंडं यद्वीर्यसंभूतं तदस्य गर्भ इति हिरण्यगर्भः । त्रिदशशत्रून् हन्तीति शत्रुघ्नः । कारणत्वेन सर्वकार्याणां व्यापनाद्व्याप्तः । वाति गंधं करोति वायुः " पुण्यो गंधः पृथिव्यां च " इति भगवद्वचनात् । " अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः " इति उद्योगपर्वणि । " द्यौरंतरिक्षं पृथिवी वाऽधस्तयोर्यस्मादजायत मध्ये वैराजरूपेण " इति वाऽधोक्षजः । अधोभूते प्रत्यक्प्रवाहिते अक्षगणे जायत इति अधोक्षजः । " अधोभूते ह्यक्षगणे प्रत्यग्रूपप्रवाहिते । जायते तस्य वै ज्ञानं तेनाधोक्षज उच्यते " ॥ ५७ ॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ५८ ॥

कालात्मना ऋतुशब्देन लक्ष्यत इति ऋतुः । शोभनं निर्वाणफलं दर्शनं ज्ञानमस्येति सुदर्शनः । शुभे दर्शने ईक्षणे पद्मपत्रायते अस्येति वा । स्वेच्छया सुदरं देहं वहति सुखेन दृश्यते भक्तैरिति वा सुदर्शनः । कलयति सर्वमिति कालः । " कालः कलयतामहम् " इति भगवद्वचनात् । परमे प्रकृष्टे स्वे महिम्नि हृदयाकाशे स्थातुं शीलमस्येति परमेष्ठी " परमेष्ठी विभ्राजते " इति मंत्रवर्णात् । शरणार्थिभिः परितो गृह्यते सर्वगतत्वात्परितो ज्ञायते इति वा पत्रपुष्पादिकं भक्तैरर्पितं परिगृह्णातीति वा परिग्रहः । सूर्यादीनामपि भयहेतुत्वादुग्रः । " भीषास्माद्वातः पवते भीषोदेति सूर्यः " इति श्रुतिः । संवसन्ति भूतान्यस्मिन्निति संवत्सरः । जगद्रूपेण वर्धमानत्वात्सर्वकर्माणि क्षिप्रं करोतीति वा दक्षः । संसारसागरे क्षुत्पिपासादिषडूर्मिभिस्तरंगितैः अविद्याद्यैर्महाक्लेशैर्मदादिभिरुपक्लेशैश्च वशीकृतानां विश्रान्तिं कांक्षमाणानां विश्रामं मोक्षं करोतीति विश्रामः । विश्वस्माद्दक्षिणः शक्तो विश्वेषु कर्मसु दाक्षिण्याद्वा विश्वदक्षिणः ॥ ५८ ॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ५९ ॥

विस्तीर्यन्ते समस्तानि जगन्ति यस्मिन्निति विस्तारः । स्थितिशीलत्वात्स्थावरः स्थितिशीलानि पृथिव्यादीनि तिष्ठन्त्यस्मिन्निति स्थाणुः स्थावरश्चासौ स्थाणुश्चेति स्थावरस्थाणुः । संविदात्मना प्रमाणं प्रत्यक्षादिप्रमाणैर्वा । अन्यथाभावव्यतिरेकेण कारणमिति बीजमव्ययम् । सुखरूपत्वात्सर्वैरर्थ्यत इति अर्थः । न विद्यते अर्थः प्रयोजनमाप्तकामत्वादस्येत्यनर्थः । महान्तः कोशा अन्नमयादयः छादका अस्येति महाकोशः । महान् भोगः सुखरूपोऽस्येति महाभोगः । महद्भोगसाधनलक्षणं धनमस्येति महाधनः ॥ ५९ ॥

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ६० ॥

अवाप्तसर्वकामत्वान्निर्वेदोऽस्य न विद्यत इत्यनिर्विण्णः । वैराजरूपेण स्थितः स्थविष्ठः । " अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ " इति श्रुतेः । अजन्मा अभूः अथवा भवतीति भूः भूसत्तायां संपदादित्वाद्भवतेः क्विप् । मही वा । यूपे पशुवत् समाराधनात्मका धर्मास्तत्र बध्यन्त इति धर्मयूपः । यस्मिन्नर्पिता महामखा यज्ञा निर्वाणलक्षणं फलं प्रयच्छन्तो महान्तो जायन्ते स महामखः । " नक्षत्रतारकैः सार्धं चंद्रसूर्यादयो ग्रहाः । वायुपाशमयैर्बंधैर्निबद्धा ध्रुवसंज्ञिते ' । सज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिंशुमारस्य पुच्छदेशे व्यवस्थितो ध्रुवः तस्य शिंशुमारस्य ज्योतिश्चक्रस्य नेमिवद्वर्तमानस्य हृदयं विष्णुरिति कथितो नक्षत्रनेमिः शिंशुमारवर्णने विष्णुर्हृदयमिति श्रूयते । चंद्ररूपेण नक्षत्री " नक्षत्राणामहं शशी " इति भगवद्वचनात् । समस्तकार्येषु समर्थः क्षमः क्षमत इति वा क्षमः " क्षमया पृथिवीसमः " इति वाल्मीकिवचनात् । सर्वविकारेषु क्षयितेषु स्वात्मनावस्थित इति क्षामः ' क्षायो मः ' इति निष्ठायां तकारस्य मकारादेशः ।

सृष्ट्याद्यर्थं सम्यगीहते समीहनः ॥ ६० ॥

यज्ञ ईज्यो महेज्यश्च क्रतुः सत्रं सतांगतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ६१ ॥

सर्वयज्ञस्वरूपत्वाद्यज्ञः सर्वेषां देवानां यज्ञाकारेण वर्तत इति वा यज्ञः "यज्ञो वै विष्णु." इति श्रुतेः । यष्टव्योऽप्ययमेव यज्ञफलदातृत्वादितीज्यः "ये यजन्ति मखैः पुण्यैर्देवतादीन् पितॄनपि । आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते" इति हरिवंशे । सर्वासु देवतासु यष्टव्यासु प्रकर्षेणायमेव यष्टव्यो मोक्षफलदातृत्वादिति महेज्यः । यूपसहितो यज्ञः क्रतुः । असनोपायिचोदनालक्षणं सत्रं सतस्त्रायत इति वा सत्त्रम् । सतां मुमुक्षूणां नान्या गतिरिति सतांगतिः । सर्वेषां प्राणिनां कृताकृतं सर्वं पश्यतीति स्वाभाविकेन बोधेनेति सर्वदर्शी । स्वभावेन विमुक्तश्चासावात्मास्येति विमुक्तात्मा 'विमुक्तश्च विमुच्यते' इति श्रुतेः । सर्वश्चासौ ज्ञश्चेति सर्वज्ञः "इदं सर्वं यदयमात्मा" इति श्रुतेः । ज्ञानमुत्तममित्येतत्सविशेषणमेकं नाम ज्ञानं प्रकृष्टं अजन्यं अनवच्छिन्नं सर्वस्य साधकतममिति ज्ञानमुत्तमम् । "सत्यं ज्ञानमनंतं ब्रह्म" इति श्रुतेः ॥ ६१ ।

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ६२ ॥

शोभनं व्रतमस्येति सुव्रतः "सकृदेव प्रपन्नाय तवास्मीति तु याचते । अभयं सर्वथा तस्मै ददाम्येतद्व्रतं मम" इति श्रीरामायणे रामवचनम् । शोभनं मुखमस्येति सुमुखः "प्रसन्नवदनं चारु पद्मपत्रायतेक्षणम्" इति श्रीविष्णुपुराणे । वनवासे सुमुखत्वाद्वा दाशरथी रामः सुमुखः 'स पितुर्वचनं श्रीमानभिषेकपरं प्रियम् । मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् । इमानि तु महारण्ये विहृत्य नव पंच च । वर्षाणि परमप्रीत स्थास्यामि वचने तव । न वनं त्यजतश्च वसुंधराम्

सर्वलोकातिगस्यैव मनो रामस्य विव्यथे " इति न व्यथां प्राप्तवान् इति रामायणे महाभारते च। सर्वविद्योपदेशेन वा सुमुखः " यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै " इत्यादि श्रुतेः। शब्दादिस्थूलकरणरहितत्वाच्छब्दादयो ह्याकाशादीनामुत्तरोत्तरस्थूलत्वकारणानि तदभावात्सूक्ष्मः " सर्वगतं सुसूक्ष्मम् " इति श्रुतेः। शोभनो घोषो वेदात्मकोऽस्येति मेघगंभीरघोषत्वाच्च सुघोषः। सद्वृत्तानां सुखं ददात्यसद्वृत्तानां सुखं खंडयतीति वा सुखदः। प्रत्युपकारनिरपेक्षतयोपकारित्वात्सुहृत्। निरतिशयानंदरूपत्वान्मनोहरतीति मनोहरः। " यो वै भूमा तत्सुखं नाल्पे सुखमस्ति " इति श्रुतेः। जितः क्रोधो येन स जितक्रोधः। वेदमर्यादास्थापनार्थं नतु कोपवशादित्यतस्त्रिदशशत्रून्निघ्नन्वेदमर्यादां स्थापयन् विक्रमशाली बाहुरस्येति वीरबाहुः। अधार्मिकान् विदारयन्विदारणः ॥ ६२ ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ६३ ॥

प्राणिनः स्वापयन्नात्मसंबोधविधुरान् मायया कुर्वन् स्वापनः। स्वतंत्रः स्ववशः। जगदुत्पत्तिस्थितिलयहेतुत्वात् आकाशवत्सर्वगतत्वाद्व्यापी " आकाशवत्सर्वगतश्च नित्यः " इति श्रुतेः। कारणत्वेन सर्वकार्याणां व्यापनाद्वा व्यापी। जगदुत्पत्त्याद्यनेकरूपाणि निमित्तविभूतिभिः अनेकधा तिष्ठन्नैकात्मा। जगदुत्पत्तिसंपत्तिविपत्तिप्रभृतिकर्माणि करोतीति नैककर्मकृत्। वसत्यत्राखिलमिति वत्सरः वत्सं रातीति वा। भक्तस्नेहित्वाद्वत्सलः ' वत्सांशाभ्यां कामबले ' इति लच्प्रत्ययविधानात्। वत्सानां पालनाद्वत्सी, जगत्पितुस्तस्य वत्सभूताः प्रजा इति वा वत्सी। रत्नानि गर्भभूतानि अस्येति समुद्रः रत्नगर्भः। धनानामीश्वरः धनेश्वरः ॥ ६३ ॥

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम्।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ६४ ॥

धर्मं गोपायतीति धर्मगुप् । " धर्मसंस्थापनार्थाय संभवामि युगे युगे " इति भगवद्वचनात् । धर्माधर्मविहीनोऽपि धर्ममर्यादास्थापनार्थं धर्ममेव करोतीति धर्मकृत् । धर्मान् धारयिता धर्मी । अवितथं परं ब्रह्म सत् " सदेव सौम्येदं " इति श्रुतेः । अपरं ब्रह्मासत् प्रपंचरूपेण " वाचारंभणं विकारो नामधेयम् " इति श्रुतेः । सर्वाणि भूतानि क्षरम् । कूटस्थोक्षरम् । " क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते " इति भगवद्वचनात् । आत्मनि कर्तृत्वादिविज्ञानं कल्पितमिति तद्वासनावकुंठितो जीवोऽविज्ञाता । आदित्यादिगता अंशवोऽस्यैवेत्ययमेव मुख्यः सहस्रांशुः । " येन सूर्यस्तपति तेजसेद्धः " इति श्रुतेः । " यदादित्यगतं तेजः " इत्यादिस्मृतेश्च । विशेषेण शेषदिग्गजभूधरान् सर्वभूतानि च विदधतीति विधाता । नित्यनिष्पन्नचैतन्यरूपत्वात्कृतलक्षणः, कृतानि लक्षणानि शास्त्राण्यनेनेति वा कृतलक्षणः ' वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ' इत्यत्रैव वक्ष्यति । सजातीयविजातीयव्यवच्छेदकं लक्षणं सर्वभावनाकृतमनेनेति वा कृतलक्षणः । आत्मनः श्रीवत्सलक्षणं वक्षसि तेन कृतमिति वा कृतलक्षणः ॥ ६४ ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ६५ ॥

गभस्तिचक्रस्य मध्ये सूर्यात्मना स्थित इति गभस्तिनेमिः । सत्त्वं गुणप्रकाशकं प्राधान्येनाधितिष्ठतीति सर्वप्राणिषु तिष्ठतीति वा सत्त्वस्थः । विक्रमशीलत्वात्सिंहवत्सिंहः । नृशब्दलोपेन सत्यभामा भामेतिवद्वा नृसिंहः सिंहः । भूतानां महानीश्वरो भूतेन सत्येन स एव परमो महानीश्वरः इति वा भूतमहेश्वरः । सर्वभूतान्यादीयन्तेऽनेनेत्यादिः आदिश्चासौ देवश्चेत्यादिदेवः । सर्वान्भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेवः इति श्रुतेः । देवानां प्राधान्याद्देवानामीशो देवेशः । देवान् बिभर्तीति देवभृत् शक्रस्तस्यापि शासितेति देवभृद्गुरुः । देवानां

भरणात्सर्वविद्यानां भरणाद्वा देवभृद्गुरुः ॥ ६५ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपींद्रो भूरिदक्षिणः ॥ ६६ ॥

जन्मसंसारसागरादुत्तारयतीत्युत्तरः सर्वोत्कृष्ट इति वा उत्तरः "विश्वस्मादिंद्र उत्तरः" इति श्रुतेः । गवां पालनाद्गोपवेषधरो गोपतिः, गौर्मही तस्याः पतित्वाद्वा गोपतिः । समस्तभूतानि पालयन् रक्षको जगतः इति गोप्ता । न कर्मणा न ज्ञानकर्मभ्यां वा गम्यते ज्ञानेनैव गम्यते इति ज्ञानगम्यः । कालेनापरिच्छिन्नत्वात् पुरा भवतीति पुरातनः । शरीरारंभकभूतानां भरणात् प्राणरूपधरः शरीरभूतभृत् । पालको भोक्ता, निरतिशयानंदसंदोहसंभोगाद्वा भोक्ता । इति नाम्नां पंचमं शतं विवृतम् । कपिर्वराहः इंद्रश्चेति कपींद्रो वराहमूर्तिः, कपीनां वानरादीनां चेंद्रः कपींद्रो राघवो वा । भूरयो यज्ञदक्षिणाः धर्ममर्यादां दर्शयन्तो यज्ञं कुर्वतो विद्यन्ते इति भूरिदक्षिणः ॥ ६६ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्त्वतांपतिः ॥ ६७ ॥

सोमं पिबति सर्वयज्ञेषु यष्टव्यत्वाद्देवतारूपेणेति सोमपः । धर्ममर्यादां दर्शयन् यजमानरूपेण वा सोमपः । स्वात्मामृतरसं पिबन्नमृतपः, मथितममृतमसुरैर्ह्रियमाणं रक्षित्वा देवान् पाययित्वा स्वयमप्यपिबदिति वा । सोमरूपेणौषधीः पोषयन् सोमः, उमया सह वर्तत इति शिवो वा सोमः । पुरून् बहून जयतीति पुरुजित् । विश्वरूपत्वात्पुरुः उत्कृष्टत्वात्सत्तमः पुरुश्चासौ सत्तमश्चेति पुरुसत्तमः । विनयं दंडं दुष्टानां प्रजानां करोतीति विनयः । समस्तान् जयतीति जयः । सत्या संधा संकल्पो अस्येति सत्यसंधः 'सत्यसंकल्पः' इति श्रुतेः । दाशो दानं तदर्हतीति दाशार्हः, दाशृदान इति [illegible] त्वाद्वा दाशार्हः । सात्त्वतं नाम तंत्रं तत्करोति तदाचष्ट इति णिचि कृते 'क्विप्चे' ति क्विप्प्रत्यये कृते च 'णेर-

निति ' इति णिलोपे च कृते पदं सात्वत् तेषां पतिर्योगक्षेमकर इति सात्त्वतांपतिः ॥ ६७ ॥

जीवो विनयिताऽसाक्षी मुकुंदोऽमितविक्रमः ।
अंभोनिधिरनंतात्मा महोदधिशयोंऽतकः ॥ ६८ ॥

प्राणान् क्षेत्रज्ञरूपेण धारयन् जीवः । विनयित्वं विनयिता तां च साक्षात्पश्यति प्रजानामिति विनयितासाक्षी अथवा नयतेर्गन्तृवाचिनो रूपं विनयिता असाक्षी असाक्षाद्‌द्रष्टा आत्मातिरिक्तं वस्तु न पश्यतीत्यर्थः । मुक्तिं ददातीति मुकुंदः पृषोदरादित्वात्साधुत्वम् । वर्णाक्षरसाम्यान्निरुक्ति-वचनान्नैरुक्तानां मुकुंद इति निरुक्तिः । अमिता अपरिच्छिन्ना विक्रमा-स्त्रयः पादविक्षेपा अस्येत्यमितविक्रमः, अमितं विक्रमणं शौर्यमस्येति वाऽमितविक्रमः । अंभांसि देवादयोऽस्मिन्निधीयन्त इत्यंभोनिधिः " तानि ह वा एतानि चत्वार्यंभांसि देवा मनुष्याः पितरोऽसुराः " इति श्रुतेः । सागरो वा " सरसामस्मि सागरः " इति भगवद्वचनात् । देशतः काल-तो वस्तुतश्चापरिच्छिन्नत्वादनंतात्मा । संहृत्य सर्वभूतान्येकार्णवं जगत्कृ-त्वाधः शेते इति महोदधिशयः । अंतं करोति भूतानामित्यंतकः " तत्क-रोति तदाचष्टे " इति णिचि प्रत्यये कृते ण्वुल्तृचौ इति ण्वुल् तस्य युवोरनाकावित्यकादेशः ॥ ६८ ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनंदो नंदनो नंदः सत्यधर्मा त्रिविक्रमः ॥ ६९ ॥

आद्विष्णोरजायतेति कामोऽजः । महः पूजा तदर्हत्वान्महार्हः । स्व-भावेनैवं भाव्यो नित्यनिष्पन्नरूपत्वादिति स्वाभाव्यः । निर्जिता अमित्रा अंतर्वर्तिनः रागद्वेषादयो बाह्या रावणादयश्च येनासौ जितामित्रः । स्वा-त्मामृतरसास्वादान्नित्यं प्रमोदते ध्यायिनां ध्यानमात्रेण प्रमोदं कुरुत इति वा प्रमोदनः । आनंदस्वरूपमस्येत्यानंदः " एतस्यैवानंदस्यान्यानि भूतानि

मात्रामुपजीवन्ति " इति श्रुतेः । नंदयतीति नंदनः । सर्वाभिरुपपत्तिभिः समृद्धो नंदः । सुखं वैषयिकं नास्य विद्यत इति वा नंदः । " यो वै भूमा तत्सुखं नाल्पे सुखमस्ति " इति श्रुतेः । सत्या धर्मज्ञानादयोऽस्येति सत्यधर्मा । त्रयो विक्रमास्त्रिषु लोकेषु क्रान्ता यस्य स त्रिविक्रमः " त्रीणि पदा विचक्रमे " इति श्रुतेः । " त्रिरित्येव त्रयो लोकाः कीर्तिता मुनिसत्तमैः । क्रमसे तांस्तथा सर्वांस्त्रिक्रमोऽसि जनार्दन " इति हरिवंशे ॥ ६९ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतान्तकृत् ॥ ७० ॥

महर्षिः कपिलाचार्य इति सविशेषणमेकं नाम । महांश्चासावृषिश्चेति महर्षिः कृत्स्नस्य वेदस्य दर्शनात् अन्ये तु वेदैकदेशदर्शनादृषयः कपिलश्चासौ सांख्यस्य शुद्धतत्त्वविज्ञानस्याचार्यश्चेति कपिलाचार्यः । " शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते " इति व्यासस्मृतेः । " ऋषिप्रसूतं कपिलं महान्तम् " इति श्रुतेश्च । " सिद्धानां कपिलो मुनिः " इति स्मृतेश्च । कृतं कार्यं जगत् ज्ञः आत्मा कृतं च ज्ञश्चेति कृतज्ञः । मेदिन्याः भूम्याः पतिर्मेदिनीपतिः । त्रीणि पदान्यस्येति त्रिपदः " त्रीणि पदा विचक्रमे " इति श्रुतेः । गुणावेशेन संजातास्तिस्रो दशा अवस्थास्तासामध्यक्ष इति त्रिदशाध्यक्षः । मत्स्यरूपी महति शृंगे प्रलयांभोधौ नावं बद्ध्वा चिक्रीड इति महाशृंगः । कृतस्यान्तं संहारं करोतीति कृतान्तकृत्, कृतान्तं मृत्युं कृंतति वा कृतान्तकृत् ॥ ७० ॥

महावराहो गोविंदः सुषेणः कनकांगदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ७१ ॥

महांश्चासौ वराहश्चेति महावराहः । गोभिर्वाणीभिर्विंदते वेत्ति वेदान्तवाक्यैरिति वा गोविंदः " गोभिरेव यतो वेद्यो गोविंदः स उदाहृतः " इति शोभना सेना गणात्मिका यस्येति सुषेणः । कनकमयान्यंगदानि यस्य स

कनकांगदी । रहस्योपनिषद्विद्याबोधत्वाद्गुहायां हृदयाकाशे निहित इति गुह्यः । ज्ञानैश्वर्यबलादिभिर्गभीरो गभीरः । दुःप्रवेशत्वाद्गहनः, अवस्थात्रय-भावाभावसाक्षित्वाद्गहनो वा । वाङ्मनसागोचरत्वाद्गुप्तः । " एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते " इति श्रुतेः । " मनस्तत्त्वात्मकं चक्रं बुद्धि-तत्त्वात्मिकां गदाम् । धारयंल्लोकरक्षार्थमुक्तश्चक्रगदाधरः " इति ॥ ७१ ॥

वेधाः स्वांगोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ७२ ॥

विदधाति सृजतीति विधाता वेधाः पृषोदरादित्वात्साधुत्वम् । स्वयमेव कार्यस्य कारणेंऽगं सहकार्यस्येति स्वांगः । न केनाप्यवतारेषु जित इत्य-जितः । कृष्णद्वैपायनः कृष्णः । ' कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् । को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेत् ' इति विष्णुपुराणवच-नात् । स्वरूपसामर्थ्यादेः प्रच्युत्यभावात् दृढः । संहारसमये युगपत्प्रजाः संक-र्षतीति संकर्षणः न च्योतति स्वपदादित्यच्युतः संकर्षणोऽच्युतः संकर्षणो-च्युत इति नामैकं सविशेषणं । वृणोति व्रियते वा वरुणः, " इमं मे वरुण श्रुधी हवम् " इति मंत्रवर्णात् । " वरुणो यादसामहमिति " भगवद्वचनात् । वरुणस्यापत्यं वसिष्ठोऽगस्त्यो वा वारुणः । वृक्ष इवाचलतया स्थित इति वृक्षः " वृक्षवत्स्तब्धो दिवि तिष्ठत्येकः " इति श्रुतेः । व्याप्त्यर्थादक्षते-र्धातोः पुष्कराक्षः, हृदयपुंडरीके चिन्तितः चित्स्वरूपेण प्रकाशत इति वा पुष्कराक्षः । सृष्टिस्थित्यंतकर्माणि मनसैव करोतीति महामनाः । " मनसैव जगत्सृष्टिं संहारं च करोति यः " इति विष्णुपुराणे ॥ ७२ ॥

भगवान् भगहाऽऽनंदी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ७३ ॥

" ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्य च मोक्षस्य षण्णां भग इतीरणा " । स यस्यास्तीति भगवान् । " उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवा-

निति ” इति विष्णुपुराणे । ऐश्वर्यादिकं संहारसमये हन्तीति भगहा । सुखरूपत्वादानंदी, सर्वसंपत्समृद्धत्वादानंदी वा । भूततन्मात्रनिर्मितां वैजयन्त्याख्यां वनमालां वहन् वनमाली । हलमायुधमस्येति हलायुधो बलभद्राकृतिः । आदित्यां कश्यपाद्वामनरूपेण जात इत्यादित्यः । ज्योतिषि सवितृमंडले स्थितो ज्योतिरादित्यः, ज्योतिश्चासावादित्यश्चेति वा । द्वंद्वानि शीतोष्णादीनि सहत इति सहिष्णुः । गतिश्चासौ सत्तमश्चेति गतिसत्तमः ॥ ७३ ॥

सुधन्वा खंडपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ७४ ॥

शोभनमिंद्रियादिमयं शार्ङ्गं धनुरस्यास्तीति सुधन्वा । शत्रूणां खंडनात् खंडः परशुरस्य जामदग्न्याकृतेरिति खण्डपरशुः, शिवो वा । अखण्डः परशुरस्येति वा । सन्मार्गविरोधिनां दारुणत्वाद्दारुणः । द्रविणं वांछितं वित्तं भक्तेभ्यः प्रददातीति द्रविणप्रदः । दिवस्पर्शनाद्दिविस्पृक् । सर्वदृशां सर्वज्ञानानां विस्तारकृद्व्यासः सर्वदृग्व्यासः अथवा सर्वा च सा दृक्चेति सर्वदृक् सर्वाकारं ज्ञानं, सर्वस्य दृष्टित्वाद्वा सर्वदृक् । ऋग्वेदादिविभागेन चतुर्धा वेदा व्यस्ताः, आद्यो वेदः एकविंशतिधा कृतः, द्वितीय एकोत्तरशतधा कृतः, सामवेदः सहस्रधा कृतः, अथर्ववेदः नवधा शाखाभेदेन कृतः, अन्यानि पुराणानि व्यस्तान्यनेनेति व्यासः ब्रह्मा । वाचस्पतिरयोनिजः इति सविशेषणमेकं नाम ॥ ७४ ॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ॥ ७५ ॥

वेदव्रतसमाख्यातैस्त्रिभिः सामभिः स्तुत इति त्रिसामा । साम गायतीति सामगः । वेदानां मध्ये सामवेदः साम “वेदानां सामवेदोऽस्मि इति” भगवद्वचनात् । सर्वदुःखोपशमलक्षणं परमानंदरूपं निर्वाणम् । संसाररोगस्यौषधं भेषजं, यद्वा बिभेत्यस्मादिति भेषजम् । संसाररोगनिर्मोक्षकारिणीं परां विद्यामुप-

दिशतीति भिषक् " भिषक्तमं त्वा भिषजां शृणोमि " इति श्रुतेः । मोक्षार्थं चतुर्थमाश्रमं कृतवानिति संन्यासकृत् । संन्यासिनां प्राधान्येन ज्ञानसाधनं शममाचष्ट इति शमः । " यतीनां प्रशमो धर्मो नियमो वनवासिनाम् । दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम् " इति स्मृतेः । ' तत्करोति तदाचष्टे ' इति णिचि पचाद्यचि कृते रूपं शमः । सर्वभूतानां शमयितेति वा शमः ; विषयसुखेष्वसंगतया शान्तः । " निष्कलं निष्क्रियं शान्तम् " इति श्रुतेः । प्रलये नितरां तत्रैव तिष्ठन्ति भूतानीति निष्ठा । समस्ताविद्यानिवृत्तिः शान्तिः सा ब्रह्मैव । परमुत्कृष्टमयनं स्थानं पुनरावृत्तिशंकारहितमिति परायणम् । पुल्लिंगपक्षे बहुव्रीहिः ॥ ७५ ॥

शुभांगः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ७६ ॥

सुंदरां तनुं धारयन् शुभांगः । रागद्वेषादिनिर्मोक्षलक्षणां शान्तिं ददातीति शान्तिदः । सर्गादौ सर्वभूतानि ससर्जेति स्रष्टा । कौ भूम्यां मोदत इति कुमुदः । कोः पृथिव्याः वलनात् संवरणात् कुवलं जलं तस्मिन् शेषोदरे शेत इति कुवलेशयः ' शयवासवासिष्वकालात् ' इत्यलुक् सप्तम्याः, कुवलस्य बदरीफलस्य मध्ये शेते तक्षकः सोऽपि तस्य विभूतिरिति वा हरिः कुवलेशयः, कौ भूम्यां संशेरत इति सर्पाणामुदरं कुवलं तस्मिन् शेषोदरे शेत इति कुवलेशयः । गवां वृद्ध्यर्थं गोवर्धनं धृतवानिति गोभ्यो हितो गोहितः, गोर्भूमेर्भारावतरणे स्वेच्छया शरीरग्रहणं कुर्वन् वा गोहितः । गोर्भूम्यादेः पतिर्गोपतिः । रक्षको जगत इति गोप्ता, स्वात्मानं स्वमायया स्वमात्मानं संवृणोतीति वा गोप्ता । सर्वकामाभिवर्षके अक्षिणी अस्येति, वृषभो धर्मः स एव वा दृष्टिरस्येति वृषभाक्षः । वृषो धर्मः प्रियो यस्य स वृषप्रियः । ' वा प्रियस्य ' इति पूर्वनिपातविकल्पविधानात् परनिपातः ॥ ७६ ॥

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ७७ ॥

देवासुरसंग्रामान्न निवर्तत इत्यनिवर्ती, वृषप्रियत्वाद्धर्मान्न निवर्तत इति वा अनिवर्ती। स्वभावतो विषयेभ्यो निवृत्त आत्मा मनोऽस्येति निवृत्तात्मा। विस्तृतं जगत् संहारसमये सूक्ष्मरूपेण संक्षिपन् संक्षेप्ता। उपात्तस्य परिरक्षणं क्षेमं करोतीति क्षेमकृत्। नामस्मृतिमात्रेण पावयन् शिवः। इति नाम्नां षष्ठं शतं विवृतम्। श्रीवत्ससंज्ञं चिह्नमस्य वक्षसि स्थितमिति श्रीवत्सवक्षाः। अस्य वक्षसि श्रीरनपायिनी वसतीति श्रीवासः। अमृतमथने सर्वान् सुरासुरादीन् विहाय श्रीरेनं वरयामासेति श्रीपतिः। श्रीः परा शक्तिः तस्याः पतिरिति वा। "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः। ऋग्यजुःसामलक्षणा श्रीर्येषां तेषां श्रीमतां विरिंच्यादीनां प्रधान इति श्रीमतांवरः "ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्" इति श्रुतेः॥ ७७॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः॥ ७८॥

श्रियं ददाति भक्तानामिति श्रीदः। श्रिय ईशः श्रीशः। श्रीमत्सु नित्यं वसतीति श्रीनिवासः श्रीशब्देन श्रीमन्तो लक्ष्यन्ते। सर्वशक्तिमयेऽस्मिन्नखिला श्रियो निधीयन्ते इति श्रीनिधिः। कर्मानुरूपेण विविधाः श्रियः सर्वभूतानां भावयतीति श्रीविभावनः। सर्वभूतानां जननीं श्रियं वक्षसि वहन् श्रीधरः। स्मरतां स्तुवतामर्चयतां च भक्तानां श्रियं करोतीति श्रीकरः। अनपायिसुखावाप्तिलक्षणं श्रेयः तच्च परस्यैव रूपमिति श्रेयः। श्रियोऽस्य सन्तीति श्रीमान्। त्रयाणां लोकानामाश्रयत्वाल्लोकत्रयाश्रयः॥ ७८॥

स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः।
विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः॥ ७९॥

शोभने पुंडरीकाभे अक्षिणी अस्येति स्वक्षः। शोभनान्यंगानि अस्येति स्वंगः। एक एव परमानंद उपाधिभेदाच्छतधा भिद्यत इति शतानंदः। "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः। परमा-

नंदविग्रहो नंदी । ज्योतिर्गणानामीश्वरो ज्योतिर्गणेश्वरः । " तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति " इति श्रुतेः । " यदादित्यगतं तेजः " इत्यादिस्मृतेश्च । विजित आत्मा मनो येन स विजितात्मा । न केनापि विधेय आत्मा स्वरूपमस्येति अविधेयात्मा । सती अवितथा कीर्तिरस्येति सत्कीर्तिः । करतलामलकवत्सर्वं साक्षात्कृतवतः क्वापि संशयो नास्तीति छिन्नसंशयः ॥ ७९ ॥

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ८० ॥

सर्वभूतेभ्यः समुद्रिक्तत्वादुदीर्णः । सर्वतः सर्वं स्वचैतन्येन पश्यतीति सर्वतश्चक्षुः " विश्वतश्चक्षुः " इति श्रुतेः । न विद्यतेऽस्येशः इत्यनीशः " न तस्येशः कश्चन " इति श्रुतेः । शश्वद्भवन्नपि न विक्रियां कदाचिदुपैतीति शाश्वतस्थिर इति नामैकम् । लंकां प्रति मार्गमन्वेषमाणः सागरं प्रति भूमौ शेते इति भूशयः । स्वेच्छयावतारैर्बहुभिर्भूमिं भूषयन् भूषणः । भूतिर्भवनं सत्ताविभूतिर्वा सर्वविभूतीनां कारणत्वाद्वा भूतिः । विगतः शोकोऽस्य परमानंदैकरूपत्वादिति विशोकः । स्मृतिमात्रेण भक्तानां शोकं नाशयतीति शोकनाशनः ॥ ८० ॥

अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ८१ ॥

अर्चिष्मन्तो यदीयेनार्चिषा चंद्रसूर्यादयः स एव मुख्योऽर्चिष्मान् । सर्वलोकादिभिर्विरिंच्यादिभिरर्चित इत्यर्चितः । कुंभवदस्मिन्सर्वं प्रतिष्ठितमिति कुंभः । गुणत्रयातीततया विशुद्ध आत्मास्येति विशुद्धात्मा । स्मृतिमात्रेण पापानां क्षपणात् विशोधनः । चतुर्व्यूहेष्वनिरुद्धः । न निरुध्यते शत्रुभिः कदाचिदिति वाऽनिरुद्धः । प्रतिपक्षोऽस्य न विद्यत इत्यप्रतिरथः । प्रकृष्टं द्युम्नं द्रविणमस्येति प्रद्युम्नः चतुर्व्यूहात्मा । अमितो विक्रमोऽस्येत्यमितविक्रमः ॥ ८१ ॥

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ८२ ॥

कालनेमिनमसुरं निजघानेति कालनेमिनिहा । गणं विना शत्रूणां कुलानि निहत्य राजत इति वीरः, विक्रमशालित्वाद्वा वीरः शूरवीरविक्रान्ताविति धातुपाठात् । शूरकुलोद्भवत्वाच्छौरिः । शूरजनानां वासवादीनां शौर्यातिशयेनेष्ट इति शूरजनेश्वरः । त्रयाणां लोकानामंतर्यामितयात्मेति त्रिलोकात्मा, त्रयो लोका अस्मात्परमार्थतो न भिद्यन्ते इति वा त्रिलोकात्मा । त्रयो लोकास्तदाज्ञता: स्वेषु स्वेषु कर्मसु वर्तन्त इति त्रिलोकेशः । केशसंज्ञिता सूर्यादिसंक्रान्ता अंशवस्तद्वत्तया केशवः । "अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः" इति महाभारते । ब्रह्मविष्णुशिवाख्याः शक्तयः केशसंज्ञिताः तद्वत्तया वा केशवः "त्रयः केशिनः" इति श्रुतेः । "मत्केशो वसुधातले" इति केशशब्दः शक्तिपर्यायत्वेन प्रयुक्तः । "को ब्रह्मेति समाख्यात ईशोहं सर्वदेहिनाम् । आवां तवांशसंभूतौ तस्मात्केशवनामवान्" इति हरिवंशे । केशिनामानमसुरं हतवानिति केशिहा । सहेतुकं संसारं हरतीति हरिः ॥ ८२ ॥

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ॥ ८३ ॥

धर्मादिपुरुषार्थचतुष्टयं वांछद्भिः काम्य इति कामः स चासौ देवश्चेति कामदेवः । कामिनां कामान् पालयतीति कामपालः । पूर्णकामत्वात्कामी, कामोऽस्यास्तीति वा "सोऽकामयत" इति श्रुतेः ।। अभिरूपतमं देहं वहन् कान्तः, द्विपरार्धान्ते कस्य हिरण्यगर्भस्य ब्रह्मणोऽतो यस्मादिति वा कान्तः । कृत आगमः श्रुतिस्मृत्यादिलक्षणो येन स कृतागमः । "वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्" इति वक्ष्यति । "श्रुतिस्मृती ममैवाज्ञे" इति भगवद्वचनात् । इदं तदीदृगेवेति निर्देष्टुं

यत्र न शक्यते गुणाद्यतीतत्वाद्रूपमस्येत्यनिर्देश्यवपुः । रोदसी व्याप्य कांतिरभ्यधिका स्थितास्येति विष्णुः "व्याप्य मे रोदसी पार्थ कान्तिरभ्यधिका स्थिता । क्रमणाद्वाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः" इति महाभारते । गत्यादिमत्वाद्वीरः 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु' इति धातुपाठात् । व्यापित्वान्नित्यत्वात्सर्वात्मत्वाद्देशतः कालतो वस्तुतश्चापरिच्छिन्नत्वादनंतः । "सत्यं ज्ञानमनंतं ब्रह्म" इति श्रुतेः । "गंधर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः" इति विष्णुपुराणवचनाच्चानंतः । यद्दिग्विजये प्रभूतं धनमजयत्तेन धनंजयोऽर्जुनः "पांडवानां धनंजयः" इति भगवद्वचनात् ॥ ८३ ॥

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८४ ॥

"तपो वेदाश्च जातिश्च ज्ञानं च ब्रह्मसंज्ञितं" तेभ्यो हितत्वात्तद्वेदितृत्वाद्वा ब्रह्मण्यः । तपआदीनां कर्तृत्वाद्ब्रह्मकृत् । ब्रह्मात्मना सर्वं सृजतीति ब्रह्मा । बृहत्वात् बृंहणत्वात्सत्यादिलक्षणं ब्रह्म "सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतेः । 'प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्' इति विष्णुपुराणे । तपआदीनां विवर्धनात् ब्रह्मविवर्धनः । वेदं वेदार्थं च यथावद्वेत्ति विंदत इति वा ब्रह्मवित् । ब्रह्मात्मना ब्राह्मणात्मना समस्तानां लोकानां प्रवचनं कुर्वन्वेदस्यायमिति ब्राह्मणः । ब्रह्मसंज्ञितास्तच्छेषभूता अस्य सन्तीति ब्रह्मी । वेदान् स्वात्मभूतान् जानातीति ब्रह्मज्ञः । ब्राह्मणानां प्रियो ब्राह्मणप्रियः, ब्राह्मणाः प्रिया अस्येति वा "घ्नन्तं शपन्तं पुरुषं वदन्तं यो ब्राह्मणं न प्रणमेद्यथार्हम् । स पापकृद्ब्रह्मदवाग्निदग्धो वध्यश्च दंड्यश्च न चास्मदीयः" इति भगवद्वचनात् । "यं देवं देवकी देवी वसुदेवादजीजनत् । भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः" इति च महाभारते ॥ ८४ ॥

महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ८५ ॥

महान्तः क्रमाः पादविक्षेपा अस्येति महाक्रमः "शं नो विष्णुरुरुक्रमः" इति श्रुतेः । महज्जगदुत्पत्त्यादि कर्मास्येति महाकर्मा । यदीयेन तेजसा भास्करादयस्तेजस्विनस्तन्महत्तेजोऽस्येति महातेजाः 'येन सूर्यस्तपति तेजसेद्धः' इति श्रुतेः । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्" इति स्मृतेश्च । क्रौर्यशौर्यादिभिर्महद्भिः समलंकृत इति महातेजाः । महांश्चासावुरगश्चेति महोरगः "सर्पाणामस्मि वासुकिः" इति भगवद्वचनात् । महांश्चासौ क्रतुश्चेति महाक्रतुः । "यथाश्वमेधः क्रतुराट्" इति मनुवचनात् । "सोऽपि स एवेति" श्रुतेः । महांश्चासौ यज्वा चेति लोकसंग्रहार्थं यज्ञान् निर्वर्तयन् महायज्वा । महांश्चासौ यज्ञश्चेति महायज्ञः "यज्ञानां जपयज्ञोऽस्मि" इति भगवद्वचनात् । महच्च तद्धविश्चेति ब्रह्मात्मनि सर्वं जगत्तदात्मतया हूयत इति महाहविः । महाक्रतुरित्यादयो बहुव्रीहयो वा ॥ ८५ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ८६ ॥

सर्वैः स्तूयते न स्तोता कस्यचिदिति स्तव्यः । अत एव स्तवप्रियः । येन स्तूयते तत्स्तोत्रं गुणसंकीर्तनात्मकम् । स्तुतिः स्तवनक्रिया । स्तोतापि स एव । प्रियो रणो यस्य यतः पंचमहायुधानि नंदकखड्गसहितानि धत्ते सततं लोकरक्षणार्थमतो रणप्रियः । सर्वैः कामैः सकलाभिः शक्तिभिश्च संपन्न इति पूर्णः । न केवलं पूर्ण एव पूरयिता च सर्वेषां संपद्भिः । स्मृतिमात्रेण कल्मषाणि क्षपयतीति पुण्यः पुण्या कीर्तिरस्य यतः पुण्यमावहत्यस्य कीर्तिर्नृणामिति पुण्यकीर्तिः । आन्तरैर्बाह्यैर्व्याधिभिः कर्मजैर्न पीड्यत इति अनामयः ॥ ८६ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८७ ॥

मनसो वेग इव वेगोऽस्य सर्वगतत्वान्मनोजवः । चतुर्दशविद्यानां बाह्यविद्यासमयानां च प्रणेता प्रवक्ता चेति तीर्थकरः । हयग्रीवरूपेण मधुकैटभौ हत्वा विरिंचये सर्गादौ सर्वाः श्रुतीरन्याश्च विद्या उपदिशन् वेदबाह्या विद्याः सुरवैरिणां बंधनाय चोपदिशति इति पौराणिकाः कथयन्ति । वसु सुवर्णं रेतोऽस्येति वसुरेताः । "अप एव ससर्जादौ तासु वीर्यमथासृजत् । तदंडमभवद्धैमं सहस्रांशुसमप्रभम्" इति वचनात् । ब्रह्मणः कारणं परमिति वसुरेताः । वसु धनं प्रकर्षेण ददाति साक्षाद्धनाध्यक्षोऽयमितरस्तु तत्प्रसादाद्धनाध्यक्ष इति वसुप्रदः । वसु प्रकृष्टं मोक्षाख्यं फलं भक्तेभ्यः प्रददातीति द्वितीयो वसुप्रदः "विज्ञानमानंदं ब्रह्म रातेर्दातुः परायण तिष्ठमानस्य तद्विदः" इति श्रुतेः । सुरारीणां वसूनि प्रकर्षेणाधः खंडयन् वा वसुप्रदः । वसुदेवस्यापत्यं वासुदेवः । वसन्ति भूतानि तत्र तेषु वा वसतीति वसुः, छादयत्यात्मनः स्वरूपं माययेति वा वसुः । अविशेषेण सर्वविषयेषु तन्मनो वसतीति वसुः तन्मनोऽस्येति वसुमनाः ब्रह्म । हविरिति तद्धविरेवेति भगवद्वचनाद्धविः ॥ ८७ ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ८८ ॥

"अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः" इति श्रुतेः ब्रह्मास्तीति ये विदुस्ते सन्तस्तैः प्राप्यते इति सद्गतिः । सती गतिर्बुद्धिः समुत्कृष्टाऽस्येति वा सद्गतिः । सती कृतिर्जगदुत्पत्त्यादिलक्षणाऽस्य यस्मात्तेन सत्कृतिः ॥ इति सप्तमं शतं विवृतम् ॥ सजातीयविजातीयस्वगतभेदरहितानुभूतिः सत्ता "एकमेवाद्वितीयम्" इति श्रुतेः । स एव परमात्मा चिदात्मको बोधो बहुधा भासमानत्वात्सद्भूतिः नानात्वप्रतीतेर्बाध्यमानत्वान्न सन्नाप्यसन् श्रौतो वा यौक्तिको वा बाधः प्रपंचस्य विवक्षितः ।

सतां तत्त्वविदां परं प्रकृष्टमयनमिति सत्परायणः। हनुमत्प्रमुखाः सैनिकाः शौर्यशालिनो यस्यां सेनायां सा शूरसेना यस्य स शूरसेनः। यदूनां प्रधानत्वाद्यदुश्रेष्ठः। सतां विदुषामाश्रय इति सन्निवासः। शोभना यमुना यमुनासंबंधिनः परिवेष्टारोऽस्येति सुयामुनः। गोपालवेषधरा यमुनापरिवेष्टारः पद्मासनादयः शोभना अस्येति वा सुयामुनः॥ ८८॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः॥ ८९॥

भूतान्यत्राभिमुख्येन वसन्तीति भूतावासः। "वसन्ति त्वयि भूतानि भूतावासस्ततो भवान्" इति हरिवंशे। जगदाच्छादयति माययेति वासुः स एव देव इति वासुदेवः। "छादयामि जगत्सर्वं भूत्वा सूर्य इवांशुभिः" इति भगवद्वचनात्। सर्वे एवासवः प्राणा जीवात्मके यस्मिन्नाश्रये निलीयन्ते स सर्वासुनिलयः। अलं पर्याप्तिः शक्तिसंपदां नास्य विद्यत इत्यनलः। धर्मविरुद्धे पथि तिष्ठतां दर्पं हन्तीति दर्पहा। धर्मवर्त्मनि वर्तमानानां दर्पं गर्वं ददातीति दर्पदः। स्वात्मामृतरसास्वादनात् नित्यं प्रमुदितो दृप्तः। न शक्या धारणा यस्य प्रणिधानादिषु सर्वोपाधिविनिर्मुक्तत्वात्तथापि तत्प्रसादतः कैश्चिद्दुःखेन धार्यते हृदये जन्मान्तरसहस्रेषु भावनायोगात्तस्माद्दुर्धरः। "क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते" इति भगवद्वचनात्। नान्तरै रागादिभिर्बाह्यैः शत्रुभिः पराजित इत्यपराजितः॥ ८९॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः॥ ९०॥

विश्वा मूर्तिरस्य सर्वात्मकत्वादिति विश्वमूर्तिः। शेषपर्यंकशायिनोऽस्य महती मूर्तिरिति महामूर्तिः। ज्ञानमयी मूर्तिः स्वेच्छया तैजसी वा दीप्तिरस्येति दीप्तमूर्तिः। कर्मनिबंधना मूर्तिरस्य न विद्यत इति अमूर्तिमान्। अवतारेषु स्वेच्छया लोकानामुपकारिणीः बह्वीर्मूर्तीर्भजत इत्यनेकमूर्तिः।

यद्यप्यनेकमूर्तित्वं तथाप्ययमीदृश इति न व्यज्यत इति अव्यक्तः । नाना विकल्पजा मूर्तयः संविदाकृतेः सन्तीति शतमूर्तिः । यतो विश्वादिमूर्तित्वमत एव शताननः ॥ ९० ॥

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबंधुर्लोकनाथो माधवो भक्तवत्सलः ॥ ९१ ॥

परमार्थतः सजातीयविजातीयस्वगतभेदविमुक्तत्वादेकः " एकमेवाद्वितीयं " इति श्रुतेः । मायया बहुरूपत्वान्नैकः " इंद्रो मायाभिः पुरुरूप ईयते " इति श्रुतेः । सोमो यत्राभिषूयते सोऽध्वरः सवः । कशब्दः सुखवाचकः तेन स्तूयत इति कः ' कं ब्रह्म ' इति श्रुतेः । सर्वपुरुषार्थरूपत्वाद्ब्रह्मैव विचार्यमिति ब्रह्म किं । यच्छब्देन स्वतःसिद्धवस्तूद्देशवाचिना ब्रह्म निर्दिश्यते इति ब्रह्म यत् । ' यतो वा इमानि भूतानि जायन्ते ' इति श्रुतेः । तनोतीति ब्रह्म तत् । " ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः " इति भगवद्वचनात् । पद्यते गम्यते मुमुक्षुभिरिति यस्मादुत्कृष्टं नास्ति तदनुत्तमं, सविशेषणमेकं नाम पदमनुत्तममिति । आधारभूतेऽस्मिन्सकला लोका बध्यन्त इति लोकानां बंधुर्लोकबंधुः । लोकानां जनकत्वाज्जनकोपमो बंधुर्नास्तीति वा लोकानां बंधुकृत्यं हितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा लोकबंधुः । लोकैर्नाथ्यते याच्यते तानुपतपति तेभ्य आशास्ते तेषामीष्ट इति वा लोकनाथः " नाथृ नाधृ याञ्चोपतापैश्वर्याशीष्षु " इति धातुपाठात् । मधुकुले जातत्वान्माधवः । भक्तस्नेहवान् भक्तवत्सलः ॥ ९१ ॥

सुवर्णवर्णो हेमांगो वरांगश्चंदनांगदी ।
वीरहा विषमः शून्यो धृताशीरचलश्चलः ॥ ९२ ॥

सुवर्णस्य वर्ण इव वर्णोऽस्येति सुवर्णवर्णः " यदा पश्यः पश्यते रुक्मवर्णं " इति श्रुतेः । हेमेवांगं वपुरस्येति हेमांगः । " य एषोऽतरादित्ये हिरण्मयः पुरुषः " इति श्रुतेः । वराणि शोभनान्यंगानि अस्येति वरांगः । चंदना

नैरंगैः केयूरैर्भूषित इति चंदनांगदी । धर्मत्राणाय वीरानसुरमुख्यान् हिरण्यकशिपुप्रभृतीन् रागादींश्च हन्तीति वीरहा । समो नास्य विद्यते सर्वविलक्षणत्वादिति विषमः । "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" इति भगवद्वचनात् । सर्वविशेषरहितत्वाच्छून्यवच्छून्यः । धृताः विगलिता आशिषः प्रार्थना अस्येति धृताशी । "न स्वरूपान्न सामर्थ्यान्नावज्ञानादिकाद्गुणात् । चलनं विद्यतेऽस्य" इत्यचलः । वायुरूपेण चलतीति चलः ॥ ९२ ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ९३ ॥

अनात्मवस्तुष्वात्माभिमानो नास्ति स्वयंवेदनाकृतेरित्यमानी । स्वमायया सर्वेषामनात्मनि स्वात्माभिमानं ददाति, भक्तानां सत्कारं मानं च ददाति, अधर्मिष्ठानां सत्कारं द्यति खंडयति, तत्त्वविदामनात्मन्यभिमानं द्यति खंडयतीति वा मानदः । सर्वैर्माननीयः पूजनीयः सर्वेश्वरत्वादिति मान्यः । चतुर्दशानां लोकानामीश्वरत्वाल्लोकस्वामी । त्रिलोकान् धारयतीति त्रिलोकधृक् । शोभना मेधा प्रज्ञाऽस्येति सुमेधाः । 'नित्यमसिच्प्रजामेधयोः' इति समासान्तोऽसिच्प्रत्ययः । मेधेऽध्वरे जायत इति मेधजः । कृतार्थो धन्यः । सत्या अवितथा मेधाऽस्येति सत्यमेधाः । अंशैरशेषैः शेषाद्यैरशेषां धरां धारयन् धराधरः ॥ ९३ ॥

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृंगो गदाग्रजः ॥ ९४ ॥

तेजसा भासा सर्वदा द्वादशादित्यरूपेण वर्षणात्तेजोवृषः । द्युतिमंगगतां कान्तिं धारयन् द्युतिधरः । सर्वशस्त्रभृतां श्रेष्ठः इति सर्वशस्त्रभृतां वरः । भक्तैरुपहृतं पत्रपुष्पादिकं गृह्णातीति प्रग्रहः । धावतो विषयारण्ये दुर्दान्तेन्द्रियवाजिनः तत्प्रसादेन रश्मिनेव बध्नातीति वा प्रग्रहवत्प्रग्रहः । प्रग्रहो रश्मौ वा इति पाणिनिवचनात् प्रग्रह-

शब्दस्य साधुत्वम् । स्ववशेन सर्वं निगृह्णातीति निग्रहः । विगतमग्रमं ... व्यग्रः । भक्तजनानामभीष्टप्रदानेषु व्यग्र इति वा व्यग्रः चतुःशृंगो नैकशृंगः " चत्वरि शृंगा त्रयो अस्य पादा द्वे शीर्षे स हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां अविवेश इति श्रुतेः । निगदेन मंत्रेणाग्रे जायते इति निशब्दलोपं कृत्वा गदाग्रजः यद्वा गदो नाम श्रीवासुदेवावरजः तस्मादग्रे जायत इति वा गदाग्रजः ।। ९४

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ।। ९५ ।।

चतस्रो मूर्तयो विराट्सूत्रात्मप्राकृततुरीयात्मनोऽस्येति चतुर्मूर्तिः सिता रक्ता पीता कृष्णा इति चतस्रो मूर्तयोऽस्येति वा चतुर्मूर्तिः । च त्वारो बाहवोऽस्येति चतुर्बाहुरिति नाम वासुदेवे रूढम् । शरीरपुरु छंदःपुरुषः वेदपुरुषो महापुरुषः इति बह्वृचोपनिषदुक्ताश्चत्वारः पुरु व्यूहा अस्येति चतुर्व्यूहः । चतुर्णामाश्रमाणां वर्णानां च यथोक्तकारि गतिश्चतुर्गतिः । रागद्वेषादिरहितत्वाच्चतुरं मन आत्माऽस्येति मनो द्धिरहंकारचित्ताख्यपुरुषार्थचतुष्टयात्मकत्वाद्वा चतुरात्मा । धर्मार्थका मोक्षाख्यचतुष्टयं भवत्युत्पद्यते यस्मादिति चतुर्भावः । यथावद्वेत्ति चतु वेदानां अर्थमिति चतुर्वेदवित् । एकः पादोऽस्येति एकपात् " पादोऽस्य वि भूतानि " इति श्रुतेः । " विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " इ स्मृतेश्च ।। ९५ ।।

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ।। ९६ ।।

संसारचक्रस्य सम्यगावर्तक इति समावर्तः । सर्वत्र वर्तमानत्व निवृत्त आत्मा कुतोऽपीत्यनिवृत्तात्मा, निवृत्त आत्मा मनो विषयेभ्यः ऽस्येति वा निवृत्तात्मा । जेतुं न शक्यत इति दुर्जयः । भयहेतुत्वादस्या सूर्यादयो नातिक्रामन्तीति दुरतिक्रमः " भयादस्याग्निस्तपति भयात्त

सूर्यः । भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचमः ” इति मंत्रवर्णात् । महद्भयं वज्रमुद्यतमिति च । दुर्लभया भक्त्या लभ्यत्वाद्दुर्लभः “ जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ” इति व्यासवचनात् । “ भक्त्या लभ्यस्त्वनन्यया ” इति भगवद्वचनाच्च । दुःखेन गम्यते ज्ञायत इति दुर्गमः । अंतरायप्रतिहतैर्दुःखादवाप्यत इति दुर्गः । दुःखेनावास्यते चित्ते योगिभिः समाधाविति दुरावासः । दुर्गामिनो दानवादयस्तान् हन्तीति दुरारिहा ॥ ९६ ॥

शुभांगो लोकसारंगः सुतंतुस्तंतुवर्धनः ।
इंद्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ९७ ॥

शोभनैरंगैर्ध्येयत्वाच्छुभांगः । लोकानां सारं यत्तद्गृह्णातीति लोकसारंगः “ प्रजापतिर्लोकानभ्यतपत् ” इति श्रुतेः । लोकसारः प्रणवः तेन प्रतिपत्तव्य इति वा लोकसारंगः पृषोदरादित्वात्साधुत्वम् । शोभनस्तंतुर्विस्तीर्णः प्रपंचोऽस्येति सुतंतुः । तमेव ततुं वर्धयति छेदयतीति वा तंतुवर्धनः । इंद्रस्य कर्मेव कर्मास्येतीन्द्रकर्मा ऐश्वर्यकर्मेत्यर्थः । महान्ति वियदादीनि भूतानि कर्माणि कार्याण्यस्येति महाकर्मा । कृतमेव न कर्तव्यं किंचिदपि कर्मास्य विद्यत इति कृतकर्मा, धर्मात्मकं कर्म कृतवानिति वा । कृतः वेदात्मकः आगमोऽनेनेति कृतागमः । “ अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदः ” इति श्रुतेः ॥ ९७ ॥

उद्भवः सुंदरः सुंदो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृंगी जयंतः सर्वविज्जयी ॥ ९८ ॥

उत्कृष्टं भवं जन्म स्वेच्छया भजत इत्युद्भवः । उद्गतमपगतं जन्मास्य सर्वकारणत्वादिति वा उद्भवः । विश्वातिशायिसौभाग्यशालित्वात्सुदरः । सुष्ठु उंदतीति सुंदः “ उन्दीक्लेदने ” इति धातोः पचाद्यच् । आर्द्रीभावस्य वाचकः करुणाकर इत्यर्थः पृषोदरादित्वात्पररूपत्वम् । रत्नशब्देन शोभा लक्ष्यते रत्नवत्सुंदरा नाभिरस्येति रत्ननाभः । शोभनं लोचनं

नयनं ज्ञानं वास्येति सुलोचनः । ब्रह्मादिभिः पूज्यतमैरर्चनीयत्वादर्कः वाजमन्नमर्थिनां सनोति ददातीति वाजसनः । प्रलयांभसि शृंगवन्मत्स्य विशेषरूपः शृंगी । मत्वर्थीयोऽतिशायने अरीन् अतिशयेन जयति जय हेतुर्वा जयंतः । सर्वविषयज्ञानमस्येति सर्ववित् । अंतरान् रागादीं बाह्यान् हिरण्याक्षादींश्च जेतुं शीलमस्येति जयी 'प्रजोरिनिः' इत्याधि कारे 'जिदृक्षि' इत्यादिपाणिनीयवचनादिनिप्रत्ययः । सर्वविचासौ जय चेति सर्वविज्जयीत्येकं नाम ॥ ९८ ॥

सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ९९ ॥

बिन्दवोऽवयवाः सुवर्णसदृशा अस्येति सुवर्णबिन्दुः 'आप्रणखात्स एव सुवर्णः' इति श्रुतेः । शोभनो वर्णोऽक्षरं बिंदुश्च यस्मिन्मंत्रात्मा स सुवर्णबिंदुः । नाम्नामष्टमं शतं विवृतम् ॥ सत्ताऽनलोऽनेकमूर्तिस्तद्वीरः त्रिलोकधृक् निग्रहश्चतुर्वेदवित् दुरारिहा सुंदरः ॥ रागद्वेषादिभिः शब्दादि विषयैश्च त्रिदशादिभिश्च न क्षुभ्यत इत्यक्षोभ्यः । सर्वेषां वागीश्वरा ब्रह्मादीनामपीश्वरः सर्ववागीश्वरेश्वरः । अवगाह्य सदानंदं विश्रम्य सुखम सते योगिन इति महाह्रद इव महाह्रदः । गर्तवदस्य माया महती दुरत्यये महागर्तः "मम माया दुरत्यया" इति भगवद्वचनात् । यद्वा गर्तशब्द रथपर्याय इति नैरुक्तैरुक्तस्तस्मान्महारथो महागर्तः । महारथत्वमस्य प्रसि भारतादिषु । कालत्रयानवच्छिन्नस्वरूपत्वान्महाभूतः । सर्वभूतानि यस्मि न्निधीयन्ते महांश्चासौ निधिश्चेति महानिधिः ॥ ९९ ॥

कुमुदः कुंदरः कुंदः पर्जन्यः पावनोऽनिलः ।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ १०० ॥

कुं धरणिं भारावतारणं कुर्वन् मोदयतीति कुमुदः मुदिरत्र णिजर्थः कुंदपुष्पतुल्यानि शुद्धानि धर्मानुबंधीनि फलानि राति ददातीति कुंदरः कुंदपुष्पतुल्यानि शुद्धानि फलानि लात्यादत्त इति वा कुंदरः रलयोर्वृ

त्वस्मरणात् । "कुं धरां दारयामास हिरण्याक्षजिघांसया । वाराहं रूपमास्थाय" इति वा कुंदरः । कुंदोपमसुंदरः । कुंदोपमसुंदरांगत्वात्स्वच्छस्फटिकवन्निर्मलः कुंदः । कुं पृथ्वीं कश्यपायादादिति वा कुंदः । "सर्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान् । तस्मिन्यज्ञे महादाने दक्षिणां भृगुनंदनः । मारीचाय ददौ प्रीतः काश्यपाय वसुंधराम्" इति हरिवंशे । कुं पृथ्वीं द्यति खंडयतीति वा कुंदः । कुशब्देन पृथ्वीश्वरा लक्ष्यन्ते "निःक्षत्रियां यश्च चकार मेदिनीमनेकशो बाहुवनं तथाच्छिनत् । यः कार्तवीर्यस्य स भार्गवोत्तमो ममास्तु मांगल्यविवर्धनो हरि" इति विष्णुधर्मे । पर्जन्यवदाध्यात्मिकादितापत्रयं शमयति, सर्वान्कामानभिवर्षतीति वा पर्जन्यः । स्मृतिमात्रेण पुनातीति पावनः । इलति प्रेरणं करोतीति इलः तद्रहितत्वादनिलः । इलति स्वपिति इत्यत्र इलस्तद्विपरीतः नित्यप्रबुद्धस्वरूपत्वादिति वाऽनिलः । अथवा निलेर्गहनार्थात्कप्रत्ययान्तरूपं गहनोऽनिल इति वा । स्वात्मानंदामृतमश्नातीत्यमृताशः । मथितममृतं सुरान् पाययित्वा स्वयं चाश्नातीति वाऽमृताशः अमृता अनश्वराः अविनश्वरफलत्वादाशा वांछाऽस्येति वा अमृताशः । मृतं मरणं तद्रहितं वपुरस्येत्यमृतवपुः । सर्वं जानातीति सर्वज्ञः । "य सर्वज्ञः स सर्ववित्" इति श्रुतेः । "सर्वतोऽक्षिशिरोमुखम्" इति भगवद्वचनात्सर्वतोमुखः ॥ १०० ॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरांध्रनिषूदनः ॥ १०१ ॥

पत्रपुष्पफलादिभिर्भक्तिमात्रसमर्पितैः सुखेन लभ्यत इति सुलभः । "पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु । भक्त्यैकलभ्ये पुरुषे पुराणे मुक्तौ कथं न क्रियते प्रयत्नः" इति महाभारते । शोभनं व्रतं नियतो भुंक्ते भोजनान्निवर्तत इति वा सुव्रतः । अनन्याधानसिद्धित्वात्सिद्धः । सुरशत्रव एवास्य शत्रवस्तान् जयतीति शत्रुजित् । सुरशत्रूणां तापनः शत्रुतापनः । न्यक् अवाक् रोहति सर्वेषामुपरि वर्तत इति न्यग्रोधः ।

पृषोदरादित्वाद्धकारस्य धकारादेशः । सर्वाणि भूतानि न्यक्कृत्य निजमायां वृणोति निरुणद्धीति वा न्यग्रोधः । अंबरादुद्गतः कारणत्वेनेत्युदुंबरः पृषोदरादित्वादेवोकारादेशः । यद्वोदुंबरमन्नाद्यं तेन तदात्मना विश्वं पोषयन् उदुंबरः । ' ऊर्वा अन्नाद्यमुदुंबरम् ' इति श्रुतेः । श्वोऽपि न स्थातेत्यश्वत्थः पृषोदरादित्वादेव सकारस्य तकारादेशः । " ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः " इति श्रुतेः । " ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् " इति स्मृतेश्च । चाणूरनामानमंध्रं निषूदवानिति चाणूरांध्रनिषूदनः ॥ १०१ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिंत्यो भयकृद्भयनाशनः ॥ १०२ ॥

सहस्राणि अनंतानि अर्चींषि यस्य स सहस्रार्चिः । " दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता । यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः " इति गीतावचनात् । सप्तजिह्वाः अस्य सन्तीति सप्तजिह्वः अग्निरूपी । " काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा । स्फुलिंगिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वाः " इति श्रुतेः । सप्त एधांसि दीप्तयोऽस्येति सप्तैधा अग्निः । " सप्त ते अग्ने समिधः सप्त जिह्वाः " इति मंत्रवर्णात् । सप्ताश्वा वाहनान्यस्येति सप्तवाहनः । सप्तनामैकोऽश्वो वाहनमस्येति सप्तवाहनः । " एको अश्वो वहति सप्तनामा " इति श्रुतेः । मूर्तिः घनरूपधारणं समर्थं चराचरलक्षणं " ताभ्योभितप्ताभ्यो मूर्तिरजायत " इति श्रुतेः । तद्रहित इत्यमूर्तिः । अथवा देहसंस्थानलक्षणा मूर्छितांगावयवा मूर्तिस्तद्रहित इत्यमूर्तिः । अघं दुःखं पापं च यस्य न विद्यत इत्यनघः । प्रमात्रादिसाक्षित्वेन सर्वप्रमाणागोचरत्वादचिंत्यः अयमीदृश इति विश्वप्रपंचविलक्षणत्वेन चिंतयितुमशक्यत्वाद्वाऽचिंत्यः । असन्मार्गवर्तिनां भयं करोति भक्तानां भयं कृन्ततीति वा भयकृत् । वर्णाश्रमाचारवतां भयं नाशयतीति भयनाशनः । " वर्णा-

श्रमाचारवता पुरुषेण परः पुमान् । विष्णोराराध्यते पंथा नान्यस्तत्तोषकारकः ” इति पराशरवचनात् । तैराराधितत्वाद्भयं नाशयतीति भयनाशनः ॥ १०२ ॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ १०३ ॥

सौक्ष्म्यातिशयशालित्वादणुः । “ एषोऽणुरात्मा चेतसा वेदितव्यः ” इति श्रुतेः । बृहत्वाद्बृंहणत्वाच्च ब्रह्म बृहत् । “ महतो महीयान् ” इति श्रुतेः । अस्थूलमित्यादिना द्रव्यप्रतिषेधात् कृशः । स्थूल इत्युपचर्यते सर्वात्मत्वात् । सत्त्वरजस्तमसां सृष्टिस्थितिलयकर्मस्वधिष्ठातृत्वात् गुणभृत् । परमार्थतो गुणाभावात् निर्गुणः । “ केवलो निर्गुणश्च ” इति श्रुतेः । शब्दादिगुणरहितत्वान्निरतिशयसूक्ष्मत्वान्नित्यशुद्धसर्वगतत्वादिप्रतिबंधकं कर्मजातं तर्कतोऽपि वक्तुं न शक्यमत एव महान् । अशब्दोस्पर्शश्च महान् शुचिरित्यापस्तंबस्मरणात् । पृथिव्यादीनां धारकाणामपि धारकत्वान्न केनचित् ध्रियत इति अधृतः । यद्येवमयं केन धार्यत इत्याशंक्याह —स्वेनैव आत्मना धार्यत इति स्वधृतः । “ स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि ” इति श्रुतेः । पद्मोदरदलताम्रमभिरूपतममस्यास्यमिति स्वास्यः । वेदार्थको महान् शब्दराशिः तस्य मुखान्निर्गतः पुरुषार्थोपदेशार्थमिति वा स्वास्यः । “ अस्य महतो भूतस्य ” इत्यादिश्रुतेः । अन्यस्य वशिनो वंशः पाश्चात्यः पाश्चात्यो इति सूचितं अस्य वंशः प्रपंचः स सर्ववंशात्प्रागेव न पाश्चात्य इति प्राग्वंशः । वंशप्रपंचं वर्धयन् वा वंशवर्धनः ॥ १०३ ॥

भारभृत् कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ १०४ ॥

अनंतादिरूपेण भुवो भारं बिभ्रद्भारभृत् । देवादिभिरयमेव परत्वेन कथितः । सर्वैर्वेदैः कथित इति वा कथितः । “ सर्वे वेदा यत्पदमा-

मनन्ति । वेदैश्च सर्वैरहमेव वेद्यः " " वेदे रामायणे चैव पुराणे भारते तथा । आदौ मध्ये तथा चान्ते विष्णुः सर्वत्र गीयते " इति स्मृत्यादिवचनेभ्यः । " सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् " इत्याद्युक्तम् । किं तदध्वनो विष्णोर्व्यापनशीलस्य पारं कथितं परमं पद विष्णुसतत्त्वमित्याकांक्षायामिंद्रियादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते । " इंद्रियेभ्यः परा ह्यर्थाः " इत्यारभ्य " पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः " इत्यंतेन यः कथितः सः । योगो ज्ञानं तेनैव गम्यत्वात् योगी । योगः समाधिः स हि स्वात्मनि सर्वदा समाधत्ते स्वमात्मानं तेन वा योगी । अन्ये योगिनो योगांतरायैर्हन्यन्ते तेन स्वरूपात् प्रमाद्यन्ति अयं तु तद्रहितत्वात्तेषामीश इति योगीशः । सर्वान् कामान् सदा ददातीति सर्वकामदः " फलमत उपपत्तेः " इति भगवता व्यासेनाभिहितत्वात् । आश्रमवतां सर्वेषां संसारारण्ये भ्रमतां विश्रामस्थानत्वादाश्रमः । अविवेकिनः सर्वान् संतापयतीति श्रमणः । क्षामाः क्षीणाः सर्वाः प्रजाः करोतीति क्षामः । तत्करोति तदाचष्ट इति णिचि पचाद्यचि कृते संपन्नः क्षाम इति । शोभनानि पर्णानि छंदांसि संसारतरुरूपेणास्येति सुपर्णः । " छदांसि यस्य पर्णानि " इति भगवद्वचनात् । वायुर्वहति यद्भीत्या भूतानीति स वायुवाहनः । " भीषास्माद्वातः पवते " इति श्रुतेः ॥ १०४ ॥

धनुर्धरो धनुर्वेदो दंडो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः ॥ १०५ ॥

श्रीरामरूपेण धनुर्धारयामासेति धनुर्धरः । स एव दाशरथिः । धनुर्वेदं वेत्तीति धनुर्वेदः । दमनं दमयतां दंडः । " दंडो दमयतामस्मि " इति भगवद्वचनात् । वैवस्वतनरेंद्रादिरूपेण प्रजा दमयतीति दमयिता । दम्येषु दंडकार्यफलं तच्च स एवेति दमः । शत्रुभिर्न पराजित इत्यपराजितः । सर्वकर्मसु समर्थ इति वा सर्वसहः । सर्वान् शत्रून् सहत इति वा सर्वसहः । सर्वान् स्वेषु स्वेषु कृत्येषु व्यवस्थापयतीति नियन्ता । न नियमो

नियतिस्तस्य विद्यत इत्यनियमः । सर्वनियंतुर्नियंत्रंतराभावात् नास्य विद्यते यमो मृत्युरित्ययमः। अथवा यमनियमौ योगांगे तद्रतत्वात् स एव नियमो यमः ॥ १०५ ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ १०६ ॥

शौर्यादिकं सत्त्वमस्येति सत्त्ववान्। सत्त्वे गुणे प्राधान्येन स्थित इति सात्त्विकः। सत्सु साधुत्वात्सत्यः । सत्ये यथाभूतार्थकथने धर्मे च चोद-नालक्षणे प्रकर्षेण नियत इति सत्यधर्मपरायणः । अभिप्रेयते पुरुषार्थकां-क्षिभिराभिमुख्येन प्रलयेऽस्मिन्प्रैति जगदिति वाऽभिप्रायः । प्रियाणि इष्टान्यर्हतीति प्रियार्हः । " यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे । तत्तद्गुणवते देयं तदेवाक्षयमिच्छता " इति स्मरणात् । स्वागतासनप्रशं-सार्घ्यपाद्यस्तुतिनमस्कारादिभिः पूजासाधनैः पूजनीय इत्यर्हः । न केवलं प्रियार्ह एव स्तुत्यादिभिर्भजतां प्रियं करोतीति प्रियकृत् । तेषामेव प्रीतिं वर्धयतीति प्रीतिवर्धनः ॥ १०६ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ १०७ ॥

विहायसं आकाशे विहाय गतिराश्रयोऽस्येति विहायसगतिः विष्णु-पदमादित्यो वा । स्वयमेव द्योतत इति ज्योतिः । " नारायणः परं ज्योतिः " इति मंत्रवर्णात् । शोभना हविर्दीप्तिरिच्छा वाऽस्येति सुरुचिः। समस्तदेवतोद्देशेन प्रवृत्तेष्वपि कर्मसु हुतं भुंक्ते भुनक्तीति वा हुतभुक्। स सर्वत्र वर्तमानः त्रयाणां लोकानां विभुत्वाद्विभुः। रसानादत्त इति रविः आदि-त्यात्मा । विविधं रोचत इति विरोचनः । सूते श्रियमिति सूर्योऽग्निर्वा। सूतेः सुवतेर्वा सूर्यशब्दो निपात्यते " राजसूयसूर्य० " इति पाणिनिवच-नात् । सर्वस्य जगतः प्रसविता सविता । " रसानां च तथाऽऽदानाद्र-विरित्यभिधीयते । प्रजानां त्वं प्रसवनात् सवितेति निगद्यसे "

इति विष्णुधर्मोत्तरे । रविर्लोचनं चक्षुरस्येति रविलोचनः " अग्निर्मूर्धा चक्षुषी चंद्रसूर्यौ " इति श्रुतेः ॥ १०७ ॥

अनंतो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ १०८ ॥

नित्यत्वात्सर्वगतत्वात् देशकालपरिच्छेदाभावादनंतः शेषरूपो वा । हु भुनक्तीति हुतभुक् । प्रकृतिं भोग्यां अचेतनां भुंक्त इति भोक्ता । जगत्पाल यतीति वा भोक्ता । भक्तानां सुखं मोक्षलक्षणं ददाति असुखं खंडयती वा सुखदः । धर्मगुप्तये असकृज्जायमानत्वादनैकजः । अग्रे जायत इत्य ग्रजः हिरण्यगर्भः । " हिरण्यगर्भः समवर्तताग्रे " इत्यादिश्रुतेः आप्तसर्वकामत्वात्प्राप्तिहेत्वभावान्निर्वेदोऽस्य नास्तीति अनिर्विण्णः । साधू न्सत आभिमुख्येन मृष्यते क्षमत इति सदामर्षी । तमनाधारमाधारम धिष्ठाय त्रिलोकास्तिष्ठन्तीति लोकाधिष्ठानं ब्रह्म । अद्भुतः "श्रवणायापि बहुभिर्य न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽऽश्चर्यो ज्ञाता कुशलानुशिष्टः " इति श्रुतेः । " आश्चर्यवत्पश्यति कश्चिदेनं " इति भगवद्वचनाच्च । स्वरूपशक्तिव्यापारकार्ये अद्भुतत्वाद्व अद्भुतः ॥ १०८ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक् स्वस्तिदक्षिणः ॥१०९

सनादिति निपातः चिरार्थवचनः कालश्च परस्यैवेति विकल्पना कापि " परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज । व्यक्ताव्यक्ते तथैवान्ये रू कालस्तथा परम् " इति विष्णुपुराणे । सर्वकारणत्वाद्विरिंच्यादीनाम सनातनानामतिशयेन सनातनत्वात्सनातनतमः । वडवानलस्य कपिल वर्ण इव तद्रूपी कपिलः । कं जलं रश्मिभिः पिबन् कपिः सूर्यो कपि र्वराहो वा । " कपिर्वराहः श्रेष्ठश्च " इति भगवद्वचनात् । अप्यये प्रलये ऽस्मिन्नपि यन्ति जगन्तीत्यप्ययः ॥ ९०० ॥ इति नाम्नां नवमं श

विवृतम् ॥ भक्तानां स्वस्ति मंगलं ददातीति स्वस्तिदः । तदेव करोतीति स्वस्तिकृत् । मंगलं स्वरूपमात्मीयं परमानंदलक्षणं स्वस्ति । तदेव भुंक्त इति स्वस्तिभुक्, भक्तानां मंगलं स्वस्ति भुनक्तीति वा स्वस्तिभुक् । स्वस्तिरूपेण दक्षते वर्धते स्वस्ति विधातुं समर्थ इति वा स्वस्तिदक्षिणः । अथवा दक्षिणशब्दः आशुकारिणि वर्तते शीघ्रं स्वस्ति दातुं अयमेव समर्थ इति । " स्मरणादेव कृष्णस्य सिध्यन्ति सर्वसिद्धयः " इति स्मृतेः । " स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् । स्मरणादेव कृष्णस्य पापसंघातपंजरम् । शतधा भेदमायाति गिरिर्वज्रहतो यथा " इत्यादिवचनेभ्यः ॥ १०९ ॥

अरौद्रः कुंडली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ११० ॥

कर्म रौद्रं रागश्च रौद्रः पापं च रौद्रं एतत्त्रयं रौद्रमस्य नास्ति अवाप्तसर्वकामत्वेन रागद्वेषादेरभावादरौद्रः । शेषरूपभाक् कुंडली, यद्वा सांख्ययोगात्मके कुंडले मकराकारे अस्य स्त इति कुंडली । सहस्रांशुमंडलोपमकुंडलधारणाद्वा कुडली । समस्तलोकरक्षार्थं मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रं धत्त इति चक्री । " चलत्स्वरूपमत्यंतजवेनांतरितानिलम् । चक्रस्वरूपं च मनो धत्ते विष्णुः करे स्थितम् " इति विष्णुपुराणे । विक्रमः पादविक्षेपः शौर्यं वा द्वयं चाशेषरूपेभ्यो विलक्षणमस्येति विक्रमी । श्रुतिस्मृतिलक्षणमूर्जितं शासनमस्येति ऊर्जितशासनः । " श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लंघ्य वर्तते । आज्ञाच्छेदी मम द्वेषी मद्भक्तोपि न वैष्णवः " इति भगवद्वचनात् । शब्दप्रवृत्तिहेतूनां जात्यादीनामसंभवात् शब्देन वक्तुमशक्यत्वाच्छब्दातिगः । " यतो वाचो निवर्तन्ते अप्राप्य मनसा सह " " न शब्दगोचरैर्यस्य योगिध्येयं परं पदम् " इत्यादिश्रुतिस्मृतिभ्यः । सर्वे वेदाः तात्पर्येण तमेव वदन्तीति शब्दसहः । " सर्वे वेदा यत्पदमामनन्ति " " वेदैश्च सर्वैरहमेव वेद्यः " इत्यादिश्रुतिस्मृतिभ्यः । तापत्रया-

भिततानां विश्रमस्थानत्वाच्छिशिरः । संसारिणामात्मा शर्वरीवच्छर्वरी ज्ञानिनां पुनः संसारः शर्वरी तामुभयेषां करोतीति शर्वरीकरः । "या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" इति भगवद्वचनात् ॥ ११० ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ १११ ॥

क्रौर्यं नाम मनोधर्मः कोपजः आंतरः संतापः साभिनिवेशः अवाप्तकामत्वात्कामाभावादेव क्रौर्याभावः तस्मात्क्रौर्यमस्य नास्तीत्यक्रूरः । कर्मणा मनसा वाचा वपुषा च शोभनत्वात्पेशलः । प्रवृद्धशक्तिः शीघ्रंकारी समर्थ इति दक्षविशेषणत्रयं चैतत् परमेश्वरे अस्मिन्नियतमिति दक्षः । दक्षिणशब्दस्यापि दक्ष एवार्थः पुनरुक्तिदोषो नास्ति, शब्दभेदात् । अथवा दक्षते गच्छति हिनस्तीति वा दक्षिणः । 'दक्ष गतिहिंसनयोः' इति धातुपाठात् । क्षमावतां योगिनां पृथिव्यादीनां च भारधारकानां श्रेष्ठ इति क्षमिणांवरः । "क्षमया पृथिवीसमः" इति वाल्मीकिवचनात् । ब्रह्मांडमखिलं वहन् पृथिवीव भारेण नार्दित इति पृथिव्या अपि वरो वा क्षमिणांवरः । क्षमिणः शक्ताः अयं तु सर्वशक्तिमत्त्वात्सकलाः क्रियाः कर्तुं क्षम इति क्षमिणांवरः । निरस्तातिशयं ज्ञानं सर्वदा सर्वगोचरमस्यास्ति नेतरेषामिति विद्वत्तमः । वीतं विगतं भयं सांसारिकं संसारलक्षणमस्येति वीतभयः सर्वेश्वरत्वान्नित्यमुक्तत्वाच्च । पुण्यं पुण्यकरं श्रवणं कीर्तनं चास्येति पुण्यश्रवणकीर्तनः । "य इद शृणुयान्नित्यं" इति श्रवणफलवचनात् ॥ १११ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ११२ ॥

संसारसागरादुत्तारयतीत्युत्तारणः । दुष्कृतिं पापसंज्ञितां हन्तीति दुष्कृतिहा, ये पापकारिणस्तान्हन्तीति वा दुष्कृतिहा । स्मरणादि कुर्वत

सर्वेषां पुण्यं करोतीति पुण्यरूपत्वात्पुण्यः, सर्वेषां श्रुतिस्मृतिलक्षणया वाचा पुण्यमाचष्ट इति वा पुण्यः । भाविनोऽर्थस्य सूचकान् दुःस्वप्नान् नाशयतीति ध्यातः स्तुतः कीर्तितश्चेति दुःस्वप्ननाशनः । विविधाः संसारिणां गतीर्मुक्तिप्रदानेन हन्तीति वीरहा । सत्त्वगुणमधिष्ठाय जगत्त्रयं रक्षयन् रक्षणः नंद्यादित्वात्कर्तरि ल्युट् । सन्मार्गवर्तिनः सन्तः तद्रूपेण विद्याविनयवृद्ध्यै स एव वर्तत इति सन्तः । सर्वाः प्रजाः प्राणरूपेण जीवयन् जीवनः । परितः सर्वतो विश्वं व्याप्य व्यवस्थित इति पर्यवस्थितः ॥ ११२ ॥

अनंतरूपोऽनंतश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ ११३ ॥

अनंतानि रूपाणि यस्य वा विश्वप्रपंचरूपेण वाऽवस्थितश्चेत्यनंतरूपः । अनंता अपरिमिता श्रीः परा शक्तिरस्येति अनंतश्रीः । "परास्य शक्तिर्विविधैव श्रूयते" इति श्रुतेः । मन्युः क्रोधो जितो येन स जितमन्युः । भयं संसारजं पुंसामपघ्नन् भयापहः । न्यायसमवेतश्चतुरश्चतुरस्रः, पुंसां कर्मानुरूपं फलं प्रयच्छतीति । आत्मा स्वरूपं चित्तं वा गभीरं यस्य स गभीरात्मा । विविधानि फलानि अधिकारिभ्यो विशेषेण दिशतीति विदिशः । विविधामाज्ञां शक्रादीनां कुर्वन् व्यादिशः । समस्तानां कर्मिणां कर्मणां फलानि दिशन्वेदात्मनेति दिशः ॥ ११३ ॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ ११४ ॥

आदिः कारणमस्य न विद्यत इत्यनादिः सर्वकारणत्वात् । भूतानामाधारो भूर्भुवः सर्वभूतानामाश्रयत्वेन प्रसिद्धाया भूम्या भुवोऽपि भूरिति भूर्भुवः । अथवा न केवलमसौ भूः भुवो लक्ष्मीः शोभा चेति भूर्भुवोलक्ष्मीः । अथवा भूर्भूलोकः भुवो भुवर्लोकः तयोः लक्ष्मीरात्मविद्या । "आत्मविद्या च देवि त्वम्" इति श्रीस्तुतौ । भूम्यंतरिक्षयोः शोभेति वा लक्ष्मीः । शोभना विविधा ईरा गतयो यस्य स सुवीरः । शोभनं विविधं ईरयतीति वा सुवीरः । रुचिरे कल्याणे अंगदे अस्येति रुचिरांगदः । जंतून् जनयन् जननः, ल्युटो बहुलग्रहणात्कर्तरि ल्युट् । जनस्य जनिमतो

जन्म उद्भवस्तस्यादिमूलंकारणमिति जनजन्मादिः । भयहेतुत्वाद्भीमः । 'भीमादयोपादाने' इति पाणिनिवचनात् । "महद्भयं वज्रमुद्यत" इति मंत्रवर्णात् । असुरादीनां भयहेतुः पराक्रमोऽस्यावतारेष्विति भीमपराक्रमः ।। ११४ ।।

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ।। ११५ ।।

पृथिव्यादीनां पंचभूतानामाधाराणामाधारत्वादाधारनिलयः । स्वात्मना धृतस्यान्यो धाता नास्तीत्यधाता 'नञ्‌दृतश्चेति समासान्तविधिरनित्य' इति कप्प्रत्ययाभावः । संहारसमये सर्वप्रजा धारयति धयति पिबतीति वा धाता 'धेट्पाने' इति धातुः । मुकुलात्मना स्थितानां पुष्पाणां हासवत् प्रपंचरूपेण विकासोऽस्येति पुष्पहासः । नित्यप्रबुद्धरूपत्वात्प्रकर्षेण जागर्तीति प्रजागरः । सर्वेषामुपरि तिष्ठन् ऊर्ध्वगः । सतां कर्माणि सत्पथेनाचरत्येष इति सत्पथाचारः । मृतान् परिक्षित्प्रभृतीन् जीवयन्निति प्राणदः । प्रणवो नाम परमात्मनो वाचक ओंकारः तदभेदोपचारेणायं प्रणवः । पणति व्यवहारार्थस्तं कुर्वन् इति पणः 'पणव्यवहारे' इति धातुः । "सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वाऽभिवदन्यदास्ते" इति श्रुतेः । पुण्यानि कर्माणि फलैः संगृह्याधिकारिभ्यः प्रयच्छन् तल्लक्षणयेति वा पणः ।। ११५ ।।

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ।। ११६ ।।

प्रमितिः संवित्स्वयंप्रमा प्रमाणं "प्रज्ञानं ब्रह्म" इति श्रुतेः । "ज्ञानस्वरूपमत्यंतं निर्मलं परमार्थतः । तदेवार्थस्वरूपेण भ्रांतिदर्शनतः स्थितम्" इति विष्णुपुराणे । प्राणा इंद्रियाणि यत्र जीवे निलीयन्ते तत्परतंत्रत्वाद्देहस्य धारकाः प्राणापानादयो वा तस्मिन् प्रविलीयन्ते, प्राणितीति प्राणो जीवः परे पुंसि निलीयत इति वा प्राणान् जीवांश्चात्मनि संहरंस्तेषामाश्रय इति वा प्राणनिलयः । पोषयन्नन्नरूपेण प्राणानिति प्राणभृत् । प्राणिनो जीवयन् प्राणाख्यैः पवनैरिति प्राणजीवनः । "न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" इति मंत्रवर्णात् । तथ्यममृतं सत्यं परमार्थं सत्तत्त्वमित्येते एकार्थवाचिनः परमार्थसतो ब्रह्मणो वाचकाः शब्दाः इति तत्त्वम् । तत्त्वं स्वरूपं यथावद्वेत्तीति तत्त्ववित् । एकश्चासावात्मा चेत्येकात्मा । "आत्मा

वा इदमेक एवाग्र आसीत्" इति श्रुतेः । "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य संततो भावस्तस्मादात्मेति गीयते" इति स्मृतेश्च । जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकारास्तानतीत्य गच्छतीति जन्ममृत्युजरातिगः । "न जायते म्रियते वा विपश्चित्" इति मंत्रवर्णात् ॥ ११६ ॥

भूर्भुवःस्वस्तरुस्तारः सपिता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ॥ ११७ ॥

भूर्भुवःस्वःसमाख्यानि त्रीणि व्याहृतिरूपाणि त्रयीसाराणि बह्वृचा आहुः तैर्होमादिना जगत्त्रयं तरते प्लवते चेति भूर्भुवःस्वस्तरुः । "अग्नौ न्यस्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति मनुवचनात् । अथवा भूर्भुव स्वस्तरुसमाख्यलोकत्रयसंसारवृक्षो भूर्भुवःस्वस्तरुः भूर्भुवःस्वःसमाख्यं लोकत्रयं वृक्षवद्व्याप्य तिष्ठतीति वा भूर्भुवःस्वस्तरुः । संसारसागरात्तारयंस्तारः । प्रणवो वा । सर्वस्य लोकस्य जनकः इति सपिता । पितामहस्य ब्रह्मणोऽपि पितेति प्रपितामहः । यज्ञात्मना यज्ञः । यज्ञानां पाता स्वामी वा यज्ञपतिः । "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" इति भगवद्वचनात् । यजमानात्मना तिष्ठन् यज्वा । यज्ञा अंगान्यस्येति यज्ञांगो वराहमूर्तिः । "वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः । अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः । अहोरात्रेक्षणो दिव्यो वेदान्तश्रुतिभूषणः । आज्यनासः स्रुवतुंडः सामघोषस्वनो महान् । धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्क्रियः । प्रायश्चित्तनखो घोरः पशुजानुर्महाभुजः । उद्गात्रंत्रो होमलिंगः फलबीजमहौषधिः । वाय्वंतरात्मा मंत्रस्फिक् विकृतः सोमशोणितः । वेदीस्कंधो हविर्गंधो हव्यकव्यास्थिवेगवान् । प्राग्वंशकायो द्युतिमान् नानादीक्षाभिरार्चितः । दक्षिणाहृदयो योगी महासत्रमयो महान् । उपाकर्मेष्टिरुचकः प्रवर्ग्यावर्तभूषणः । नानाछंदोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायो वै मेरुशृंग इवोच्छ्रितः" इति हरिवंशे । फलहेतुभूतान्यज्ञान् वाहयतीति यज्ञवाहनः ॥ ११७ ॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ ११८ ॥

यज्ञं बिभर्तीति पाति वा यज्ञभृत् । जगदादौ तदंते च यज्ञं करोतीति तति वा यज्ञकृत् । यज्ञानां तत्समाराधनात्मनां प्रधानं तत्समवायानां शे यज्ञी । यज्ञं भुंक्ते भुनक्तीति वा यज्ञभुक् । यज्ञः साधनं तत्प्राप्ताविति यज्ञसाध यज्ञस्यान्ते फलप्राप्तिं कुर्वन् यज्ञान्तकृत् । वैष्णव्यृक्शंसनेन पूर्णा पूर्णं कृत्वा यज्ञसमाप्तिं करोतीति वा यज्ञान्तकृत् । यज्ञानां गुह्यं ज्ञान इष्टफलाभिसंधिरहितो वा यज्ञः तदभेदोपचारात् ब्रह्म यज्ञगुह्यम् । अ अत्ति च भूतानीत्यन्नम् । अन्नमत्तीत्यन्नादः । सर्वं जगदन्नादिरूपेण षोमात्मकमेवेति दर्शयितुमेवकारः । चशब्दः सर्वात्मनामेकस्मिन्परस्मिन् समुच्चित्य वृत्तिं दर्शयितुम् ॥ ११८ ॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ॥ ११९ ॥

आत्मैव योनिरुपादानकारणं नान्यदित्यात्मयोनिः । निमित्तकारणमपि एवेति दर्शयितुं स्वयंजात इति, प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधादि स्थापितमुभयकारणत्वं हरेः । विशेषेण खननाद्वैखानः, धरणीं विशे खनित्वा पातालवासिनं हिरण्याक्षं वाराहं रूपमास्थाय जघानेति पु प्रसिद्धम् । सामानि गायतीति सामगायनः । देवक्याः सुतो देवकीनंदन " ज्योतींषि शुक्राणि च यानि लोके त्रयो लोका लोकपा त्रयी च । त्रयोऽग्नयश्चाहुतयश्च पंच सर्वे देवा देवकीपुत्र एव " महाभारते । स्रष्टा सर्वलोकस्य । क्षितेर्भूमेरीशः क्षितीशः दशरथात्मज कीर्तितः पूजितो ध्यातः स्मृतः पापराशिं नाशयन् पापनाशनः । " प पवासाद्यत्पापं पुरुषस्य प्रणश्यति । प्राणायामशतेनैव तत्पापं नश नृणाम् । प्राणायामसहस्रेण यत्पापं नश्यते नृणाम् । क्षणमात्रेण तत् हरेर्ध्यानात्प्रणश्यति " इति वृद्धशातातपवचनम् ॥ ११९ ॥

शंखभृन्नंदकी चक्री शार्ङ्गधन्वा गदाधरः । रथांगपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ सर्वप्रहरणायुध ओं नम इति ॥ १२० ॥

पांचजन्याख्यं भूताद्यहंकारात्मकं शंखं बिभ्रत् शंखभृत् । विद्याम नंदकाख्योऽसिरस्येति नंदकी । मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रमस्त्यस्तीति चक्री । संसारचक्रमस्याज्ञया परिवर्तत इति वा चक्री । इं

याद्यहंकारात्मकं शार्ङ्गं नाम धनुरस्यास्तीति शार्ङ्गधन्वा । 'धनुषश्च' इत्यनङ् समासान्तः प्रत्ययः । बुद्धितत्त्वात्मिकां कौमोदकीं नाम गदां वहन् गदाधरः । रथांगं चक्रमस्य पाणौ स्थितं स रथांगपाणिः । अत एवाशक्यक्षोभण इत्यक्षोभ्यः । केवलं एतावन्त्येवायुधान्यस्येति न नियम्यते अपि तु सर्वाण्येव प्रहरणायुधान्यस्येति सर्वप्रहरणायुधः । आयुधत्वेनाप्रसिद्धान्यपि करजादीन्यस्यायुधानि भवन्तीत्यन्ते सर्वप्रहरणायुध इति वचनं सत्यसंकल्पत्वेन सर्वेश्वरत्वं दर्शयितुम् । 'एष सर्वेश्वर' इति श्रुतेः । द्विर्वचनं समाप्तिं द्योतयति । ॐनम इति ओंकारश्चांते "ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तेन मांगलिकावुभौ" इति वचनात् । अंते नम इयुक्त्वा परिचरणं कृतवानिति "भूयिष्ठां ते नम उक्तिं विधेम" इति श्रुतेः । धन्यं तदेव लग्नं तन्नक्षत्रं तदेव पुण्यमहः । करणस्य च सा सिद्धिर्यत्र हरिः प्राङ्नमस्क्रियते इति च प्रागित्युपलक्षणम् । अंतेऽपि नमस्कारस्य शिष्टैराचरणात् । नमस्कारफलं प्रागेव दर्शितं "एकोपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय" "अतसीपुष्पसंकाशं पीतवाससमच्युतम् । ये नमस्यन्ति गोविंदं न तेषां विद्यते भयम् । लोकत्रयाधिपतिमप्रतिमप्रभावमीषत्प्रणम्य शिरसा प्रभविष्णुमीशम् । जन्मान्तरप्रलयकल्पसहस्रजातमाशु प्रशान्तिमुपयाति नरस्य पापम् ॥१२०॥

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ १२१ ॥

इति नाम्नां दशमं शतं विवृतम् ॥ इतीदमित्येतेन नामसहस्रमन्यूनातिरिक्तमिति दर्शयति । दिव्यानामप्राकृतानां नाम्नां सहस्रं प्रकीर्तितमिति वदता प्रकारान्तरेणापि संख्योपपत्तिर्दर्शिता ॥ १२१ ॥

यः इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः ॥ १२२ ॥

प्रक्रमे 'किं जपन्मुच्यते जंतुः' इति जपशब्दोपादानात् कीर्तयेदित्यनेनापि त्रिविधजपो लक्ष्यते उच्चोपांशुमानसलक्षणस्त्रिविधः । य इदं शृणुयादित्यादिः स्पष्टार्थः । परलोकप्राप्तस्यापि नहुषादावशुभप्राप्त्यभावं सूचयितुममुत्रेत्युक्तम् ॥ १२२ ॥

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ १२३ ॥

वेदान्तानामर्थं ब्रह्म गच्छत्यवगच्छतीति वेदान्तगः। किं जपन्मुच्यते जन्तुर्जन्मसंसारबंधनादिति वचनात् जपकर्मणा साक्षान्मुक्तिशंकायां कर्मणां साक्षान्मोक्षहेतुत्वं नास्ति ज्ञानेनैव मोक्ष इति दर्शयितुं वेदान्तगो ब्राह्मणः स्यादित्युक्तम्। कर्मणां त्वंतःकरणशुद्धिद्वारेण मोक्षहेतुत्वम्। "कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते। नित्यं ज्ञानं समासाद्य नरो बंधात्प्रमुच्यते। धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते ॥ योगिनः कर्म कुर्वन्ति संगं त्यक्त्वाऽऽत्मशुद्धये। कर्मणा बध्यते जंतुर्विद्ययैव विमुच्यते। तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान्" इति मानवं वचनम्। "तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते" इति। "ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः। यथाऽऽदर्शतले प्रख्ये पश्यत्यात्मानमात्मनि" इत्यादिस्मृतिभ्यश्च। "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" "येन केनचिद्यजतापि यज्ञेनापि दार्विहोमेनानुपहतमना एव भवति" इत्यादिस्मृतिभ्यः ज्ञानादेव मोक्षः। "ब्रह्मविदाप्नोति परं" "तरति शोकमात्मवित्" "ब्रह्मविद्ब्रह्मैव भवति" "ब्रह्मैव सन् ब्रह्माप्येति" "तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति" "विद्वान्न बिभेति कुतश्चन" "इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः" "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति" "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः" "वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृताः परिमुच्यन्ति सर्वे" इत्यादिश्रुतिभ्यः। शूद्रः सुखमवाप्नुयादिति श्रवणेनैव न तु जपयज्ञेन। "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः" इति श्रुतेः। 'श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः' इत्यादिना महाभारतादिश्रवणमनुज्ञायते। 'सुगतिमियाच्छ्रवणाच्च शूद्रयोनिरिति हरिवंशे। यच्च शूद्रः शृणुयात्स सुखमवाप्नुयादिति व्यवहितेन संबंधः त्रैवर्णिकान्कीर्तयेदित्यंतेन ॥१२३॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम् ॥ १२४ ॥

चक्षुरादीनामात्मयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वनुरूपतः प्रवृत्तिः कामः ; प्रजायत इति प्रजा संततिः ॥ १२४ ॥

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः । सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ १२५ ॥ यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च । अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥ १२६ ॥ न भयं क्वचिदाप्नोति वीर्यं तेजश्च विंदति । भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ॥ १२७ ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बंधनात् । भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ १२८ ॥ दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् । स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ १२९ ॥ वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः । सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥ १३० ॥ न वासुदेवभक्तानामशुभं विद्यते क्वचित् । जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ १३१ ॥

भक्तिमानित्यादिना भक्तिमतः शुचेः सततमुद्युक्तस्यैकाग्रचित्तस्य श्रद्धालोर्विशिष्टफलाधिकारिणः फलविशेषं दर्शयति ॥ १२५–१३१ ॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिःस्मृतिकीर्तिभिः ॥ १३२ ॥

श्रद्धा आस्तिक्यबुद्धिः । भक्तिर्भजनतात्पर्यम् । आत्मनः सुखं आत्मसुखं तेन च क्षान्त्यादिभिश्च युज्यते ॥ १३२ ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १३३ ॥

न च क्रोधो न मात्सर्यं न लोभो नाशुभा मतिरिति अकारानुबंधरहितेन नकारेण समस्तपदत्रयं, क्रोधादयो न भवन्ति मात्सर्यं च न भवतीत्यर्थः ॥१३३॥

द्यौः सचंद्रार्कनक्षत्रा खं दिशो भूर्महोदधिः । वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १३४ ॥ ससुरासुरगंधर्वं सयक्षोरगराक्षसम् । जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १३५ ॥ इंद्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः । वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥१३६॥

द्यौः सचंद्रार्कनक्षत्रेत्यादिना स्तुत्यस्य वासुदेवस्य माहात्म्यकथनेनोक्तानां फलानां प्राप्तिवचनं यथार्थकथनं नार्थवाद इति दर्शयति ॥ १३४–१३६ ॥

सर्वागमानामाचारः प्रथमं परिकल्प्यते । आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १३७ ॥ ऋषयः पितरो देवा महाभूतानि धातवः । जंगमाजंगमं चेदं जगन्नारायणोद्भवम् ॥ १३८ ॥ योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादिकर्म च । वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ १३९ ॥ एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः । त्रींल्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः ॥ १४० ॥

'सर्वागमानामाचारः प्रथमं परिकल्प्यते । आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ' इत्यनेनावान्तरवाक्येन सर्वधर्माणामाचारवत एवाधिकार इति दर्शयति ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ १४१ ॥
विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ १४२ ॥

॥ इति विष्णुनामसहस्रस्तोत्रम् ॥

इमं स्तवमित्यादि नामसहस्रशाखाज्ञेन सर्वज्ञेन भगवता कृष्णद्वैपायनेन साक्षान्नारायणेन कृतमिति सर्वैरर्थिभिः सादरं पठितव्यं सर्वफलसिद्धय इति दर्शयति विश्वेश्वरमित्यादिना । विश्वेश्वरोपासनादेव स्तोतारस्ते धन्याः कृतार्थाः कृतकृत्या इति । " आदरेण यथा स्तौति धनवन्तं धनेच्छया तथा चेद्विश्वकर्तारं को न मुच्येत बंधनात् " इति व्यासवचनम् । प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥

सहस्रनामसंबंधिव्याख्या सर्वसुखावहा । श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकराचार्यविरचितं विष्णोर्नामसहस्रभाष्यं समाप्तम् ॥

इत्येवं श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशंकरभगवद्विरचितग्रंथसंग्रहस्य पूर्वमुद्रितभिन्नपुस्तकावेक्षणयुतं संशोधनं आरंभादासमाप्ति मुद्रणकार्यपरीक्षणं प्रकाशनं च दशाब्दमितेन कालेन भागवतोपनामधारिणं रघुनाथसूनुं हरिशर्माणं महाराष्ट्रदेशस्य पश्चिमविभागांतर्गते पुण्यपत्तननाम्नि नगरे वसन्तं चित्पावनब्राह्मणं गार्ग्यगोत्रोत्पन्नं निमित्तीकृत्य श्रीमदाचार्याणामाशिषो वेदान्तवेद्यपरब्रह्मणः माया वा संपूर्णतामनयत् ।